N. A.

Shantanavitikasameta Durga Saptasati

शान्तनवीटीका समेता दुर्गासप्तशती॥

Sanskrit

Paper - Printed

1960 Sambat (115 years old)

117 Folio

13"×4.9"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नं. २९२

❁ अथ शान्तनवीटीकासमेता दुर्गासप्तशती प्रारभ्यते ❁

अत्र च सटीकांगषट्कं सभाष्यं देवीसूक्तं रात्रिसूक्तं च निवेशितमस्माभिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ ॐ नमश्चंडिकायै ॥ ब्रह्मा यस्यै हरिर्यस्यै रुद्रो यस्यै व्यधान्नमः ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १ ॥ अव्युत्पन्नमुखांधकूपपतिता गावो मुनेः खिद्यते ताः प्रोद्धर्तुमहो यतध्वमभितः स्वस्वार्थवत्सोत्सुकाः ॥ सूत्रैः पाणिनिसंभृतैरतितरामाकृष्यमाणाः पुनस्ता वः कामदुघा भवंत्यपि तमस्तोमद्विषः सत्विषः ॥ २ ॥ ऐंश्रींह्रींपदभावितं जगददः स्रष्टुं स्वयं रक्षितुं संहर्तुं समये क्षमामयमयीं ब्राह्मीं श्रियं चंडिकाम् ॥ आराध्यादिमशक्तिमार्त्तिदविनीं श्रीतोमरः शंतनु-मार्कंडेयपुराणसिद्धमहिमव्याख्यां तु विख्यापयते ॥ ३ ॥ मार्कंडेयपुराणोक्तं देवीमाहात्म्यमद्भुतम् ॥ अल्पाक्षरमनल्पार्थमपपाठपराङ्मुखम् ॥ ४ ॥ शुभंयुः शंतनुः शंयुः सत्कीर्त्तिस्तोमरान्वयः ॥ व्याकरोति पराकृत्य कुव्याख्यानपरंपराम् ॥ ५ ॥ ॐ नमश्चंडिकायै ॥ अवतीत्युपासकमवंति ब्रह्म वेति विगृह्य । अव रक्ष-णादौ । " अवतेष्टिलोपश्च " इति मन्प्रत्ययः । तस्य प्रत्ययस्यैव टिलोपः न प्रकृतेः । अन्यथा हि मडित्येव विदध्यात् । " ज्वरत्वर " इत्यादिना वकारस्योपधा-

ॐ नमश्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ १ ॥

याश्च ऊठौ द्वयोरूठोः सवर्णदीर्घत्वे " सार्वधातुकार्धधातुकयोः " इति गुणः । " कृन्मेजंतः " इत्यव्ययत्वम् । " ओमित्यनुमतौ प्रोक्तं प्रथमे वाप्युपक्रमे । ओमित्ये-काक्षरं ब्रह्म सर्वमंत्राधिदैवतम् ॥ गुर्वादिभजने दाने नमः स्यात्क्वाप्यनादरे । चतुर्थी स्यान्नमोयोगान्नमःस्वस्त्यादिसूत्रतः ॥ " चंडिकायै चंडते कुप्यते चंडा चंडी च । चंडैव चंडिका कोपना । " बह्वादिभ्यश्च " इति वा ङीप् । " केणः " इति ह्रस्वः । कुत्सिता शत्रुभिर्निंदितेति संज्ञायां कन् । अथवा ह्रस्वा दीर्घविलक्षणा-कारा सूक्ष्मरूपतया दुरधिगमत्वात्संज्ञायां कन् । अथवा चंड उग्रः तस्य स्त्री चंडी पूर्ववत्संज्ञायां कन् । अथवा चंडते चंडिका । ण्वुल् । " युवोरनाकौ " " प्रत्यय-स्थात्कात्पूर्वस्यात इदाप्यसुपः " इति इत्त्वम् । मार्कण्डेय उवाच ॥ " कडि मदे " मृगवत्कंडते योगात् मायाति मृकंडुः । " मृकंड्वादयश्च " इत्युः । मृगान् कड-यति मदयति वा मृकंडुः मृगस्येवास्य कंडूरिति वा । पृषोदरादित्वात्साधुः । " वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योग-

---

१ बाहुलकात्स्वार्थेऽणो रूपम् ।

१ दु. शां.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तदुच्यते पंचविधं निरुक्तम् ॥ " मृकंडोरपत्यं पुमान् मार्कंडेयः । " शुभ्रादिभ्यश्च " इत्यपत्ये ढक्प्रत्ययः । " किति च " इत्यादिवृद्धिः । " ढेलोपोऽकद्र्वाः " इत्युकारलोपः । ढस्य एयादेशः । उवाच ऊचिवान् स्वशिष्यायाष्टममनूत्पत्तिहेतुमुक्तवानिति यावत् । इह खलु ब्रह्मकल्पे चतुर्दश मनवः क्रमशः क्रमंते । तद्यथा । " स्वायंभुवो मनुः पूर्वं ततः स्वारोचिषो मनुः । औत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ षडेते मनवोऽतीता अथ वैवस्वतो मनुः । सावर्णाः पंच रौच्यश्च भौत्यश्चागामिनस्त्वमी ॥ " तत्र सवर्णायाः संबंधिनः सुताः पंचापि सावर्णाः । सावर्णयो मनवः कथ्यंते । ततश्च स्वायंभुवाद्याः षट् सप्तमो वैवस्वतः अष्टमः सावर्णिः नवमो दशम एकदशो द्वादशश्च सावर्णय एव । त्रयोदशो मनुः रौच्यः चतुर्दशस्तु मनुर्भौत्यः । इति चतुर्दश मनवः । तत्र अष्टमस्य मनोः सावर्णेरुत्पत्तिं स्वशिष्याय वेदयितुं प्रस्तौति मार्कंडेयो भगवान् । वृणोति व्रियते वर्ण्यते च वर्णनैं वर्णः । " वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु चाक्षरे । " वर्णेन स्तुत्या सह वर्त्तमाना सवर्णा । अथवा आत्मभर्त्रा सवित्रा समानो वर्णो यस्याः सा सवर्णा । सवर्णायाः अपत्यं पुमान् सावर्णिः । स्त्रीभ्यो ढकं बाधित्वा " बह्वादिभ्यश्च " इति इञ्प्रत्ययः । सावर्णाः पंचेति तु प्रयोगः संबन्धविवक्षया दाशरथो राम इतिवदर्दंतो ज्ञेयः । सूर्यस्य तनयः । स कतमो मनुरित्यपेक्षायामाह । यो मनुः कथ्यतेऽष्टम इति । यच्छब्देनोच्यते योऽर्थः तच्छब्दस्तस्य वाचकः । यः पुराणज्ञैर्वैवस्वतमनोः सप्तमादनंतरं सूर्यतनयः सावर्णिर्नाम मनुः कथ्यते सोऽष्टमो मनुर्भविष्यतीत्यर्थः । अष्टमत्वं विधेयम् । सावर्णिरष्टमो मनुरित्येवोक्ते सवर्णायाः प्रागुक्तसामान्यव्युत्पत्त्या तादृश्याः अन्यजोऽपि कश्चिन्मनुः स्यात् । अत उक्तं सूर्यतनय इति । सूर्यतनयोऽष्टमो मनुरित्येवोक्ते छायासुतोऽपि सूर्यतनयः शनैश्चरो मनुः स्यात् । अत उभयमुक्तं सावर्णिः सूर्यतनय इति । तस्य सावर्णेरष्टममनोरुत्पत्तिं विस्तराच्छब्दप्रपञ्चनात् गदतो मम मुखं वा संमुखं निशामय हे शिष्य दत्तावधानः सन् पश्येत्यर्थः । निशामय शृण्विति तु कुव्याख्यानम् । तथाहि । " शम उपशमे " दिवादिः । " शम लक्षआलोचने " चुरादिः । आभ्यां यथायोगं णिचि अत उपधाया वृद्धौ " शमोऽदर्शने " शमो णौ दर्शनादन्यत्रार्थे मित्संज्ञो भवति । अमंतत्वादेव मित्त्वसिद्धौ नियमार्थोऽयं योगः । मितां ह्रस्वः । शमयति व्याधिं निवर्त्तयाति । निशामयति श्लोकाञ्छृणोति । दर्शने तु मित्त्वाभावाद्ध्रस्वत्वाभावादत उपधाया वृद्धिरेव । निशामयति रूपं चक्षुषा रूपं पश्यतीत्यर्थः । " निःशर्करमिदं तीर्थं भारद्वाजं निशामय । " चक्षुषा पश्येत्यर्थः । तथा च दुर्घटः । निशामय तदुत्पत्तिमित्यत्र निशा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मनं चक्षुःसाधनं ज्ञानमिति यावत् ॥ १ ॥ स प्रसिद्धः सावर्णिः रवेस्तनयः महाभागः महामायानुभावेन यथा मन्वंतराधिपो बभूव तथा विस्तरतो वदिष्यामीत्यन्वयः । मात्यस्यां विश्वं माया । माकाभ्यामयच् । अथवा " मान पूजायाम् " चुरादिः । मानयितुमर्हा माया । पृषोदरादित्वान्नलोपः । अथवा । मा लक्ष्मीः मा इति अयः शुभावहो विधिर्यस्याः सा माया महती चासौ माया च महामाया तस्याः परमशक्तेरनुभावः प्रभावः सामर्थ्यं महामायानुभावस्तेन । अथवा । महती चाद्या माया यस्याः सा महामाया तस्यामनुभावः मतिनिश्चय अबाध्याध्यवसायः महामायानुभावस्तेन । अथवा । अः विष्णुस्तस्य माया महती चासौ अमाया च महामाया तस्याः अनुभावः तेन । " अनुभावः प्रभावे च सतां च मतिनिश्चये । " अथवा । " अय गतौ " । अययति अर्पयतीति णिजंतात्पचाद्यचि स्त्रियां टापि अया । आसमंतादभिव्याप्तां मां लक्ष्मीमुपासकाय अययति अर्पयति वा शक्तिर्भवति सा महामाया तस्याः अनु पश्चादबाध्याध्यवसायादनंतरं भावः परमतयानुसंधानमनुभावः । " तं भावं भावयेद्योगी " इति स्मरणात् । " भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । " तेन । " पश्चात्सादृश्ययोरनु " । मन्वंतराधिपः इह प्रकरण-

महामायानुभावेन यथा मन्वंतराधिपः ॥ स बभूव महाभागः सावर्णिस्तनयो रवेः ॥ २ ॥

तः सप्तममनुजीवितकालात् परभूतो नवममनूदयात्पूर्वो यः कालः स मन्वंतरशब्देन विवक्षितः ततश्चांतरशब्दो मध्ये वर्त्तते । मनोः सप्तमनवमयोरंतरे मध्यकाले ब्रह्मणा अधिकृतः रक्षकः प्रजानां पतिरधिको मन्वंतराधिपः । " अंतरमवकाशावधिपरिधानांतर्द्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽतरात्मनि च ॥ " महाभागः । " भज सेवायाम् " । भावे घञ् । " चजोः कुघिण्ण्यतोः" महान् भागो भक्तिर्यस्य सः । अथवा । " भासृ दीप्तौ " कर्त्तरि क्विप् । भासते भाः भासं धर्मं वा गच्छति प्राप्नोतीति भागः । " गमेर्डोऽन्यत्रापि दृश्यते " इति कर्त्तरि डः । महांश्चासौ भागश्चेति महाभागः। अथवा भासं परदेवतां गायति इति भागो मन्त्रः । " आतोऽनुपसर्गे कः " महान् भागो मंत्रो यस्य स महाभागः । अथवा । भगस्यैश्वर्यादेरिदं भागं भवितव्यतालक्षणं हेतु वस्तु महद्भाग्यं यस्य स महाभागः । " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतिः ॥ भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु । " तनोति कुलं तनयः । रूयते स्तू-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यते रविः तस्य ॥ २ ॥ अष्टमो मनुः कथ्यत इति भाग्यः प्रस्तुतस्तस्य सावर्णेः प्राग्जननिदानतामाहिमचारित्राणि वर्णयति मार्कंडेयोऽनेन श्लोकेन । पूर्वं प्रथमस्वायंभुवमन्वंतरकालमपेक्ष्यं द्वितीयमन्वंतरलक्षणे स्वारोचिषेंऽतरे स्वारोचिषमन्वंतरकाले पुराकल्पे चैत्रवंशसमुद्भवः सुरथो नाम प्रसिद्धः समस्ते क्षितिमंडले राजाऽभूत् अजनिष्ट (अवर्तत) अवृतेत्यन्वयः । स्वस्येव आत्मन इव ब्रह्मण इव रोचिः प्रभा यस्य सः स्वरोचिः मनुः । अथवा । अः विष्णुः सुष्ठु अस्येव विष्णोरिव रोचिर्यस्य सः स्वरोचिः मनुः । स्वरोचिष इदं स्वारोचिषं तस्मिन् स्वारोचिषे । आगमशासनानित्यत्वादैजभावः । " रोचिः शोचिरुभे क्लीबे प्रकाशो द्योत आतपः । " अंतमवसानं राति गृह्णात्यंतरम् । तस्मिन् कालविशेषे पूर्वं कालम् । अपेक्षणक्रियापेक्षा द्वितीया । " चिती संज्ञाने " । " सर्वधातुभ्यष्ट्रन् " । चेतति जानाति धर्माधर्मप्रवृत्त्यप्रवृत्तीः कर्त्तुमिति चित्रः कश्चिद्राजा तस्यापत्यं पुमान् चैत्रः । " शिवादिभ्योऽण् " । तस्य वंशः संतानः । तस्मात्सम्यगुद्भवति इति चैत्रवंशसमुद्भवः

स्वारोचिषेंऽतरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥ ३ ॥

तस्य पालयतः सम्यक्प्रजाः पुत्रानिवौरसान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥ ४ ॥

अथवा " चिञ् चयने " । " अमिचिमिदिशासिभ्यः क्त्रः " । चीयते चित्रमद्भुतं कर्म तस्यायं चैत्रः । तस्य राज्ञो वंशस्तस्मात्समुद्भवः । विद्यया जन्मना वा प्राणिनामेकलक्षणः संतानो वंश इत्युच्यते । रमंते यस्मिन्रथः शोभनो रथो यस्य सुरथः । " नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने । " राजते इति राजा । अभूत् " भू सत्तायाम् " लुङ् । क्षितेर्भूमेर्मंडलं चक्रवालं तस्मिन् ॥ ३ ॥ तदा तस्मिन् स्वारोचिषमन्वंतरे काले औरसान् उरसोत्पादितान् उरसा निर्मितान् " उरसो यच्च " पुत्रानिव सम्यगनवद्यं यथा स्यात्तथा प्रजाः लोकान् पालयतः दुःखेभ्यो रक्षतस्तस्य राज्ञः कोलाविध्वंसिनो भूपाः शत्रवः शातयितारो बभूवुरित्यन्वयः । को ब्रह्मा अः विष्णुः उः महेश्वरः तान् ब्रह्मविष्णुमहेश्वरान् काः लांति अर्चयितुं गृह्णंतीति कोला ब्राह्मणादयः तानासमंताद्विध्वंसयंतीति कोलाविध्वंसिनः रक्षोयोनयः । अथवा । कोलाः शूकरास्तान् विध्वंसयंतीति कोलाविध्वंसिनः यवनाः । अथवा । कोलान् शूकरान् विध्यंति ताडयंति कोलाविधः । " नहिवृतिवृषिव्याधि "

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति दीर्घः । कोलाविधः क्षत्रियादयस्तान् ध्वंसयंतीति कोलाविध्वंसिनो यवनाः । ननु च कोलान् शूकरान् अवंति रक्षंतीति कोलाविनो यवनास्तान् ध्वंसयतीति कोलाविध्वंसी तस्य कोलाविध्वंसिनः इति सुरथस्यापि विशेषणमेतत्स्यात् । अस्तु यदीत्थं व्युत्पाद्येत । उत्तरश्लोके तु कोलाविध्वंसिभिरित्येतद्यवनविशेषणतया व्युत्पादयिष्यामः । उरसा निर्मितः । " उरसो यच्च " । " औरसो धर्मपत्नीजः " इति स्मृतिः । पुत् अव्ययं नरकवाचि पितरं पुन्नरकात् त्रायते पुत्रः । अथवा " पूञ् पवने " । पुनाति पुत्रः । " पुवो ह्रस्वश्च " इति पुत्रः । " पुत्रः स्यादात्मसंभवः । पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः । ततः पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ " इति स्मृतिः ॥४॥ तस्य अतितरां प्रकृष्टं बलं हस्त्यश्वरथपादातसमृद्धं वलं सैन्यं येषां शत्रूणां ते अतिप्रबलास्तान् दंडयतीत्यतिप्रवलदंडी तस्य सुरथस्य तैः कोलाविध्वंसिभिर्यवनैर्भूपैः सह युद्धमभवत् । तस्मिन् युद्धे सुरथो राजा न्यूनैरल्पबलैरपि तैः कोलाविध्वंसिभिर्यवनभूपैर्जितः अभिभूतः इत्यन्वयः । इह जित इति नायं " जि जये " इत्यस्य प्रयोगः । कस्य तर्हि "जि अभिभवे" इत्यस्य । तदुक्तम् । " जयिर्जयाभिभवयोराद्यर्थेऽसावकर्मकः । उत्कर्षप्राप्तिराद्योऽर्थो द्वि-

तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥ ५ ॥

ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ॥ आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥ ६ ॥

तीयेऽर्थे सकर्मकः ॥ " इति । कोला नाम नगरी तां राजधानीं विध्वंसयंतीति कोलाविध्वंसिनः । " सुरथो नाम राजाभूत्समस्ते क्षितिमंडले । " इति सुरथस्य यत्सार्वभौमत्वमुक्तं प्राक् तदिदानीं न । दैवघटनाच्छत्रुभिरल्पैरथाक्रांतः सागरांताखिलावनिवलयत्वात्तस्येति भावः ॥ ५ ॥ तत एवाह । स्वकीयपुरजनपदमात्राधिप एव आसीन्नतु सार्वभौम इत्यन्वयः । स यद्यपि शत्रुभिराक्रांतस्तथापि तदाक्रांतिजनितोद्वेगोपगतवनवासिमुनिवरोपदिष्टमहामायैकसमाराधनलब्धवराबाप्तव्यसाम्राज्यसंप्राप्तव्याष्टममनुत्वपदलक्षणभवितव्यतावाप्तिपात्रतया महाभाग इति विशेषणमर्थवदेव । यदुक्तम् । " संभवे व्यभिचारे च स्याद्विशेषणमर्थवत् । " इति । दिश्यते देशः स्थानमात्रं ननु च नीवृज्जनपदः देशस्तु विषयः स्थानमात्रं तत्कथं देशग्रहणेनेह जनपदो लभ्यते । तदभ्यधादमरः । " नीवृज्जनपदो देशविषयौ तूपवर्त्तनम् । " इति । " त्वंताथादि न पूर्वभाक् " इति च यत्पर्यभाषिष्ट नैष दोषः । नीवृदादीन् पंचैकार्थानाहुरपरे त्वित्याश्रयणात् । आत्मात्मीयज्ञातिधनवाची स्वशब्दः ॥ ६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रापि तन्मात्रे सपत्नापहृतभूचक्रे गर्हिते स्वपुरे सतो निवसतो दुर्बलस्य शत्रुभिर्गृहीतभूचक्रस्य प्रभुमंत्रोत्साहशक्तिशून्यस्य सुरथस्य कोशो बलं च बलिभिर्बलवद्भि-र्दुष्टैरुल्लंघितमर्यादैर्दुरात्माभिर्दुष्टाशयैः राज्यं गृहीतं कृतनिश्चयैरमात्यैर्मंत्रिभिरपहृतमात्मसात्कृतमित्यन्वयः । अमा सह समीपे भवा अमात्याः । " स्थौल्यसामर्थ्यसै-न्येषु बलं ना काकसीरिणोः । " कोशः स्वर्णादिलोहाष्टकसंग्रहः । " सुवर्णं रजतं ताम्रं रीतिः कांस्यं तथा त्रपु । सीसं कालायसं चैव ह्यष्ट लोहानि चक्षते ॥ " अप-हृतः कोशः अपहृतं च बलमिति विगृह्य " नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् " इति नपुंसकशेषः एकवद्भावश्च । अपिशब्दो गर्हायाम् । दुरीषदर्थेकुत्सनेवैवर्ण्या-संभवलाभेषु । दुष्टैरिति । " दुष वैकृत्ये " । क्तः कर्त्तरि । वैकृत्यं रूपभंगः ॥ ७ ॥ ततः अमात्यैरपहृतकोशबलत्वाद्धृतस्वाम्यः अपहृतस्वामित्वः स सुरथो भूपतिः एकाकी असहायः केवलः मृगयाव्याजेन हयमारुह्य गहनं निरंतरव्याप्तलतादिपिहितोदरं वनं काननं जगाम गतवानित्यन्वयः । मृग्यंतेऽन्वेष्यंते प्राणिनो मृगादयोऽ-

अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः॥७॥ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥
एकाकी हयमारुह्य जगाम गहनं वनम् ॥८॥ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥ ९ ॥

स्यां मृगया पापर्द्धिस्तस्याः व्याजेनाखेटकवृत्तिनिमेषेण मुनिवनोपगमनमेवात्र मुख्यं कार्यं नतु मृगयाचरणम् । मुख्यकार्यस्वरूपाच्छादनं व्याजः । स्वामिन ईश्वरस्य भावः स्वाम्यं हृतं स्वाम्यं यस्य स हृतस्वाम्यः । एक एव एकाकी । "एकादाकिनिच्चासहाये "। एकत्वे तु एककः। " कलिलं गहनं समे" ॥८॥ द्विजेति संबुद्ध्यंतं वर्य इति तु राजविशेषणम् । मार्कंडेयः स्वशिष्यं संबोधयति । हे द्विज, इतः सुरथचरित्रकथायाः श्रवणप्रवणो भवेति । स वर्यः वरार्हः सुरथस्तत्र तस्मिन् वने सुमेधसो नाम मुनेः शिष्योपशोभितं प्रशांतश्वापदाकीर्णमाश्रममद्राक्षीत् ददर्शेत्यन्वयः । मुनेरिति सुमेधसो विशेषणम् । विधेयत्वेन आश्रम्यंति तपस्यंति अत्रेत्याश्रमः। द्वाभ्यां मातृ- ॥ ३ ॥
मौंजीभ्यां जायते द्विजः । हे द्विज, सुष्ठुशोभना मेधा यस्य स सुमेधाः । " नित्यमसिच्प्रजामेधयोः " इति असिच्समासांतः । तस्य मुनेः परमसामर्थ्यात् प्रशांताः । संत्यक्तहिंस्रताः ये श्वापदाः व्याघ्रादयस्तैराकीर्णं व्याप्तम् । शुन इव पदानि येषां ते श्वापदाः । " शुनो दंतदंष्ट्राकर्णकुदवराहपदपुच्छेषु " इति दीर्घत्वम् । वरं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुना राज्यावाप्त्यष्टममनुत्वावाप्तिलक्षणमर्हतीति वर्यः सुरथः । " दंडादिभ्यो यः " । अथवा " छंदसि च " इति यत् । छंदोवत्पुराणानि भवंति । " तपोभिरिष्यते यस्तु देवेभ्यः स वरोत्तमः । देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिये ॥ " शिष्यैर्वेदानधीयद्भिरुपशोभितं शोभान्वितं संजातशोभम् ॥ ९ ॥ तेन सुमेधसा मुनिना सत्कृतः आद्दतः पूजितः स सुरथः तस्मिन् मुनिवराश्रमे इतश्चेतश्च विचरन् परिभ्रमन् कंचित्कालं तस्थौ स्थितश्चेत्यन्वयः । कालमिति कालाध्वनोरत्यंतसंयोगे द्वितीया । मुनिषु वरः श्रेष्ठः सुमेधाः मुनिस्तस्याश्रमे । अथवा । स सुरथस्त्वस्मिन् मुनिवराश्रमे तेन मुनिना इतः प्राप्तः अभ्यागतः सत्कृतश्च सन् कंचित्कालं चेतश्च स्वांतं च विचरन् तपः क्षमं स्यान्न वेति विचिंतयन् तस्थावित्यपरोऽन्वयः ॥ १० ॥ तदा मुनिसंदर्शनकाले तत्राश्रमे ममत्वाकृष्टमानसः स सुरथः स्वचेतसाचिंतयत् कुटुंबं संस्मृतवानित्यन्वयः । ममेति विभक्तिप्रतिरूपकमव्ययम् । मामिति भावो ममत्वं ममता ममत्वमिति मदीयताबुद्धिः तथा आकृष्टं वशीकृतं मानसं स्वांतं चेतो यस्य स

तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥१०॥ सोऽचिंतयत्तदा तत्र ममत्वाकृष्टमा-
नसः ॥ मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ ११ ॥ न जाने स प्रधानो मे शूरहस्ती
सदामदः ॥ मम वैरिवशंयातः कान्भोगानुपलप्स्यते ॥ १२ ॥

तथोक्तः । किमचिंतयदित्यपेक्षायामाह । पूर्वं मत्पूर्वैर्मत्पित्रादिभिः धर्मतः पालितं मत्कुलागतं पुरं संप्रति विधिवशेन मया हीनं त्यक्तं तत् हि निश्चयेन असद्वृत्तैरसच्चरितैस्तैर्मद्भृत्यैर्मदमात्यप्रभृतिभिः पुंभिर्धर्मतः धर्ममाश्रित्य दुःखेभ्यः पाल्यते किं न वेति सोऽचिंतयत् सुरथ इत्यन्वयः । " सान्ववायागतं वस्तु धर्मार्थयोपसाधनम् । सान्ववायोद्भवैः सम्यक्पालनीयं हि धर्मतः ॥ " इति यमगीतातो युक्तैषा राज्ञः स्वपुरानुस्मृतिः । मत्पूर्वैः मम मे वा पूर्वाः मत्पूर्वास्तैः । पूर्वं कालम् । भरणीया भृत्याः । भृञो संज्ञायां क्यप् । " हिर्हेतावयवधारणे । वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले । धर्माः पुण्ययमन्यायस्वभावाचारसोमपाः ॥ " उपमायां विकल्पे वा ॥ ११ ॥ किं नु भविष्यतीति तन्न जाने इति सोऽचिंतयदित्यन्वयः । सुखेन अकृच्छ्रेण प्रकर्षेण धीयते धार्यते पोष्यत च सुप्रधानः । " आतो युगिति, ईषद्दुःसुषु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृच्छ्राकृच्छ्रार्थेषु, उपपदेषु दधातेर्यक्, युवोरनाकौ ”। सप्रधान इत्यपपाठः। स इति च्छेदेऽपि प्रधान इति न स्यात्। प्रदधाति प्रधानमिति नपुंसकत्वात्। यदभ्यधुः परमात्मधीप्रकृतिमहामात्रमुख्येषु “ प्रधानमजहल्लिंगमद्वयोः ” इति प्रधानेनामात्येन सह वर्त्तते सप्रधान इति चेन्न। “ मम वैरिवंशं यातः ” इत्यनेन पौनरुक्तिप्रसंगात्। प्रसह्याक्रांतराज्यत्वादमात्या एव हि वैरिण इत्यलं विस्तरेण। सदा सर्वदा मदो यस्येति सदामदः। यद्वा। स इति पदात्स प्रसिद्धो मे हस्तीति संबंधनीयम्। दामानि द्यति खंडयति दामदः। “ आतोऽनुपसर्गे कः। न पुंसि दाम संदानम् ”। भुज्यं ते भोगः। “ पालनेऽभ्यवहारे च निर्वेशे च पणे स्त्रियाम्। भोगः सुखे भुजंगानां शरीरफणयोरपि ॥ ” जाने इति। “ ज्ञाजनोर्जा, शिति, अनुपसर्गात् ज्ञः ” इत्यात्मनेपदम् ॥ १२ ॥ ये नित्यं संततमनवरतं शश्वत् प्रसादधनभोजनैः प्रसादैरुचितदानैर्धनैर्वेतनरूपैर्भोजनैः मम अनुगता अनुजीविनः ते अद्य इदानीं मद्विहीना अनाथाः संतः अन्यमहीभृतां मदितरमहीभृतां राज्ञामनुवृत्तिं

ये ममानुगता नित्यं प्रसादधनभोजनैः॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वंत्यन्यमहीभृताम् ॥१३॥ असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ॥ संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति॥१४॥एतच्चान्यच्च सततं चिंतयामास पार्थिवः॥तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः॥१५॥

सेवां ध्रुवं निश्चितं कुर्वंति निश्चितामनुवृत्तिं विदधति इति सोऽचिंतयदित्यन्वयः। “ ध्रुवो भभेदे क्लीवं तु निश्चिते शाश्वते त्रिषु। ” ॥१३॥ अतिदुःखेन मत्पूर्वैर्मयात्र संचितः उपार्जितः स सुवर्णादिद्रव्याणां कोशः राशिः असम्यग्व्ययशीलैरसम्यग्विफलः व्ययः द्रव्योत्सर्गः शीलं स्वभावो येषां ते तथोक्तास्तैः सततं व्ययं वित्तोत्सर्गं कुर्वद्भिः तैरमात्यप्रभृतिभिः करणैः क्षयं नाशं गमिष्यति प्राप्स्यतीति सोऽचिंतयदित्यन्वयः। आहुश्च। “ आगमे च व्ययाभावे व्यये चानागमे क्रमात्। कोशस्य वृद्धिनाशे स्तस्तत्साम्ये पूर्वरूपता ॥ ” इति। सततं संततम्। “ लुं पदेऽवश्यमः कृत्ये तुं काममनसोरपि। समो वा हिततयोर्मांसस्य पचि युड्घञोः ॥ ” अत्यर्थं दुःखं यस्मिंस्तदतिदुःखं तेन कर्मणा। “ शीलं स्वभावे सद्वृत्ते। व्यय वित्तसमुत्सर्गे ” चुरादावदंतः। व्ययनं व्ययः। मदभ्यधुः। “ वित्त त्यागे, व्ययतिर्व्ययने गतौ ” इति ॥१४॥ स पार्थिवः सुरथ एतच्च पूर्वोक्तमतोऽन्यच्च स ततं विस्तारितमंतःपुरगतं पुरांतरगतं देशांतरगतं च स्वकीयं वस्तु सर्वं चिंतयामासेत्यन्वयः। ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सततमित्यत्र स इति च्छेदः । ततं विस्तारितमित्यर्थः । एकपदत्वे तु सततं संततमिति हि व्याख्यानं स्यात् । ततश्च सुरथश्चिंतासंततिकाक्रांतस्वांततया वक्ष्यमाणप्राप्तव्याष्टममनुत्वपदावास्त्यै चिंतानुकूलतया समाधानविधानविधुरः प्रसज्येत । ननु च सोऽचिंतयदिति क्रियापदे कृते पुनश्चिंतयामासेति वाचो युक्तिर्न युक्तिमतीति चेत् । तन्न । उक्तं चानुक्तं च ममत्वाकृष्टमानसतया पुनः पुनश्चिंतितमेवाचिंतितमिव अचिंतयद्राजेति युक्तिमत्येव तद्वाचो युक्तिरिति । पृथिव्या ईश्वरः पृथिव्यां विदितः ज्ञातश्च पार्थिवः । तस्येश्वरस्तत्र विदित इति चेत्यञ् । स सुरथस्तत्र तपोवने तथा तथा तत्र स्वकीयं वस्तु विचिंतयन् सन् विप्राश्रमाभ्याशे विप्रस्य सुमेधसो मुनेराश्रमस्याभ्याशे निकटे देशे एकं कंचिद्वैश्यं तृतीयं द्वितीयं ददर्श दृष्टवानित्यन्वयः । तृतीयमात्ममुन्यपेक्षया द्वितीयमात्मापेक्षयेत्यर्थः । विशोऽपत्यं जातिर्वैश्यः । गर्गादित्वाद्यञ् । ददर्श होति क्वचित् पाठः । स इति तु प्रकरणतो लभ्यते । " तु हि च स्म ह वै पादपूरणे । अशू व्याप्तौ " । तालव्यांतः कर्मणि

स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ॥ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ १६ ॥
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥ १७ ॥

घञ् । अभ्यश्यते व्याप्यते अभ्याशः। एकं केवलमेकाकिनम् ॥ १५ ॥ तेन सुरथेन स वैश्यः पृष्टः किं पृष्ट इत्याह । भो अहो त्वं कः कोऽसि जातितः किंच अत्र मुन्याश्रमे तवागमने च को हेतुः किं कारणमित्यन्वयः । " अव्ययं एष भो शब्द " इति भाष्यम् । अथ चैतद्भवच्छब्दस्य संबुद्धौ रूपं रुत्वोत्वयत्वलोपेषु (?)। सामान्याल्लेशतो ज्ञानमपि वस्तु विशेषतः जिज्ञासमानो जिज्ञास्यं पृच्छन्नेवान्यदीप्सितम् । राजा वैश्यं पुनः पृच्छति । भो अहो त्वं कस्माद्धेतोः सशोक इव लक्ष्यसे सखेद इव प्रतीयसे । कस्माच्च हेतोः त्वं दुर्मना इव लक्ष्यसे विमनस्क इव वीक्ष्यसे इत्यन्वयः । " मन्युशोकौ तु शुक् स्त्रियाम् । मन्युर्दैन्ये क्रतौ क्रुधि " । शोकेन सहितः सशोकः दुर्मना विमनाः स्यात् । दुःस्थं मनो यस्य स दुर्मनाः इव साम्ये शारदाभ्रमिव पेलवमायुरितिवत् ॥ १६ ॥ इतीत्थं प्रणयोदितं प्रणयेन प्रेम्णा उदितं कथितं । तस्य भूपतेः सुरथस्य वचः आकर्ण्य श्रुत्वा स वैश्यस्तं नृपं सुरथमुद्दिश्य प्रश्रयावनतः प्रश्रयेण विनयेनावनतो नम्रः सन् प्रत्युवाचेत्यन्वयः । सुर-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

थक्तृतप्रश्नानां प्रत्युत्तरं वक्तुं वाक्यमग्रहीदिति भावः । " विश्रंभयाञ्चाप्रेमाणः प्रणयेन समार्थकाः । " ॥ १७ ॥ धनिनां कुले उत्पन्नोऽहं समाधिर्नाम विख्यातः जात्या वैश्योऽस्मीत्यन्वयः । अनेन कस्त्वं भो इति प्रश्नस्योत्तरमुक्तम् । " इभ्य आढ्यो धनी । कुलं गृहेऽपि वंशेऽपि " । धनेषु लोभात् गार्ध्यात् असाधुभिरसज्जनैः पुत्रैश्च दारैश्च पुत्राणां च दारैर्निरस्तश्च निराकृतोऽस्मीत्यन्वयः । एतेन सशोक इव कस्मात्त्वमिति प्रश्नस्योत्तरमुक्तम् ॥ १८ ॥ विहीनः स्वजनैः बांधवैश्च रहितोऽस्मि इतोऽपि सशोकोऽस्मीत्यन्वयः । दारैः पुत्रैरादायि मे धनं मदीयैर्दारैः पुत्रैश्च मे धनमादायि गृहीतमित्यन्वयः । अनेन दुर्मना इव लक्ष्यसे कस्मादिति प्रश्नस्योत्तरमुक्तम् । मदीयैराप्तैर्बंधुभिः पुत्रमित्रकलत्रादिभिर्हृतधनो निरस्तश्चाहं दुःखी उद्विग्नमनाः सन् वनमभ्यागतोऽस्मीत्यन्वयः । अनेन हेतुश्चागमनेऽत्र क इति प्रश्नस्योत्तरमुक्तम् ॥ १९ ॥ तथाविधः सोऽहमत्र वने संस्थितः सन् पुत्राणां च स्वजनानां च कुशलाकुशलात्मिकां कुशलस्वरूपामकुशलस्वरूपां च द्विविधरूपां प्रवृत्तिं वार्त्तां न वेद्मि न

वैश्य उवाच ॥ समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥१८॥ विहीनः स्वजनैर्दारैः पुत्रैरादाय मे धनम् ॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥१९॥ सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ॥ प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥२०॥ किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् ॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥२१

जानामीत्यन्वयः । संगतोऽत्रत्यैः स्थितः संस्थितः । " संस्थाधारे स्थितौ मृतौ " इति वा । दारशब्दः पुंस्येव भूम्न्येव कलत्रवाची । कुशलं चाकुशलं चात्मा स्वभावो यस्याः सा तथोक्ता । " शेषाद्विभाषा " इति कप् समासांतः इत्त्वं च ॥ २० ॥ किं नु इति च्छेदः । " किम् पृच्छायां जुगुप्सने । नु पृच्छायां विकल्पे च " तत्र किमित्यनव्ययं च । संप्रत्येव सांप्रतं " प्रज्ञादिभ्यश्च " इत्यण् । इह क्षेमत्वाश्रयो विकल्पस्तुशब्देन सूच्यते । सांप्रतमिदानीं तेषां पुत्रादीनां गृहे किमपि क्षेमं नु वर्तते । अथवा सांप्रतमिदानीं तेषां पुत्रादीनां गृहे किमपि अक्षेमं नु वर्तते इति तदुभयं न वेद्मीत्यन्वयः । क्षेमं वाक्षेमं वा न वेद्मीत्यर्थः । " कुशलं क्षेममस्त्रियाम् " । क्षिणोति हिनस्ति क्लेशान्क्षेमम् । ते सुताः सांप्रतं किं सद्वृत्ता नु अथवा ते सुताः सांप्रतं किं दुर्वृत्ता नु इति तदुभयं कथं मे ज्ञेयं स्यादित्यन्वयः । ते सुताः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सांप्रतं सद्वृत्ता वा दुर्वृत्ता वा कथं मया ज्ञेया इति भावः । तत्साधु वृत्तं चरित्रं येषां ते सद्वृत्ताः । अथवा सतामिव वृत्तं चरित्रं येषां ते सद्वृत्ताः । दुष्टमसाधु वृत्तं चरित्रं येषां ते दुर्वृत्ताः अथवा दुष्टानामसज्जनानामिव वृत्तं चरित्रं येषां ते दुर्वृत्ताः ॥ २१ ॥ " इति दुर्दैवतो वैश्याद्दुद्वृत्पुत्रादिबन्धुतः । दुःखतः कथितं वाक्यमाकर्ण्योचे पुनर्नृपः ॥ " हे समाधे हे वैश्य, भवान् धनैः कारणैः लुब्धैः गृध्नुभिर्यैः पुत्रदारादिभिर्दुर्वृत्तैर्बंधुभिर्निरस्तोऽभूत् तेषु भवतः मानसं कर्तृ स्नेहं किमनुबध्नाति किमर्थं करोतीत्यन्वयः । तादृशेषु स्नेहनिबंधनं जुगुप्सितं गर्हितं त्यजनीयं भवत इति भावः । यदाहुः । " भवतः स्निह्यति स्निह्ये द्रुह्येच द्रुह्यते पुनः । सौजन्यं सुजने कुर्याद्दौर्जन्यमपि दुर्जने ॥ " इति । भवांल्लुब्धैरित्यत्र " तोर्लि " इति नकारस्य परसवर्णोऽनुनासिको लकारः ॥ २२ ॥ यन्मद्गतमित्यपि क्वचित्पाठः सभ्यः । ममेत्येकवचनपाठौचित्यादस्मद्गतमिति पाठे राजाग्रे वैशस्य प्रश्रयावनतस्य सतः प्रागल्भ्यनौचित्यप्रसंगाच्च । हे नृप, भवान् यन्मद्गतं वचः यथा प्राह ब्रवीति एतद्वचः एवमिदमि-

राजोवाच ॥ यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥ २२ ॥

वैश्य उवाच ॥ एवमेतद्यथा प्राह भवानस्मद्गतं वचः ॥ किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ २३ ॥

यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥ पतिस्वजनहार्दं च हार्दितेष्वेव मे मनः ॥ २४ ॥

त्थमेव । अथाप्यहं किं करोमि मे मनः कर्तृ निष्ठुरतां परुषतां न बध्नाति नाचरति नाश्रयति इत्यन्वयः । इवेत्थमर्थयोरेवमस्मद्गतमस्मद्गतम् । अस्मत्पृथक् । मद्गतं मद्गतं मत्पृथक् । अथवा अस्माभिर्गतं ज्ञातमस्मद्गतम् । मया गतं ज्ञातं मद्गतम् । गत्यर्था धातवो ज्ञानार्था अपि भवंति॥२३॥ हे राजन्, पितृस्नेहं संत्यज्य धनलुब्धैः यैर्मत्पुत्रैर्निराकृतोऽस्मि तेष्वेव पुनर्मे मनः हार्दि वर्त्तते । किंच । पतिस्वजनहार्दं भर्तृलक्षणबंधुस्नेहं संत्यज्य धनलुब्धैर्यैर्मेद्दारैर्निराकृतोऽस्मि तेष्वेव पुनर्मे मनः हार्दि वर्त्तते करोमि किमित्यन्वयः । हृदयस्य स्वांतस्य कर्म हार्दं प्रेम । स्नेह इति यावत् । युवादित्वादण् । " हृदयस्य हृल्लेखयदण्लासेषु " इति हृद्भावः । हार्दमस्त्यस्य तत् हार्दि मे मनः हृदयनिविष्टस्नेहोपेतं स्नेहनिबद्धमिति यावत् । पतिरेव स्वभर्तैव स्वजनो बंधुस्तस्मिन् हार्दं स्नेहः पतिस्वजनहार्दं तत् । " लुब्धोऽभिलाषुकस्तृष्णक् " ॥ २४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे महामते राजन्, विगुणेष्वपि बंधुषु प्रेमप्रवणं मे चित्तमिति जानन्नपि नाभिजानामि किमेतदित्यन्वयः । अथवा हे महामते राजन्, यद्यस्मात्कारणात् वंधुषु असत्स्वप्यस्ति मे चित्तं प्रेमप्रवणमिति जानन्नप्येतद्वारयितुं नाभिजानामि करोमि किमित्यन्वयः । अथवा हे राजन्, बन्धुषु विगुणेषु सत्स्वपि यच्चित्तं प्रेमप्रवणं स्यात् । तत्किं नाम कुत्सितं गर्हितमिति जानन्नपि नाभिजानामीत्यन्वयः । महती मतिर्यस्य सः महामतिः । हे महामते, प्रवणं प्रह्वं नम्रमनुकूलम् । “ प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे । ” अगुणेषु विगुणेषु अस्नेहेषु निस्नेहेषु ॥ २५ ॥ करणं कृतिः कृतं नपुंसके भावे क्तः । अथवा करणं कृतिः कृत्तस्यै संपदादित्वाद्भावे स्त्रियां क्विप् । निर्गलति श्वासो यस्मात् स निःश्वासः शोकः । दुःस्थं मनो यस्य दुर्मनाः तद्भावो दौर्मनस्यं प्रतिपाक्षिणि नास्ति प्रीतिर्येषां ते अप्रीतयः निष्ठुरं कठोरं तेषां पुत्रादीनां कृते मे लाभायासंसिद्धविषये संसिद्धिप्रयुक्त्यैव मे निःश्वासः शोकादैन्यं दौर्मनस्यं दुःस्थितमनस्कत्वं च जायते । यद्यस्मात्कारणात् मयि अप्रीतिष्वपि

किमेतन्नाभिजानामि जानन्नपि महामते ॥ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥२५॥ तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते॥
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ॥ २६ ॥ मार्कंडेय उवाच ॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ समाधिर्नाम
वैश्योऽसौ स च पार्थिवसत्तमः ॥२७॥ कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥२८॥

तेषु पुत्रादिषु मे मनः निष्ठुरं न जायते अतः करोमि किमित्यन्वयः । तदित्थं संप्रति सांसारिकचिंतातः कांदिशीकोऽस्मीति भावः । कांदिशीको भयद्रुतः । कां दिशं व्रजामीति व्याकुलोऽस्मीति भावः ॥ २६॥ हे विप्र हे शिष्य, समाधिर्नाम असौ वैश्यश्च पार्थिवसत्तमः स सुरथश्च तौ द्वौ सहितौ मिलितौ हितसंयुक्तौ वा संतौ तं प्रसिद्धं सुमेधसं नाम मुनिं समुपस्थितो सम्यक्क जग्मतुरित्यन्वयः । तिष्ठतिरुपपूर्वो गत्यर्थोऽपि । पार्थिवेषु सन् अतिशयेन पार्थिवसत्तमः ॥ २७ ॥ अल्पाच्तरत्वाद्वैश्यस्य पूर्वनिपातः । अभ्यर्हितस्तु पार्थिवः क्षत्रियत्वात् । यथान्यायं तु शश्वत् वर्णोक्तविधिमनतिक्रम्यैव यथार्हमर्हं पूज्यं वृद्धमनतिक्रम्यैव यथाश्रमं तस्मै सुमेधसे मुनये संविदं संभाषणाद्याचारं कृत्वा तेनापि पूजितौ तदनुमत्या उपविष्टौ संतौ वैश्यपार्थिवौ काश्चित्स्वार्थपराः उचिताः कथाः उक्तीः चक्रतुः विदधतुरित्यर्थः । “ तुः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्याद्भेदेऽवधारणे । स्त्री संविद् ज्ञानसंभाषाक्रियाकाराजिनामसु । प्रतिज्ञातोषणाचारेष्वपि संवित्प्रयुज्यते ॥ " ॥ २८ ॥ हे भगवन् हे सर्वैश्वर्यसंपन्न हे मुने, त्वामहमेकं रहस्यं प्रष्टुमिच्छामि तद्वदस्व रहस्युपदिश । भासनोपसंभाषासूत्रेण रहस्युपच्छंदने आत्मनेपदम् । यद्यस्मात्कारणात् स्वचित्तायत्ततां विनाऽवस्थानं मे मनसः दुःखाय भवतीत्यन्वयः । यदहमेकं रहस्यं त्वां प्रष्टुमिच्छामि तत् ममावश्यमाकर्णनीयम् । अन्यथा तदाकर्णनाभावे स्वचित्तायत्तत्वं न स्यात् । तद्भावस्तु मे मनसः दुःखाय स्यात् संशयापन्नत्वात् । तस्मात्तद्रहस्यं मया श्रोतव्यमेवेति भावः । " ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इति स्मृतिः ॥ " ॥ २९ ॥ मुनिष्वतिशयेन सन् विपश्चिन्मुनिसत्तमः । हे मुनिसत्तम, जानतोऽपि उत्पन्नज्ञानस्यापि गतराज्यस्य शत्रुहस्तंगतसाम्राज्यस्य मे अखिलेष्वपि राज्यांगेषु यथा अज्ञस्येव ममत्वं ममता वर्त्तते किमेतादित्यन्वयः । विनष्टराज्यस्य पुंसः राज्यांगेषु किं ममत्वेन कृतं स्यादिति भावः । " स्वाम्यमात्यसुहृत्कोशराष्ट्र-

राजोवाच ॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ २९ ॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि ॥ जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ॥ ३० ॥ अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥ स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥ ३१ ॥ एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ ॥ दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ ३२ ॥

दुर्गबलानि च । " इति सप्त राज्यांगानि । " व वा यथा तथैवैवम् " ॥३०॥ अयं वैश्यश्च यद्यपि पुत्रैर्निकृतः विप्रकृतः खिलीकृतस्तथा दारैः कलत्रैर्भृत्यैश्च उज्झितः उत्सृष्टः स्वजनैर्भ्रात्रादिबंधुभिरपि संत्यक्तस्तथापि तेषु पुत्रादिषु ममत्वेन अतिस्नेहवानिति भावः । निकृतः स्याद्विप्रकृतः निक्रियते खिलीक्रियते स्म निकृतः । अथवा निकृतस्त्वनृजुः शठः । निकृणोति हिनस्ति निकृतः हिंसकोऽयमनृजुः शठ इत्युज्झित इत्यर्थः । " कुसृतिर्निकृतिः शाठ्यम् " । निष्कृत इत्यप्रस्तुतत्वादपपाठः । तथाहि निष्कृतिः प्रायश्चित्तिः । यदाहुः । " कामतो ब्राह्मणवधे जीवतो नास्ति निष्कृतिः । " इति प्रायश्चित्तिर्नास्तीत्यर्थः । " प्रायश्चित्तिस्तु निष्कृतिः " । अथवा निरर्थकः कृतो निकृतः । अथवा निष्क्रांतः कृतात्कारणात् राज्याद्वा निष्कृतः ॥ ३१॥ द्वावपि अत्यन्तदुःखितौ वर्त्तावहे इत्यन्वयः । " इवेत्थमर्थयोरेवम् । षिञ् बं-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धने "। विषिणोति बध्नाति विषयः शब्दस्पर्शरूपरसगंधलक्षणः ग्रामसमूहादिलक्षणश्च विषयश्च दृष्टदोषत्वमध्रुवत्वमंततो दुःखहेतुत्वं च । ममेति भावो ममत्वं तेन आकृष्टं मानसं ययोस्तौ तथोक्तौ ॥ ३२ ॥ हे महाभाग हे सुमेधो मुने, ज्ञानिनोरपि आवयोर्नृपवैश्ययोर्मोहो भवतीति यत्तदेतत्किमित्यन्वयः । भगस्यैश्वर्यादेरिदं भागं महद्भागं यस्य स महाभागः । तयोर्ज्ञानिनोः को नु मोह इत्यत आह । हे ब्रह्मन्, मूढस्य विवेकांधस्य इदं सुखाय इदं दुःखायेति हिताहितपार्थक्ये विषये अंधस्य मम च सुरथसमाधिसंज्ञयोर्नृपवैश्ययोरेषा मूढता विवेकविहीनता मोहापन्नता भवतीति किमेतदित्यन्वयः । " अचक्षुषि तमस्यंधं जले तिमिरकृत्यपि । " ॥३३॥ हे राजन्, समस्तस्य सर्वस्य जंतोश्चेतनस्य प्राणिनः विषयगोचरे ज्ञानं बुद्धिमात्रमस्तीत्यन्वयः । न हि मोक्षे धीर्ज्ञानं विवक्षितम् । किंतु विषयगोचरे । इंद्रियार्थस्य तत्तदिंद्रियजं ज्ञानं विद्यत एव तावन्मात्रमिति भावः। विषिणोति बध्नातीति विषयः शब्दादिः। गावः इंद्रियाणि चरंत्यस्मिन् गोचरः। "गोचरसंचर" इति साधुत्वम् ।

तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ३३ ॥
ऋषिरुवाच ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ विषयश्च महाभाग याति चैवं पृथक्पृथक् ॥ ३४ ॥
दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ३५ ॥

यद्यपि " रूपं शब्दो गंधरसस्पर्शाश्च विषया अमी । गोचरा इंद्रियार्थाश्च" इत्यभिधानात् य एव विषयः स एव गोचर इति पौनरुक्त्यं प्रतीयते। तथापीह दुःखितं सुरथं प्रति विषिणोति बध्नाति विषयो दुःखहेतुरिंद्रियं वशीकरोति गोचर इति प्रदर्शनादपौनरुक्त्यं द्रष्टव्यम् । भगस्यैश्वर्यादेरिदं भागम् । महद्भागं यस्यासौ महाभागः । हे महाभाग राजन्, एवं वक्ष्यमाणप्रकारेण विषयाश्च विषयवृत्तयश्च पृथक् विभिन्ना यांति । पार्थक्येनेंद्रियगोचरतां व्रजंति । अथवा प्रसरंति संचरंति ॥ ७ ॥
इत्यन्वयः । " विषयाश्च महाभाग जातिश्चैवं पृथक् पृथक् । " इति पाठे जातिः सामान्यं रूपत्वगंधत्वाद्यमप्यनेकविधम् ॥३४॥ सत्यपि चक्षुर्गोलके केचिच्चेतनाः प्राणिनः दिवांधाः उलूकादयः तथा अपरे केचित्प्राणिनः काकादयो रात्रावंधाः दृष्टिहीना इत्यन्वयः । केचिन्नराश्वप्रभृतयः प्राणिनः यथा दिवा तथा रात्रौ च तुल्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृष्टिर्येषां ते तुल्यदृष्टयो भवंतीत्यन्वयः । पूर्वं राज्ञा सुरथेन पृष्टं यन्मोहो ज्ञानिनोरपि तत्किमेतदिति तत्रोत्तरमर्थांगीकारेण ॥ ३५ ॥ मनुजाः ज्ञानिनः सत्यं किंतु ते एव केवलं ज्ञानिनो न हि यतो मनुजेभ्योऽन्येऽपि सर्वे पशुपक्षिमृगादयः ज्ञानिनः संत्येव हीत्यन्वयः । सर्वेऽपि मनुजादयो यथाविषयं यथोचितज्ञाना एवेति भावः । मनुजा मानवाः संति साधु सत्यम् । "तु स्याद्भेदेऽवधारणे । हि हेतावधारणे" । अतो ह्यनेनापि केवलं नियतमपरं क्रियाविशेषणमिदानीं ज्ञानित्वाविशेषात्प्राणिनां प्रति नियतज्ञाननिबंधनव्यवहारासिद्धिः कथं स्यादित्याशंक्य तामुपपादयितुमाह ॥ ३६ ॥ तेषां मृगपक्षिणां यज्ज्ञानं स्वभावजम् । शास्त्रजमव्याहतज्ञानजं च तन्न मृगपक्षिणाम् । "तुल्यमन्यत्तथोभयोः ।" तथा तेन प्रकारेण प्रतिनियतं तत्तत्स्वजातिप्रयुक्तोपयुक्तं विषयज्ञानादन्यद्यज्ज्ञानं शरीरमात्रोपयोगि तत् उभयोर्मृगादिमनुष्ययोः । आहारनिद्रादिविषयज्ञाननिबंधनव्यवहारपार्थक्यसंसिद्धेरसांकर्यमिति भावः ॥ ३७ ॥ प्रागुक्तं राज्ञा यन्मोहो ज्ञानिनोरपि तत्किमेतदिति तत्र कि-

ज्ञानिनो मनुजाः सत्यं किं तु तेन हि केवलम् ॥ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः॥३६॥ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥ मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ३७ ॥ ज्ञानेऽपि सति पश्यैतान्पतगाञ्छावचंचुषु ॥ कणमोक्षादृतान्मोहात्पीडयमानानपि क्षुधा ॥ ३८ ॥ मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ लोभात्प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥ ३९ ॥

माश्चर्यमित्याह सदृष्टांतम् । हे राजन्, ज्ञाने सत्यपि मोहान्ममत्वाच्छावचंचुषु शिशुत्रोटिषु कणमोक्षादृतानादृतकणमोक्षान् क्षुधा बुभुक्षया पीडयमानानपि एतान् पतंगान् पश्येत्यन्वयः । ज्ञाने सत्यपीति । ये शावचंचुषु निक्षेप्तव्यकणास्ते यद्यस्माभिरेव भक्ष्येरन् तर्हि नूनं वयं क्षुधा न पीडयामहे इति स्वार्थं जानंतोऽपि स्वयं क्षुधा पीडयमाना अपि मोहान्ममत्वाद्वा शावचंचुष्वेव कणान्निक्षिपंति पक्षिण इति भावः । पतेरंगच् पक्षिणि । "चंचुस्त्रोटिरुभे स्त्रियौ" आदृताः कणमोक्षा यैस्ते कणमोक्षादृताः । वाहिताग्न्यादिषु परनिपातः । कणमोक्षाहितानित्यपि क्वचित्पाठः ॥ ३८॥ हे मनुजव्याघ्र राजन्, मानुषा लोभात्प्रत्युपकाराय प्रत्युपकृतिलोभात् हेतोः सुतान् सुतेषु विषयेषु कालांतरे प्रत्युपकारमेतेऽस्मदर्थं करिष्यंतीति साभिलाषाः सकामाः भवंति इति पादत्रयान्वयः । तत्र निदर्शनमाह । ननु भो राजन्, त्वं एतान् लोके

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसिद्धान् पक्षिमृगादीन् ममत्वात्सुतान्प्रति साभिलाषान् सादृतान् किं न पश्यसि । इति चतुर्थपादान्वयः । अहो राजन्नेते यदि पशुपक्षिमृगादयोऽपि किल प्रत्युपकारनिरपेक्षा अपि केवलं ममत्वादेव सुतान्प्रति साभिलाषाः सादरा दृश्यंते किमुत मानुषा ममत्वाकृष्टमानसाः प्रत्युपकारगृध्नवः । सुतान्प्रति साभिलाषाः स्युरतितरामेवेति भावः । मनुजोऽयं व्याघ्र इव शूरः श्रेष्ठः मनुजव्याघ्रः । " उपमितं व्याघ्रादिभिः सामान्याप्रयोगे " इति समासः । " स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ मश्चावधारणानुज्ञानुनयामंत्रणे ननु । " सुतान्प्रति इति प्रतियोगे द्वितीयासप्तम्यर्थेऽत्रापि उपकृतपुत्रकर्तव्यप्रत्युपकारलोभात् पितरो मनुष्याः पुत्रवात्सल्यं कुर्युर्ममत्वाच्च विशेषत इत्यलं विस्तरेण ॥ ३९ ॥ यद्यप्यमी मनुष्या यथा प्रत्युपकारार्थं पुत्रान्पालयंति तद्वन्मोक्षार्थमपि यतंत एव तथापि संसारस्थितिकारिणा महामायाप्रभावेण ममतावर्त्ते मोहगर्त्ते निपातिताः इत्यन्वयः । ममता आवर्त्त इव ममतावर्त्तः । तत्र तत्र च महत्या मायायाः प्रभावः

तथापि ममतावर्तें मोहगर्तें निपातिताः ॥ महामायाप्रभावेन संसारस्थितिकारिणा॥४०॥ तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः॥
महामाया हरेश्चैषा तथा संमोह्यते जगत्॥४१॥ज्ञानिनामपि चेतांसि देवी भगवती हि सा॥बलादाकृष्य मोहाय महामाया प्रयच्छति॥४२॥

सामर्थ्यं सर्वाकलनशक्तिविजृंभः तेन । अथवा महामायां प्रति पूरयति महामायाप्रः स चासौ भावश्चेति तेन । " भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु । " संसारस्य स्थितिः प्रवाहनित्यतयावस्थानं न कदाचिदनीदृशं जगदिति भावाभावावपि जगद्रूपौ संसाररूपाविव संसारस्थितिं करोतीति तच्छीलः संसारस्थितिकारी तेन ॥ ४० ॥ चशब्दो हेतौ यतो महामायेति याऽनादिः प्रसिद्धास्ति भवती एषा जगत्पतेः हरेर्विष्णोः योगनिद्रेति कथ्यते । तया जगत्संमोह्यते मुह्यत्संप्रयुज्यते मोहपरायणं क्रियते । तत्तस्माज्ज्ञाने सत्यपि पुत्रादिषु ममत्वं कथं जायते इति अत्र विस्मयो न कार्य इत्यन्वयः । विस्मयोऽद्भुतम् । योगो निद्रेव योगनिद्रा प्रपंचात्मावगमो योगोऽत्र ध्यानलक्षणो विषयेभ्यश्चित्तवृत्तिनिरोधो विवक्षितः नतु साक्षान्निद्रा अस्वमत्वाद्देवानाम् । " योगः सन्नहनोपायध्यानसंगतियुक्तिषु । अपूर्ववस्तुलाभेऽपि भेषजेऽपि चरेऽपि च ॥" "मम माया दुरत्यया" इति भगवद्वचनान्महामायायाः प्राधान्यमाह ॥४१॥ हि यस्मादनादिः प्रसिद्धा वैष्णवी माया भगवती ऐश्वर्यादियुता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतः सा देवी स्वेच्छया दीव्यंती सती ज्ञानिनामपि उपनिषत्स्थज्ञानानामपि पुंसां चेतांसि बलात्सामर्थ्यादाकृष्य मोहाय सांसारिकत्वाय ममत्वाय प्रयच्छति ददाति चित्तानि ममत्वाधीनानि करोतीत्यन्वयः । " स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः । " दाणो यच्छः शिति ॥ ४२ ॥ तया देव्या चराचरं विश्वं विसृज्यते विशेषेण सृज्यते उत्पाद्यते । अथ च सैषा देवी प्रसन्ना सती नृणां पुंसां वरदा भवति अप्रसन्नाऽवरदा भवति । अथ च सैषा देवी नृणां भक्तानां प्रसन्ना सती मुक्तये च भवतीत्यन्वयः । तया विसृज्यते तया अविसृज्यते इत्यकारप्रश्लेषो विवक्षातो ज्ञेयः । अ इत्येतत् पृथगव्ययम् । " अमानोनाः प्रतिषेधवचनाः " इति स्मरणात् । अभ्यधुश्च । अभावेन ह्यनोनापीति । चरतीति चराचरं जंगमरूपं विश्वमित्यर्थः । " चरिष्णु जंगमचरं त्रसमिंगं चराचरम् । " चरिचलिपतिवदीनां द्वित्वाक्चाभ्यासस्य वा चरादीनां पचाद्यचि द्विर्भावोऽभ्यासस्यागागमश्च । आग्विधानसामर्थ्याद्धलादिः शेषो न । अन्यथाऽऽकारादेश एव वक्तव्यः स्यात् । न चेह

तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ ४३ ॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ४४ ॥

चरं चाचरं चेति विगृह्येकवद्भावेन विश्वविशेषणं चराचरमित्येतादिति शंकनीयम् । विश्वग्रहणादेव जगद्ग्रहणादेव वा तस्य पौनरुक्त्यप्रसंगात् । नहि स्थावरजंगमात्मकादन्यद्विश्वस्य शब्दवाच्यं वास्ति । तस्माच्चराचरमिह जंगममेव विवक्षितम् । विश्वजगच्छब्दयोरिह भिन्नवाक्यस्थतया विवक्षितत्वादपौनरुक्त्यम् । समं सर्वम् । " विश्वमशेषं कृत्स्नसमस्तनिखिलाखिलानि निःशेषम् । विष्टपं भुवनं जगत् । " जगति जगद्विश्वम् । " जगत्स्याद्विष्टपे क्लीबे यौवने जंगमे त्रिषु । " इति रुद्रकोशः ॥४३॥
इह महामाया अविद्यारूपा बंधहेतुः विद्यारूपा तु मुक्तिहेतुरिति प्रतिपाद्यते । तत्र अविद्यापक्षस्तावत् । सा प्रसिद्धा देवी अविद्या विद्येतरा । यद्वा वेत्ति वित् ब्रह्मज्ञानसंपन्नस्ततोऽन्यः अवित्सांसारिकः तं याति अविद्या । कीदृशी अविद्या अपरमा परा उत्कृष्टा मा मोक्षलक्ष्मीः ततोऽन्याऽपरमा । अथवा न विद्यते परा उत्कृष्टा मा मोक्षलक्ष्मीर्यस्याः सा अपरमा । अथवा अः विष्णुः परमः परोऽन्योऽधिकरणभूतो यस्याः सा अपरमा । पुनः कीदृशी अविद्या अमुक्तेर्हेतुभूता न विद्यते मुक्तिर्य-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मात्त्रिवर्गात्सोऽमुक्तिस्त्रिवर्गः धर्मकामार्थलक्षणः क्षयस्थानवृद्धिलक्षणो वा त्रिवर्गः तस्य हेतुभूता । पुनः कीदृशी अविद्या असनातनी न सना सदाभवा असनातनी । अनादिरपि ह्यविद्या विद्याविनिवर्त्तनीयत्वादनित्या अध्रुवा । पुनः कीदृशी अविद्या सर्वेश्वरी सर्वेश्वराः ईशनशीलाः स्वामिनः स्वस्वामिभावसंबंधसंबंधिनो भवंति । यतः सा सर्वेश्वरी अखिलप्रपंचरूपा सैवेश्वरी ऐश्वर्यसम्पन्ना । अत एव संसारबंधहेतुः संसार इति बन्धस्तस्य हेतुः कारणम् । अथवा सर्वेषां लोकानामीश्वराः ब्रह्मविष्णुमहेश्वराः तेषां ब्रह्मादीनामीश्वरी ब्राह्मी वैष्णवी माहेश्वरीति व्यपदेशतस्तत्र तद्वशीकृत्यौचित्यात् स्वामिर्नाति यावत् । पुनः कीदृशी अविद्या सा अः विष्णुस्तेन सह वर्त्तमाना । विष्णुमायेत्यर्थः । चकारेण विद्यारूपा हि महामायेति पक्षः समुच्चीयते । तथाहि सा वैष्णवी माया सैव विद्या अतीतप्रपंचब्रह्मगोचरा । पुनः कीदृशी विद्या परमा परात्मात्मतत्त्वगोचरत्वाद्दुस्तरा । पुनः कीदृशी विद्या सनातनी " सत्यं ज्ञानमनंतं ब्रह्म " इति श्रुतेः । ब्रह्मरूपत्वान्नित्या । ब्रह्मतत्त्वगोचरत्वोपचारौचित्यापि शाश्वती । "शाश्वतस्तु ध्रुवो नित्यः सदातनसनातनाः । " " सायंचिरम् " इत्यादिना ट्युः तुट् टित्वात् ङीप् । पुनः कीदृशी विद्या सर्वा संपूर्णा विश्वरूपा पुनः

राजोवाच ॥ भगवन् का हि सा देवी महामायेति यां भवान् ॥ ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥ ४५ ॥

कीदृशी विद्या ईश्वरस्य ईश्वरी ईश्वरेश्वरी । ईश्वरस्यापि हि स्वरूपदिदृक्षुत्वौचित्यावाप्तव्यत्वात् अवश्याश्रयणीयत्वात्तस्याः ।" स्थेशभासपिसकसो वरच् " इति वरचि ईश्वर इति रूपम् । अश्नुते "अशू व्याप्तौ" व्याप्नोति इति विगृह्य ईश्वरीति भवति । " अश्नोतेराशुकर्मणि वरट् चेच्चोपधायाः" इत्यौणादिको वरट् । पुनः कीदृशी विद्या । संसारबंधहेतुः पुंसः मुक्तेर्हेतुभूता कारणभूतेत्यर्थः । संसाररूपबंधस्य हेता गंता संसारबंधहेता तस्य संसारबंधहेतुः पुंसः मुक्तेर्मोक्षस्य हेतुभूता । " ज्ञानादेव तु कैवल्यम्" इति सिद्धांतश्च विद्यैव मुक्तिः निदानमिति तात्पर्यम् । हेतुरिति " हि गतौ " तृचि षष्ठ्येकवचनांतमेतत् । षष्ठीसमासः । कर्तरि चेति तु षष्ठीसमासप्रतिषेधः प्रायिको "जनिकर्त्तुः प्रकृतिः" इति पाणिनिप्रयोगाल्लिंगादवसीयते । हेतुशब्दस्तु उकारांतः कारणवाची । अविद्या अहंमतिः विद्या तु मोक्षफलं ज्ञानम् ॥ ४४॥ सुरथः सुमेधसं मुनिं महामायामहिमानं प्रष्टुं वाक्यमूचे । हे भगवन् द्विज सुमेधः मुने, भवान् यां महामायेति ब्रवीति आह का हि सा देवी सा च कथं केन प्रकारेण उत्पन्ना उद्भूता ॥ ९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्या देव्याः कर्म च किं पराक्रमश्च क इत्युवाच राजेत्यन्वयः । “ इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु ” ॥ ४५ ॥ पुनः पृच्छति राजा । हे ब्रह्मविदां वर श्रेष्ठ, त्वत्तः सकाशात्तत्सर्वं श्रोतुमिच्छामि तादिति किं सा देवी यत्प्रभावा यत्सामर्थ्या यत्स्वरूपा यदाकृतिः यदुद्भवा च यदुत्पत्तिका च तस्याः देव्याः सामर्थ्यं कीदृशं किंस्वरूपं कीदृशं च प्रादुर्भवनमिति प्रश्नतात्पर्यम् । त्वत्तः त्वत् “ आख्यातोपयोगे ” इत्यपादानता । यः भावो यस्याः सा यत्स्वरूपं यस्याः सा यथोक्ता । ब्रह्म विदन्ति ब्रह्मविदः तेषां मध्ये वर । “ वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः । ब्रह्म वेदो ब्रह्म तपो ब्रह्म ज्ञानं च शाश्वतम् ॥ ” ब्रह्मन्निति संबुद्ध्यतः पाठः क्वचित् ॥४६॥ अथ सुमेधा ऋषिरुवाच । हे राजन्, जगन्मूर्तिः सा देवी नित्यैव तया देव्या इदं लोकमयं सर्वं ततं कृतम् । सा तु केनापि न तता न कृता । तथापि लोकोपकारा-

यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदांवर ॥ ४६ ॥ ऋषिरुवाच ॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥ ४७ ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥ ४८ ॥ योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ॥ आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ॥ ४९ ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ ५० ॥

र्थां तत्समुत्पत्तिस्तत्प्रादुर्भावः । बहुधा अनेकैः मम वाचो युक्तितस्त्वया श्रूयतामित्यन्वयः । जगत जगती मूर्तिः काया यस्याः सा तथोक्ता । तस्याः समीचीना उत्पत्तिः तत्समुत्पत्तिः । “ मूर्तिः काठिन्यकाययोः ” ॥४७॥ सा देवी देवानां कार्यसिद्ध्यर्थं यदाविर्भवति प्रकाशते तदा सा देवी नित्यापि सती लोके उत्पन्ना लब्धजन्मेति अभिधीयते कथ्यते जनतयेत्यन्वयः । आत्मवचनादात्मरूपत्वादकृतकत्वाच्च नित्यं तस्याः इति भावः । “ प्रकाशे प्रादुराविः स्यात ” । आविर्भवति प्रकाशते इत्यर्थः । नियतं भवा नित्या “ नेर्ध्रुव ” इत्यप् । “ गतानुगतिको लोको न लोकः पारमार्थिकः । सतीमप्यसतीमाह सीतां रक्षःक्षयाश्रयात् ॥ सहजो यः समुल्लासः क्षीराब्धेः सोऽपि मंस्यते । चंद्र इत्यत्र किं कुर्मो गतानुगतिकं जगत् ॥ ”॥४८॥ कल्पांते प्रलये ब्रह्मादीनां निशावसाने जगति भुवने एकार्णवीकृते एकार्णवत्वेन कृते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सति एकोदकपूरत्वावस्थापिते सति भगवानैश्वर्यादिसंगतः प्रभुः स्वामी विष्णुर्व्यापको नारायणः शेषमनंतफणीश्वरमास्तीर्य आप्रसार्य तल्पकीकृत्य यदा योगनिद्रामभजत् योगनिद्रामिवासेवत तदा तस्मिन् काले योगनिद्रोपलक्षिते काले विष्णुकर्णमलोद्भूतौ मधुकैटभाविति विख्यातौ नाम्ना कथितौ द्वावसुरौ सुरविद्विषौ ब्रह्माणं विष्णोर्नाभिकमलस्थं वेधसं हिंसितुमुद्यतौ उद्युक्तावुन्मुखावभूतामिति श्लोकयुग्मान्वयः । योगो निद्रेव ध्यानांगनिद्रा तां वेवेष्टि व्याप्नोति विश्वं विष्णुः जंगम्यते जगत् तस्मिन् यस्मिन् रणंत्यंभांसि संति बहूनि सोऽर्णवः । "अर्णसो लोपश्च" इति वः । एकः केवलोऽर्णवः समुद्रः पूर्णो यस्मिंस्तत् एकार्णवं जगत् प्रलयतः प्राक् सप्तार्णवत्वे जगद्व्यवस्थापितं प्रलये तु एकार्णवस्य जगतो भावः ऐकार्णव्यं ब्राह्मणादित्वात् ष्यञ् । वृद्धिः स्त्रियामैकार्णव्यमेव ऐकार्णवी "षिद्गौरादिभ्यश्च" इति ङीप् । तया ऐकार्णव्या एकार्णवत्वेन कृतं व्यवस्थापितं जगत् तस्मिन् । अथवा नियत्या भगवत्या (?)। जगत्येकार्णवे कृते इति मुक्तसंशयः पाठः । "संवर्त्तः प्रलयः कल्पः क्षयः कल्पांत इत्यपि । कल्पः शास्त्रे विधौ न्याये संवर्त्ते ब्रह्मणो दिने ॥" कल्पस्यांतोऽवधिः कल्पान्तः तस्मिन् । मन्यतेऽहमेव शूर इति मधुः "मधुः

स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥ ५१ ॥

तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ॥ विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥ ५२ ॥

पुंस्यसुरे चैत्रे मधुके सुरभावपि । क्लीबं तु मधु मद्ये स्यात् क्षौद्रे पुष्परसेऽपि च ॥" कीटस्येव भाः प्रभा यस्य तत्कीटभं कर्णजं मलं तत्र भवः कैटभः । बृंहति वर्धते ब्रह्मा तम् । विष्णोः कर्णांतयोर्मलं तदुद्भूतौ ॥ ४९ ॥ ५० ॥ विष्णोर्नाभिकमले स्थितः स प्रजापतिर्ब्रह्मा तावसुरौ च उग्रौ दृष्ट्वा जनार्दनं च प्रसुप्तं योगनिद्रापन्नं दृष्ट्वा एकाग्रहृदयस्थितः सन् हरेः विष्णोः प्रबोधनार्थाय हरिनेत्रकृतालयां तां योगनिद्रां महामायां तुष्टाव स्तुतवान् । इति श्लोकयुग्मान्वयः । नाभिरेव कमलं तत्र स्थित उपविष्टः । "ब्रह्मा विप्रोऽपि कश्चित् स्यात्" । अत उक्तं प्रजापतिरिति । प्रजापतिर्मनुरपि स्यादत उक्तं ब्रह्मा इति । "अर्द हिंसायाम्" चुरादिः । जनानर्दयति हिनस्ति जनार्दनः । "अर्द गतौ याचने च" । भ्वादिः । जनान् अर्दति गच्छाति । "ष्टुञ् स्तुतौ" स्तवनक्रियाफलं स्वरक्षालक्षणं ब्रह्मण एवेत्यात्मनेपदे सति तुष्टुवे इति पाठः । अथवा स्तवनक्रियाफलं पारंपर्यात् देवरक्षणलक्षणमेवेति युक्तं परस्मैपदं तुष्टावेति । यदुक्तम् । इति हरेः प्रबोधनार्थायेति तु यद्यप्यव्य-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वहितं स्तवनक्रियाफलं साक्षात्प्रयोजनं तथापि प्रयोजनं दैत्यवधविधिद्वारकं पारंपर्याय धृतं देवसंरक्षणमेव स्तवनक्रियाफलम् । एकमद्वितीयमग्रं प्रमुखं हृदयं स्वांतं यस्य स एकाग्रहृदयः । अनन्यमनस्कः स्थितः निष्कंपः । अथवा एकमद्वितीयमग्रं प्रधानं हृत् चित्तं यस्य सः एकाग्रहृत् । अये शुभावहे विधौ दैत्यवधलक्षणे विषये स्थितः दत्तावधानः अयस्थितः । हरेर्नेत्रे एव कृत आलयो यया सा तथोक्ता । अथवा हरिणा नेत्राभ्यां कृत आलयो गृहं यस्याः सा तथोक्ता । अथवा हरेर्नेत्रेण चक्षुषा प्रमाणेन कृतः अलयः असंश्लेषः अनाशः अमोक्षो वा यस्याः सा तथोक्ता अथवा हरेः परमात्मनो नेता प्रापयिता वेदांतः हरिनेता तेन अकृतः आलयः पदं प्रति नियतं स्थानं यस्याः सा तथोक्ता ताम् । प्रबोधनमेवार्थः प्रयोजनं तस्मै प्रबोधनार्थाय ॥ ५१ ॥ ५२ ॥ ब्रह्मा तावत्तां स्तोतुं स्वयमेव प्रतिजानीते प्रतिज्ञां करोति । अतुलमसदृशं तेजो यस्य सः अतुलतेजाः तस्य विष्णोर्ध्यानरूपां निद्रां स्तौमि । " तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि कीर्त्तितम् । " तेजः असहनत्वेऽपि । यदाहुः ।

ब्रह्मोवाच ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः ॥ ५३ ॥
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ ५४ ॥

" अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् । प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥ " कीदृशीं निद्राम् । विश्वेश्वरीं विश्वस्य ईश्वरीं व्यापिकां जनयित्रीम् । " अश्नोतेराशुकर्मणि वरट् चेचोपधायाः । " पुनः कीदृशीं जगद्धात्रीं जगतो धारयित्रीं पोषयित्रीं च । पुनः कीदृशीं स्थितिं सर्गसंहारमध्यमावस्थां कुर्वाणाम् । संहारं च सर्गस्थित्युत्तरावस्थां कुर्वाणाम् । " सुप्यजातौ णिनिस्ताच्छील्ये " । पुनः कीदृशीं भगवतीं षडैश्वर्यसंगताम् । जगदिति । धात्रीमिति ताच्छील्ये तृन् योगे " न लोकाव्यय " सूत्रेण षष्ठीनिषेधात् कर्मणि द्वितीयांतं जगादिति । एतेन विष्णुयोगनिद्रैव जगत्सर्गस्थितिसंहारकारिणी ब्राह्मीवैष्णवीमाहेश्वरीमयी शक्तिरिति स्तुतितात्पर्यं सूचितम् ॥ ५३ ॥ अशेः सरत् । षत्वकत्वषत्वानि । "अक्षरं वर्णनिर्माणं वर्णमप्यक्षरं विदुः । अक्षरं न क्षरं विंद्यादक्षरं श्रुतितोययोः ॥ " अश्नाति त्रीन् लोकान् भुंक्ते भूतात्मकत्वादक्षरा । अश्नुते व्याप्नोति विश्वात्मकत्वाच्च अक्षरा । यद्वा क्षराति संचलति क्षरं न क्षरमक्षरं ध्रुवम् अक्षरा ध्रुवा अत एव हे अक्षरे ध्रुवे, हे नित्ये हे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शाश्वति हे देवि, त्वं स्वाहा देवतोद्देशेन द्रव्यत्यागजनितदेवतापितृरूपत्वेन आस्थिता अंगीकृता । प्रज्ञासि शास्त्रेण । अव्ययं स्वाहेति । यदभ्यधुः "स्वाहा देवहविर्दाने श्रौषड्वौषड् वषट् स्वधा । " इति च । यद्वा त्वं स्वाहेति देवहविर्दानमंत्ररूपासि । यद्वा । त्वं स्वाहेत्येवमसि स्वाहा त्वं देवस्वरूपेत्यर्थः । यद्वा । त्वं स्वाहासि हुतभुक्प्रियासि । सुष्ठु आहूयते स्वाहा सास्त्यस्याः इति वा स्वाहा । " स्वाहाग्नाय्यनलप्रिया "। यद्वा "आकारः स्यात्पितामहः"। त्वं सुष्ठु आं पितामहं ब्रह्माणं जिहीषे गच्छसि स्वाहासि त्रय्यसि ब्राह्म्यसि । "आतोऽनुपसर्गे कः" । हे देवि, त्वं स्वधा पितृद्देशेन दीयमानद्रव्यजनिततृप्तिरसि । यद्वा । त्वं स्वधेत्येवमसि स्वधात् । स्वधेति मन्त्रतो भुंजाना पितृरूपासीत्यर्थः । यद्वा । " अकारो वासुदेवः स्यात् " सुष्ठु अं वासुदेवं दधासि पोषयासि स्वधासि लक्ष्मीरसि । हे देवि, हि यतः त्वं वषट्कारोऽसि । अतः वषडिंद्रायेति वषट्कारभागिंद्र इति त्वमिंद्राण्यसीत्यर्थः । यद्वा । हे देवि, त्वं हि त्वमेव वषट्कारोऽसि वषट्कारो यजमानः ऋत्विक् चासि । " हि हेतावधारणे " । हे देवि, त्वं स्वरात्मिका । स्वः स्वर्गः आत्मा यस्याः सा स्वर्गरूपासि । यद्वा । त्वं परलोकात्मासि । " स्वर्गे परे च लोके स्वः " । यद्वा । त्वं स्वरा त्वं स्वरात्मिकाऽनुदात्तादिस्वरूपरूपासि । अथ च निषादऋषभादिस्वरात्मिकाप्यसि । अथवा वषट्कारस्वरात्मिका इत्येकं पदम् । वषट् कारयति वषट्कारं स्वः फलं तपः प्रयोजनमात्मा यस्याः सा । वषट्कारप्रवर्त्तकस्वर्गरूपफलात्मासि । हे देवि, त्वं सुधामसि सुधा असि । हे देवि, त्वं त्रीन् लोकान् त्रीन् वेदान् त्रीन् ब्रह्मविष्णुमहेश्वरान् वा दधासि इति त्रिधासि । यद्वा । त्रिधामासि । त्रीणि धामानि गृहाणि भुवनलक्षणानि देहानि ब्रह्मादिरूपाणि तेजांसि चन्द्रार्काग्निरूपाणि च त्रिशक्तिलक्षणानि यस्याः सा त्रिधामा । हे देवि, त्वं त्रात्मिका । " त्रैङ् पालने " । त्रायते त्राः विष्णुः क्विप् । त्रा आत्मा स्वभावो यस्याः सा विष्णुरूपासि । यद्वा । संपदादित्वाद्भावे क्विप् । त्राणं त्राः पालनमात्मा स्वरूपं यस्याः सा पालनरूपासि । हे देवि, त्वं त्रिधा त्रिभिः प्रकारैः एकमात्रद्विमात्रत्रिमात्ररूपस्वरा । परंपरया त्र्यात्मकह्रस्वदीर्घप्लुतभेदभिन्नमात्रा आत्मा यस्याः सा त्रिमात्रात्मिका स्वरवर्णरूपासि स्थितासि अस्थितासि च । यद्वा । त्रिधा त्रिभिः प्रकारैः ब्राह्मीवैष्णवीमाहेश्वरीरूपाः मातरः आत्मा स्वरूपं यस्याः सा त्रिशक्त्याकृतिस्त्रिमात्रात्मिकेयं विष्णुयोगनिद्रा स्थितेति । त्रिधा मात्रात्मिका ॐकाररूपेति च मात्रा अकारः उकार मकारश्चेति तदात्मिका तत्स्वरूपेति कश्चिदोमुपदगतवर्णानभांक्षीत् । तच्च पापात् पापीयः ईदृशीमोमुपदव्युत्पत्तिमत्सूत्राम् "अंधस्य चांधलग्नस्य विनिपातः पदे पदे।"

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्यंधपरंपरापारंपर्यपर्यागतामंधकुक्कुटीगतिमिव पदे पदे स्खलंतीं प्रति कियद्वतुष्यामः किमु । यद्वा तुष्यामः । कियद्वा तुष्यामः । तथाहि वर्णेषु ये वर्णैकदेशा वर्णांतरसमानाकृतयस्तेषु तत्कार्यं न भवति । तच्छायानुकारिणो हितेन पुनस्त एवेति पृथक्प्रयत्ननिवर्त्यं द्विवर्णमिच्छंत्याचार्याः । दर्शितात्रास्माभिरोंपदव्युत्पत्तिरोन्नमश्चंडिकाया इत्यात्रावतेष्टिलोपश्चेति सूत्रत इत्यलं विस्तरेण ॥ ५४ ॥ पूर्वत्र त्रिधा मात्रात्मिका इति विशेषणेन अकारादिस्वरूपमात्रकात्मतोक्ता । अर्द्धमात्रात्वमित्यनेन तु ककारादिव्यंजनरूपमात्रकात्मतोच्यते । हे देवि, त्वमर्धमात्रा अर्धं मात्रा अर्धमात्रा सा व्यंजनवर्णस्वरूपमात्रिका त्वमेव । " अर्धं नपुंसकम् " इति समासः । तदुक्तम् । " एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्धमात्रकम् ॥ " इति । अथवा पूर्वत्र त्रिधामात्रात्मिकेत्यनेन ओमात्मकत्वं विवक्षितम् । तत्र ओमिति द्वे मात्रे दीर्घत्वात् । मकारस्त्वर्धमात्रः व्यंजनत्वात् । एवं त्रिधामात्रात्मकता । अथवा " ओमभ्यादाने " इति सूत्रतो वेदादिप्रारंभे ॐ अग्निमीळे पुरोहितमित्यादौ ओंशब्द ओं इति प्लुतः। एवं त्रिधामात्रात्मकता । अथवा "प्रणवष्टेः" इति सूत्रेण यज्ञकर्मणि अपां रेतांसि जिन्वतो३म्। इत्येवं पादस्य वा

अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥ ५५ ॥

अर्द्धस्य वा अंत्यस्याक्षरस्यो३म्शब्दस्त्रिमात्र आदिश्यते । एवं त्रिधामात्रात्मकता । तत्रो३म्शब्दे मकाररूपा या अर्द्धमात्रा स्थिता नित्या ध्रुवा मोक्षं सूचयंती विशेषतः । अनुच्चार्या परमात्मरूपत्वात् । " यतो वाचो निवर्त्तंते अप्राप्य मनसा सह । " इति श्रुतिविशेषतः लक्षणीया सा अर्धमात्रा त्वमेव । अर्धमात्रासूचिता या मुक्तिः सा त्वमेवेति भावः । अर्धमात्रायामर्धरूपतया स्थितेत्यपि व्याख्यातम् । अथ च अं विष्णुं याति अया रमा सा त्वमेव । अथ च वदेः क्विप् । वदतीति उत् वाचकः शब्दः न विद्यते उत् वाचकः शब्दो यस्याः सा नुत् " यतो वाचो निवर्त्तंते अप्राप्य मनसा सह । " इति श्रुतेः । चरितुं गंतुं प्राप्तुमर्हा चार्या । अनुच्च सा चार्या च अनुच्चार्या परब्रह्मता सा त्वमेव । हे देवि, त्वमेव संध्यासि । संध्यायंत्यस्यां संधीयेते अहोरात्रौ वास्यां संध्या पितृप्रसूः । पितॄणां मातासीति यावत् । अथवा हे देवि, त्वमेव सावित्री । सवितुरियं सावित्री ऋगसि । यद्वा । सा प्रसिद्धा सावित्री वैष्णवी शक्तिरसीति यावत् । यद्वा । सविता देवता यस्याः सा तदादिव्याहृतिरहिता ऋक् । सैव व्याहृतिसहिता गायत्रीत्युच्यते । हे देवि, त्वं वेदजननी गायत्र्यासि इति यावत् । नित्यस्यापि सतो वेदस्य गायत्र्युपदे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शानुदयाद्वेदाध्ययनानुदय इति गायत्र्युपरिष्टैव सती वेदाध्ययनम् । जननीत्यध्येयाध्ययनैक्योपचारौचित्यतो वेदं जनयति वेदजननी वेदस्य वा जननी वेदमाता गायत्रीत्युक्तम् । हे देवि, त्वं परासि श्रेष्ठासि । यद्वा । " पॄ पालनपूरणयोः " पिपर्त्तिपरा । वेदांश्च जनांश्च वेदजनान्नयंति सौख्यं प्रापयंतीति वेदजनन्यो ब्राह्म्याद्या-स्तासां परा पालयित्री च त्वमेवासि । वेदजननीति तु पाठे देवानां जननी अदितिस्त्वमेव परा उत्तमा । यद्वा । वेदजननीं गायत्रीं पांति वेदजननीपाः ऋषयस्तान् रक्षितुं रासि वेदजननीपरा त्वमेवासि ॥ ९५ ॥ इह हि " पाठक्रमादर्थक्रमो वलीयान् " इति सृष्ट्याद्युपक्रम्योच्यते । हे देवि, त्वया ब्राह्म्या शक्त्या एतज्जगत् सृज्यते उत्पाद्यते । हे देवि, त्वया वैष्णव्या शक्त्या एतज्जगत् पाल्यते दुःखाद्रक्ष्यते । हे देवि, त्वं रौद्री शक्तिः सती एतज्जगदंतेऽवसाने अत्सि खादसि । तादित्थं सर्वदा पुनः पुनः क्रमशः सर्गस्थितिसंहारलक्षणत्रिविधावस्थापन्नतद्विश्वं वस्तुतस्त्वयैकयापि ब्राह्मीवैष्णवीरौद्रीव्यपदेशभेदाभिन्नया शक्त्या धार्यते आत्मशक्त्यामाधिकरण-

त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ९६ ॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥ ९७ ॥

रूपायां विश्वमाधेयीक्रियते त्वयेति तात्पर्यम् । सर्वं ददासीत्यन्वयः ॥ ९६ ॥ इह जगन्मये इति पाठः । " मय गतौ " । मयते जानाति मया । पचाद्यचि स्त्रियां टाप् । जगतो मया जगन्मया । हे सर्वज्ञे संबुद्धौ हे जगन्मये हे भुवनज्ञे, सर्वे गत्यर्था धातवः प्रयोगात् ज्ञानार्थाः । जगन्मयि इति पाठेऽपि संबुद्ध्यंतमेव । देव्या-नया स्रष्टव्यत्वेन पालनीयत्वेन संहर्त्तव्यत्वेन च देवीकर्तृकजगत्कर्मकतत्तत्सर्गादिक्रियाविषयभूताज्जगतो हेतोरागता जगत्सर्गादिव्यापारमुद्दिश्यागता प्रादुर्भूता देवी जगन्मयीत्युच्यते । " तत आगतः " इत्याधिकृत्य मयडिति सूत्रेण हेतुभ्यो मनुष्येभ्यश्च मयट्प्रत्ययः । तत आगत इत्यर्थे जगतो हेतोरागता देवी जगन्मयी । टित्वात् ङीप् ह्रस्वः । अथवा "तत्प्रकृतवचने मयट्" । प्रकृतं प्रस्तुतमुच्यतेऽस्मिन्निति प्रकृतवचनं तदिति प्रथमासमर्थात्प्रकृतवचनेऽभिधेये मयट् । जगत् प्रकृतं प्रस्तुतं कर्त्तव्यत्वेनोच्यतेऽस्यां जगन्मयी संबुद्धौ ह्रस्वः । हे देवि हे जगन्मयि भुवनज्ञे, अथवा हे जगन्मयि जगन्निर्मातुमागते जगन्निर्माणकारणादागते त्वं अस्य जगतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विसृष्टौ विशेषतः सृष्टौ उत्पादने विषये सृष्टिरूपासि तथांतेऽवसाने संहारे विषये संहृतिरूपा चासीत्यन्वयः । सृष्टिस्रष्ट्रयोः पालनापलयित्र्योः संहृतिसंहर्त्र्योश्चाभेदेनातिशयोक्तिः । देव्याः सर्वात्मकत्वेन वा स्वरूपकथनम् । हे देवि जगन्मयि ब्रह्माणि, वर्त्तेत इति व्यपदेशमात्रं सृष्ट्यादिकं तु त्वमेव च करोषि नाहमिति नम्रोक्तिरप्यवसेया ॥ ५७ ॥ हे देवि, त्वं महती विद्या परब्रह्मगोचरज्ञानरूपासि । हे देवि, त्वं महती अविद्या अनिर्वचनीयाविद्या प्रपंचपरिविज्ञानरूपासि । हे देवि, त्वं महती माया अनात्मन्यात्मेति बुद्धिरात्मन्यप्यनात्मेति बुद्धिर्माया । हे देवि, त्वं महामेधा महती धारणावती बुद्धिः महती अमेधा अधारणावती धीः । हे देवि, त्वं महास्मृतिर्महती स्मृतिर्ध्यानरूपा महती अस्मृतिः अध्यानरूपा । हे देवि, त्वं महामोहा महाममता महाऽममता च । हे देवि, त्वं भगवती ऐश्वर्ययुक्ता च अभगवती अनैश्वर्यासि । हे देवि, त्वं महादेवी महादेवस्य स्त्री । हे देवि, महेश्वरी महती ईश्वरी व्यापकस्वभावा । " अश्नोतेराशुकर्मणि वरट् चेच्चोपधायाः " । अथ च महती

महाविद्या महामाया महामेधा महास्मृतिः॥महामोहा च भवती महादेवी महासुरी॥५८॥प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा॥५९॥त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा॥लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च॥६०॥

विद्या यस्यां सा मुक्तिः महती माया अविद्या यस्याम् अमुक्तिः । इत्थं महामेधा स्मृतिः महास्मृतिरीति इष्टदेवतोपासना । महामोहा तृष्णा अस्मृतिः मूर्च्छा निद्रा च ॥ ५८ ॥ हे देवि, त्वं च त्वमेव सर्वस्य प्रकृतिरिति । प्रक्रियते सर्वमनया प्रकृतिः सत्त्वरजस्तमःसाम्यावस्था अव्यक्ताख्या प्रधानम् । अथ च त्वमेव गुणान् सत्त्वरजस्तमांसि विभावयसि पृथक्कृत्य जगद्रूपेणावस्थापयसि । गुणत्रयविभाविनी । सत्वं ज्ञानसुखहेतुः रजो रागात्मदुःखहेतुस्तम आवरकं मोहहेतुः । गुणाः प्रकृतिधर्माः । हे देवि, त्वमेव कालरात्रिः । जगत्संहारकारिणी यामभंगिनी यत्र प्रलीयते जगत् । हे देवि, त्वमेव महारात्रिः यत्र चतुर्मुखो मुक्तिमागात् । हे देवि, त्वमेव दारुणा मोहरात्रिश्चासि । ममतागर्भपातिनी महामायाख्या संसृतिः दंष्ट्राकरालाग्निरुद्रपत्न्यः अतिदारुणाः । मोहरात्रिर्मोहतनुर्जगत्सूत्रे जगत्करी ॥ ५९ ॥ हे देवि, त्वं श्रीः संपत्तिरासि हरिप्रियाप्यसि । हे देवि, त्वमीश्वरी ईश्वरस्य पत्न्यासि । " अश्नोतेराशुकर्मणि वरट् चेच्चोपधायाः " इति । जगद्व्यापिनी चासि । हे देवि,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वं ह्रीः असि । " ह्रींकारो वै प्राणः " इति श्रुतेः । प्राणभूतासि । ह्रीमिति मकारांतमव्ययं प्राणवाचि । ह्रीमनुनासिकस्वरांतपाठे तु देवीप्रणवासीति रहस्यम् । ह्रीस्त्वमिति च पाठे लज्जाशब्देन पौनरुक्त्यं स्यात् । हे देवि, त्वं बुद्धिरसि चिन्मात्रब्रह्मरूपासि । त्वं बोधलक्षणासि । बोधयितृव्यापारदर्शनासि अथवा बोधरूपा विविधागमरूपासि । हे देवि, त्वं लज्जासि व्रीडासि । हे देवि, त्वं पुष्टिरसि अवयवोपचितिरसि । हे देवि, त्वं तथा तेन तुष्टिरसि प्रीतिरसि । हे देवि, त्वं शांतिरूपा रतिविषयव्यावृत्तिरसि । हे देवि, त्वमेव क्षांतिस्तितिक्षा चासि ॥ ६० ॥ हे देवि हे चंडिके, त्वं यथा उक्तलक्षणप्रकारेण । खड्गिनी शूलिनी गदिनी चक्रिणी शंखिनी चापिनी बाणा बाणवती परिघायुधा च सती अत एव घोरा अत्युग्रदर्शना भुशुंडीति भाष्यसे इत्यन्वयः । " अत इनि ठनौ " । गदिनीत्यत्र तु " व्रीह्यादिभ्यश्च " इति इनिः । सर्वत्र " ऋन्नेभ्यो ङीप् " । बाणा बाणवती " अर्शआदिभ्योऽच् " मत्वर्थीयः । परिघः परिघातनः । लोहबद्धो लगुड आयुधं यस्याः सा तथोक्ता ।

खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणा भुशुंडीपरिघायुधा ॥ ६१ ॥
सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ ६२ ॥

खड्गशूलगदाचक्रशंखचापबाणपरिघैरष्टाभिरायुधैरष्टभुजा घोरात्युग्राकृतिश्चंडिका देवी । भुशुंडीति वक्ष्यमाणलक्षणा सती प्रसीदत्विति भावः । " मुडि खंडने " शत्रून्मुंडति खंडयति इति कर्मण्यणि स्त्रियां ङीप् शत्रुमुंडी । भुजैः शत्रुमुंडी भुजशत्रुमुंडी चंडिका । अत्र हि भुजशत्रुमुंडीशब्दैः " पृषोदरादीनि यथोपदिष्टम् " इति शिष्टोपदिष्टत्वात् ज इत्यस्य अत्रुम् इत्यस्य च लोपे कृते भुशुंडीति व्युत्पाद्यते । " भुजाभिरष्टभिः शत्रूनष्टावष्टाभिरायुधैः । मुंडत्यत्युग्रचंडोक्तिर्भुशुंडी चंडिका स्मृता ॥ " यच्चाहुः । " उड्डीयोड्डीय च प्राप्य नदंती दशकार्त्तिका । क्रमते चानतांगी या सा भुशुंडी निगद्यते ॥ " एतेन बाणभुशुंडीपरिघायुधेत्येकं पदमिति
व्याख्यावगंतव्या । बाण इत्यनाकारः पाठः इत्युक्तिरपि व्युदस्ता । भुशुंडी गोफणिकेत्युक्तिरप्ययुक्तिमूलोपेक्षणीया प्रेक्षावद्भिः । परिघो लोहार्गलमिति तु शब्दतोऽर्थतश्च भ्रष्टं व्याख्यातम् । यदाह क्षीरस्वामी । " परितो हंति परिघः । " परौ घः " इति हेर्घत्वम् । लोहबद्धो लगुड इति ॥६१॥ हे देवि, त्वमेव जगती सौम्यासि अक्रूरा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रशांतासि । सोमदैवतिकाप्यसि । अथवा शोभना मा लक्ष्मीः यस्यासौ सुमः विष्णुः सुमस्य भावः सौम्यं शोभनलक्ष्मीकत्वं तद्यस्या अस्त्यसौ सौम्या । अर्श आद्यच् । शोभनलक्ष्मीकत्वयुतासि । अथवा उमासहितः सोमः उमापतिस्तस्य भावः सौम्यं तद्यस्याः सा सौम्या उमापतित्वयुतासि । हे देवि, त्वमेव सौम्यतरासि । सूयते सुधा सोमश्चन्द्रः सोमस्येयं सुधा सौमी । सौमीं सुधामर्हति सौम्या देवावलिस्त्वं च । दंडादित्वाद्यः । तयोस्त्वमतिशयेन सौम्यासौमतरा । " द्विवचनमविभज्योपपदे तरवीयसुनौ " इति द्विवचने उपपदे तरप् । " तसिलादिष्वाकृत्वसुचः " इति पुंवद्भावः । हे देवि, त्वमशेषसौम्येभ्यः अखिलसुन्दरेभ्यः पदार्थेभ्यस्तु पार्थक्येन अतिसुंदरी असि । सुष्ठु नंदयति सुंदरी मनोज्ञा मनोरमा । " सोमदैवतके सौम्यः सौम्यः स्यात्सुंदरेऽपि च । सौम्योऽङ्कूरे बुधे सौम्यः सौम्यः शांते प्रयोगतः ॥ " हे देवि, त्वमेव परा श्रेष्ठा । हे देवि, त्वमेव पराणां श्रेष्ठातः परमा । अत्युत्कृष्टा परमोत्तमा । व्यवस्थात्र तु श्रेष्ठत्वस्य विवक्षितत्वात् । अन्यथा परेषा-

यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ६३ ॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ६४ ॥

मिति स्यात् । अथवा परं ब्रह्म अणंति कथयंति पराणः क्विप् । तेषां मध्ये त्वं परमासि । यद्वा परे चापरे च परापराः । " द्वंद्वे च " इति सर्वनामत्वाभावात्सुडागमाभावः । तेषां त्वं परमा । अथ च हे देवि, त्वमेव परमा उत्कृष्टा लक्ष्मीः । अथवा परमः ईश्वरः तस्य स्त्री त्वमेव परमेश्वरी । " ईश्वरी स्वामिनी दुर्गा लोकानां व्यापिका च सा । " ॥ ६२ ॥ हे अखिलात्मिके देवि, क्वचित् जगति सत् असद्वा यच्च किंचिद्वस्तु पदार्थरूपं प्रतीयते तस्य सर्वस्य सदसदात्मकस्य या शक्तिः सामर्थ्यं सा त्वमेवासि । अतः परं मया किं स्तूयसे इत्यन्वयः । पदं च पदार्थश्च ताभ्यां क्रियमाणा स्तुतिश्च स्तोता च स्तुत्यं च तत्तदुचितशक्तिश्च त्वमेवेति त्वत्तोऽन्यत्वाभावाद्भेदनिबंधना स्तुतिः कथं प्रवर्त्तनीयेति भावः । इयमेव च परमावधिस्तुतिरतोऽपि का नाम स्तुतिरित्यपरो भावः । अग्न्यादितत्तदौचित्यतत्तदर्थक्रियाकरी शक्तिरप्रतिबद्धात्मा धर्मः सामर्थ्यशब्दिता ॥ ६३ ॥ हे देवि, त्वां स्तोतुमिह क ईश्वरः कः समर्थोऽस्ति न कोऽपि । तथाहि यया जगत्स्रष्टा उत्पादयिता । तृन्नंतोऽयम् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्वा भविष्यदनद्यतने लुडन्तोऽयम् । यः जगत्पाति रक्षति भविष्यत्सामीप्ये लट् । यद्वा जगत्पाता इति पाठः । भविष्यदनद्यतने लुडंतोऽयम् । योऽवसाने जगत् अत्ति संहरति सोऽपि विष्णुरपि यया योगनिद्रया त्वया देव्या नीद्रावशं नीतः निद्राधीनतां गमितः । " वशी वंध्यगवी वश्या सुनाझी करिणी वशा । इच्छायंत्रणयोः पुंसि प्रभुत्वे च वशंगतः ॥ " ॥ ६४ ॥ हे देवि, यतः त्वया महामायया अहं ब्रह्मा विष्णुश्च ईशानश्च ते त्रयोऽपि शरीरग्रहणं कारिताः शरीरं गृह्णतः कारिताः ममतावृताः कृताः अतस्त्वां कः पुमान् स्तोतुं शक्तिमान् भवेत् । न कोऽपि । यः कोऽपि शरीरधारी स त्वां स्तोतुमसमर्थ एव तदन्यस्तु मुक्तस्त्वद्रूप एव सन् कथं त्वामेव स्तोष्यति त्वं चाशरीरिणी स्तुतिश्च स्तुत्यस्तोतृभेदनिबंधना । अतस्त्वद्विषया स्तुतिः कथं घटेत साकल्येनेति स्तुत्युपसंहार एव वरमिति भावः ॥ ६५ ॥

विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥६५॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥६६॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ६७ ॥ ऋषिरुवाच ॥ एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ विष्णोः प्रबोधनार्थाय निहंतुं मधुकैटभौ ॥६८॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ ६९ ॥

हे देवि, इत्थं वर्णितैरुदारैर्दक्षिणैः सरलैः वरैः स्वैरात्मीयैः प्रभावैः सामर्थ्यविशेषैः संस्तुता जगन्मोहयंती त्वमेतौ इमौ । यद्वा । आ इतौ एतौ आगतौ दुर्धर्षौ दुःखेनाभिभवनीयौ मधुकैटभौ नाम असुरौ सुरद्विषौ मोहय अविवेकं प्रापयेत्यन्वयः । " दक्षिणे सरलोदारौ " ॥ ६६ ॥ हे देवि, त्वया जगत्स्वाम्यच्युतः दैत्यारिर्विष्णुर्लघु शीघ्रं प्रबोधं च उन्निद्रभावं नीयतां त्वया समुच्यताम् । किंच एतौ महासुरौ हंतुमस्य अच्युतस्य विष्णोर्बोधश्च क्रियताम् । उत्साहानुकूल्यं बुद्ध्युन्मेषश्च क्रियतां रच्यतामित्यन्वयः । प्रबोधमिति प्रधाने कर्मणि द्वितीया । अप्रधाने कर्मणि तु नीयतामिति तिङाभिहितत्वात्प्रथमा ॥ ६७ ॥ तदा तस्मिन् प्रलये काले तत्र विष्णुनाभिकमले वेधसा ब्रह्मणा एवं स्तुता तामसी तमोगुणसंमता निद्रात्मिका देवी मधुकैटभौ निहंतुं विष्णोः प्रबोधनार्थाय तस्यैव नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वक्षसश्च निर्गम्य व्यक्तजन्मनः प्रकटजननस्य ब्रह्मणः अव्यक्तजन्मनश्च ब्रह्मणः दर्शनविषये तस्थौ प्रकटीबभूवेति श्लोकद्वयान्वयः । अव्यक्तात्प्रधानाज्जन्म यस्य सः अव्यक्तादात्मनः जन्म यस्य वा । यतोऽसावात्मनाभूत् । नेत्रे च आस्यं च नासिका च बाहवश्च हृदयं चेति द्वंद्वः । प्राण्यंगत्वात्प्राप्तस्यैकवद्भावस्य " न दधिपयआदीनि " इति निषेधाद्बहुवचनम् । यद्वा अयंते अयाः प्राणाः नेत्रास्यनासिकाबाहुहृत् तेन सहिता अयाः प्राणाः उच्छ्वासनिःश्वासलक्षणास्तेभ्यः सकाशेभ्यः उरसश्च निर्गत्य निद्रा ब्रह्मदर्शनपथमगमदिति भावः ॥ ६८ ॥ ६९ ॥ तया निद्रया देव्या मुक्तः परित्यक्तो जगन्नाथो जनार्दनः विष्णुश्च एकार्णवे जगत्येकजलपूरे अहिशयनात् शेषनागशयनात्सकाशादुत्तस्थौ उत्तस्थिवान् ततः शयनादुत्थाय उत्थानादनंतरं वा स जनार्दनस्तौ मधुकैटभौ ददृशे । तावपि तं ददृशाते । परस्मैपदं बाधित्वा कर्त्तरि कर्मव्यतिहारे आत्मनेपदम् । विष्णुकर्तृकं दैत्यकर्मकं तावद्दर्शनं व्यतिबभूवे । अथ च तावत् । दैत्यकर्तृकविष्णुकर्मकं दर्शनं व्यतिबभूवे । अन्यथा ददर्श इति

उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ॥ एकार्णवे हि शयनात्ततः स ददृशे च तौ ॥ ७० ॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ ७१ ॥

स्यात् ॥ ७० ॥ कीदृशौ ददृशे जनार्दनः । मधुश्च कैटभौ च तौ मन्यतेऽहमेव वीर इति मधुः । कीटस्येव भा यस्य तत् कीटमं कर्णमलं तत्र भवः कैटभः । इह हि पृषोदरादित्वाद्ध इत्युत्तरपदलोपो द्रष्टव्यो भीमसेनो भीम इतिवत् । क्वचित् वृत्तभंगमनुसृत्य ततश्च मधुकैटभौ दुरात्मानाविति पाठः । " युजोर्जेन सरिद्भर्तुः पथ्यावक्रं प्रकीर्तितम् । " इति द्वितीये चरणे अतिवीर्यपराक्रमावित्यत्र चतुरक्षरादूर्ध्वं जगणस्य सत्त्वान्न वृत्तभंगः । तेन मधुकैटभावित्यत्र भौ इति न पठनीयमित्यर्थः । पथ्यावक्रतया नभौ । अन्यथा " मधुकैटभौ दुरात्मानौ " इति नवाक्षरपादत्वेन " अपि माषं मषं कुर्याच्छंदोभंगं न चाचरेत् । " इति छंदःशास्त्रसमयभंगप्रसंगः स्यात् । अथवाहुः । " छंदोवत्पुराणानि भवंति अन्यदेवेदं छांदसं छंदः । " यदभ्यधुस्तद्विदः । " न्यूनाधिकाक्षरत्वेन यत्र पादः क्वचिद्भवेत् । तद्वैदिकं निचृच्छंदो मृत्युंजयतुर्यथा ॥ " इति । दुरात्मानौ दुष्टबुद्धी । अतिवीर्यपराक्रमौ अत्युत्कृष्टबलौ अत्युत्कृष्टप्रभावौ अत्युत्कृष्टशक्ती अत्युत्कृष्टोद्योगौ च । " वीर्यं बलं प्रभावश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शत्त्युद्योगौ पराक्रमौ । " क्रोधरक्तेक्षणौ क्रोधेन रक्ते ईक्षणे ययोस्तौ प्रत्येकं तथोक्तौ । ब्रह्माणं हंतुं जनितोद्यमौ । दुर्विधिना जानित उत्पादित उद्यम उत्थितः यमः कालो ययोस्तौ । यद्वा । जननं जनिः संजाता जनिर्यस्यासौ जनितः । तारकादित्वादितच् । जनितोद्यमावासन्नकालाविति यावत् ॥ ७१ ॥ ततः शयनात्समुत्थाय भगवानैश्वर्यादिमान् विभुः व्यापकः हरिः विष्णुस्ताभ्यामसुराभ्यां सह युगपत् बाहुप्रहरणः सन् पञ्च वर्षसहस्राणि युयुधे । " युध संप्रहारे " आत्मनेपदी दिवादिः । बाहव एव प्रहरणानि आयुधानि यस्यासौ । बाहुयुद्धं चकारेत्यर्थः । वर्षाणां सहस्राणि पंचेति संख्यायाः शब्दे प्राधान्येऽप्यन्वयार्थं वर्षाणामेव प्राधान्यमिति कालस्यात्यंतसंयोगे द्वितीया । पञ्चसहस्राणि वर्षाण्यभिव्याप्य युद्धं व्यधादिति भावः ॥ ७२ ॥ अतिबलोन्मत्तौ महामायाविमोहितौ संतौ तावप्यसुरौ अस्मत्तो वरो वांछितोऽर्थस्त्वया व्रियतामिति केशवमुक्तवंतौ ऊचतुः । अत्यधिकबलेन सामर्थ्येन उन्मत्तावधिकमदौ महामायया विमोहितौ प्रयुक्तौ प्रापिताविवेकौ अस्मत्त

समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ॥ पंच वर्षसहस्राणि बाहुप्रहरणो विभुः ॥७२॥ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ॥
उक्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥७३॥ श्रीभगवानुवाच ॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ किमन्येन वरेणात्र एता-
वद्धि वृतं मया ॥७४॥ ऋषिरुवाच ॥ वंचिताभ्यामिति तदा सर्वमापोमयं जगत् ॥ विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥७५॥

आवाभ्याम् । प्रशस्तः केशः केशवः विष्णुः ॥७३॥ असुरौ प्रति विष्णुरवोचत् । अद्येदानीं चेद्भवंतौ मे तुष्टौ स्तः तर्हि उभावपि असुरौ मम वध्यौ मया हंतुमर्हौ । इह "हनो वा वध च" इति यत्तथेति तु घात्यौ भवेतां स्याताम् । अत्र च प्रतिपक्षे विषये किमन्येन वधादपरेण कृतं स्यात् । वधादितरवरे प्रार्थिते शत्रुशेषप्रसंगः स्यात् । तदन्यत्तु वस्तु भगवतो ममाप्रार्थ्यं सिद्धमेवेत्याशयादाह । भवन्तौ मया एतावद्धि एतावदेव भवत्कर्मकमत्कर्तृकवधलक्षणं वृतं प्रार्थितं नान्यत् । वाक्ये संधिकार्यमतंत्रम् । " एका एकशिरोरुहा त्रिचरणा एकेक्षणा द्विस्तनी " इतिवत् । अथवा वरेणात एतावद्धीति पाठः । अत एवाभ्यां भवद्भ्यामेतावदेव वधरूपं वस्तु मया वृतं नान्यदिति ॥७४॥ तदा असुरवधवरप्रार्थनाकाले विष्णुना महामायानुकूलेन वंचिताभ्यां विप्रलब्धाभ्यां मधुकैटभाभ्यां सर्वं जगदापोमयं विलोक्य भगवान् कमलेक्षणः पुंडरीकाक्षो विष्णुः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति गदितः । इति वक्ष्यमाणप्रकारेण उक्तः । “ विप्रलब्धस्तु वंचितः । आप्लृ व्याप्तौ । आपः कर्माख्यायाम् ” इति आपस्शब्दः सांतोऽप्यस्ति । आपोभिर्मार्जनं कुर्वीतवत् । अहांसि कर्मसाधनानि प्रकृतानि उच्यंतेऽस्मिन् जगति तत् आपोमयम् । “ तत् प्रकृतवचने मयट् ” । अथवा । “ आपः स्त्री भूम्नि । मय गतौ ” । अनुदात्तेत्वलक्षणमात्मनेपदं चक्षिङो ङित्वात्क्वचिदनित्यमिति लङि परस्मैपदम् । आपः कर्म्यः । जगत्कर्म । आपोमयं जगदित्यत्र नकारस्य श्चुत्वेन ञकारः । “सर्वमापोमयं जगत् ” सर्वं जगत् कर्म । आपः कर्म्यः । अमयन् अगच्छन् व्याप्तवत्य इति विलोक्य ताभ्यां हरिरुक्त इति योजना ॥ ७५ ॥ किं गदितः कमलेक्षणो भगवान् ताभ्याम् । हे विष्णो, तव युद्धेन आवामसुरौ प्रीतौ स्वः भवावः । हे विष्णो, त्वमावयोर्मधुकैटभयोः श्लाघ्यः स्तुत्यः मृत्युः अंतकालोऽसि । किंतु यत्रोर्वी भूमिः सलिलेन परिप्लुता नाभूत् तत्र आवां मधुकैटभौ जहि हन्याः इति ताभ्यां विष्णुरुक्तः। आवयोर्वधरूपं वरं वांछता मायिना तेन विष्णुना आवामसुरौ वंचिताबभूताम् । ततो येन नौ वधो न स्यात् स कोऽन्यस्त्वद्वधोपायः । अयमस्ति संप्रति सर्वं जगदापोमयं जलमयमेव वर्त्तते । ततश्च यत्रोर्वी जलमयी न दृश्येत तत्राव-

प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः ॥ आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ ७६ ॥

ऋषिरुवाच ॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥ कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ॥ ७७ ॥

योरसुरयोः त्वत्कर्तृको वधोऽस्त्विति । एवं चोक्तो हि सर्वापि पृथ्वी जलमध्ये चेति क्व नौ हनिष्यत्यसावित्यावाभ्यामसुराभ्यां मायाविभ्यां भगवानपि वंचितो भविष्यत्यशुभस्य कालयापनास्त्विति भावः । आपोमयमित्यत्र आपस् इति सांतमापोभिर्मार्जनं कुर्यादिति प्रयोगश्च । “ भूजिमृङ्भ्यां युक्त्युकौ । मृत्युः स्त्रीपुंसयोरंते ” जहीति हंतेर्विध्यादौ लोटि “ सेर्ह्यपिच्च । हंतेर्जः” आभीयतयाजस्यासिद्धत्वाद्धेर्लुगभावः । वधिः प्रकृत्यंतरमस्तीति केवलोऽप्यस्ति वधशब्दः शिष्टप्रयोगतः (?) ॥ ७६ ॥ सुमेधा ऋषिः सुरथं प्रति वाक्यमूचिवान् । हे मधुकैटभौ, यद्यथा युवाभ्यामगादि तत्तथा न ततोऽन्यथा इत्युक्त्वा शंखचक्रगदाभृता भगवता विष्णुना स्वकीये जघने उपस्थादूर्ध्वप्रदेशं तयोरसुरयोः शिरसीकृत्वा निधायावस्थाप्य वै प्रसिद्धेन चक्रेण छिन्ने कृते अच्छेदिषातामित्यन्वयः । प्रलयकालजलपूरो भगवतो जघनादधो ह्यभूदिति भगवतो जघनं जलप्लुतं च न । उर्वी च भवति पृथिव्यारब्धत्वात् । इत्थं विष्णुचक्रोच्छिन्नशिरस्कत्वात्तयोरसुरयोः श्लाघ्यमृत्युता च । शंखश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चक्रं च शंखचक्रं तेन सहिता गदा शंखचक्रगदा तां बिभर्ति शंखचक्रगदाभृत् तेन । यद्वा । स्त्रीकट्याः पुरोभागो हन्यते जघनमित्युपलक्षणम् ॥ ७७ ॥ एवंप्रकारेण ब्रह्मणा आत्मभुवा स्वयमात्मना संस्तुता एषा देवी समुत्पन्ना देवकार्यार्थं प्रादुरभूत् । हे राजन् सुरथ, त्वं भूयः पुनः भूयिष्ठं यथा भवति तथा च अस्याः देव्याः प्रभावं प्रादुर्भावं सामर्थ्यं च शृणु आकर्णय । भूयस्ते वदाम्यहम् । सुमेधा नामर्षिः ॥ ७८ ॥ इति श्रीमद्राजाधिराजश्रीमत्तोमरान्वयश्रीमिदुद्धरणात्मजश्रीशंतनुचक्रवर्त्तिविरचितायां शांतनव्यां मार्कण्डेये चंडिकामाहात्म्यटीकायां मधुकैटभवधविष्ण्युपलक्षितः प्रथमोऽध्यायः ॥ १ ॥ सावर्णिं मनुं कायति सावर्णिकं सावर्णिः प्रयोजनमस्येति सावर्णिकम् । पुराकल्पे महिषासुरे असुराणामधिपे सति देवानां च पुरंदरे इंद्रे अधिपे सति देवासुरं युद्धं पूर्णमन्यूनमब्दशतं वर्षशतमभूदित्यन्वयः ।

एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ॥ प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ॥ ७८ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्यायः ॥ १ ॥ ऋषिरुवाच ॥ देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ महिषेऽसुराणामधिपे देवानां च पुरंदरे ॥ १ ॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥ जित्वा च सकलान्देवानिंद्रोऽभून्महिषासुरः ॥ २ ॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥ पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ३ ॥

असुराणां विजिगीषूणामिदमासुरं देवानामासुरं देवासुरम् । अथवा । देवैः सह आसुरं देवासुरं युद्धम् । यद्वा । देवाश्चासुराश्च देवासुरं "येषां च विरोधः शाश्वतिकः" इति एकवद्भावः । तस्मिन्नस्ति तद्देवासुरं युद्धम् । अर्शआदित्वादच् । यद्वा । देवासुरस्येदं देवासुरं युद्धम् । "संज्ञापूर्वको विधिरनित्यः" इति ह्यादिवृद्ध्यभावः । अन्यथा दैवासुरमेव स्यात् । पुराण्यरीणां दारयति पुरंदरः । "वाचंयमपुरंदरौ च" इति खश् । महिषेऽसुराणामधिपे इति निचृच्छंदो मधुकैटभौ दुरात्मानावितिवत् ॥ १ ॥ तत्र युद्धे महावीर्यैरसुरैर्देवसैन्यं पराजितमभिभूतमभ्यभावि । ततश्च महिषासुरः सकलान् देवान् जित्वा अभिभूय इंद्रोऽभूदित्यन्वयः । "वीर्यं बलं प्रभावश्च वीरकर्म च कीर्तितम् ।" सिनोति बध्नाति सह इनेन स्वामिना वर्त्तते वा सेना सेनैव सैन्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् ॥ २ ॥ ततो महिषासुरात्पराजिताः प्राप्तपराभवाः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवाः पद्मयोनिं पद्मजं प्रजापतिं ब्रह्माणं पुरस्कृत्य पुरोधाय तत्र गताः । क्व । यत्रेशः शर्वः यत्र च गरुडध्वजो विष्णुरास्ते इत्यन्वयः । "योनिः स्यात्कारणे भगे"। पुरोऽव्ययं गत्याख्यम् । "पराजेरसोढः" इत्यपादानाख्या ॥ ३॥ त्रिदशा देवास्तयोरीशकेशवयोरग्रे यथा येन प्रकारेण वृत्तं निष्पन्नं महिषासुरचेष्टितमौद्धत्यं तद्वत्तथैव प्रकारेण वृत्तं देवाभिभवविस्तरं शब्दप्रपंचनं कथयामासुः । अथवा त्रिदशास्तयोरीशकेशवयोरग्रे यथावृत्तं वृत्तं चरित्रमनतिक्रम्य महिषासुरचेष्टितं कथयामासुः । तद्वन्महिषासुरचेष्टितवत् । यथावृत्तं वृत्तमनतिक्रम्य देवाभिभवविस्तरं देवानामभिभवो यस्मिन् स विस्तरो यस्मिन् कर्मणि तद्यथा भवति तथा कथयामासुः । महिषासुरचेष्टितं देवाभिभवं च विस्तरसहितं कथयामासुरिति भावः ॥ ४ ॥ चकारेणानुक्तदिक्पत्यनुक्तग्रहाः गृह्यंते । ततोऽन्येषां ब्रह्मर्षीणां च अमीषां सूर्यादीनामधिकारान् स महिषासुरः स्वयमेवाधितिष्ठति सूर्यस्येंद्राग्न्योरनिलस्येंदोर्यमस्य वरुणस्य ततोऽन्येषां च देवानामृषीणां च अधिकारेषु स्वयमेव महिषासुरस्तिष्ठति । "अधिशीङ्-

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ४॥ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च ॥
अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥५॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ विचरंति यथा मर्त्या महिषेण दुरात्मना
॥ ६ ॥ एतद्वः कथितं सर्वममरारिविचेष्टितम् ॥ शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यताम् ॥ ७ ॥

स्थासां कर्म" इति अधिकरणं कर्माख्यम् । "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" अन्यथाभिधाने ॥ ५ ॥ दुरात्मना तेन महिषेणासुरेण सर्वे देवगणाः स्वर्गान्निराकृताः संतः भुवि विचरंति । मर्त्या यथा मरणधर्माणो मनुष्या इव प्रत्याख्याताः निरस्ताः निराकृताः ॥ ६ ॥ अत्र व इति ब्रह्मविष्णुमहेश्वरापेक्षं बहुवचनम् । अस्माभिर्देवैरिंद्रादिभिः एतदमरारिविचेष्टितं देवरिपोर्महिषासुरस्य चेष्टितमौद्धत्यं देवाभिभवं च सर्वं निरवशेषं च युष्माकमग्रे कथितं वयमिन्द्रादयः सर्वे वो युष्मान् शरणं रक्षितॄन् दुःखेभ्यः पालयितॄन् प्रपन्नाः प्राप्ताः स्मः । तस्य महिषासुरस्य वधो हननं विचिन्त्यताम् । येन स हन्येत स उपायो युष्माभिश्चिंतनीयः । "शॄ हिंसायाम्" शृणाति शत्रून् "शरणं गृहरक्षित्रोः । वेदाः प्रमाणम्" इतिवच्छरणमिहैकवचनांतं विवक्षितम् । अस्तेर्लट्युत्तमपुरुषबहुवचनांतं स्म इति । "वध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हिंसायाम् ” वधनं वधः । भावे घञ् । “जनिवध्योश्च” इति वृद्ध्यभावः । अत एव च वधितुमर्हौ वध्यौ । “ ऋहलोर्ण्यत् ” इति वृद्ध्यभावः । तथा च मम वध्यावु-मावपि इति प्राक्तने प्रयोगे इदं च साधनमवगंतव्यम् । “ हनो वा वध च” इति तु अदंतत्वं तत्र दर्शितम् । ममेति तत्र “ कृत्यानां कर्त्तरि च ” इति षष्ठी । यद्वा । तत्र वधमर्हतो वध्यौ । “ दंडादिभ्यो यः ” इति यः ॥ ७ ॥ इत्थं देवानां वचांसि निशम्य आकर्ण्य मधुसूदनः कैटभजित् विष्णुश्च शंभुश्च मृत्युंजयः कोपं चकार । तौ कीदृशाकृती । भ्रुकुटीकुटिलाननौ भृकुटीकुटिलाननौ भ्रकुटीकुटिलाननौ इति पाठत्रयम् । भ्रुकुटी भृकुटी भ्रकुटी स्त्रियः । “ कुट कौटिल्ये । इकृट्यादिभ्यः ” । यद्वा । “ सर्वधातुभ्य इन् ” । कुटादित्वात् ङित्त्वाद्गुणाभावः । कृदिकारादक्तिनो वा ङीष् । “ इको ह्रस्वो ङ्यो गालवस्य ” उत्तरपदिकं ह्रस्वत्वम् । अकारो वा भ्रकुंसादीनामिति पक्षे अत्त्वमौत्तरपदिकम् । ततश्च भ्रुवौ क्रोधात् भुग्ने कुटी इव भ्रुकुट्यौ ताभ्यां भ्रुकुटीभ्यां कुटिले भुग्ने आनने ययोस्तौ भ्रुकुटीकुटिलाननौ हरि-

इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ॥८॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः॥
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥९॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥ १० ॥

हरौ । निशम्येति । शमेर्णौ “ अत उपधायाः ” इति वृद्धौ “ शमोऽदर्शने ” इति सूत्रेण चक्षुःसाधनज्ञानादन्यत्र श्रवणे मित्त्वान्मितां ह्रस्वः । चक्षुःसाधनज्ञाने तु निशामय पश्येत्यर्थे ह्रस्वत्वाभावः । चकारात् ब्रह्मा च भ्रकुटीकुटिलाननः कोपं चकारेत्यनुसंधेयम् ॥ ८ ॥ ततोऽनंतरमतिकोपपूर्णस्य चक्रिणो विष्णोर्ब्रह्मणः शंक-रस्य ततो विस्तृतात्तस्माच्च वदनात्सकाशान्महत्तेजो निश्चक्राम निरगात् । “ तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि कीर्त्तितम् । ” ॥ ९ ॥ तेभ्यस्त्रिभ्योऽन्येषां शक्रा-दीनां च देवानां सुमहत्तेजः कर्तृ शरीरत एव निर्गतं निरगमत् । तत्तेजः कर्तृ ऐक्यमेकमपृथक् समगच्छत समपद्यत एकमभवत् । ऐक्यमिति चातुर्वर्ण्यादित्वात्स्वा-र्थे ष्यञ् । “ अकर्मकाच्च ” इत्यनुवृत्तौ “ समो गम्यृच्छि ” इत्यादिसूत्रेण गमेरात्मनेपदं तङ् । तच्चैक्यं समपद्यतेत्यपि क्वचित्पाठः । सकर्मकत्वे परस्मैपदम् । तच्चै- ॥१७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कतां समगच्छत् ॥ १० ॥ ते इंद्रादयः सुराः तत्र देवसदसि । यद्वा । तत्र दैवे तेजसि देदीप्यमाने जृंभमाणे जयति । अतीव अत्यर्थं सुतरां सुष्ठु ज्वालाव्याप्तदिगंतरं ज्वालाभिरर्चिर्भिर्व्याप्तं विद्योतितं दिशां दशानामंतरं मध्यमंतरालं येन तथोक्तं ज्वलंतं दीप्यमानं पर्वतमिव हेमाद्रिमिव तेजसः कूटं पुंजं ददृशुर्दृष्टवंतः । " माया निश्चलयंत्रेषु कैतवानृतराशिषु । अयोधने शैलशृंगे सीरांगे कूटमस्त्रियाम् । बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ " ॥ ११ ॥ तत्र देवसदसि तत्प्रागुत्पन्नं ब्रह्मविष्णुरुद्रमुखजं तेजस्तत्पश्चादुत्पन्नं इंद्रादिसर्वदेवशरीरजं च तेजः उभयत्विषा अतुलमनुपमं त्विषा दीप्त्या व्याप्तलोकत्रयमेकस्थमेकस्मिन्नेव समवायिनि तिष्ठत् एकत्वेनापृथग्भावेन तिष्ठत् वर्त्तमानं सन्नारी अभूत् । तत्तेजः स्त्रीरूपमभवदिति भावः । " नृनरयोर्वृद्धिश्च " इति शार्ङ्गरवादिपाठात् नृत्वजातिविवक्षायां ङीनि वृद्धिः ॥१२॥

अतीव तेजसः कूटं ज्वलंतमिव पर्वतम् ॥ ददृशुस्तेऽसुरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ ११ ॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥१२॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मुखम् ॥ याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १३ ॥ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नितंबस्तेजसा भुवः ॥ १४ ॥ ब्रह्मणस्तेजसा पादौ तदंगुल्योऽर्कतेजसा ॥ वसूनां च करांगुल्यः कौबेरेण च नासिका ॥ १५ ॥

यच्छंभोरिदं शांभवं तेजः तेनास्याः मुखमजायत समजनिष्ट । याम्येन यमदेवताकेन तेजसा तस्याः नार्याः केशाः अभवन् । विष्णुतेजसा तस्याः नार्याः बाहवश्चाभवन् । " दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः " इत्यत्र यमाचेति वक्तव्यमित्याहुः ॥ १३ ॥ सौम्येन सोमदेवताकेन तेजसा तस्याः नार्यास्तनयोर्युग्ममभवत् । ऐंद्रेण तेजसा मध्यमभवत् । वरुणसंबंधिना वारुणेन तेजसा जंघोरू जंघाभ्यां सहितौ ऊरू जंघोरू अभवताम् । जंघे च ऊरू च वारुणेन तेजसा प्रत्येकमभूतामित्यर्थः । अन्यथा जानुबाहुवत्प्राण्यंगत्वादेकवद्भावान्नपुंसकत्वात् ह्रस्वत्वं स्यात् । जंघोरू इति न दधिपयआदित्वान्नैकवत्त्वमिति पक्षे जंघा च ऊरुश्चेति जात्यैकवचनं विग्रहे । भुवस्तेजसा नितंबः कटिदेशः अभवत् ॥ १४ ॥ ब्रह्मणस्तेजसा तस्याः नार्याः पादावभवतां तदंगुल्यः पादयोरंगुल्यः अर्कतेजसाभवन् अष्टानां वसूनां च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेजसा करांगुल्योऽभवन् । कौबेरेण कुबेरसंबंधिना तेजसा नासिका अभवत् ॥१५॥ तस्याः नार्याः दंतास्तु प्राजापत्येन प्रजापतिसंबंधिना तेजसा संभूताः समभवन् । प्राग्दीव्यतीयेष्वर्थेषु " दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः " । तथा नयनत्रितयं नेत्रत्रयं पावकतेजसा वह्नितेजसा जज्ञे अजनिष्ट । जनेः कर्त्तरि परोक्षे लिट्यात्मनेपदम् ॥ १६ ॥ तस्याः नार्याः ये भ्रुवौ तत्संध्ययोस्तेजः । यद्वा । यत्संध्ययोस्तेजः तत्तस्याः नार्याः भ्रुवाविति ह्युभयथा योज्यम् । तथा अनिलस्य वायोर्यत्तेजः तौ तस्या नार्याः श्रवणौ शब्दग्रहणौ । यद्वा । यौ तस्याः नार्याः श्रवणौ शब्दग्रहणौ तदनिलस्य वायोस्तेजः इत्युभयथापि योज्यम् । तदित्थमुक्तानां च ततोऽन्येषां च देवानां संबंधिनां तेजसां संभवः सा शिवा सा सर्वमंगला देवी । यद्वा या शिवा सर्वदेवानां तेजसां संभवः इत्युभयथापि योज्यम् । निर्दिश्यमानप्रतिनि-

तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १६॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १७ ॥ ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ॥ तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥ १८॥ ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च ॥ ऊचुर्जय जयेत्युच्चैर्जयंतीं ते जयैषिणः ॥१९॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः ॥ २० ॥

र्दिश्यमानयोरेकत्वमापादयंति । सर्वनामानि पर्यायेण तल्लिंगसंख्याभांजि भवंति । श्रूयते शब्द आभ्यामिति करणे ल्युटि श्रवणौ शब्दग्रहौ इति पुंल्लिंगता । " कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः । " इत्यभिधानतस्तु नपुंसकत्वे श्रवणे अनिलस्य चेति पाठोऽपि लभ्यः ॥ १७ ॥ ततः शिवायाः देव्या आविर्भावानंतरं समस्तदेवानां तेजोराशिसमुद्भवां तेजःपुंजात्समुद्भवंतीं तां सर्वमंगलां देवीं विलोक्य अमराः प्राक् महिषार्दिता अपि महिषासुरेण हिंसिता अपि प्रीतिं प्रापुः प्राप्तवंतः । " अर्द हिंसायाम् " चुरादिः क्तः कर्मणि ॥१८॥ ततो देवीदर्शनतः प्रमोदावाप्त्यनंतरं ते देवाः जयैषिणः संतस्तां देवीं जयंतीं जय जयेत्युच्चैरूचुः । अथ ते देवाः सर्वेऽपि तस्यै देव्यै स्वानि स्वान्यायुधानि च ददुः ॥ १९ ॥ देवायुधानि मंत्रध्यानवशंवददेवताकृतीन्यत्यद्भुतशक्तीनि इति शूलाधिदैवताद्विनिष्कृष्य पिना-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कभृत् पिनाकी शिवः तस्यै देव्यै शूलमायुधं स्वसदृक्षमायुधं ददौ दत्तवान्। आयुधाधिदेवतासामर्थ्यादायुधं सूते यत्तत्तस्यै दत्तवानिति भावः। "अस्त्री शूलं रुगायुधम्"। कृष्णश्च विष्णुश्च स्वचक्रतः सुदर्शनाख्चक्रतः समुत्पाट्य आकृष्य तस्यै देव्यै दत्तवान्। यथा देवतेजोमयी देवी समभवत्तथा तदायुधान्यपि देवायुधसमुद्भवान्येव दैवतेच्छयेति नात्राश्चर्यमिति भावः॥ २०॥ वरुणश्च शंखं तस्यै देव्यै ददौ। हुताशनश्चाग्निस्तस्यै देव्यै ददौ शक्तिमायुधविशेषम्। अत्रापि शंखतः शक्तितश्च शंखं शक्तिं चाकृष्य दत्तवंतौ ताविति भावः। मरुदेव मारुतः वायुस्तस्यै देव्यै चापं दत्तवान्। तथा मारुत एव बाणपूर्णे शरसंभूते इषुधी दत्तवान् तस्यै देव्यै अक्षयबाणपूर्णेतूण्यौ दत्तवान्। "तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोः।" इषवो धीयंतेऽत्र इषुधिः इषुधी इति द्विवचनं सव्यापसव्याभ्यां चापाकर्षणसूचनार्थम्॥२१॥ अमराधिपः सहस्राक्ष इंद्रः शचीपतिः कुलिशाद्वज्रात् सकाशाद्वज्रं पविं समुत्पाट्याकृष्य तस्यै ददौ। किंच स एवेंद्रः शचीपतिः ऐरावतात्स्वर्गजात् सकाशात् घंटां च महती-

शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी॥२१॥ वज्रमिंद्रः समुत्पाट्य कुलिशादमराधिपः॥ ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात्॥२२॥ कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुम्॥ २३॥

माकृष्य तस्यै देव्यै ददौ। "वज्रोऽस्त्री हीरके पवौ। संभवे व्यभिचारे च स्याद्विशेषणमर्थवत्। इदि परमैश्वर्ये" इंदति इंद्रः सोऽन्योऽपि स्यात् अतः उक्तममराधिप इति सोऽन्योऽपि देवः स्यात् अत उक्तं सहस्राक्ष इति। सहस्रमक्षीणि यस्य सः सहस्राक्षः सोऽहिः शेषोऽपि सहस्राननत्वात् सहस्रमेव अक्षीणि यस्येत्येवं धृतविग्रहत्वस्य विवक्षितत्वादशे (दो) षः "सुरूढिर्योगमपहरति" इति तु न्यायोऽत्र नाश्रितः। तत्र ह्याश्रित्वे (ते) ऽयं व्यावृत्त्या कीर्त्तनेन श्ले (शे) षो नास्तीति। यद्यपि स्यात् तथापि तदा(दना) श्रयणजनितः पौनरुक्त्यदोषः प्रसज्येतेत्यलं विस्तरेण। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच्" समासांतः॥२२॥ यमोंऽतकः कालदंडादाकृष्य दंडं कालदंडमायुधं तस्यै देव्यै ददौ। अंबुपतिश्च वरुणः पाशादाकृष्य पाशं ददौ। तस्यै देव्यै पाशाख्यमस्त्रं ददौ। "आशाख्याशालिशीप्रार्थौ पाशो बंधनशस्त्रयोः।" प्रजापतिर्ब्रह्मा तस्यै देव्यै अक्षमालां जपमालां कमंडलुं च ददौ। "अस्त्री कमंडलुः कुंडी"। ब्रह्मा विप्रोऽपि कश्चित् स्यात् अत उक्तं प्रजापतिरिति। स मनुरपि स्यात्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत उक्तं ब्रह्मेत्यपि । " वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः । " ॥ २३ ॥ रविर्निजानात्मीयान् रश्मीन् किरणान् तस्या देव्याः समस्तेषु रोम्णां कूपेषु ददौ निक्षिप्तवान् । " किरणप्रग्रहौ रश्मी । स्वके नित्ये निजं त्रिषु " । कालो यमः तस्यै देव्यै निर्मलं खड्गं निर्मलं स्वच्छं चर्म दत्तवान् । अंगत्राणसाधनं फलकं चर्म दत्तवान् । " फलकोऽस्त्री फलं चर्म । कालो मृत्यौ महाकाले यमेऽनेहसि च स्मृतः । " ॥ २४ ॥ क्षीराण्युदकानि यस्य यस्मिन् वा स क्षीरोदश्च । " उदकस्योदः संज्ञायाम् " । क्षीराब्ध्यधिदैवतः अमलं हारं मुक्ताफलहारं ददौ दत्तवान् । तथा स एव क्षीरोदस्तस्यै देव्यै अजरे च नूतने जरारहिते अंबरे वाससी दत्तवान् । " अंबरं व्योम्नि वाससि " ॥ २५ ॥ चूडामणिमित्यारभ्य श्लोकत्रयमेककर्तृकैकक्रियकं द्रष्टव्यम् । तथा हि विश्वकर्मा देवशिल्पी सूर्योऽपि । यदप्यभ्यधुः विश्वकर्माऽर्केसुरशिल्पिनोरिति । विश्वस्य कर्मास्मादर्कात् । विश्वं कर्मास्य सुरशिल्पिन इति विश्वकर्मा । स देवशिल्पी तस्यै देव्यै यथा चातुर्येण रचितं दिव्यं दिवि भवम् ।

समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥ कालश्च दत्तवान्खड्गं तस्यै चर्म च निर्मलम् ॥ २४ ॥ क्षीरोदश्चामलं हारमजरे च तथांबरे ॥
चूडामणिं तथा दिव्यं कुंडले कटकानि च ॥२५॥ अर्धचंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु ॥ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् ॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥२६॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ॥२७॥

" द्युप्रागपागुदक्प्रतीचो यत् " । चूडामणिं शिरोरत्नं ददौ । तथा कुंडले कर्णवेष्टने सुवर्तुले तस्यै स एव विश्वकर्मा ददौ । कटकोऽर्द्धर्चादित्वादस्त्रियाम् । तथा स एव तस्यै देव्यै शुभ्रमर्द्धचंद्रस्य समप्रविभागः अर्द्धचंद्रस्तां ददौ । " अर्द्धं नपुंसकम् " इति समासः । " परवल्लिंगं द्वंद्वतत्पुरुषयोः " तथा स एव विश्वकर्मा तस्यै देव्यै सर्वबाहुषु केयूरान् केयूराणि अंगदानि ददौ । केयूरोऽर्द्धर्चादित्वादस्त्रियाम् । तद्वत्पूर्ववत् स एव विश्वकर्मा तस्यै देव्यै तस्याः देव्याः पादयोर्नूपुरौ मंजीरौ विमलौ निर्मलौ मंजीरौ ददौ । " पादांगुलं तुलाकोटिर्मंजीरो नूपुरोऽस्त्रियाम् । " हंसकः पादकटकं तद्वत् पूर्ववच्चातुर्येण रचितम् । अनुत्तमं नास्त्यतोऽन्यदुत्तमं यस्मात् तदनुत्तमं वरेण्यं ग्रैवेयकं ग्रीवालंकारं कंठभूषणं तस्यै देव्यै ददौ विश्वकर्मा । " कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु " इति ढकञ् । " नास्त्रसत्कारिणां ग्रैवम् " इत्यत्र त्वनलंकार-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वादणेव । तथा स एव विश्वकर्मा देवशिल्पी तस्याः देव्याः समस्तासु सकलासु अंगुलीषु योग्यानि अंगुलीयकरत्नानि तस्यै देव्यै ददौ । " जिह्वामूलांगुलेभ्यश्छः । स्वार्थे कन् " । अंगुलीषु भवानि अंगुलीयकानां रत्नानि अंगुलीयकान्येव वा रत्नानि । " रत्नं स्वजातिश्रेष्ठेऽपि " इत्यभिधानतः गुणतः श्रेष्ठानि मनोज्ञानि अंगुलीयकरत्नानि रमंतेऽस्मिन् रत्नं " जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ।" अंगुलीयकानि रत्नानि चेति द्वंद्वः । तथा स एव विश्वकर्माभेद्यं दंशनं च दिव्यं कवचं तस्यै देव्यै ददौ । दश्यंते बध्यंते दंशनम् । " तनुत्रं वर्म दंशनम् । उरश्छदः कंकटकोऽजगरः कवचोऽस्त्रियाम् ।" ॥ २६ ॥२७॥ जलधिः समुद्रस्तस्यै देव्यै शिरसि उरसि च अपराम्म्लानपंकजां मालां स्रजमददात् । "डुदाञ् दाने " । भूतानद्यतने लङ् । परस्मैपदम् । अददादिति पाठे तु "दद दाने" चक्षिङो ङित्करणलिंगादनुदात्तेत्त्वनिबंधनमात्मनेपदमनित्यमित्यात्मनेपदाभावः । किं च स एव जलधिः तस्यै देव्यै अतिशोभनमत्यर्थं मनोहरं पंकजं लीलारविंदमददात् अददद्वा । अम्लानानि अशुष्काणि सदैवार्द्रीभूतानि यस्यां सा तथोक्ता ताम् । यद्वा नास्ति म्लानं म्लानिः सर्वदैव येषां तानि अम्लानानि पंकजानि यस्यां सा ताम् । माल्यते धार्यते माला

अम्लानपंकजां मालां शिरस्युरसि चापराम् ॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनम् ॥ २८ ॥
हिमवान्वाहनं सिंहं रत्नानि विविधानि च ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ २९ ॥

स्रक्ताम् । आसमंतादाप्ता आप्तिक्रियापेक्षया आशब्दस्योपसर्गत्वम् । आपोऽभांसि यैः यानि वा तानि आपानि पंकजानि तानि राति गृह्णातीति आपरा ताम् । " ऋक्पूरब्धूः पथामानक्षे " इति अः समासांतः द्व्यंतरुपसर्गेभ्योऽप ईत्तु न ईत्त्वमनवर्णांतादिति वक्तव्यमिति स्मरणात् । इत्थं च आपरामिति च्छेदः । यद्वा नास्ति परं श्रेष्ठं यतः सा अपरा अनुत्तमा ताम् । यद्वा न विद्यंते पराः शत्रवो यत्र धार्यमाणायां सा ताम् । यद्वा ततो देवीतः अपरा न परा अपरा अभिन्ना अपृथग्भूता सदैव संलग्ना ताम् । यद्वा शिरसि उरसि च अपरां पृथग्भूताम् । शिरसि मालां माल्यरूपां स्रजं " माल्यं माला स्रजौ मूर्ध्नि " इत्यभिधानात् । उरसि तु कंठात्प्रालंबरूपां मालां "प्रालंबमृजुलंबि स्यात्कंठात् " इत्यभिधानात् । कंठाद्वक्षस्यवलंबमानं माल्यं मालाख्यं प्रालंबमुच्यत इति अपरत्वं पृथक्त्वं मालायाः ॥२८॥ हिमवान् अद्रिराजः तस्यै देव्यै सिंहं नाम वाहनं ददौ । वाहयति प्रापयति वाहनम् । यद्वा वहति वाहनम् । " वाहनमाहितात् " इति प्रयोगात् । " अन्येषामपि दृश्यते "

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति दीर्घः । यद्वा उह्यते प्राप्यतेऽनेनेति वाहनम् । "वाहनमाहितात्" इति निपातनादुपधादीर्घत्वम् । हिनस्ति सिंहः पंचास्यः कंठीरवः । किंच स एव हिमवान् तस्यै देव्यै विविधानि नानाप्रकाराणि रत्नानि अददात् । धनाधिपो धनदः सुरया अशून्यं सर्वदा परिपूर्णं पानपात्रं ददौ । सूयते परिवास्यते सुरा गंधोत्तमा ॥ २९ ॥ य इमां पृथिवीं धत्ते धारयति स सर्वनागेशः सर्वनागाधिपः शेषः अनंतश्च महामणिविभूषितं नागहारं नागरूपं हारं तस्यै देव्यै ददौ । नागाः सर्पेभ्योऽन्ये देवयोनयः इत्याहुः । "अनंतो नागराजः स्यात्सर्पराजस्तु वासुकिः ।" नागाः काद्रवेयाः । "काद्रवेये गजे सीसे नागः स्यान्नागकेसरे ।" ॥ ३० ॥ यैरायुधालंकारादिकं देव्यै समर्पितं देवैस्ततोऽन्यैरपि सुरैः सर्वैर्विभूषणैस्तथा आयुधैश्च संमानिता पूजिता सती देवी साट्टहासमत्यधिकहाससगर्भं यथा स्यात्तथा उच्चैरुदग्रं यथा स्यादुदात्तं वा यथा स्यात्तथा मुहुर्मुहुः वारंवारं ननाद । "णद अव्यक्ते शब्दे" । मुखतो नादमानंदतः सिंहनादं चकार । एतेन संग्रामतः शत्रून् संहरिष्यामीति

शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥३०॥ अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥
संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः॥३१॥तस्या नादेन घोरेण कृत्स्नमापूरितं नभः॥ अमायतातिमहता प्रतिशब्दो महानभूत्॥३२॥

वीररसाविर्भावः सूचितः सिंहनादेन । "क्ष्वेडा तु सिंहनादः स्यात्" । सिंहस्येव नादो नदनं वीराणां योद्धुकामानां खलु भवति । "अट्ट अतिक्रमणहिंसनयोः" भावे घञ् । अट्टनमट्टः अट्टेन जातो हासोऽट्टहासः अट्टहासेन सहितं साट्टहासं क्रियाविशेषणमेतत् ॥ ३१ ॥ तस्या देव्याः घोरेण भयंकरेण नादेन सिंहनादेन कृत्स्नं नभः अंतरिक्षमापूरितमभिव्याप्तं कवलितम् । अथ च अमायता अमा समीपे आयता आगच्छता अतिमहताऽऽदीर्घेण वर्धमानेन तेन सिंहनादेन घोरेण जनितः प्रतिशब्दः प्रतिध्वनिः महानभूत् । "इण् गतौ" । आङ्पूर्वः यद्वा अनुपसर्गः । शतरि इणो यणादेशः तृतीयांतं नादेत्यस्य विशेषणमायतेत्यदः । "समीपार्थे सहार्थे च स्यादमेत्येतदव्ययम् ।" कश्चित् "माङ् माने" दैवादिकः । आत्मनेपदानित्यत्वेन शत्रंतं मायतेत्येतदित्याख्यत् तन्न ङित्त्वनिमित्तात्मनेपदस्य नित्यत्वाभ्युपगमात् । यद्वा "माङ् माने" दिवादिः भूतानद्यतने लङ् । तेन नादेन कृत्स्नं नभः आपूरितं सत् अमायत परिमितमजायत । अहो विभु नभः अनंतं महत्परिमाणमपि ॥२०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेन सिंहनादेन आपूरितत्वादमायत परिमितमजायतेत्याश्चर्योक्तिः । अन्यथा विभुतावन्न परिमीयते । परिमीयते चेद्विभुत्वव्याहतिरिति ॥ ३२ ॥ तेन प्रतिशब्देन निमित्तेन सकला लोकाः चुक्षुभुः क्षोभमापुः । " क्षुभ संचलने । लोकस्तु भुवने जने । " तेन शब्देन समुद्राश्च चकंपिरे सरित्पतयश्च कंपमापुः । " कपि चलने " चचाल वसुधा भूश्चलनमाप । " चल कंपने " । चेलुः सकलाश्च महीधराः पर्वताः चेलुः चकंपिरे कंपमापुः । " चल कंपने " सर्वत्र कर्त्तरि लिट् ॥ ३३ ॥ जयेति च मुदा देवास्तामूचुः सिंहवाहनां सिंहो वाहनं यस्याः सा सिंहवाहना तां सिंहवाहनां देवीं जयलोकोत्कर्षेण वर्त्तस्व यद्वा जय शत्रूनभिभव इति देवाः मुदा हर्षेण ऊचुरुक्तवंतः । सिंहवाहिनीमिति पाठे सिंहेन वाहयत्यात्मानं सिंहवाहिनी । यद्वा सिंहं वाहयति युद्धे चिर्ती प्रापयति सिंहवाहिनी ताम् । अथो एनां देवीं भक्तिनम्रात्ममूर्तयो मुनयस्तुष्टुवुः चकारादानर्चुश्च । भक्त्या नम्रा आत्ममूर्त्तयो येषां ते तथोक्ताः आत्ममूर्त्तयः स्वकायाः ॥ ३४ ॥

चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ॥ चचाल वसुधा चेलुः सकलाश्च महीधराः॥३३॥जयेति देवाश्च मुदा तामूचुः सिंहवाहनाम् ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥३४॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥३५॥

तादित्थं देव्याः साट्टहाससिंहनादेन समस्तं त्रैलोक्यं त्रिभुवनं संक्षुब्धं दृष्ट्वा प्राप्तक्षोभं वीक्ष्य ते सर्वे अमरारयः महिषासुरादयः दैत्याः सन्नद्धाखिलसैन्याः उदायुधाः संतः समुत्तस्थुः योद्धुमुत्थिता अभवन् इत्यन्वयः । सम्यक् क्षुब्धं यदाहुः । " क्षुब्धस्वांत " इति निपातनान्मंथातिरिक्तविषयः क्षुभितमिति प्राप्नोति तत्र परिहारः । क्षुब्धा गिरिनदीत्याद्यामिति । क्षुब्धागिरिनदीत्याद्युपमानाद्भविष्यतीति । त्रयो लोकास्त्रैलोक्यं चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् । अमराणामरयः अमरा वा अरयो येषां ते अमरारयः । महिषासुरादयो दैत्याः सन्नद्धाः व्यूढकंकटाः अखिलाः सैन्याः सैनिकाः येषां सेनाधीश्वराणां ते तथोक्ताः । " सन्नद्धो वर्मितः सज्जो दंशितो व्यूढकंकटः । सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ॥ " योद्धुमूर्ध्वानि कृतानि आयुधानि यैस्ते उदायुधाः समुत्तस्थुः । " अनोरूर्ध्वकर्मणि " इत्युक्तेर्नात्रात्मनेपदम् ॥ ३५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

" आस्तु स्यात्कोपपीडयोः " । महिषासुरः आ एतत् किमिति क्रोधात् आभाष्य उक्त्वा अशेषैरसुरैर्वृतः परिवेष्टितः सन् तं देव्याः सिंहनादलक्षणं शब्दमभ्यधावत अभिययौ । " धावु गतिशुद्धयोः " स्वरितेत्त्वादात्मनेपदम् ॥ ३६ ॥ श्लोकद्वयमेकान्वये द्रष्टव्यम् । ततः अभिधावनानंतरं स महिषासुरः तां देवीं ददर्श । कीदृशीम् । त्विषा दीप्त्या तेजसा व्याप्तलोकत्रयाम् । पादाक्रांत्या नतभुवं नम्रवसुधां किरीटेन उल्लिखितांबरां स्पृष्टगगनाम् । धनुर्ज्या-निःस्वनेन क्षोभिताशेषपातालां कंपितसकलरसातलाम् । भुजसहस्रेण समंतात् समंततः दिशः दश व्याप्य संस्थितां सम्यगवस्थिताम् । " किरीटं पुंनपुंसकम् । " धनुर्ज्या धनुषि आरोपिता मौर्वी समंतात् समंतत इत्यर्थेऽव्ययम् । " संस्थाधारे स्थितौ मृतौ " ॥ ३७ ॥ ३८ ॥ ततो देवीदर्शनादनंतरं तया देव्या सह

आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ ३६ ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ पादाक्रांत्यानतभुवं किरीटोल्लिखितांबराम् ॥ ३७ ॥ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थिताम् ॥ ३८ ॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगंतरम् ॥ ३९ ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ॥ ४० ॥

सुरद्विषां महिषासुरादीनां युद्धं प्रववृते प्रकर्षेण अवर्तिष्ट । कीदृक् युद्धम् । बहुधा मुक्तैरुज्झितैः प्रयुक्तैः प्रेरितैः शस्त्रास्त्रैः खड्गबाणादिभिः आदीपितदिगं-तरमासमंतात् दीपितमुद्द्योतितं दिशामंतरं मध्यमंतरालं यस्य यत्र वा तत् तथोक्तम् । क्रियाविशेषणं चैतत् स्यात् । यद्यथा । आयुधं तु प्रहरणं शस्त्रमस्त्रमि-त्यभिन्नार्थतयाभ्यधुस्तथापि शस्त्राणि खड्गादीनि करस्थानि । अस्त्राणि तु बाणादीनि मोक्तव्यानि इत्यस्यावांतरभेदः। अथवा "शस्त्रमायुधलोहयोः" इत्यभिधानात्। शस्त्रेण लोहेन कालायसेन निर्मितान्यस्त्राणि तैः। अतश्च सेनांगत्वनिबंधनैकवद्भावशंकाप्यपास्ता । शास्त्रैरिति पाठे शास्त्रैरायुधशास्त्रे कथितान्यस्त्राणि तैः। शास्त्रैस्तत्त-द्देवताकैर्मंत्रैः शिक्षितान्यस्त्राणि वा शास्त्राणि । यद्वा। शस्त्रस्य लोहस्येमानीत्यपि शास्त्राणि लोहमयानि तैः ॥ ३९ ॥ सेनां नयमानः सेनानीर्महिषासुरस्य सेनानीः

॥२१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सेनाधिपः चिक्षुराख्यः चिक्षुरसंज्ञः स महासुरः युयुधे । "युधः संप्रहारे" आत्मनेपदी संप्रहारो हननम् । अथ च । अतोऽन्यः चामरः चामराख्यः महासुरश्च चतुरंगबलान्वितः सन् युयुधे । संप्रजहार । "हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयम् । " चत्वारि अंगानि यत्र बले तेनान्वितः ॥४०॥ रथानां षड्भिरयुतैः अन्वितः रथानां षष्ट्या सहस्रैर्युक्तः। उदग्राख्यो महासुरः युयुधे । एकाद्याः संख्या अष्टादशपर्यंताः संख्ये येषु वर्त्तमानास्त्रिलिंगाः विशेष्यलिंगा भवंति । इह षड्भिरित्येतदयुतैरित्यस्य विशेषणं द्रष्टव्यम् । किं च । विंशत्याद्यास्तु सर्वाः संख्याः संख्यायां च संख्येये च वर्त्तमानाः सत्य एकवचनांता एव भवंति । किंच । संख्यामात्रार्थे वर्त्तमानायाः विंशत्यादेः संख्यायाः द्विवचनबहुवचने अपि भवतः सरूपाणामेकशेषारंभात् द्वे विंशती तिस्रो विंशतयः । गवां विंशती गवां विंशतयः । इह च षट् अयुतानि षड्भिरयुतैरित्ययुतशब्दस्य एकशेषस्ततो बहुवचनम् । एवमुत्तरत्रापि यथासंख्या व्युत्पत्तिरनुसंधेया । दश सहस्राणि अयुतम् । महाहनुर्नाम महासुरः रथानामयुतानि

रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ॥ अयुध्यतायुतानां च सहस्रेण महाहनुः ॥ ४१ ॥
पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥ ४२ ॥

यानि तेषामयुतानां सहस्रेण रथायुतसहस्रेण युद्धसाधनेन देव्या सह अयुध्यत । रथानां कोट्या साधनभूतया युद्धमकरोदित्यर्थः ॥४१॥ असयः खड्गा इव लोमान्यस्य असयः एव वा लोमानि यस्य सः असिलोमा नाम महासुरश्च रथानां पंचाशद्भिर्नियुतैः युद्धसाधनैः देव्या सह अयुध्यत युद्धमकरोत्।दश लक्षाणि नियुतम्। पंचाशन्नियुतानि पंच कोट्यः। रथानां पंचभिः कोटिभिरयुध्यतेत्यर्थः । द्वापंचतौ पंक्तिर्दश पंक्तयः शतं दश शतानि सहस्रं दश सहस्राण्ययुतं दशायुतानि प्रयुतं प्रयुतं तु लक्षमेव दश लक्षाणि नियुतमेव लक्षादुपरि गणितस्थानं नियुतमुक्तं गणितागमे लक्षमयं नियुतमिति एतेन तन्निरस्तम् । यत् " अयुतं दशसाहस्रं नियुतं स्याद्दशायुतैः।" इति। नियुतं दशायुतैरित्येतदमूलप्रमाणमुपेक्ष्यं प्रेक्षावद्भिः। विंशत्याद्याः सदैकत्वे यद्यपि स्युस्तथापि संख्यामात्रेऽर्थे वर्त्तमानानां विंशत्यादीनां संख्यानां द्विवचनबहुवचने अपि भवतः एकशेषात् । ततश्च पंचाशद्भिरिति । अत्र बहुवचनं युक्तं नियुतैरित्यत्र बहुत्वात् । रणे युद्धे बाष्कलो नाम महासुरः अयुतानां षड्भिः शतैर्युयुधे ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रथानां यानि षड्भिः शतैर्गुणितानि षष्टिलक्षाणि तैः साधनैर्देव्या समं बाष्कलो युद्धं चकार ॥४२॥ तस्मिन् युद्धे उग्रदर्शनो नाम महासुरः अनेकैर्गजवाजिसहस्रौघैश्च रथानां कोटचा च वृतः परिवेष्टितः सन् देव्या सममयुध्यत । गजाश्च वाजिनश्च भूयांसः गजवाजि । सेनांगत्वात् द्वंद्वैकवद्भावः । गजवाजिनो भूयांसः सहस्राणि अपरिमितानि तेषां समूहाः अनेकेऽपरिमितास्तैर्वृतः परिवेष्टितः । अथ च रथानां कोटचा वृतः परिवेष्टितः । कोटिः संख्याविशेषः कोटिरर्बुदसंज्ञा संख्याप्रयुतसंज्ञं लक्षमर्बुदसंज्ञा कोटिरिति ह्याहुः ॥ ४३ ॥ अथ तत्र संयुगे संग्रामे विडालाख्यः विडालो नाम महादैत्यः रथानां पंचाशद्भिरयुतैः पंचभिर्लक्षैः परिवारितः परिवेष्टितः सन् देव्या समं युयुधे युद्धं चकार ॥४४॥ कालो नाम महादैत्यः रणे रथानां पञ्चाशता युतैः पञ्चाशत् संख्यागुणैस्तैरयुतैः पंचभिर्लक्षैर्वृतः वेष्टितः युयुधे । अपि च स एव तत्र संयुगे युद्धे तावद्भिरेव हस्तिभिर्वाजिभिः पदातिभिश्च सेनांगैः प्रत्येकं पंचभिः पंचभिर्लक्षैः परिवारितः सन् देव्या समं युयुधे ॥४५॥ तत्र संयुगे युद्धे अन्ये

गजवाजिसहस्रौघैरनेकैः परिवारितः ॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ ४३ ॥ विडालाख्यो महादैत्यः पंचाशद्भिरथायुतैः ॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥४४॥ वृतः कालो रथानां च रणे पंचाशतायुतैः ॥ युयुधे संयुगे तत्र तावद्भिः परिवारितः ॥४५॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥ युयुधुः संयुगे देव्या सह तत्र महासुराः ॥ ४६ ॥

च चिक्षुरादिभ्योऽपरे येऽसुरास्तत्र तेषु महासुरा अयुतशः अयुतैरयुतैः दशसाहस्रीभिः रथनागहयैः करणैर्वृताः परिवेष्टिताः संतः देव्या सह युयुधुः। चक्षिङो ङित्करणतोऽनुदात्तेत्त्वनिमित्तात्मनेपदस्यानित्यत्वात्परस्मैपदम् । अन्यथात्र युयुधिरे इत्येव न्याय्यम् । युध्यतेरनुदात्तत्वात् । इह अन्ये च तत्रेति निर्द्धारणे सप्तमी । ये चिक्षुरादिभ्योऽन्ये असुराः संति तत्र तेषु महासुरा इति यत्तदोरर्थतो नित्यसंबंधः । परतो यस्तत्रशब्दः स संयुगे इत्येतदपेक्षयाधिकरणसप्तम्यंतः । अयुतश इति । संख्यैकवचनाच्च वीप्सायामिति कारकवाचिनः संख्याशब्दाद्वीप्सायां शस्प्रत्ययः । रथैः सहिताः नागाः गजाः रथनागाः रथनागैः सहिताः हयाः रथनागहयास्तैः " सामानाधिकरण्याधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च " इति समासः । अन्यथा रथाश्च नागाश्च हयाश्चेति द्वंद्वे रथनागहयमिति सेनांगत्वादेकवद्भावः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यात् ॥ ४६ ॥ महिषासुरस्तत्र युद्धे रथानां दंतिनां हयानां च प्रत्येकं कोटिकोटिसहस्रैर्वृतः परिवेष्टितः सन् तया देव्या सह योद्धुमवहितोऽभूत् । कोटचा गुणिता कोटिः कोटिकोटिः कोटिकोटचा गुणितानि सहस्राणि कोटिकोटिसहस्राणि तैः चकारात्पदातीनामपि तावद्भिरेव कोटिकोटिसहस्रैर्वृत इत्यवगंतव्यम् ॥ ४७ ॥ संयुगे युद्धे चिक्षुराद्याः सर्वेऽपि महासुरास्तोमराद्यैरायुधैः साधनैः देव्या समं युयुधुः । चक्षिङो ङित्करणादत्र आत्मनेपदानित्यत्वात्परस्मैपदम् । अन्यथा युयुधिरे इत्येव स्यात् । युधेरनुदात्तेत्त्वात् । " सर्वला तोमरोऽस्त्रियाम् " । स्तोम्यंते श्लाघ्यंते तोमराः । " स्तोम श्लाघायाम् । भिंदिपालः सृगस्तुल्यौ " । भिंदतः शत्रोः प्रयोक्तारं पालयति भिंदिपालः हस्तक्षेप्यो लगुडः । " कासू सामर्थ्ययोः शक्तिः" कासूर्नामायुधविशेषः । " अयोग्रं मुसलोऽस्त्री स्यात् । " मुस्यते खंडचतेऽनेन मुसलं खंडाति भिनत्ति खङ्गः द्विधारः करवालोऽसिरित्यर्थः । परान् श्यंति तनूकुर्वंति परशवः कुठारभेदाः । " पट्टिः क्षेत्रादिविन्यासे हिंसास्त्रधारयोरपि । " पट्टिर्धाराविशेषोऽस्त्य-

कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥ ४७ ॥ तोमरैर्भिंदिपालैश्च शक्तिभिर्मुसलै-स्तथा ॥ युयुधुः संयुगे देव्याः खड्गैः परशुपट्टिशैः ॥ ४८ ॥ केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥ देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥ ४९ ॥ सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥ ५० ॥

स्मिन् पट्टिशः । लोमादित्वात् शः । परशुभिः सहिताः पट्टिशास्तैः । परशवश्च पट्टिशाश्च आयुधविशेषा इति द्वंद्वे तु सेनांगत्वात् द्वंद्वैकवद्भावः स्यात् ॥ ४८ ॥ ततो युद्धप्रवृत्तेरनंतरं केचित् महासुराः देवीं हंतुं शक्तीश्चिक्षिपुः । "क्षिप प्रेरणे" । आचिक्षिपुरिति तु पाठे प्रयोक्तुमाकृष्टवंतः । तथा देवीं हंतुं पाशांश्चिक्षिपुः पाशान् प्रेरित-वंतः। तथैव अपरे केचित्तु खड्गप्रहारैर्देवीं हंतुं प्रचक्रमुः । आदिकर्मणि प्रयोक्तव्ये " प्रोपाभ्याम् " इत्यात्मनेपदेन भाव्यमिति चेदुच्यते । "पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण " इत्यादिकर्मणि वृत्तिः । अथवा नायं प्र इत्युपसर्गः । तर्हि प्रोपसर्गः प्रतिरूपकः अव्ययाख्यः अन्यथा प्रचक्रमिरे इत्यात्मनेपदमेव स्यात् ॥ ४९ ॥ ततः सा देवी विजिगीषमाणा चंडिका निजान्यात्मीयानि शस्त्राणि खड्गादीनि अस्त्राणि च बाणादीन्यायुधानि वर्षति प्रवर्तयति तच्छीलेति तथोक्ता सती तानि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महासुरप्रवर्त्तितानि प्रयुक्तानि शस्त्राणि खड्गादीनि अस्त्राणि च । बाणान्यायुधानि लीलयैव प्रचिच्छेद द्वेधाचकार खंडयामास । " छिदिर् द्वैधीकरणे " । हलादि-शेषे पुनः " पुनः प्रसंगविज्ञानात्सिद्धम् " इति प्रसक्तोऽपि ननु किं हलादिः शेषः " नावयववावयवः समुदायावयवो भवति " इति वचनात् । शस्त्राण्यस्त्राणि चंडि-केति पाठे अंतरेणापि चकारं चार्थोऽर्थतः क्वचिल्लभ्यते । तथा अहरहर्नयमानोऽपि गामश्वं पुरुषं व्रजं वैवस्वतो न तृप्यति वाक्ये । अथवा । शस्त्राण्यस्त्राणि चांबि-केति पाठः । शस्त्राण्यस्त्राणि चेश्वरीति तु क्वचित्पाठः । लीला हेला विलासा खेला क्रीडा वा तथा ॥ ५० ॥ अनायस्तमखिन्नमम्लानमाननं मुखं यस्याः सा तथोक्ता देवी विजिगीषमाणा सुरैर्ब्रह्मादिभिर्ऋषिभिर्वसिष्ठादिभिश्च । यद्वा नारदादिभिः सुरर्षिभिः स्तूयमाना ईश्वरी च भगवती असुराणां देहेषु । यद्वा आसुरेष्वसुरसंबंधिषु देहेषु शस्त्राणि खड्गादीनि अस्त्राणि बाणादीन्यायुधानि मुमोच मुक्तवती प्रेरितवती । ईश्वरस्य स्त्री ईश्वरी । यद्वा । " अश्नोतेराशुकर्मणि वरट् चेचोपधायाः " इति

अनायस्ताननना देवी स्तूयमाना सुरर्षिभिः ॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥५१॥ सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ चचारासुरसैन्येषु वनेष्विव हुताशनः ॥५२॥ निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥ त एव सद्यः संभूता गणाः शतसहस्रशः ॥५३॥

ईश्वरी विश्वव्यापिका भगवतीत्यर्थः ॥ ५१ ॥ स प्रसिद्धो देव्या वाहनीभूतः केसरी सिंहोऽपि क्रुद्धः धुतसटः कंपितस्कंधकेसरः सन् आसुरसैन्येषु यद्वा असुरसैन्येषु चचार प्रससार परिबभ्राम । केषु क इव वनेषु हुताशनोऽग्निरिव । सिंहः क्रोधेन ज्वलद्रूपत्वात् हुताशन इव । हुताशनसादृश्यं सिंहस्य वर्णितम् । यथा च वनानि वनाग्निदग्धानि भस्मीस्युस्तथा दैत्यसैन्यान्यपि देवीवाहनीभूतसिंहरोषानलदग्धानि भवेयुरिति दैत्यसैन्यानां वनसादृश्यं द्रष्टव्यम् । " क्रुद्धः कंठीरवो गर्जन्नुज्ज्वलो-ज्ज्वलदीधितिः । उद्वमन्निव जज्वाल स ज्वालाज्वलनं युधि ॥ " इति भावः । " व्रतिनस्तु सटा जटा " इत्यभिधानाद्व्रतिनः शिखा सटेत्युच्यते इह तु सटेव सटा इत्युपमानात् धुताः सटा येन स तथोक्त इति सटाप्रयोगसिद्धिः ॥ ५२ ॥ अंबिका चंडिका रणे संग्रामे महासुरैः समं युध्यमाना सती यान् यानेव यावत एव निःश्वासान् उच्छ्वासान् मुमुचे मुक्तवती ते एव तावंत एव निःश्वासाः प्रत्येकं सद्यस्तस्मिन्नेव क्षणे शतसहस्रशः गणाश्चण्डिकागणाः संभूताः समदृश्यंत । इह गणाः ॥२३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शताधिकं सहस्रं चेद्विवक्षितास्तदा शतसहस्रमेकादश शतानि शतसहस्रं शतसहस्राणि वीप्सायां शतसहस्रशः । " संख्यैकवचनाच्च वीप्सायाम् " । शस् । अथ च गणाः शतगुणितानि सहस्राणि लक्षमित्यर्थः ॥५३॥ ते रणे देवीरोषनिश्वाससजा गणाः युध्यध्वं युध्यध्वमिति देव्यानुपबृंहिताः प्रोत्साहिताः परशुभिः भिंदिपाला-सिपट्टिशैरायुधैरसुरगणान्नाशयंतः महासुरैः समं युयुधुः । भिंदिपालैः सहिता असयः खड्गाः तैः सहिताः पट्टिशास्तैः । द्वंद्वे तु सेनांगत्वादेकत्वं स्यात् । " बृहि वृद्धौ " उपपूर्वः प्रोत्साहने वृद्ध्युत्कर्षे वा वर्तते । देवीशक्त्यपबृंहितानिति पाठे अपपूर्वो बृहि वृद्धिवाचि । ते गणाः देवीसामर्थ्यात्क्षीणानसुरगणान् नाशयंतः । अ-स्मिन् पाठे गणानां शौर्योत्कर्षो नास्ति । यतो देवीशक्त्यपबृंहितानेवासुरान्नाशयंतो युयुधुः ॥ ५४ ॥ युद्धे महोत्सवे इव देव्या गणाः पटहानानकानवादयंत वादितवंतः। वदेर्ण्यंताल्लङि " णिचश्च " इत्यात्मनेपदम् । " आनकः पटहोऽस्त्री स्यात् । " तथापरे गणाः शंखानवादयंत । तथान्ये गणाः मृदंगान् मुरजानवादयंत।

युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः ॥ नाशयंतो सुरगणान्देवीशक्त्युपबृंहिताः ॥ ५४ ॥ अवादयंत पटहान्गणाः शंखांस्तथापरे ॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥५५॥ ततो देवी त्रिशूलेन गदया शक्तिऋष्टिभिः ॥ खड्गादिभिश्च शतशो निजघान महा-सुरान् ॥५६॥ पातयामास चैवान्यान्घंटास्वनविमोहितान् ॥ असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ॥ ५७ ॥

युद्धमहोत्सव इत्यनेन बाणानां रणोन्मुखत्वेन शौर्योत्कर्षः संग्रामजयित्वं सूच्यते । उत्सूते सुखमुत्सवः । महानुत्सवो महोत्सवः ॥ ५५ ॥ ततोऽनंतरं देवी त्रिशूलेन गदया शरवृष्टिभिः खड्गादिभिश्च संग्रामसाधनैरायुधैः शतशः शनैः शनैः महासुरान् निजघान । निरंतरं जिहिंस । आदिशब्देन यष्टिपरशुकुंतमुद्गरमुशलकर्त्तरीकरवा-लिकाभिंदिपालपरिघशंकुतोमरवज्रशक्तिपाशचक्राद्यायुधानि गृह्यंते ॥ ५६ ॥ अथ च देवी घंटास्वनविमोहितान् घंटानिर्घोषमूर्च्छितानन्यानसुरान् पाशेन बध्वा भुवि पातयामास । अथ च देवी अन्यानसुरान् पाशेनाकर्षयदाकृष्टवती । कृषेश्चुरादिकात्स्वार्थे णिचि लङि रूपम् । ननु च नायं पठ्यते चुरादौ । यद्येवम् । " कर्षत्याकर्षणे शे तु कृषते कृषतीत्युभे । " इत्येवं पठ्यते । एवं तर्हि भ्वादेः कर्षते कर्षणं कर्षः कर्षमकरोत् । " तत्करोति " इति णिच् ॥ ५७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देव्यास्तीक्ष्णैः खङ्गपातैः केचिन्महासुराः द्विधाकृताः खंडिताः । तथाऽपरे महासुरा देव्या गदया कृतेन निपातेन विपोथिताः संतः भूमौ शेरते शयितवंत इत्यर्थः । विपोथिता इति “ पुथु हिंसायाम् ” दिवादिः । यदाहुः । “ पुथ्येत्पुंथति हिंसार्थे भाषार्थे पोथयेदिति । ” विविधं पोथनं विहननं विपोथः संजात एषां विपोथिताः संजातविघाता इत्यर्थः । यद्वा विविधः पोथः विघातो येषां ते विपोथाः । विपोथाः कृताः विपोथिताः । “ तत्करोति ” इति णिचि कर्मणि क्तः । ननु च पुथ्यतेर्णिचि कर्मणि क्तः। ननु च पुथ्यतेरुदुपधत्वान्नपुंसके भावे क्ते कृते कित्त्वनिषेधपक्षे पोथितमिति स्यात् । ततश्च विविधं पोथितं पोथनं विहननं येषां ते इति बहुव्रीहौ वाहिताग्न्यादित्वान्निष्ठांतस्य परनिपाते विपोथिताः स्युः न स्युः यतः “उदुपधाद्भावादिकर्मणोरन्यतरस्याम्” इति शब्विकरणानामेवोदुपधानां तत्र सूत्रे ग्रहणं नान्येषामित्यभ्युपजग्मुः । यद्वा । विपुंथिता इति पाठे “ पुथि हिंसासंक्लेशनयोः ” भ्वादिः कर्मणि क्तः । विपुंथिता विहिंसिताः संक्लेशिता बाधिता इति यावत् ॥ ५८ ॥

केचिद्द्विधाकृतास्तीक्ष्णैः खङ्गपातैस्तथापरे ॥ विपोथिता निपातेन गदया भुवि शेरते ॥५८॥ वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ॥५९॥ निरन्तरशरौघेण कृताः केचिद्रणाजिरे ॥ शैलानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ॥६०॥

केचिन्महासुराः देव्या मुशलेन भृशमत्यर्थं हताः ताडिताः रुधिरं रक्तं वेमुः उज्जगरुः । केचिच्च महासुराः देव्या शूलेन वक्षसि भिन्नाः विदारिताः संतः भूमौ निपातिताः न्यपतन् । वेमुरिति “ अत एकहल्मध्येऽनादेशादेर्लिटि ” इति “ टुवमु् उद्गिरणे ” इत्यस्य “ न शसददवादिगुणानाम् ” इति निषेधादेत्त्वाभ्यासलोपौ न स्त इत्याहुः । ततश्च ववमुरित्येवं भवितव्यमिति । अत्र समादधुः । अत एकहल्मध्येऽनादेशादेर्न शसददवादिगुणानां लिटीत्येकयोगे कर्त्तव्ये योगविभागादस्यानित्यत्वामिति ततः वेमुरित्यपि क्वचित्साधु स्यादिति ॥ ५९ ॥ केचिच्छैलानुकारिणः शैलान् स्वगात्रपरिमाणतः अनुकुर्वाणाः पर्वतायमानाः त्रिदशानामर्दनाः अर्दयितारः हिंसकाः असुराः रणाजिरे रणस्याग्रे देव्या प्रयुक्तेन निरंतरशरौघेण अविच्छिन्नबाणव्यूहेन कृताः छिन्नाः विद्धाः प्राणानसून् मुमुचुः व्यमुंचन् । शराणामोघः तेन शरौघेण । “ कुमति च ” इति णत्वम् । निरंतराः शराः निरंतरशरास्तेषामोघः समूहस्तेन । सेनानुकारिण इति क्वचित्पाठः । सेना सैन्यमनु पश्चात्कर्तुं शीलं

॥२४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

येषां ते अग्रेसराः शूराः त्रिदशार्दिनः देवहिंसिनः केचिदसुराः रणाजिरे प्राणान् मुमुचुः अत्यक्षुः । सेधानुकारिण इति पाठे सिध्यंति सेधाः । शल्यानुकारिण इति तु सभ्यः पाठः । " श्वावित्तु शल्यः " इत्यभिधानात् । शल्यः शल्यको भक्ष्यः पंचनखः। निरंतरा इति पाठे शरौघेण निरंतराः प्रतिलोमकूपव्याप्ताः कृताः सिद्धा अत एव शल्यका इव शल्लीकण्टकशतावृताः । शल्यका इव दृश्यमाना रणाग्रे प्राणान्मुमुचुः । निरंतराः शरौघेण कृता इति तु पाठे कृता रचिता इत्यर्थः ॥ ६० ॥ तया देव्या केषांचिदसुराणां बाहवो भुजाः छिन्नाः खण्डिताः भुवि पेतुः तथा देव्याऽपरेऽसुराः छिन्ना ग्रीवाः शिरोधरा येषां ते छिन्नग्रीवाः संतः पेतुः। तथा देव्याऽन्येषामसुराणां छिन्नानि शिरांसि पेतुस्तथा देव्याऽन्येऽसुराः वपुषो मध्ये देशे विदारिताः खण्डिताः संतः पेतुः भूमौ बभ्रंशुः । "असाकल्ये तु चिच्चन । छिन्नं तालं लूनं कृत्तं वृक्णम् । दारितौ भिन्नभेदितौ । " ॥ ६१ ॥ अपरे तु महासुरा युद्धतः देव्या विच्छिन्नजंघाः खण्डितजंघाकाः संतः उर्व्यां भुवि पेतुः प्रबभ्रंशुः । केचित्तु

केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥६१॥ विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः॥६२॥ छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः॥कबंधा युयुधुर्देव्या गृहीतपरमायुधाः॥६३॥

युध्यंतः एकबाह्वक्षिचरणाः एकबाहुका एकाक्षाः एकचरणकाश्च संतो देव्या द्विधाकृताः खण्डिता उर्व्यां पेतुः न्यपतन् । बाहुश्च अक्षि च चरणं च बाह्वक्षिचरणं युद्धतः प्रतिमहासुरं संपन्नमेकबाह्वक्षिचरणं तेषां ते । " द्वंद्वांते श्रूयमाणं पदं व्यावर्त्तकं प्रत्येकमभिसम्बध्यते । " तथा सम्पन्नव्रीहियवो ग्रामः। तथा च व्रीहियवधान्याः प्रजाः (?) ॥ ६२ ॥ अन्ये महासुराः शिरसि छिन्नेऽपि सति भूमौ पतिताः पुनस्तदनु उत्थिताः कं शिरो बध्नंति कबंधाः संतः पुनः शिरोधारिणः सन्तः गृहीतपरमायुधाः आत्तोत्तमशस्त्राः पुनर्देव्या समं युयुधुः । गृहीतपरमायुधेति ह्यविसर्गपाठे तु गृहीता परमा आ समंतात् युत् युद्धं यया सा देवी गृहीतपरमायुत् गृहीतपरायुधेति तृतीयांतमेतत् । " कबंधोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम् । " कस्य शिरसो बन्धोऽत्र कबन्धः कं बध्नाति वा कबन्धः । " कबंधं सलिले तुण्डे । युद्धे योद्धृषु वीरेषु सहस्रे कृन्तमूर्द्धसु । तदावेशात्कबन्धः स्यादेकोऽमूर्द्धा क्रियान्वितः ॥ " इति कबंधलक्षणम् । " देवीदानवयुद्धे तु कबन्धार्बुदकोटयः । क्षणे क्षणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समुत्पन्ना देव्या युयुधिरे पुनः ॥ देवीदानवयुद्धोत्थकबन्धार्बुदकोटयः । देवीरोषोत्थहुंकारज्वलज्ज्वलनभास्मिताः ॥ " ॥ ६३ ॥ तत्र युद्धे अपरे महासुरास्तूर्याणां वाद्यादीनां ततानद्धघनसुषिराणां चतुर्णां लयः साम्यं वाद्यादीनामन्योऽन्यसमत्वमाश्रिताः वीररसावेशवशाः खड्गशक्त्यृष्टिपाणयः युध्यमानाः पूर्वं देव्या छिन्नशिरसोऽपि वीररसाविष्कारात्संग्रामाधिदेवतावेशाच्चाविष्कृतचेतनाः संतः पश्चात्कं शिरो बध्नंति स्वं स्वं यथास्थानं संनिवेशयंतीति कबन्धाः संतः पुनः शिरोधारिणः संतः ननृतुर्नृत्यं चक्रुः । चकारात्केचिद्देव्या समं युयुधिरे च । तूर्यलयाश्रिता हि नृत्यंति खड्गशक्त्यृष्टिपाणयो हि युध्यन्ते । " ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् ॥" तथा च भरतः । "ततं चैवावनद्धं च घनं सुषिरमेव च । चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम् ॥" अत एवाभ्यधुः । " चतुर्विधामिदं वाद्यं वादित्रातोद्यनामकम् । " इति । यद्यपि खड्गे तु निस्त्रिंशचंद्रहासासिऋष्टय इति ऋष्टिः खड्गपर्यायस्तथाप्याकृतिसंनिवेशविशेषभेदभिन्नतया

ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥ ६४ ॥
तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः ॥ रुधिरौघविलुप्तांगाः संग्रामे लोमहर्षणे ॥ ६५ ॥

पृथक्प्रयुक्तः । खड्गशक्त्यष्टपाणय इति तु पाठे खड्गैः शक्तिभिश्च अष्टा व्याप्ताः प्राणयो येषां ते । यद्वा दैत्याः केचिदष्टभुजाश्च संतीति खड्गश्च शक्तयश्च अष्टस्वष्टसु पाणिषु येषां ते ॥ ६४ ॥ अन्ये महासुराः संग्रामशूराः युद्धे तिष्ठ तिष्ठेति देवीं भाषंतः कथयंतः स्वकीयामहमहमिकां प्रकटयंतो देव्या समं योद्धुमाजग्मुरिति शेषः । तिष्ठ तिष्ठेत्यत्र नित्यवीप्सयोर्नित्ये आभीक्ष्ण्ये च तिङंतस्य द्विर्वचनम् । भाषंत इति " भाष व्यक्तायां वाचि " । अनुदात्तेत्त्वात्प्राप्तस्यात्मनेपदस्य चक्षिङो ङित्वादनित्यत्वात्परस्मैपदं शतृप्रत्ययः । तिष्ठ तिष्ठेत्यभाषंतेति पाठे तु अन्ये महासुरा देवीं तिष्ठ तिष्ठ अद्यास्मदग्रे क्व यास्यसि क्व च निलीयसे इति सभर्त्सनं नामग्राहमालपन्नित्यर्थः । " तिष्ठ तिष्ठेति चैवोक्त्वा देव्याऽन्ये युयुधुर्मृधे । " अन्ये च महासुरा मृधे युद्धे देवि तिष्ठ तिष्ठेति सभर्त्सनमुक्त्वा देव्या च समं युयुधुः । लोमानि रोमा[illegible]णि हृष्यंत्युद्भवंत्यनेनेति लोमहर्षणं तस्मिन् रोमांचोद्गमकारिणि संग्रामे रुधिराणामोघाः स्तोमास्तैः विलुप्तांगा अपरे महासुराः । " रोमांचो रोमपुलको रोमहर्ष-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णमित्यपि । ओघो वृंदेंऽभसां रये ”॥ ६५ ॥ देव्या पातितैः भ्रंशितै रथैर्नागैर्गजैरश्वैरसुरैश्च कीर्णा सा वसुंधरा अगम्याऽनधिगम्या गंतुमशक्या तत्राभवत् । क यत्र स महान् रणः संग्रामः देव्या समं महिषासुरसैन्यानामभूत् । पातितैरथेत्यत्र “ रोरि ” इति रेफलोपः । रथसहिताः नागाः रथनागास्तत्सहिता अश्वाः तैः । द्वंद्वे तु सेनांगत्वादेकवद्भावः स्यात् । वसूनि धारयति सा वसुंधरा न गम्या अगम्या असेव्या । गमेः पोरदुपधाद्यत् ॥ ६६ ॥ किं च तत्र युद्धे असुरसैन्यस्य मध्ये सद्यः सपदि तत्क्षणे देव्या सह संग्रामारंभक्षणे एव वारणानां गजानामसुराणां दैत्यानां वाजिनां घोटकानां शोणितौघा रक्तसमूहा एव महानद्यः समुद्रगाः सद्यः विसुस्रुवुः प्रसुस्रुवुरित्यर्थः । रक्तप्रवाहमय्यो महानद्यो बभूवुरित्यर्थः । विसुस्रुवुः । “ स्रु गतौ ” लिट् उस्युवङ् ॥ ६७ ॥ तथा तद्वत् अंबिका देवी असुराणां तत्प्रसिद्धं महासैन्यं क्षणेन तत्क्षणमात्रेण क्षयं विनाशं निन्ये प्रापयामास । नयतिर्द्विकर्मकः । तृणानि च दारूणि च तृणदारूणि तेषां महान् चयः गणः समूहस्तं यथा

पातितै रथनागाश्वैरसुरैश्च वसुंधरा ॥ अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥ ६६ ॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः ॥
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥६७॥ क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्
॥ ६८ ॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥ ६९ ॥

वह्निस्तद्वत् । यद्वा यथा तथैव साम्ये ॥६८॥ न केवलमंबिकैव अपि तु स सिंहश्च । स प्रसिद्धो देव्या वाहनीभूतो धुतकेसरः कंपितस्कंधकेसरः सिंहश्च महानादं महांतं नादं कंठीरवत्वात् । कंठगर्जनमुत्सृजन् कुर्वन् तथोचितमसुरसैन्यं क्षयं नाशं निन्ये । यच्चाख्यात् अथवा स च सिंहः कर्त्ता विचिन्वतीति विचयनक्रियासंबंधनीयः स सिंहः महानादमृत्सृजन् धुतकेसरः सन्नमरारीणां सुरद्विषां शरीरेभ्यः सकाशतः असून् प्राणान् विचिन्वाति प्राणान् गृह्णीयादिव संहरेदिव । विचिन्वतीति “ चिञ् चयने ” विध्यादौ लिङर्थे लेट् । कर्त्तरि स्वादिभ्यः श्नुः । लेटस्तिप् । “ लेटोडाटौ ” इति अडागमः । छांदसो गुणाभावः । इकोयणचि न किंतु हुश्नुवोः सार्वधातुके यण् इतश्च लोपः परस्मैपदेष्विति तु वा । तेनात्र इति श्रूयते । अथवा विचिन्वतीति सप्तमीयम् । स सिंहश्च धुतकेसरः महानादमुत्सृजन् व्यापाद्य तच्छरीरेभ्यः प्राणान्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विचिन्वतीवेत्युत्प्रेक्षते । ततश्च तस्मिन् सिंहेऽमरारीणां शरीरेभ्यः प्राणान् विचिन्वतीव इतस्ततः संहर्तुं गवेषयतीव सति देव्या गणैश्च तैरसुरैः सह युद्धं कृतं व्याधा-
यीत्यर्थः ॥ ६९ ॥ तत्र संग्रामभूमौ देव्या रोषनिःश्वाससंभूतैर्गणैश्च तैरसुरैः सह युद्धं तथा कृतं यथा दिवि स्वर्गे देवाः पुष्पवृष्टिमुचः संतः एनां देवीं तुष्टुवुः स्तुत-
वंतः । पुष्पाणां वृष्टीर्मुंचंति पुष्पवृष्टिमुचः । अथैनां तुष्टुवुरिति पाठे तु देव्या गणैश्च तत्र भूमौ महासुरैः समं युद्धं कृतम् अथानंतरं पुष्पवृष्टिमुचो देवाः दिविषदः
एनां युध्यमानां ससिंहां सगणामंबिकां तुष्टुवुः । अहो इदं नामाश्चर्यं योद्धारो मायाविनो महासुराः तैः सममेकाकिन्यवला युध्यते महासुरसैन्यान्यप्यनेकानि दशशः
शतशः सहस्रशः अयुतशः लक्षशः नियुतशः कोटिशः कोटिकोटिशश्च क्षयं तयैकयैव नीतानि तद्रणे कवंधा अपि तयाऽबलया युध्यंते ते च तदबलारोषहुंकारज्व-

शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥७०॥
इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥ २ ॥ ऋषिरुवाच ॥ निहन्यमानं
तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकाम् ॥१॥ स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा मेरुगिरेः
श्रृंगं तोयवर्षेण तोयदः ॥ २ ॥

लज्ज्वलनज्वालावलीढाः क्षणे क्षणे भस्मीभवंति अथ च रणमंडले तदबलाविखंडितप्रचंडविक्रमोल्लासि महायोद्धृ महासुरवपुर्विलसद्रुधिरौघा महानद्यः प्रवहंतीति ता-
मित्थमद्भुताद्भुतचारितां लोकाभ्युदयैकफलोदयामंबिकां दिविषदः स्तुवंतीत्यर्थः ॥ ७० ॥ इति श्रीमार्कंडेये महाराजाधिराजश्रीमत्तोमरान्वयश्रीमदुद्धरणात्मजश्रीशंतनु-
चक्रवर्तिविरचितायां शांतनव्यां चंडिकामाहात्म्यटीकायां द्वितीयोऽध्यायः ॥ २ ॥ ऋषिरुवाच ॥ अथ माहिषासुरसेनानीः चिक्षुरसंज्ञः महासुरः तत्सैन्यं तस्य
महिषासुरस्य सैन्यं देव्या निहन्यमानं निरंतरं हन्यमानमवलोक्य वीक्ष्य कोपाद्योद्धुमंबिकां देवीं ययौ जगाम । निहन्यमानमिति " वर्त्तमानसामीप्ये वर्त्तमानवद्वा "
इति भूले लट् । निहतामित्यर्थः ॥ १ ॥ स चिक्षुरनामाऽसुरः समरे संग्रामे शरवर्षेण निरंतरप्रयुक्तवाणपातनेन देवीं ववर्ष च्छादयामास । कः केन किमिव तोयदो मेघः ॥२६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तोयवर्षेण संततप्रवृद्धपाथः प्रथितपातनेन मेरुगिरेः शृंगमिव । " न भिन्ने वचने लिंगे न हीनाधिकतापि वा । उपमा दूषणायालं त्रयोद्वेगो न धीमताम् ॥ क्रिया-वाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः । प्रयोगतोऽनुवर्त्तव्या अनेकार्था हि धातवः॥ " यद्वा यथा तथैवेदं साम्यम् ॥ २ ॥ ततोऽनंतरं देवी संग्रामे लीलयैव क्रीडयैव अनायासेनैव बाणैस्तस्य चिक्षुरसंज्ञस्य शरोत्करान् बाणगणान् छित्त्वा खंडयित्वा तुरगान् घोटकान् बाणैर्जघान। अथ च बाणैरेव वाजिनां घोटकानां यंतारं सारथिं जघान । " क्रीडा लीला च नर्म च । स्त्रीणां विलासविब्बोकविभ्रमाललितं तथा । हेला लीलेत्यमी हावाः क्रियाः शृंगारभावजाः ॥ नियंता प्राजिता यंता सूतः क्षत्ता च सारथिः । " ॥३॥ सा देवी सद्यः सपदि तत्क्षणे एवाशुगैर्बाणैः धनुः कोदंडं च चिच्छेद अच्छिनत् । अतिसमुच्छ्रितमत्युच्चतरं ध्वजं च केतुं बाणैश्चिच्छेद । छिन्नं धन्व धनुर्यस्य स तथोक्तः तं छिन्नधन्वानं चिक्षुरं महासुरं गात्रेषु सर्वावयवेषु आशुगैर्विव्याध ताडयामास । "व्यध ताडने । लिटचभ्यासस्योभयेषाम्" इति संप्रसार-

तस्य च्छित्त्वा ततो देवी लीलयैव शरोत्करान् ॥ जघान तुरगान्बाणैर्यंतारं चैव वाजिनाम् ॥ ३ ॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषु च्छिन्नधन्वानमाशुगैः ॥ ४ ॥
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ५ ॥

णम् " आशुगौ वायुविशिखौ " । धनुर्धर्चादित्वान्नपुंसकेऽपि । अन्यथा " धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम् । " इत्यभिधानात् ॥ ४ ॥ स चिक्षुराख्योऽसुरः देव्या छिन्नं धन्व धनुर्यस्य विच्छिन्नो रथो यस्य विरथः। हता अश्वा यस्य सः हतः सारथिर्यस्य सः ईदृगवस्थः खड्गचर्मधरः सन् तां देवीं हंतुमभ्यधावत उपाद्रवत् । " सृ गतौ । सर्तेः वेगितायां गतौ धावादेशो वक्तव्यः " । यद्येवं सर्तेः परस्मैपदित्वादात्मनेपदं न स्यात् । स्यात्कर्तरि कर्मव्यतिहार इति । न स्यात् । " न गतिहिं-सार्थेभ्यः " इति निषेधात् । अतश्चाभ्यधावत्ततो देवीमित्यपाठिषुः । यद्वा " धावु गतिशुद्धयोः " इत्येतस्य स्वरितेत्त्वात्पाक्षिकमस्यात्मनेपदमिति अस्त्वभ्यधावत तां देवीमित्यपि पाठपाटवं पठितॄणाम् । " फलकोऽस्त्री फलं चर्म " । गात्रत्राणं चर्ममयत्वाच्चर्म । " धृञ् धारणे " धरते धरः । खड्गश्च चर्म च सेनांगत्वादेकव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ङ्गावः । खड्गचर्मणो धरः खड्गचर्मधरः । अन्यथा कर्मण्यण् स्यात् ॥ ५ ॥ अतितरां वेगवान् स चिक्षुरः सेनानीरसुरः तीक्ष्णा तिग्मा धारा यस्य तेन खड्गेन मण्ड-
लाग्रेण सिंहं मूर्धनि आहत्य प्रहृत्य देवीमपि सव्ये वामे भुजे आजघान प्रजहार । अकर्मकत्वात्परांगकर्मकत्वाच्च " आङो यमहनः " इत्यात्मनेपदाप्राप्तिः । " वामं
शरीरं सव्यं स्यादपसव्यं तु दक्षिणम् । " हे नृपनंदन सुरथ, निशामय । तस्या देव्या वामं भुजं प्राप्य चिक्षुराख्यमहासुरप्रयुक्तः खड्गः मण्डलाग्रः पफाल । " ञि-
फला विशरणे " विशशार चूर्णीबभूव । ततः खड्गभंगानंतरं कोपादरुणलोचनः रक्तलोचनः चिक्षुरः शूलं त्रिशूलमायुधं जग्राह अग्रहीत् । " अस्त्री शूलं रुगायुधम् "
॥ ६ ॥ ७ ॥ ततस्तु त्रिशूलग्रहानंतरं चिक्षुरो महासुरस्तत्प्राग्गृहीतं त्रिशूलं तमायुधं भद्रकाल्यां देव्यां विषये चिक्षेप अक्षैप्सीत् । कीदृशं शूलम् अम्बरादाकाशात्

सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥ आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥ ६ ॥ तस्याः खड्गो भुजं प्राप्य पफाल
नृपनन्दन ॥ ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ७ ॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी
रविबिंबमिवांबरात् ॥ ८ ॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ॥ तेन तच्छतधा नीतं शूलं स च महासुरः ॥ ९ ॥ हते तस्मिन्
महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥ १० ॥

अम्बरमाक्रम्य तेजोभी रविबिंबमिव जाज्वल्यमानं देदीप्यमानमित्यर्थः । अम्बरादिति कर्मणि ल्यब्लोपे पंचमी । तेजोभी रविबिंबमित्यत्र " रोरि " इति रेफलोपे
" ढ्रलोपे पूर्वस्य दीर्घोणः " । तेजोभिरविबिंबमित्यदीर्घपाठे अवेः सूर्यस्य बिंबमिवेत्यर्थः । " अवयः शैलमेषार्काः " इत्यभिधानात् । अम्बरमतति अम्बरात्
इति प्रथमांतत्वे तु रविबिंबविशेषणं द्रष्टव्यम् । भद्रा च सा कालस्य कालाग्निरुद्रस्य स्त्री काली । यद्वा काली चण्डिका ॥ ८ ॥ तच्चिक्षुरप्रयुक्तमापतदागच्छत् शूलं ॥२७॥
कर्म दृष्ट्वा देवी स्वकीयं शूलममुंचत प्रयुक्तवती तेन देवीप्रयुक्तेन शूलेन तच्चिक्षुरप्रयुक्तशूलं शतधा शतप्रकारैः चूर्णतां नीतं प्रापितम् । न केवलं त्रिशूलमेव अपि तु
चिक्षुरमहासुरश्च चूर्णतां नीत इत्यर्थः । अमुंचत " मुच्लृ मोक्षणे " स्वरितेत् ॥ ९ ॥ माहिषासुरस्य चमूपतौ सेनापतौ तस्मिन् चिक्षुराख्ये महावीर्ये देव्या हते सति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चामरो नाम त्रिदशार्दनः अमरहिंसकः महासुरः गजारूढः सन् देव्या सह संग्रामयितुमाजगामागतवान् । वीर्यं बलं प्रभावश्च महद्यस्य अर्दयति हिनस्ति अर्दनः त्रिदशानामर्दनः ॥ १० ॥ अथ स चामरनामापि महादैत्यः देव्याः प्रतिघातनाय शक्तिमायुधविशेषं मुमोच । अथांबिका देवी द्रुतं शीघ्रं सत्वरं हुंकाराभिहतामत एव निष्प्रभां तां चामरमहादैत्यप्रयुक्तां शक्तिं भूमौ पातयामास ॥ ११ ॥ चामराख्यो महासुरः आत्मीयां शक्तिमायुधं देव्या भूमौ निपतितां प्रभ्रष्टां च दृष्ट्वा क्रोधसमन्वितः अप्रतिहतशक्तिरद्य मदीया हता ईदृगवस्था मास्तादिति क्रोधोर्मिमूर्च्छितः सन् देवीं प्रति त्रिशूलं चिक्षेप मुमोच । तदपि शूलं सा देवी अच्छिनत् बाणैः कृत्वा । " छिदिर् द्वैधीकरणे " । भूतानद्यतने लङ् लिङ्विषयेऽपि क्वचिदस्ति । पुराकल्प एतदासीदिति भाष्यकारप्रयोगादित्याहुः ॥ १२ ॥ ततो देव्या चामरीये

सोऽपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतम् ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ ११ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १२ ॥ ततः सिंहः समुत्पत्य गजकुंभांतरस्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १३ ॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥ १४ ॥ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १५ ॥

शूलाग्रे चूर्णिते सत्यनंतरं सिंहः उच्चैः समुत्पत्य गजस्य कुंभयोरंतरे मध्ये विषये स्थितः सन् तेन त्रिदशारिणा सुरद्विषा चामरेण दैत्येन सममुच्चैरतितरां बाहुभ्यां प्रवर्त्तितेन युद्धेन बाहुयुद्धेन युयुधे संप्रजह्रे । युध्यतोऽनुदात्तेत्त्वादात्मनेपदम् । " कुंभौ तु पिंडौ शिरसस्तयोर्मध्ये विदुः पुमान् । " ॥ १३ ॥ ततो बाहुयुद्धवृत्तितस्तु पुनर्युध्यमानौ तौ सिंहचामरौ तस्मान्नागाद्गजात्सकाशात् महीं भूमिं गतौ संतावतिदारुणैर्भयंकरैः प्रहारैरतिसंरब्धौ अतितरां क्रोधाविष्टौ युयुधाते । संपूर्वो रभिः क्रोधार्थः । युयुधाते अतिसंरब्धौ इति च्छेदः । मणीवादित्वात्प्रगृह्यत्वाभावात्प्रकृतिभावात् " एङः पदांतादति " इति पूर्वरूपत्वमेव । अथवा शिष्टप्रयोगतः " संज्ञापूर्वको विधिरनित्यः । ओर्गुणात् " इत्यतः स्वायंभुवप्रयोगवत् ॥१४॥ ततो युद्धरसावेशतो वेगाज्जगज्जयरयात् खमंतरिक्षमुत्पत्य उत्प्लुत्य पुनर्वेगान्निपत्य च मृगारिणा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिंहेन चामरनाम्नो महासुरस्य शिरो मस्तकं करप्रहारेण करकृतः प्रहारस्ताडनं तेन पृथक्कृतं दूरीकृतं छिन्नम् । " प्रहारजवयोर्वेगो विण्मूत्रातिप्रवर्त्तने । " ॥ १५ ॥ रणे देव्या शिलादिभिः पाषाणैर्वृक्षैस्तरुभिः आदिशब्दाद्धनुराद्यायुधैश्च उदग्राख्यो महासुरः हतः । करालो नाम महासुरः चशब्दात्ससैन्यः दंतमुष्टितलैः दंतमुष्टिभिः तलैः प्रतलैः चशब्दात् खड्गाद्यैरायुधैः सिंहेन गणैः देव्या च निपातितः न्यघाति व्यसूकृतः । " पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ । " दंतैः सहिता मुष्टयः दंतमुष्टयः दंतमुष्टिभिः सहिताः तलाः तैः । द्वंद्वे तु प्राण्यंगत्वादेकवद्भावः स्यात् । दंतो गजदंतः तेन निर्मितो मुष्टिस्तस्य तलैर्भागदेशैः छुरिकाधाराविशेषैश्च निपातित इत्यपि व्याख्यानम् । केचिद्दत्तमुष्टितलैरिति क्तांतं पठंति । दत्तं मुष्टितलं यैर्गुणैः ते दत्तमुष्टितलाः तैर्निपातित इत्यपि व्याख्येयम् ॥ १६ ॥ रणे क्रुद्धा देवी उद्धतं नाम महासुरं चशब्दात् सैन्यं गदापातैश्चूर्णयामास संपिपेष । परासुमकार्षीत् । त्रिनेत्रा परमेश्वरी चण्डिका देवी रणे क्रुद्धा सती भिंदिपालेन हस्तक्षेप्येण लगुडेन बाष्कलं

उदग्रश्चरणे देव्या शिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलैश्चैव करालश्च निपातितः ॥ १६ ॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥ बाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकम् ॥१७॥ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥१८॥ बिडालस्यासिना कायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥ कालं च कालदंडेन कालरात्रिरपातयत् ॥१९॥

नाम महासुरं जघान । " भिंदिपालः सृगस्तुल्यौ । " तथा परमेश्वरीबाणैः ताम्रं नाम महासुरं जघान । तथा परमेश्वरीबाणैरेव अंधकं नाम महासुरं जघान । तथा परमेश्वरीबाणैरेव उग्रमास्यं यस्य तमुग्रास्यं नाम महासुरं जघान । तथा परमेश्वरीबाणैरेव उग्रं वीर्यं यस्य तं उग्रवीर्यं नाम महासुरं च जघान । तथैव परमेश्वरीबाणैरेव महांतौ हनू कपोलाधोभागौ यस्य तं महाहनुं नाम महासुरं जघान । त्रिनेत्रं चेति तु पाठे त्रीणि नेत्राणि यस्य तं त्रिनेत्रं महासुरं त्रिशूलेन चशब्दात्ससैन्यम् । परमा ईश्वरी " अश्नोतेराशुकर्मणि वरट् चेचोपधायाः " यद्वा परमेश्वरस्य स्त्री परमेश्वरी ॥ १७ ॥ एकार्थवाचकौ ॥ १८ ॥ रणे देवी असिना खड्गेन बिडालस्य महासुरस्य शिरो मूर्द्धानं कायाच्छरीरात् वै प्रख्यातितः पातयामास । रणे देवीशरैः दुर्धरं नाम दुर्मुखं चोभौ नाम महासुरौ कर्म यमक्षयं यमगृहं द्वितीयं कर्म निन्ये प्राप-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यामास । नयतिर्द्विकर्मकः । " क्षयो यक्ष्मणि कल्पांते निलयेऽपचयेऽपि च । कालं च कालदंडेन कालरात्रिरपातयत् ॥ " कालं नाम महासुरं कालरात्रिरंबिका कालदण्डेनापातयत् माभ्रंशयत् ॥ १९ ॥ उग्रदर्शनं नाम महासुरमत्युग्रैः खड्गपातैरताडयत् । " तड आघाते " चुरादिः । असिनैव असिलोमानं महासुरमच्छिदत् अच्छैत्सीत् । " गणैः सिंहेन देव्या च जयक्ष्वेडाकृतोत्सवैः ।" गणादिभिः उत्सवे रणोत्सवैः जयसंबंधिनिक्ष्वेडाकृता जयसिंहनादः कृत इत्यर्थः । "क्ष्वेडा तु सिंहनादः स्यात् " । कालं वेत्यादिश्लोकद्वयं केचित्पठंति केचित्तु न ॥ २० ॥ एवं प्रागुक्तभंग्या स्वसैन्ये आत्मीयसैन्ये स्वयं संक्षीयमाणे सति महिषासुरस्तु तदसहमानः सन् माहिषेण महिषसंबंधिना महिषाकारेण स्वरूपेण तान् देवीगणान् त्रासयामास उद्वेजयामास । संक्षीयमाण इति " क्षि क्षये " भ्वादिरकर्मकः परस्मैपदी इति

" उग्रदर्शनमत्युग्रैः खड्गपातैरताडयत् ॥ असिनैवासिलोमानमच्छिदत्सा रणोत्सवे ॥ गणैः सिंहेन देव्या च जयक्ष्वेडाकृतोत्सवैः "॥२०॥
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥ २१ ॥ कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् ॥ लांगूलताडितांश्चान्याञ्छृंगाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥ निःश्वासपवनेनान्यान् पातयामास भूतले ॥ २३ ॥

तु प्रयोगतोऽन्तर्भावितण्यर्थविवक्षायां " नाभुक्तं क्षीयते कर्म । क्षीयंते चास्य कर्माणि " इतिवत्सकर्मकत्वे सति कर्मकर्त्तरि लटः शानचि " कर्मवत् कर्मणा तुल्यक्रियः " इति यक्यात्मनेपदेऽकृत्सार्वधातुकयोर्दीर्घे रूपम् ॥ २१ ॥ महिषासुरः तुंडप्रहारेण तुंडेन वक्रेण जनिताघातेन कांश्चिद्गणान् देवीरोषजनितान् पुरुषान् रणशूरान् भूतले पातयामास । तथा क्षुरक्षेपैरपरान् भूमौ पातयामास । " शफं क्लीबे क्षुरः पुमान् " । स तथान्याँल्लांगूलताडितान् भूमौ पातयामास । " पुच्छोऽस्त्री लूमलांगूले " । स तथान्यांश्च शृंगाभ्यां विदारितान् गणान् भूमौ पातयामास । " दारिते भिन्नभेदितौ " । स तथा वेगेन जवेन कांश्चिदपरान् भूमौ पातयामास । स तथा महिषः नादेन ध्वनिना कंठगर्जितेनापरान् व्याकुलचित्तान् भूमौ पातयामास । अपरान् भ्रमणेन परितोऽग्रतः पार्श्वतश्च भूतले पातयामास । महिषः अन्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न् निःश्वासंपवनेन निःश्वास एव पवनो वायुस्तेन भूतले पातयामास ॥ २२ ॥२३ ॥ इत्थं स महिषासुरो महादेव्याः अंबिकायाः प्रमथानां पार्षदानामनीकानि सै-
न्यानि प्रमथगणान् निपात्य भूमौ नितरां पातयित्वा तस्याः सिंहं हंतुमभ्यधावत आभिमुख्येनाधावत आद्रवत् । " धावु गतिशुद्ध्योः " लङ् स्वरितेत्त्वादात्मनेप-
दम् । " वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् । " ततः प्रमथगणमथनतः सिंहं हंतुमागमनं तस्य ततश्च महिषे महासुरे विषयेंऽबिका चंडिका कोपं चक्रे
॥ २४ ॥ महावीर्यः स महिषासुरः क्षुरक्षुण्णमहीतलः सन् योद्धुं क्रोधात् अग्रैकपादशफनिष्पिष्टकृताग्रक्षोणिभागः सन् उच्चैरभ्रंलिहाभ्यां शृंगाभ्यां उच्चैरभ्रंलिहान्
पर्वतान् उच्चैरभ्रंलिहमुकुटमूर्द्धनि देव्या उच्चैश्चिक्षेप उच्चैरक्षैप्सीत् । अथ चोच्चैर्ननाद । " णद अव्यक्ते शब्दे " गलगर्जनं चोच्चैश्चकार । महावीर्यः वीर्यसंपन्नः सत्त्ववान्
महिषोऽतितरामिति यावत् ॥२५॥ यस्य महिषासुरस्य वेगेन जवेन युक्तं भ्रमणं तेन विक्षुण्णा विशेषेण संपिष्टा मही व्यशीर्यत स्वयमेव विशीर्णाभवत् । " शॄ हिंसा-

**निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥ सिंहं हंतुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥ २४ ॥ सोऽपि कोपान्महावीर्यः खुरक्षु-
ण्णमहीतलः ॥ शृंगाभ्यां पर्वतानुच्चैश्चिक्षेप च ननाद च ॥ २५ ॥ वेगभ्रमणविक्षुण्णमही तस्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः
प्लावयामास सर्वतः ॥ २६ ॥ धुतशृंगविभिन्नाश्च खंडंखंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २७ ॥**

याम् " क्र्यादिः परस्मैपदी विपूर्वोऽकर्मकः । इह तु अंतर्भावितण्यर्थविवक्षायाम् । विशीर्यंते मेघः स्वयमेव विशीर्यंते हेतुः स्वयमेवेतिवत्कर्मकर्त्तरि लङि रूपम् । किं
च तस्य महिषस्य लांगूलेन पुच्छेन आहतः ताडितोऽब्धिः अर्णवः सर्वतः सर्वत्र पृथिव्यां सकलजनान् प्लावयामास । वारिपूरमग्नं विश्वं चकार । तसिप्रकरणे " आ-
द्यादिभ्य उपसंख्यानम् " इत्यधिकरणे तसिः । यद्वा कर्मणि ल्यब्लोपे पंचमी । सर्वतः सर्वां पृथ्वीं प्लावयामास ॥ २६ ॥ घनाश्च महांतो मेघाः तेन महिषासु- ॥२९॥
रेण धुताभ्यां शृंगाभ्यां विभिन्नाः विदारिताः संतः खंडंखंडं शकलं शकलं ययुः । महिषेण धुतशृंगविदारिताः महांतो मेघाः खंडप्रकाराः खंडसदृशाः संतः ययुरि-
त्यर्थः । " प्रकारे गुणवचनस्य " इत्यधिकस्याल्पसादृश्ये गुणवचनस्य द्विर्भावः । खंडखंडं ययुरिति तु पाठे " कर्मधारयवदुत्तरेषु " इति विकल्पेन कर्मधारयत्वातिदे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शात् द्विरुक्तयोर्भागयोर्मध्ये पूर्वभागसंबन्धिन्या विभक्तेर्लुक् । श्वासानिलास्ता विशीर्णाः, श्वासानिलास्ताः शतशः, श्वासानिलाहताः शीर्णा निपेतुर्नभसोऽचलाः । ” अत्र पाठत्रये तस्य महिषस्य रोषजाः श्वासा एव अनिलाः वायवस्तैरस्ताः क्षिप्ताः अत एव विशीर्णाश्चूर्णीभूताः अचलाः पर्वताः नभसः सकाशान्निपेतुः निपतिताः । यद्वा श्वासानिलास्ताः शतशः शतं शतं शतशः । संख्यैकवचनाच्च वीप्सायां शस्प्रत्ययः । यद्वा श्वासानिलैराहताः ताडिता इत्यनुसंधेयम् । शीर्णाः चूर्णीभूताः ॥ २७ ॥ इति प्रागुक्तरीत्या क्रोधसमाध्मातं क्रोधाग्निसंयुक्तं क्रोधेन समंतादाविष्टं विजृंभितं तमभ्यापतंतं महिषं महासुरं दृष्ट्वा वीक्ष्य तदा तद्वधाय तं महिषं हंतुं चंडिका देवी कोपमकरोत् । वध हिंसार्थः इति वधिः प्रकृत्यंतरं “ जनिवध्योश्च ” इति वधिग्रहणादवसीयते तद्वधायेति तस्य वधनं वधः तद्वधः भावे घञ् । जनिवध्योश्चेत्यत उपधाया वृद्ध्यभावः । “ क्रियार्थोपपदस्य च कर्मणि स्थानिनः ” इति चतुर्थी । तद्वधं विधातुं कोपं क्रोधमकरोत् ॥ २८ ॥ म्रियंतेऽस्मिन्वीराः मृधं युद्धं तत्र

इति क्रोधसमाध्मातमापतंतं महासुरम् ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ २८ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरम् ॥ तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९ ॥ ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥ ३० ॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः ॥ तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥ ३१ ॥

महति मृधे सा देवी तावत्तस्य महिषासुरस्य वधाय वै प्रसिद्धं वरुणादवाप्तं पाशमायुधं क्षिप्त्वा प्रवर्त्य तं महासुरं बबंध । अथ स पाशबंधमसहिष्णुः माहिषं रूपं तत्याज अत्याक्षीत् । ततोऽनु स संत्यक्तमहिषाकारो मायावित्वादन्य एव पशुः शार्दूलः खड्गः पौत्री वा प्रशस्तं प्रथमेन क्षमगात्रोऽभूत् । अथ देव्या पाशेन सोऽपि वा बद्ध एवाभूत् ॥ २९ ॥ ततो महिषादिरूपपरित्यागादनंतरं स महासुरो मायावित्वात्सद्यः सपदि देव्या समं योद्धुं सिंहोऽभवत् । ततोऽम्बिका देवी तस्य मायामयसिंहस्य शिरः मूर्द्धानं यावद्यावता कालेन छिनत्ति च्छेत्स्यति तावत्तावत्येव काले स मायावी महासुरः खड्गपाणिः पुरुषः प्रादुर्भवन्नदृश्यत ऐक्ष्यत देव्येति शेषः । “ यावत्तावच्च साकल्ये वधौ मानेऽवधारणे । ” खड्गः पाणौ यस्य स तथोक्तः । “ प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः ” इति वक्तव्यम् ॥ ३० ॥ ततः खड्गपाणेः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरुषस्य दर्शनानंतरमेव देवी आशु सत्वरं सायकैः आशुगैः खड्गचर्मणा सार्द्धं तं खड्गपाणिं पुरुषं कंठे चिच्छेद। खड्गं च चर्म च पुरुषं च सायकैश्चिच्छेदेति सूचयितुं सार्द्धमित्युक्तम्। खड्गश्च चर्म च खड्गचर्म सेनांगत्वादेकवद्भावः। तेन सार्द्धम्। "फलकोऽस्त्री फलं चर्म"। चर्ममयं चर्मगात्रत्राणं हस्तग्राह्यं फलकम्। करेण च महासिंहं तं चकर्ष जगर्ज च। ततः पुरुषरूपतः सकाशात्स महासुरः महागजोऽभूत्॥ ३१॥ स च महागजः करेण शुंडादंडेन तं प्रसिद्धं देवीवाहनं सिंहं चकर्ष आकृष्टवान् जगर्ज च बृंहितं च चकार। "गर्ज शब्दे" भ्वादिः परस्मैपदी। गजः सिंहं चकर्षेति हि असुरविनाशसूचक उत्पातोऽयं प्रसिद्धवैपरीत्यात्॥ ३२॥ ततो देवी तु पुनः सिंहं कर्षतः आक्षिपतः आहरतः तस्य महागजस्य करं शुंडादंडं खड्गेन चंद्रहासेन निरकृंतत निकृष्याच्छैत्सीत्। "कृती छेदने" परस्मैपदी। यदभ्यधुः। "कृणत्ति कृंततीत्येते वेष्टने छेदने क्रमात्।" इति। इह तु छांदसमात्मनेपदम्। ऋषयश्छांदसम्पदमनुकुर्वंति। अन्यथा निरकृंतदित्येव स्यात्।

करेण च महासिंहं तं चकर्ष जगर्ज च॥ कर्षतस्तु करं देवी खड्गेन निरकृंतत॥ ३२॥
ततो महासुरो भूयो माहिषं वपुरास्थितः॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरम्॥ ३३॥

कर्षतस्तत्करं देवीति पाठे कर्षतो गजस्य करः प्रसिद्धः तत्कर इति व्याख्या। इह स महासुरः प्राक् महाहवक्षमः। "महिषोऽभूत्ततो व्याघ्रः खड्गः पोत्री हरिः पुमान्। गजोऽथ महिषो भूयो मायावी स महामृधे॥" इत्येतदावेदयितुमाह। ततो गजवपुस्त्यागानन्तरं भूयः पुनरपि स महासुरः माहिषं वपुराश्रितः प्राप्तवान् सन् तथैव पूर्ववदेव प्राग्वन्महिषः संस्तथैव त्रैलोक्यं क्षोभयामास। क्षोभं प्रापयामास। तथैव स चराचरं त्रैलोक्यं लोकत्रयं क्षोभयामास। आश्रित इति "श्रिञ् सेवायाम्"। प्रतिष्ठितप्रतिज्ञानार्थः सकर्मकः। "गत्यर्थाकर्मकश्लिषशीङ्स्थास" इत्यादिना कर्त्तरि क्तः। वपुराश्रितः अंगीकृतवान् सन् त्रैलोक्यं क्षोभयामासेत्यर्थः। आस्थितेत्यविसर्गपाठे तु "आङः स्थः प्रतिज्ञाने" इत्यात्मनेपदम्। कर्तरि लुङ् "स्थाघ्वोरिच्च" इत्यकारस्य इत्वं सिचः कित्त्वं च तेन गुणाभावः। "ह्रस्वादंगात्" इति सिचो लोपः। स इति च्छेदे तु महासुर इत्यर्थः। चराश्च देवाः अचराश्च पर्वतादयः चराचरम्। "सर्वो द्वंद्वो विभाषैकवद्भवति"। चराचरात्मकं त्रैलोक्यं स महासुरः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्षोभयामासेत्यर्थः । यद्वा चराश्चाचराश्च चराचरास्तैः सहितं त्रैलोक्यं सचराचरम् । संभवात्स्वरूपाख्यानतो विशेषणविशेष्यभावः । चीर्गेत्यर्थः । " चरिचलिपति-
वदीनां वा द्वित्वमच्याक् चाभ्यासस्य " इति पचाद्यचि द्विर्भावेऽभ्यासस्य च आगागमः । आग्विधिसामर्थ्याद्धलादिशेषाभावः । अन्यथा ह्यागमादेशयोर्विशेषाभा-
वादागमलिंगमपार्थकं स्यात् । " चरिष्णु जंगमचरं त्रसमिंगं चराचरम् । " ॥ ३३ ॥ ततस्त्रैलोक्यक्षोभणाज्जगन्माता जगतां जननी जगद्धिता चण्डिका देवी क्रुद्धा
सती अत एवारुणलोचना अरुणे रक्ते लोचने यस्याः सा उत्तममममृतं पानं मधु पुनः पुनः पपौ । " पा पानें " कर्मणि ल्युट् । लीलया मध्वेव पपौ पुनः पुनश्च
जहासैव युद्धं तु न गणयामास । " हसे हसने" लिटस्तिपो णल् । पपाविति "आत औ णलः" । वीरपानं चकारेत्यर्थः। "वीरपानं तु यत्पानं वृत्ते भाविनिवारणे।"
वीराणां कर्त्तव्यं मद्यपानं वीरपानम् । " मुहुः पुनःपुनः शश्वदभीक्ष्णमसकृत्समाः । घटा युतायुतोन्मानं मधुमांसोपदंशकम् ॥ एकैकवारतश्चण्डी पपावत्र रणोत्सवे ।"

ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना॥३४॥ ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः॥वि-
षाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान्॥३५॥ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः॥ उवाच तं मदोद्धूतमुखरागाकुलाक्षरम्॥३६॥

॥ ३४ ॥ वलेन सामर्थ्येन वीर्येण प्रभावेण तेजसा मदेन हर्षेण गर्वेण चोद्धतः अविनीतो निर्मर्याद उत्कटः स महिषासुरोऽपि ननर्द च कण्ठगर्जनं चकार । " नर्द
गर्द शब्दे " । चण्डिकां प्रति भूधरान् गिरीन् विषाणाभ्यां शृंगाभ्यां चिक्षेप प्रक्षिप्तवान् । अविनीतः समुद्धतः । " स्थैर्यसामर्थ्यसैन्येषु वलं ना काकसीरिणोः । "
वीर्यं वलं प्रभावश्च ॥ ३५ ॥ सा चण्डिका तेन महिषासुरेण प्रहितान् क्षिप्तांस्तान् भूधरान् गिरीञ्छरोत्करैः शराणामुत्करैः उत्क्षेपैः चूर्णयंती निःशेषयंती सती तं
महिषासुरं मदोद्धूतमुखरागाकुलाक्षरं यथा स्यात् । उवाच मदान्मधुपानजादुद्धूतो मुखे रागस्तेनाकुलान्यक्षराणि वर्णा यस्मिन् कर्मणि वचने तन्मदोद्धूतमुखरागाकुला-
क्षरम् । क्रियाविशेषणानां कर्मत्वं नपुंसकैकत्वं च वाच्यम् । यद्वा मदोद्धूतमुखरागा देवी मदेन मधुपानजेन उद्धूतो जातो मुखे रागः कषायभावो यस्याः सा । आकु-
लाक्षरमिति क्रियाविशेषणम् । आकुलानि व्यामिश्रितान्यस्पष्टाक्षराणि यस्मिन् कर्मणि तत् ॥ ३६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र ह्याकुलाक्षरमित्युक्तत्वाद्गर्ज गर्जे इत्येवं प्रतिपदं व्यत्यस्ताक्षरं देव्योक्तम् । ऋषिणा तु तत्सत्कृत्यार्थसंगत्या प्रणीतम् । हे मूढ हे अज्ञ, त्वं क्षणं तावद्गर्ज गर्ज यावदहं मधु पिबामि । यावता क्षणेन मधु पास्यामि तावंतं क्षणं त्वमपि कण्ठगर्जनं कुरु कुरु । तावदेव तवायुस्ततः क्षणांतरे मया त्वयि हते व्यसूकृते सति अत्रैव संग्रामभूमावेव अत्रैव अस्मिन्नेव क्षणे वा आशु अविलंबितं देवता इंद्रादयो देवा गर्जिष्यंत्यानन्दतो गास्यंति । " गृजि शब्दे " लट् । पिबामीति पानाग्रे भविष्यति काले " यावत्पुरानिपातयोर्लट् " इति लट् । " अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः । " ॥ ३७ ॥ सा देवी एवमुक्त्वा समुत्पत्य सम्यक् उत्पत्य तं महिषासुरमारूढा आरूढवती एनं महिषासुरं कण्ठे च कण्ठप्रदेश एव एकेन पादेन उचितेनाक्रम्य शूलेनाताडयत् । " तड आघाते " चुरादिः । आरूढा इह तु

देव्युवाच ॥ गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ॥ मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु देवताः ॥३७॥ ऋषिरुवाच ॥ एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ ३८ ॥ ततः सोऽपि पदाक्रांतस्तया निजमुखात्ततः ॥ अर्धनिष्क्रांत एवासीद्देव्या वीर्येण संवृतः ॥ ३९ ॥ अर्धनिष्क्रांत एवासौ युध्यमानो महासुरः ॥ तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४० ॥ एवं स महिषो नाम ससैन्यः ससुहृद्गणः ॥ त्रैलोक्यं मोहयित्वा तु तया देव्या विनाशितः ॥ ४१ ॥

" गत्यर्थाकर्मक " इत्यादिना कर्त्तरि क्तः । एनमित्यन्वादेशे रूपमिदमेतदोन्यतरस्याम् ॥ ३८ ॥ ततोऽनंतरं स महिषासुरस्तया देव्या पदा पादेन आक्रांतः स शूलेन ताडितोऽपि तस्मान्निजमुखादात्मीयमुखात्सकाशादर्द्धनिष्क्रांत एव अर्द्धेन शरीरेण निर्गतः देव्या वीर्येण बलेन सामर्थ्येन संवृतः संछादितः स्तंभितः आसीत्तथैवास । न संपूर्णो निष्क्रांतः अर्धनिष्क्रांतः अर्द्धेन वा निष्क्रांतः अर्धनिष्क्रांतः ॥ ३९ ॥ असौ महासुरो महिषवक्त्रादर्द्धनिष्क्रांतः शरीरार्द्धेन निर्गतः युध्यमानः युद्धं कुर्वाण एव तया देव्या भगवत्या महासिना मण्डलाग्रेण शिरस्तस्यासुरस्य उत्तमांगं छित्त्वा भूमौ निपातितः । शरीरस्यार्द्धः निष्क्रांतः विशेषेण समासः । अर्द्धेन वा निष्क्रांतः " कर्तृकरणे कृता बहुलम् " इति समासः । न बहुव्रीहिः । अर्द्धो निष्क्रांतो देहभागो यस्येति विग्रहप्रसंगात् ॥ ४० ॥ एवमुक्तरीत्या महिषो नाम ॥३१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसिद्धः स महासुरः सैन्यसहितः सुहृद्गणसहितः त्रैलोक्यं त्री ल्लोकान् मोहयित्वा मोहं दुःखं प्रापय्य ततो युद्धं कुर्वाणस्तया देव्या नाशं प्रापितः । महाकाल्या निपातित इति पाठे महान् कालः उग्रस्तत्पत्नी महती काली दुर्गा तया वा ॥ ४१ ॥ तदा तस्मिन् समये देव्या महिषे महासुरे विनिपातिते सति त्रैलोक्यस्थैः सर्वैः पुरुषैः देवीं प्रति जयलोकोत्कर्षेण वर्तस्वेत्युक्तम् । कीदृशैः देवाः स्वर्लोकसद्मानः इन्द्रादयः असुराः पातालवासिनो बलिप्रभृतयः मानवा भूलोकसद्मानो ब्राह्मणादयस्तैः सहितैः । पुनः कीदृशैस्तदाभूतैस्तस्मान्महिषासुरादाभूताः पीडां प्राप्तवंतस्तैः । " आस्तु स्यात्कोपपीडयोः । भू प्राप्तौ " आत्मनेपदी चुरादिः । " आधृषाद्वा " इति णिजभावपक्षे कर्त्तरि क्ते रूपम् । योगविभागात्समासः । इत्थंभूतेति निर्देशाद्वा ॥ ४२ ॥ ततो महिषमर्द्दनादनंतरं यत्किंचिद्दैत्यसैन्यमवशिष्टं स्वल्पं तदपि हाहाकृतं हाहा इति ससंभ्रमं दीनभावेन कृतमाहितं सत् ननाश । " णश अदर्शने " अदर्शनमभावः । अदृष्टमभूत् । किंच देवतानां गणास्तु सकलाः

त्रैलोक्यस्थैस्तदाभूतैर्महिषे विनिपातिते ॥ जयेत्युक्तं ततः सर्वैः सदेवासुरमानवैः ॥४२॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४३ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥

सर्वेऽपि परमुत्कृष्टं प्रहर्षं संतोषं जग्मुश्च प्राप्तवन्तः । " हा विषादशुगार्त्तिषु । चापले द्वे भवतः " इति वक्तव्यम् । संभ्रमेण प्रवृत्तिश्चापलम् । हाहा इति संभ्रमप्रवृत्त्या दीनत्वेन कृतमनाथं ननाश दैत्यसैन्यमित्यर्थः ॥४३॥ अथ तां देवीं सुराः इन्द्रादयः दिवि भवैर्दिव्यैर्महर्षिभिः सह सहितास्तुष्टुवुः स्तुतवन्तः । सुराश्च दिव्या महर्षयश्च देवीं स्तुतवन्त इत्यर्थः । अथ गन्धर्वपतयश्च जगुः हाहाहूहूप्रभृतयो गन्धर्वाः गायमानास्तेषां पतयो गानविचक्षणास्तुम्बुरुप्रभृतयः गीतवंतः । " गै शब्दे " लिट् । अथ अप्सरोगणाश्च ननृतुः उर्वशीप्रभृतयः स्वर्गवारांगनाः तासां गणाः नृत्यवन्तो देवीविजये महोत्सवे । " नृती गात्रविक्षेपे " नाट्ये लिट् उस् ॥ ४४ ॥ इति श्रीमार्कण्डेये महाराजाधिराजश्रीमत्तोमरान्वयश्रीमदुद्धरणात्मजश्रीशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां महिषासुरवधस्तृतीयोऽध्यायः ॥ ३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महिषासुरे निहते सति ततोऽनन्तरमिन्द्रपुरोगमाः शक्रप्रमुखाः सर्वेऽपि सुरगणाः स्तुतिं कर्तुमारेभिरे उपक्रांतवंतः । " रभ राभस्ये " । आत्मनेपदे लिट् । पुरो गच्छतीति पुरोगमः इन्द्रः पुरोगमः अग्रेसरो येषां ते ॥१॥ रणे देव्या चंडिकया तस्मिन्नतिवीर्ये सुरारिबले महिषासुरसैन्ये च अतिवीर्ये दुरात्मनि महिषासुरे च हते सति प्रणतिनम्रशिरोधरांसाः प्रहर्षपुलकोद्गमचारुदेहाः शक्रादयः सुरगणास्तां देवीं वाग्भिस्तुष्टुवुः स्तुतवंतः। "वीर्यं वलं प्रभावश्च "। प्रणतिभिर्नम्राः शिरोधराः कंधरा ग्रीवा अंसाः स्कंधा भुजशिरांसि च येषां ते धरंतीति धराः शिरसां धराः शिरोधराः प्रहर्षे प्रमोदे पुलकाः रोमांचास्तेषामुद्गमः प्रादुर्भावस्तेन चारवो मनोहरा देहा येषां ते । वाग्भिरिति चतुर्विधाभिर्वाणीभिः । यद्भाष्यम् । "चतुष्टयीशब्दानां प्रवृत्तिः। जातिशब्दाः गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्था " इति । अन्ये त्वाहुः ।

ऋषिरुवाच ॥ ततः सुरगणाः सर्वे देव्या इंद्रपुरोगमाः ॥ स्तुतिमारेभिरे कर्त्तुं निहते महिषासुरे ॥ १ ॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या ॥ तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताःस्म विदधातु शुभानि सा नः ॥ ३ ॥

" द्रव्यं गुणं क्रियां जातिमाहुः शब्दाश्चतुर्विधाः । यदृच्छया प्रयुक्ताः स्युः संज्ञाशब्दाश्च पंचमाः ॥ " अपरे त्वाहुः । " वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यंती सूक्ष्मा चाप्यनपायिनी ॥ " चेति चतुर्विधा वागुच्यते । शब्दानां निष्पत्तिर्यस्याः सा घटाद्यर्थरूपा वाक् वैखरीत्युच्यते । श्रुतिगोचरा श्रोत्रग्राह्या वाक् मध्यमेत्युच्यते । द्योतितोऽर्थो यया सा द्योतितार्था ज्ञानरूपा वाक् पश्यंतीत्युच्यते । अनपायिनी ब्रह्मरूपा वाक् सूक्ष्मेत्युच्यते ॥ २ ॥ यया देव्या आत्मशक्त्या स्वशक्त्या इदं जगत् प्रपंचितं तामखिलदेवमहर्षिपूज्यामम्बिकां देवीं भक्त्या आनताः स्म । सा नोऽस्माकं शुभानि दधातु करोतु। "तु हि च स्म ह वै पादपूरणे " । निःशेषाः सर्वे देवास्तेषां गणास्तेषां शक्तयः तासां समूहास्त एव मूर्त्तयो यस्याः सा । अखिलाः सर्वे देवाः महर्षयश्च तैस्तैः पूज्यां पूजनीयाम आनता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वयं भक्तिप्रह्वाः ॥ ३ ॥ यस्याः देव्या अतुलमनुपमं प्रभावं बलं वक्तुं साकल्येन वर्णयितुं ब्रह्मा चतुर्मुखः भगवानैश्वर्यसम्पन्नः अनंतो विष्णुः हरश्च नालं न हि समर्थः । हि प्रसिद्धमेव तत् । सा चण्डिका देवी अखिलजगत्परिपालनाय अशुभभयस्य नाशाय मतिं करोतु । अखिलं जगत्परिपालयितुमशुभेभ्यो भयं नाशयितुं च स्वयं स्वांतं सदाऽवधानं करोतु । प्रभावः प्रभुत्वम् । " स्थौल्यसामर्थ्यसैन्येषु बलम् " । अशुभभवस्येति पाठे भव उदयः ॥ ४ ॥ हे देवि, सुकृतिनां पुण्यवतां भवनेषु गेहेषु या श्रीः संपत्तिरभूदस्ति भविष्यति स्वयं तां त्वां नताः प्रणता वयं स्म । अतस्त्वं सुकृत्यात्मकं विश्वं श्रीः सती परिपालय । हे देवि, पापात्मनां भवनेषु याऽलक्ष्मीः अभूदस्ति भविष्याति स्वयं तां त्वां नताः प्रणताः वयम् । अतस्त्वं पापात्मकं विश्वमलक्ष्मीः सती परिपालय । हे देवि, कृतधियां ज्ञानिनां हृदयेषु या बुद्धि-

यस्याः प्रभावमतुलं भगवाननंतो ब्रह्मा हरश्च न हि वक्तुमलं बलं च ॥ सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य
मतिं करोतु ॥ ४ ॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य
लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५ ॥ किं वर्णयाम तव रूपमचिंत्यमेतत्किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं
चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥

रभूदस्ति भविष्यति स्वयं तां त्वां नताः प्रणता वयमतस्त्वं कृतध्यात्मकं विश्वं बुद्धिः सती परिपालय । हे देवि, सतां सज्जनानां हृदयेषु या श्रद्धा सत्कर्मनिष्ठाऽभूदस्ति भविष्याति स्वयं तां त्वां नता वयम् अतः त्वं सदात्मकं विश्वं श्रद्धा सती परिपालय । हे देवि, त्वं कुलजनप्रभवस्य हृदये या लज्जाऽभूदस्ति भविष्यति तां त्वां नता वयम् अतः त्वं सत्कुलाचारसंरक्षणं लज्जा लज्जा सती सत्कुलजनप्रभवात्मकं विश्वं परिपालय । स्मशब्दः पादपूरणे । स्वयमव्ययम् । सुष्ठु अयः शुभावहो विधिर्यस्मिन् कर्मणि नमने परिपालने वा तत् ॥ ५ ॥ असुराश्च देवाश्च असुरदेवाः शाश्वतिकाविरोधाविवक्षायां त्वसुरदेवं तेषां गणा आदयो येषां ते मनुष्यादीनां ते तथोक्ताः तेषु । " अजाद्यदंतम् " इत्यसुरशब्दस्य पूर्वप्रयोगः । अजाद्यदंतत्वादभ्यर्हितत्वाच्च अमरदैत्यगणादिकेष्विति तु पाठः सभ्यः । हे देवि, सर्वेष्वसुरादिगणे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

 षु तवाद्भुतं रूपमचिंत्यं मनसापि चिंतयितुं स्मर्त्तुमप्यशक्यमेतत्तव मनोहरं रूपं वाचा किं वर्णयाम । "वर्ण वर्णक्रियायाम्" चुरादि लोडंतम् । यन्मनसापि स्मर्त्तुमश-
 क्यं तद्वाचा किं वर्णयितुं शक्यं स्यादिति भावः । हे देवि, तव भूर्यधिकमसुरक्षयकारि अतिवीर्यं च किं वाचा वर्णयाम यन्मनसाप्यचिंत्यं स्यात् । हे देवि, सर्वेष्व-
सुरदेवगणादिकेष्वाहवेषु संग्रामेषु तवाद्भुतानि चरितानि वीरकर्माणि किं वर्णयाम वाचा यानि मनसापि स्मर्त्तुमशक्यानि ॥ ६ ॥ हे देवि, त्वं त्रिगुणापि त्रयो गुणा
यस्यां सा सत्त्वं रजस्तम इति त्रयो गुणाः । सत्त्वगुणा त्वं वैष्णवी शक्तिः सती जगंति रक्षसि रजोगुणा त्वं ब्राह्मी शक्तिः सती सृजसि तमोगुणा रौद्री शक्तिः सती संहरसि अतः सर्जनीयसंरक्षणीयसंहरणीयानि जगंति स्वर्गभूपातालाख्यानि येषां त्वं हेतुरसि । हे देवि, त्वं हरिहरादिभिरपि देवैः तत्त्वतो न ज्ञायसे मायारूपत्वात् । हे देवि, त्वमपारा अनवधिरनंता । त्वं सर्वाश्रया सर्वे आश्रयो यस्याः सा । आश्रीयते आश्रया सर्वस्याश्रया सर्वाश्रया । हे देवि, इदमखिलं जगत्तवैवांशभूतं मायामयत्वात् । जगतः अंशरूपेण निष्पन्नमंशत्वं भूतं प्रापदिति वांशभूतं, त्वमव्याकृता केनापि न व्याकृतासि पदेन वाक्येन । "यतो वाचो निवर्त्तंते अप्राप्य मनसा सह"

हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा। सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या॥७

इति श्रुतेः। त्वं च विद्यात्वेन परब्रह्मतत्त्वमेव । यद्वा हे देवि, त्वमव्याकृतासि न केनापि प्रकाशितासि । परप्रकाश्यत्वानभ्युपगमाद्ब्रह्मस्वरूपस्य स्वयंप्रकाशत्वाभ्युपगमाच्च । त्वं च परब्रह्मतत्त्वमेव स्वयं प्रकाशमनतिशयानंदचिद्रूपमसीत्यर्थः। यद्वा । अव्याकृताऽव्याहता केनापि न हिंसितासि । "कृञ् हिंसायाम्" स्वादिः । त्वमेव तु युद्धेऽहितान् व्याकृणोषि व्याहंसि । यदाहुः। "हिंसाकरणयोः स्वादौ कृणोति कृणुते कृञः। करोति कुरुते द्वे द्वे संपद्येते क्रमादिति॥" अव्याकृता हि परमेति पाठे तु हि यस्मात् हे देवि, त्वं परमा परा उत्कृष्टा मा लक्ष्मीस्ततः अः विष्णुस्तेन व्याकृता उरसि स्थापिता लोकेषु वा । यद्वा हे देवि, हि यस्मात्तव रोमकूपेषु निजरश्मीन्
दिवाकरः ददौ अतस्त्वमव्याकृतासि अविना सूर्येण आसमंतात्कृता तेजोभिर्निर्मितासि । अत एव त्वं परमा परा श्रेष्ठा मा तेजोलक्ष्मीः । " अवयः शैलमेषार्काः " ।
यद्वा । हि यतः त्वं जगतामाद्या मूलभूता । अतः सृष्टेः प्राक्केवलैवेत्यव्याकृता सत्त्वरजस्तमोगुणानुदयाद्भेदप्रत्ययानुदयात्सत्त्वादिना अपृथक्कृता सांख्यदर्शनप्रसिद्धा परमा प्रकृतिः प्रधानाख्यासि । इयं देवी सांख्यमते प्रकृतिराख्याता वेदांतिनस्तु तामनिर्वचनीयामात्ममायामनादिमविद्यामाहुः । शाब्दिकास्तां वस्तुतत्त्वावसिति-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिद्धिमेदामाहुः । शैवास्तां शिवशक्तिसंसक्तिमाहुः । वैष्णवाः विष्णुमायां तामाहुः । शाक्तास्तु तां महामायामनादिमाहुः । पौराणिकाः तां देवीमाहुः ॥ ७ ॥ " सुर ऐश्वर्ये " । सुरंति सुराः सुराणां भावः सुरता साऽस्ति येषां ते सुरताः इंद्रादयः । मत्वर्थेऽर्श आदित्वादच् । समस्ताश्च ते सुरताश्च समस्तविबुधा इति यावत् । हे देवि, सा वै प्रसिद्धा स्वाहा त्वमेवासि यस्याः समुदीरणेन सकलेषु मखेषु यज्ञेषु समस्तसुरताः यज्ञभुजः तृप्तिं प्रयांति । किंच वै प्रसिद्धा स्वाहा च त्वमेवासि अत एव खलु पितृयज्ञेषु जनैः श्राद्धकृद्भिः पुरुषैः पितृगणस्य तृप्तिहेतुः। स्वधेत्येवंरूपं मंत्रात्मा सती त्वमेवोच्चार्यसे कथ्यसे । " देवे श्राद्धे भवेत्स्वाहा पित्र्ये श्राद्धे स्वधोच्यते । स्वाहा देवहविर्दाने श्रौषड्वौषड् वषट् स्वधा ॥" इत्यभिधाने तु विभागो नाश्रितः ॥८॥ हे देवि, हि निश्चयेन या मुक्तिहेतुः अचिंत्यमहाव्रता परमा वेदांतोद्भवब्रह्मतं-

यस्याः समस्तसुरतासमुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ॥ ८ ॥ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा भगवती परमा हि देवि ॥ ९ ॥ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥ देवि त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहंत्री ॥ १० ॥

त्वावगतिरूपसाक्षात्कारलक्षणा विद्यासि भगवती सुनियतेंद्रियतत्वसारैर्मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैरभ्यस्यसे पुनःपुनरावर्त्यसे शिक्ष्यसे इत्यन्वयः। मुक्तिरमृतं कैवल्यम् । " ज्ञानादेव तु कैवल्यम् " इत्यभ्युपगमात् । मुक्तिहेतुर्विद्या अविचिंत्या चिंतयितुमशक्या । दुस्तराणि महांति व्रतानि उपवासादीनि यस्यां साचिंत्यमहाव्रता अभ्यस्यसे । " असु क्षेपणे " अभिपूर्वः कर्मणि लटः थासः से । सुष्ठु नियतानि विषयेभ्यो व्यावर्तितानींद्रियाणि यैः ते च ते तत्त्वसाराश्च तत्त्वं तत्त्वज्ञानं सारं नान्यं येषां ते तत्त्वसाराः । मन्यंते मुनयस्तैः मोक्षमर्थयंते मोक्षार्थिनः अस्तः नष्टः समस्तदोषः कामादिरूपो येषां तेऽस्तसमस्तदोषास्तैः विद्यते ज्ञायंतेऽनया विद्या भगवती सर्वैश्वर्यसंपन्ना परमा उत्कृष्टा ॥ ९ ॥ हे देवि, भगवती ऐश्वर्यादिसंपन्ना शब्दात्मिका वर्णपदवाक्यरूपवाणीस्वरूपा । सुविमलर्ग्यजुषामुद्गीथरम्यपदपाठवतां साम्नां च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स. श. ॥३४॥ निधानं सर्वजगतामार्तिहंत्री परमा उत्तमा चतुर्वर्गदर्शिनी वार्त्ता वृत्तांतरूपा त्रय्यसि वेदानां त्रयी भवसीत्यन्वयः । अथवा भगवती त्वं सर्वजगतां भवभावनाय संसृत्युत्पादनाय परं निधानमाश्रयः स्थानमसि । त्वमार्तिहंत्र्यसि । त्वं वार्तासि कृषिगोरक्षादिवृत्तिरसि । त्वं शब्दात्मिका नादरूपासि । यद्वा वर्णपदवाक्यरूपासि गद्यपद्यात्मिकासि । हे देवि, त्वं सुविमलानि ऋग्भिः सहितानि यजूंषि तेषाम् । ऋचः ऋग्वेदाः यजूंषि यजुर्वेदाः तेषां साम्नां सामवेदानां च त्रय्यसीत्यन्वयः । वेदशाखानां बाहुल्याद्बहुवचनम् । उद्गीथ उद्गीतमत एव रम्यपदपाठवतामुद्गीथरम्याणि पदानि तैः कृत्वा पाठवतामन्यथा पदानां पाठः पदपाठः उद्गीथेन रम्यः पदपाठो येषां तानि उद्गीथरम्यपदपाठानि सामानीति स्यात् । उद्गीथः प्रणव इति क्षीरतरंगिणीकारो व्याख्यत् । उद्गीथः सामवेदः इत्यौणादिवृत्तिकारः । प्रणवपक्षे उद्गीथरम्यता ऋग्यजुषाणामप्यस्ति । यद्वा उद्गीथ उद्गीतं साम्नि प्रसिद्धं " वार्त्ता वृत्तौ जनश्रुतौ " । वृत्तिः कुसीदपाशुपाल्यवाणिज्याख्या । जनश्रुतिर्वृत्तांतः । " स्त्रिया- शां. टी. अ० ४

मेधासि देवि विदिताखिलशास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥

मृक्सामयजुषी इति वेदास्त्रयस्त्रयी । " ऋचः यजूंषि च ऋग्यजुषाणि अचतुरादिना समासांतः इह तु समासांतविध्यानित्यत्वमाश्रितम् । सुविमलानि ऋग्यजूंषि येषाम् । यद्वा समासांतरमुक्तमेव । भवभावनाय भवः शिवः परमात्मा यस्य भावनं ध्यानं तस्मै प्रवृत्ता त्रयी त्वमेवासीत्यर्थः । " उग्रे जन्मनि कल्याणे प्राप्तौ संसृतिसत्तयोः । " भवः आर्तिहंत्रीति " जनिकर्तुः प्रकृतिः " इति निर्देशात्समाससिद्धिः । " आर्तिः पीडाधनुःकोटयोः " आङ्पूर्वता क्वचित् ॥ १० ॥ हे देवि, त्वं मेधासि अत एव त्वं विदिताखिलशास्त्रासि । यद्वा हे देवि, त्वं विदिताखिलशास्त्रसारा मेधासि । " धीर्धारणावती मेधा " । विदितान्यखिलानि शास्त्राणि साराणि चतुर्वर्गतत्त्वपराणि न्याय्यानि यया मेधया सा त्वमेवासि । "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥" हे देवि, त्वमसंगा संत्यक्ताखिलबंधहेतुः अप्रतिबंधाऽनिवारितगतिः । दुर्गा दुष्प्रापा दुःखेन गम्यमाना दुर्गा । दुर्गभवसागरनौरसि दुर्गो दुस्तरो भवः संसारः सागर इव तत्र नौः ॥३४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तरणिरसि । यद्वा दुर्गं दुस्तरं भवं स्यति खण्डयति दुर्गभवसा न विद्यते गरो विषं दुःखं यत्र सा अगरा अगरा चासौ नौश्चेति अगरनौः दुर्गभवसा चासौ अगरनौश्च। यद्वा त्वं दुर्गे दुर्गमे दुष्प्रापे भवे शंभौ परब्रह्मभूतत्वे सागरे साम्प्रते विषये असंगा रागादिरहिता दुर्गा दुष्प्रापा नौरसि । नौरिव नौर्देवी ब्रह्मप्राप्तिसाधनविद्यारूपे-त्यर्थः । हे देवि, त्वं कैटभारिहृदयैककृताधिवासा श्रीरसि विष्णुवक्षस्थलनिवासिनी लक्ष्मीस्त्वमेवासि । हे देवि, त्वमेव शशिमौलिकृतप्रतिष्ठा गौरी उमासि । शशी चंद्रः मौलौ किरीटे यस्य स शंभुः तेन कृता प्रतिष्ठावस्थितिरर्द्धशरीरभाक्त्वेन यस्याः सा । "चूडा किरीटं केशाश्च संयता मौलयस्त्रयः ।" ॥११॥ ईषत्सहासं मंदस्मि-तोपेतं रुचिरं परिपूर्णचंद्रबिंबानुकारि पूर्णेंदुबिंबोपमं कनकेषु उत्तमं यत्कनकं तस्येव कांतिः शोभा यस्य तत् अत एव कांतं मनोहरमेवंभूतं तव वक्त्रकमलं जगन्मोहनं जयति तथापि तद्विलोक्य सहसाऽतर्कितमात्तरुषा प्राप्तकोपेन महिषासुरेण प्रहृतमत्यद्भुतमेतत् । अहो ईदृशं जगन्मोहं जगत्संजीवनं वक्त्रं विलोक्य पुमानानंदमाप्नुयात्

ईषत्सहासममलं परिपूर्णचंद्रबिम्बानुकारिकनकोत्तमकांतिकांतम् ॥ अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महि-षासुरेण ॥ १२ ॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥ प्राणान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितांतकदर्शनेन ॥ १३ ॥

तत्कथं महासुरः संजातकोपः प्राहार्षीदिति भावः । अतर्किते तु सहसाऽव्ययम् । सहसा बलेन वा । " सहोबलं सहामार्गः " । सहते सहः । अनव्ययत्वे सहसाकृ-तमिति " ओजःसहोंभस्तमसस्तृतीयायाः " इत्यौपपदिकमलुग्विधानं चावगमकम् । अद्भुतम् " अदिभुवो डुतच् " । अदित्याश्चर्येऽव्ययम् । आत्ता रुट् क्रुधेन स तेन ॥१२॥ हे देवि, कुपितं क्रोधाविष्टं भ्रुकुटीकरालं भ्रुकुट्या करालं विषमं भयंकरमत एव क्रोधताम्रमुद्यच्छशांकसदृशच्छवि उद्यन् उदयं कुर्वन् शशांकश्चंद्रः आरक्तः पूर्णश्च तेन सदृशी छविः प्रभा यस्य तत् । तदीयं संग्रामोन्मुखं दृष्ट्वा तु दृष्ट्वैव महिषासुरः सद्यः सपदि दर्शनक्षण एव प्राणान्न मुमोच न तत्याजेति यत् तद-तीव चित्रम् । युक्तोऽयमर्थः । हि निश्चयेन । कुपितांतकदर्शनेन कुपितकृतांतदर्शनेन कैः जंतुभिः जीव्यते न कैश्चिदपि । " जीव प्राणधारणे " अकर्मकत्वाद्भावे लटि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यगात्मनेपदप्रथमपुरुषैकवचनमेव भावस्यैकत्वात् प्राणधारणं प्रकृतावंतर्भूतमिति " जीवते देवदत्तः " इति प्रयोगे पृथक् प्राणपदं कर्मवाचिनः प्रयुज्यते अनुच्यमानेऽपि तस्मिन् प्राणान् धारयतीति गम्यमानत्वादतश्च जीवतिरकर्मकः । भ्रुवौ कुटीव भ्रुकुटी " इको ह्रस्वो ङ्यो गालवस्य " उत्तरपदिकं ह्रस्वत्वमत्वं च वा । तेन भ्रुकुटीव भ्रुकुटी करालं कुटिलम् । " बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे । करालो दंतुरे तुंगे " । कृणोति हिनस्ति करालम् ॥१३॥ हे देवि, त्वं प्रसीद प्रसन्ना भव । परमा परा उत्कृष्टा मा लक्ष्मीरसि । हे देवि, भवती जगतां भवाय सम्पदुद्भवाय सद्यः सपदि भवति भवती त्वं कोपवती अप्रसन्नास्ति तर्हि सद्यः जगतां कुलानि वंशान् समूहान् वा विनाशयति । इह भवतीति भवच्छब्दप्रयोगे युष्मदस्मच्छब्दान्यत्वेन शेषे प्रथमः पुरुषः विनाशयतीत्ययम् । " वंशे वृन्दे गृहे कुलम् " । उक्तमर्थं प्रकृतेन देवीचरितेन योजयति विज्ञातमित्यर्द्धेन । अधुनैव विज्ञातं विदितमस्माभिः एतत्किं यत् त्वा मा इतमेतं योद्धुमागतम् । सुविपुलं सुष्ठु बहुलं महिषासुरस्य बलं

देवि प्रसीद परमा भवती भवाय सद्यो विनाशयति कोपवती कुलानि॥ विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥ ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति बंधुवर्गः ॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्यु-दयदा भवती प्रसन्ना ॥ १५ ॥

सैन्यमस्तं विनाशं नीतं प्रापितमित्येतत् । प्रसादपरमेति पाठे प्रसादेन प्रसन्नत्वेन परमा उत्कृष्टा चेत्तर्हि लोकानां भवाय भूतये संपदुदयाय भवति । " अस्तमदर्शने " अस्तमिति मकारांतमव्ययमनुपलब्धेऽर्थे वर्त्तते । " असु क्षेपणे " इत्यतो नपुंसके भावे क्त तु अस्तं प्रेरणं दूती (री) करणमन्यत्र क्षेपं नीतमित्यर्थः । विनाशं नीतमित्यर्थस्तु न स्यात् । अस्तमित्यव्ययत्वे त्विष्टसिद्धिः ॥ १४ ॥ हे देवि, भवती सदाऽभ्युदयदा सती येषां प्रसन्नास्ति ते एव लोका जनपदेषु जीवत्सु देशेषु संमताः लब्धप्रतिष्ठाः स्युः तेषामेव धनानि स्युः तेषामेव यशांसि सत्कीर्त्तयः स्युः । तेषां बंधुवर्गश्च न सीदति । चकाराच्चतुष्पात्प्रभृतिश्च न सीदति । त एव धन्याः धनेषु साधवः । यद्वा धनानि लब्धारः प्राप्तारः धन्याः । " धनगणं लब्धा " इति सूत्रेण यत्प्रत्ययः । " सुकृती पुण्यवान् धन्यः " । हे देवि, येषां भवती प्रस- ॥३५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्नास्ति त एव निभृताः विनीताः शिक्षितकुलाचारा अचपलाः आत्मजाः सुताः भृत्याः अनुचराः दाराः कुलस्त्रियश्च येषां ते । " निभृतविनीतप्रश्रिताः समाः " ॥ १५ ॥ हे देवि, भवतीप्रसादाद्भवत्याः प्रसादात्संभावितः सुकृती पुण्यवान् जनः प्रतिदिनं सदैव अत्यादृतः अतितरामादृतः सन् सकलानि समस्तानि स्वशाखोक्तान्यत एव धर्म्याणि धर्मेण प्राप्याणि धर्मादनपेतानि यथायथं श्रौतानि स्मार्त्तानि च करोति । ज्योतिष्टोमादीनि हि स्वर्गकामः करोति ततश्च स्वर्गं प्रयाति तेन हेतुना हे देवि, लोकद्वयेऽपि भुवि दिव्यपि त्वमेव फलदासि । ननु इदं इत्थमेव । " प्रश्नावधारणानुज्ञानुनयामंत्रणे ननु । नौ वयोधर्मे " इति धर्मेण प्राप्याणीत्यर्थे यत्प्रत्ययः । यद्वा धर्मपथ्यर्थन्यायादनपेते यत् । अत्यादृतौ सादरार्चितौ । ननु च भवतीप्रसादादित्यत्र सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावो भवतीति भवत्प्रसादादिति स्यात्तत्राह । पुंवदिति योगविभागसाध्यमिदं पुंवत्त्वं क्वचिदेव योगविभागादिष्टसिद्धिः । ततश्चैकोऽहं भवतीसुतक्षयकरो मातः कियंतो रय इतिवत्पुंवद्भावा-

धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकद्वयेऽपि फलदा ननु देवि तेन ॥ १६ ॥ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीवशुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥ १७ ॥

भावः क्वचिदस्त्येव । भवतीति तु च्छित्त्वा प्रसादात्प्रसन्नत्वाद्भवती लोकद्वयेऽपि फलदास्ति इति पुंवत्वशंकानिरासपरव्याख्याने भवतीसुतक्षयकर इति प्रयोगः कदर्थितः स्यात् ॥ १६ ॥ हे दुर्गे, भीतस्याशेषजंतोः सर्वस्यापि प्राणिनः स्वांतेन स्मृता सती त्वं भीतिं हरसि । हे दुर्गे, त्वं स्वस्थैरभीतैस्तु जंतुभिः स्मृता सती अतीव शुभां मतिं चतुर्वर्गफलसाधनभूतां बुद्धिं ददासि । त्वन्मंत्रत्वद्ध्यानत्वद्भजनपरां मतिं वा ददासि । तदित्थं हे दारिद्र्यदुःखभयहारिणि, सर्वोपकारकरणाय सर्वोपकारान् कर्त्तुं सदा आर्द्रचित्ता कृपार्द्रहृदया परा देवता त्वदन्या कास्तु न कापि । " अभ्यादितो भयं हर्त्तुं मतिं दातुमनुत्तमाम् । देवि त्वदपरा कास्तु सर्वोपकृतिकारिणी ॥ " दुःखेन गंतुं शक्यतेऽस्यां दुर्गा । " सुदुरोरधिकरणे च " इति डः । " बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे । " स्वस्थैः स्वर्गस्थैर्देवैः स्मृतेति वा ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"दरिद्रा दुर्गतौ" । दरिद्राति दुर्गच्छति निर्द्धनीभवतीति दरिद्रः दरिद्रस्य कर्म दारिद्र्यं तस्य दुःखं दारिद्र्यदुःखं तस्माद्भयं हरतीति तच्छीला तस्याः संबुद्धिः हे दारिद्र्यदुःखभयहारिणि, सर्वेषु भक्तेषु अभक्तेषु उदासीनेषु च उपकाराणां करणं विधानं तस्मै ॥ १७ ॥ यद्येषा देवी सर्वोपकारकरणाय दयार्द्रचित्ता स्यात्किमिति हि दैत्यान्निहंति तत्रोत्तरमाह । उपैतु लोडंतः पाठः । नांव इति पाठे न अंब इति च्छेदः । हे अंब हे सर्वजननि, त्वं सर्वोपकाराय सदा कृपार्द्रचित्तासीति यत्तत्तथैव नान्यथा । तथाहि एभिरहितैर्महिषासुरादिभिर्हतै रणे त्वद्धतैः जगत् लोकः सुखमुपैतु पीडकाभावात्सुखं प्राप्नोतु । तथा एते अहिता लोकत्रयद्रुहो महिषासुरादयः चिराय नरकाय नरकं गंतुं पापं न कुर्वंतु किंतु संग्रामे मृत्युं मरणमधिगम्य प्राप्य दिवं स्वर्गं प्रयांतु इति मत्वा विचिंत्यानुग्रहबुद्ध्या एतान् दैत्यान् विनिहंसि न्यवधीः । ततोऽन्यानपि दैत्यान् विनिहंनिष्यसि । सिप् " वर्त्तमानसामीप्ये वर्त्तमानवद्वा " इति लट् । नूनमवश्यम् । " नूनमवश्यं निश्चये द्वयम् । चिराय चिर-

एभिर्हतैर्जगदुपैतु सुखं तथैते कुर्वंतु नाम्न नरकाय चिराय पापम् ॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥ १८ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥ लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥ १९ ॥

रात्राय चिरस्याद्याश्चिरार्थकाः" अव्ययाख्याः । अंबेति " अंबार्थनद्योर्ह्रस्वः " । नामेत्यत्र पाठे आमनरकाय कुष्ठादिमहाव्याधिप्रधाननरकाय पापं न कुर्वंत्वित्यर्थः । अथवा " नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने । " एभिरसुरैर्हतैर्जगत्सुखमुपैतु तथैतेऽसुराः यद्यपि पापं कृतवंतः कुर्वंतु नाम चिराय चिरकालं तथा वधेनोद्धरणीया इत्यर्थः ॥ १८ ॥ हे देवि, भवती सर्वासुरान् सर्वेषामपि असून् प्राणान् रांति गृह्णंति तान् असुरान् दृष्ट्वैव क्रूरदृष्ट्यैव भस्म भस्मीभूतान् किं न प्रकरोति किंतु सामर्थ्यतः करोत्येव । अथापि हि हे देवि, त्वमरिषु शत्रुषु शस्त्रमायुधं प्रहिणोषि प्रयुंक्षे इति यत्तत्र तवाभिप्रायोऽन्य एव हि निश्चयेन रिपवोऽपि शत्रवोऽपि शस्त्रपूताः शस्त्रहताः कृतप्रायश्चित्ता इव शमितपापफलाः संतो लोकान् स्वर्गादीन् प्रयांत्विति । तदित्थम् । हे देवि, तव तेष्वहितेष्वपि साध्वी

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मतिरनुग्रहबुद्धिर्भवति किं पुनः साधुषु स्वधर्मनिरतेषु साध्वी तव मतिर्भवतीति किं ब्रूम इति भावः। भवतीशब्दप्रयोगे प्रकरोतीति प्रथमपुरुषः भस्मत्वस्य विधेयत्वादेकत्वेऽपि न विरोधो "वेदाः प्रमाणम्" इतिवत्। प्रहिणोतीति "हि गतौ। स्वादिभ्यः श्नुः। हिनुमीना" इति णत्वम्। "लोकस्तु भुवने जने"। साध्वी वोतो गुणवचनान्ङीष् ॥१९॥ हे देवि, रणे तव उग्रैः खड्गप्रभानिकरैर्विस्फुरणैः तथा उग्रेण शूलाग्रकांतिनिवहेन वा असुराणां दृष्टयः विलयं विनाशं नागताः न अगमन् इति यत्तदेतदन्यदेवास्ति कारणं किम्। अंशुमदिंदुखंडयोगि आननं सुधांशुखंडयुक्तं तव वक्त्रं विलोकयतामिति हेतुगर्भं विशेषणमसुराणाम्। यद्यमी असुरा रणे देव्यामृतांशुखंडयुक्तमाननं न विलोकयेयुः तर्हि उग्रैः खड्गप्रभानिकरविस्फुरणैः शूलाग्रकांतिनिवहेन च विलयं गतदृशः संपद्येरन्निति भावः। अत्र क्रियातिपत्तिर्वर्त्तते। यथा। हे देवि, यद्यसुराः तवामृतांशुखंडयुक्तं मुखं व्यलोकयिष्यन् तर्हि उग्रैः खड्गप्रभानिकरविस्फुरणैः शूलाग्रकांतिनिवहेन च विलीनदृशः सम-

खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोऽसुराणाम् ॥ यन्नागता विलयमंशुमदिंदुखंडयोग्याननं तव विलोकयतां तदेतत् ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वीर्यं च हंतृहृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥

पत्स्यंत। नच तदेतत्समपत्स्यंत। यद्यस्मान्मुखं व्यलोकयिष्यन् तस्माद्दसुरा विलीनदृशो न समपत्स्यंतेति। खड्गस्य प्रभास्तासां निकरः स्तोमस्तस्य विस्फुरणानि संवलयनानि तैः। शूलस्याग्राणि त्रीणि येषां तेषां कांतयस्तासां निवहः समूहस्तेन। अंशवः किरणाः। इंदुरमृतमयूखस्तस्य खंडः शकलस्तेन योगः संबंधस्तद्वत्। अंशुमदिंदुखंडेन योक्तुमर्हं योग्यमाननमित्यपिशब्दः सवर्णदीर्घः (?) ॥ २० ॥ हे देवि, तव शीलं सद्वृत्तं कर्तृ दुर्वृत्तवृत्तशमनं दुष्टं वृत्तं येषां ते दुर्वृत्ताः तेषां शमनं शमयितृ निवारकं वर्त्तते। यद्वा दुष्टेन वृत्तेन वृत्तं निष्पन्नं फलं दुर्वृत्तवृत्तं दुष्टं फलं नरकलक्षणं तस्य शमनं तव शीलम्। तथा हे देवि, तवैतत्सर्वसौभाग्य-सौंदर्यभाजनं रूपमचिंत्यं मनसापि विचारयितुमशक्यमविचार्यं सत् अन्यैर्मनोहरैरतुल्यमसदृशमसाधारणमसमानं वर्तते। तथा हे देवि, तव वीर्यं च हृतदेवपराक्रमा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णां दैत्यानां हंतृ घातकं वर्त्तते। तथा हे देवि, इत्थं प्रागुक्तभणित्या त्वया स्वकीया दया वैरिष्वपि प्रकटितैव प्रकाशितैव। "वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले। शीलं स्वभावे सद्वृत्ते। रूपं गुणे स्वभावे च" ॥२१॥ हे देवि वरदे, भुवनत्रयेऽपि ते तवास्य पराक्रमस्य केन सह उपमा भवतु न केनापि। निरुपमत्वात्ते पराक्रमस्य। ननु "अतुलोपमाभ्याम्" इति निषेधात्तृतीया न स्यात्। सहविवक्षायां तृतीयास्त्येव। सूत्रं तु षष्ठचर्थसहभावाविवक्षार्थं च। हे देवि, रूपं च शत्रुभयकारि शत्रूणां भयोत्पादनशीलं ततोऽन्येषां तु अतिहारि अतिमनोहारि तवैवास्ति न त्वन्यस्य। त्वदीयचित्ते कृपा च समरनिष्ठुरता च त्वय्येव दृष्टा नान्यत्र दृष्टेत्यर्थः। भवत्विति लोट् दृष्टेति निष्ठा। दृष्ट्वा इति क्त्वांतोऽपपाठः। कृपा समरनिष्ठुरता इति च प्रथमा नतु द्वितीया। समरे निष्ठुराया भावः। त्वतलोर्गुणवचनस्य पुंवद्भावः ॥ २२ ॥ हे देवि, त्वया एतत्त्रैलोक्यं रिपुनाशनेनातुलं यथा भवति तथा त्रातं रक्षितम्। "त्रैङ् पालने। स्नुदविदोंदत्राघ्राह्रीभ्योऽन्यतरस्याम्" इति वा निष्ठानत्वम्। त्वया समर-

केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्र-
येऽपि ॥ २२ ॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा ॥ नीता दिवं रिपुगणा भयमप्यपास्तमस्माक-
मुन्मदसुरारिभवं नमस्ते ॥ २३ ॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२४॥

मूर्द्धनि रिपुगणान् हत्वा ते रिपुगणाः दिवं स्वर्गं नीताः। हे देवि, त्वयाऽस्माकं देवानामुन्मदसुरारिभवं भयमप्यपास्तमपाक्षिप्तं दूरीकृतम्। हे सर्वजननि, नमस्ते। लोके खलु हिताः नातिमर्हंति। त्रयो लोकाः त्रैलोक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्। अखिलं त्रैलोक्यमिति पाठे पौनरुक्त्यभिया न विद्यते खिलं यत्रेति क्रियाविशेषणम्। "संभवे व्यभिचारे च स्याद्विशेषणमर्थवत्।" रिपूणां नाशनेन समरस्य मूर्द्धेव मूर्द्धा युद्धाग्रभूमिस्तथा चोच्छ्रितमदेभ्यः सुराणामरिभ्यो दैत्येभ्यः भवं संभवम्। "नमः स्वस्ति" इति चतुर्थी ॥ २३ ॥ हे देवि अंबिके, त्वं शूलेनायुधेन शत्रुभ्यो नोऽस्मान् पाहि रक्ष। "पा रक्षणे। सेर्ह्यपिच्च। अस्त्री शूलं रुगायुधम्"। त्वं घंटायाः स्वनेन नः शत्रुतः पापतश्च पाहि। हे देवि, त्वं चापज्यानिःस्वनेन चापारोपिताकृष्टमौर्वीजनितानिःस्वनेन नोऽस्मान् पाहि पापतः शत्रुभ्यश्चेति शेषः ॥ २४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे देवि ईश्वरि ईश्वरस्य पत्नि । यद्वा हे ईश्वरि जगद्व्यापिनि । " अश्नोतेराशुकर्मणि वरट् चेच्चोपधायाः " । हे चंडिके, त्वमात्मनः शूलस्यायुधस्य भ्रामणेन परितोऽभितश्चक्राकारेण परिवर्त्तनेन नोऽस्मान् प्राच्यां दिशि रक्ष शत्रुतः । त्वं प्रतीच्यां पश्चिमायां दिशि आत्मशूलस्य भ्रामणेन रक्ष । त्वमात्मशूलस्य भ्रामणेन दक्षिणे दिग्विभागे तथा उत्तरस्यां दिशि रक्ष । भ्रमणस्येदं भ्रामणं प्रदक्षिणीकरणं परितो मण्डलीकरणम् । अन्यथा चलनमात्रं शूलसमेता क्रिया स्यात् । अतश्च प्रदक्षिणाकृति परिभ्रमणं विवक्षितमिति सूचयितुं प्राच्यां प्रतीच्यां दक्षिणे उत्तरस्यामित्युक्तम् । चकाराद्विदिग्ग्रहणम् ॥ २५ ॥ हे देवि, त्रैलोक्ये त्रिषु लोकेषु ते तव यानि सौम्यानि सुन्दराणि प्रसन्नानि रूपाणि विचरंति विहरंति । यानि चात्यंतघोराणि भयंकराणि रूपाणि विचरंति तैस्तैश्च रूपैरुपलक्षिता त्वं तैस्तैः करणैर्वाऽस्मान् रक्ष । तथा तैरेव द्विविधै रूपैर्भुवं रक्ष । चकारात्पातालल्लोकं रक्ष । " सौम्यं तु सुंदरे सोमदेवते । सोमाद्दत्राणि । " सौम्यं सुंदरे तूपचारतः । " अनुगृह्णाति यान्

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यर्थघोराणि ते रक्षास्मांस्तथा भुवम् ॥ २६ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥२७॥ ऋषिरुवाच ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धात्री तत्र गंधानुलेपनैः॥२८॥

देवी तेषां सौमी जगन्मयी । नानुगृह्णाति यान् देवी तेषां घोरा जगन्मयी ॥ " ॥ २६ ॥ हे देवि, खड्गशूलगदादीनि यान्यायुधानि तैः । यानि चास्त्राणि धनुरादीनि तैश्च त्वं सर्वतः समंततः अस्मान् त्वदेकशरणान्रक्ष दुःखतः शत्रुतश्च पालय । " हस्तिशुंडांशुवाहाग्रवलिभूक्तः करः पुमान् । " करो हस्तः अंगुल्यः करशाखाः करपल्लवास्तैः संगस्तद्वंति करपल्लवसंगीनि । करः पल्लव इव करपल्लवस्तेन संगस्तद्वंति वा हस्तस्थितानीत्यर्थः । " समंततस्तु परितः सर्वतो विष्वगित्यपि । " खड्गश्च शूलं च गदा च खड्गशूलगदं सेनांगत्वादेकवत्त्वं तदादिर्येषां तानि धनुरादीनि ॥ २७ ॥ एवमुक्तभणित्या जगतां धात्री पोषयित्री देवासुरैः स्तुता ततो दिव्यैर्दिविभवैः नंदनोद्भवैः नंदनं स्वस्तनवनं तत उद्भवैः कुसुमैः तथा दिव्यैः गंधानुलेपनैश्चार्चिता पूजिता । गंधैरनुलेपनानि गंधाः कुंकुमादयः " कुंकुमागरुकस्तूरीकर्पूरं चंदनं तथा । महासुगंधमित्युक्तं नाम्ना स्याद्यक्षकर्दमः ॥ " अनुलेपनमंगरागः॥ २८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

समस्तैराखिलैः त्रिदशैः देवैः भक्त्यादिविभवैर्धूपराजैः सुधूपिता सुपूजिता देवी प्रसादसुमुखी सती तान् प्रणतान् समस्तान् सुरानिंद्रादीन् वाक्यं प्राह उवाच । उपसर्गप्रतिरूपकः प्रशब्दोऽव्ययाख्यः । अहेति निपातस्तिङन्तप्रतिरूपः कालसामान्यवचनः । शोभनं मुखमस्त्यस्याः सुमुखी । " स्वांगाच्चोपसर्जनादसंयोगोपधात् " इति चात् ङीष् च टाप् च । " नखमुखात्संज्ञायाम् " इति ङीषो निषेधस्तु संज्ञायामेव ॥ २९ ॥ हे त्रिदशाः, युष्मत्कृतैरेभिः स्तवैः प्रपूजिता अहं अति प्रीतास्मि । युष्माभिरस्मत्तः सकाशाद्यदभिवांछितमभिलषितं वर्त्तते तद्वस्तु व्रियतां प्रार्थ्यताम् । अहं ददामि दास्यामि । इह प्रीता प्रीत्येति पाठद्वयं यत्तन्मत्तोऽभिवांछितमिति पाठः सभ्यः । यदस्मत्तोऽभिवांछितमिति पाठे अस्मद्देवीभ्यः व्रियतामहं ददामीति वचनचातुर्यम् । कीदृक् स्यात् बहुत्वेनोपक्रम्यैकत्वेनोपसंहाराद्वाचो-

भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ॥ प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ॥ २९ ॥ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितम् ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ ३० ॥ कर्त्तव्यमपरं यच्च दुष्करं तन्न विद्महे ॥ इत्याकर्ण्य वचो देव्याः प्रत्यूचुस्ते दिवौकसः ॥ ३१ ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः ॥३२॥ यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३३ ॥

युक्तिरयं युक्तिमतामुद्वेगं जनयतीत्यर्थः ॥ ३० ॥ हे देवि, अपरं युष्माभिः कर्त्तव्यं सत् दुःसाध्यं यत्तच्च मदग्रे मह्यं निवेद्यतां ज्ञाप्यतां तदप्यपरं महिषासुरवधापेक्षया द्वितीयं कार्यं साधयामि इति भावः । इति इत्थं देव्या वचः आकर्ण्य श्रुत्वा ते सर्वे दिवौकसः इंद्रादयः प्रत्यूचुः प्रतिवाक्यमुक्तवंतः । दिवि ओको निवासो येषां ते दिवौकसः । पृषोदरादित्वात्साधुः ॥ ३१ ॥ हे देवि, यद्यस्मात् त्वया अस्माकं शत्रुरयं महिषासुरो नाम निहतः अतस्त्वया सर्वमस्माकं प्रयोजनं कृतमेव । न किंचिदवशिष्यते । न कश्चिदपि शत्रुरवशिष्टः ॥ ३२ ॥ हे महेश्वरि देवि, यदि पक्षांतरे त्वयाऽस्माकं त्वदनुग्रहजीविनां वरो देयोऽनुमतः स्यात् तर्हि वरः प्रार्थ्यतेऽस्माभिः । कोऽसौ हे देवि, त्वं परमापत्सु अस्माभिस्त्वदेकशरणैः संस्मृता संस्मृता सती वारंवारं ध्याता नोऽस्माकं परमापदः । यद्वा परमा अत्यर्था आपदो येभ्यः ते परमापदः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शत्रवः तान् महासुरान् हिंसीथाः हिंस्याः । " हिसि हिंसायाम् " रुधादेः प्रार्थने लिङ् च । परस्मैपदस्थाने " व्यत्ययो बहुलम् " इत्यात्मनेपदस्य थासः सीयुट् । अस्माकमिति दानप्रतिग्रहभावाभावात्संबंधे षष्ठ्येव । " रजकस्यांशुकं दत्ते स्वामी भृत्यस्य वेतनम् । " इतिवत् । पक्षांतरे चेद्यदि च ॥३३॥ देवाः द्वितीयं वरं प्रार्थयंते । हे देवि, हे अंबिके अमलानने प्रसन्नवदने, त्वमस्माभिः प्रपन्ना प्रणता सेविता सती वरदासि अतो यश्च मर्त्यः एभिस्त्वद्विषयैरस्माभिर्देवैः कृतैः स्तवैस्त्वां देवीं स्तोष्यति भक्तितः स्तविष्यति तस्य मर्त्यस्य मनुष्यस्य वित्तर्द्धिविभवैः सह धनदारादिसम्पदां सदा वृद्धये भवेथाः । सर्वदा वित्तस्य ऋद्धेः समृद्धेः विभवैरुद्धवैः सह धनस्य गोमहिष्यश्वादेर्दाराणां पत्नीनामादिशब्दात्सेवकानां सम्पदां क्षेत्रारामधान्यपुत्रमित्रादिसम्पत्तीनां च वृद्धये भवेथाः । प्रार्थने लिङ् । " व्यत्ययो बहुलम् "

यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् ॥ वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३४ ॥ ऋषिरुवाच ॥ इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३५ ॥ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ३६ ॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥३७॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणु स्व मयाख्यातं यथावत्कथयामि ते ॥३८॥

इत्यात्मनेपदम् । यद्यपि वित्तं धनमिति पर्यायस्तथाप्युपचाराद्गवाश्वादिकं धनशब्देन विवक्षितम् । वित्तर्द्धयश्च विभवाश्च ऐश्वर्याणि तैः सहितं धनं गवाश्वादिदारादिपत्न्यादि येषां सम्पदः तासाम् ॥ ३४ ॥ हे नृप सुरथ, इति प्रागुक्तरीत्या देवैर्जगतोऽर्थे त्रैलोक्यसंरक्षणप्रयोजनाय तथात्मनोऽर्थे स्वार्थे देवकार्यार्थे च विषये प्रसादिता प्रसादसुमुखीकृता भद्रकाली भद्रा सर्वमंगला काली रुद्रपत्नी कर्मधारयः । हे देवाः, तथास्तु युष्मद्वांछितं वस्तु सिध्यत्वित्युक्त्वांतर्हिताऽभवत् अदृश्या बभूव ॥ ३५ ॥ हे भूप, जगत्त्रयहितैषिणी सा देवी देवशरीरेभ्यो यथा पुरा पूर्वं तेजोरूपा संभूता महिषासुरवधाय प्रादुरभूदित्येतत्सर्वं ते तुभ्यं मया कथितम् ॥ ३६ ॥ ॥ ३७ ॥ श्लोकद्वयमेकान्वयम् । शृणु स्वेति पदद्वयम् । हे स्व आत्मीय सुरथ, सा प्रसिद्धा देवानामुपकारिणी देवी पुनश्च दुष्टदैत्यानां धूम्रलोचनचण्डमुण्डादीनां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वधाय च तथा शुंभनिशुंभयोर्वधाय लोकानां रक्षणाय च गौर्या देहात्समुद्भूताऽभवदासीत् तत्सर्वं यथावद्यथार्थं यावत्ते तुभ्यं कथयाम्यहं यथावद्यावत्प्रकारेणाख्यातं मया कथितं शृणु । शृणुष्वेति पाठे “ व्यत्ययो बहुलम् ” इत्यात्मनेपदम् । “ शुम्भ भाषणे हिंसायां च ” भ्वादिः । शुंभति भाषते हिनस्ति वा शुंभः दंत्यादि-रयम् (?) । तालव्यादिपाठे तु “ शुभ शुंभ शोभार्थे ” तुदादिः । शुंभति शोभते रणेष्विति शुंभः । यथाप्रकारवद्यथावत्क्रियाविशेषणम् ॥ ३८ ॥ इति श्रीमद्राजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुविरचितायां शांतनव्यां देवीमाहात्म्यटीकायां शक्रादिस्तुतिश्चतुर्थोऽध्यायः ॥ ४ ॥ हे राजन् , पुरा पूर्वस्मिन् कल्पे शुंभनिशुंभाभ्यामसुराभ्यां द्वाभ्यां कर्तृभ्यां मदबलाश्रयात् मदेन गर्वेण सहितं बलं सामर्थ्यं यस्याश्रयणं तस्माद्धेतोः शचीपतेरिंद्रस्य इन्द्राद्वा सकाशात्त्रैलोक्यं हृतं गृहीतम् ।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे शक्रादिकृतदेवीस्तुतिर्नाम चतुर्थोऽध्यायः ॥ ४ ॥ ऋषिरुवाच ॥ पुरा शुंभ-
निशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ १ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवम् ॥
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ २ ॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ अन्येषां चाधिकारान्स स्वयमेवा-
धितिष्ठति ॥ ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ३ ॥

यज्ञभागाश्च हृताः यज्ञविधिविहतिद्वारा । “ हर्षे गर्वे मदे क्षैब्ये गजदाने च कीर्त्तितः । स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ॥” ॥ १ ॥ तौ शुंभनिशुंभावेव कामरूपत्वात्सूर्यरूपतां चक्राते सूर्याधिकारहरणात्सूर्यभावमिव ऐंदवमिन्दुसंबंधिनमधिकारमाधिपत्यं तावेव चक्राते । तथा तावेव कौबेरसंबंधिनमधिकारं चक्राते । तावेव याम्यं यमाधिकारं तथा तावेव वरुणस्याधिकारं चक्राते । याम्यमिति “ दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ” इत्यत्र प्राग्दीव्यतीयेष्वर्थेषु “ यमाच्चेति वक्तव्यम् ” इति ण्यः । सूर्याद्यधिकारांस्तावेवाग्रहीष्टामित्यर्थः ॥ २ ॥ तावेवासुरौ पवनस्य वायोर्ऋद्धिमस्खलितगतिमैश्वर्यं चक्रतुः । तथा तावेव वह्नेः कर्म व्यापारं चक्रतुः । तावेवान्येषां दिवौकसां देवानामधिकारानग्रहीष्टम् । इदमर्धं क्वाप्येव दृश्यते । ततस्ताभ्यामसुराभ्यां सकाशतः पराजिताः प्राप्तपराभवाः अत

॥३९॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एव भ्रष्टराज्याः भ्रष्टाधिकारा देवा विनिर्धूताः स्वर्गाद्दूरीकृता आसन् । ताभ्यामसुराभ्यां विनिर्धूताः त्यक्ता इति भावः ॥ ३ ॥ ताभ्यां शुंभनिशुंभाभ्यां हृताधिकारा अथ हृतराज्या निराकृताः निरस्ताः सर्वे त्रिदशाः देवास्तां प्रसिद्धामपराजितां कैरप्यपराभूतां देवीं स्मरंति स्म स्मृतवंतः । स्मेत्यध्याहृत्य " लट् स्मे " इति लट् । " प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः । " ॥ ४ ॥ अपराजिता नाम देशं गता इत्याह (?) । यथा प्रागुक्तप्रकारेण आपत्सु स्मृता सती तत्क्षणादेव भवतामखिलाः परमापदः नाशयिष्यामीति तया देव्याऽस्माकं देवानां वरो दत्तोऽस्तीति मतिं कृत्वा चेतसि निधाय देवाः हिमवंतं नगेश्वरं जग्मुः ययुः । ततः तत्र विष्णुमायां देवीं प्रतुष्टुवुः प्रकर्षेण भक्तिपूर्वं स्तुतवंतः । विष्णुमाया महामायेति पर्यायौ । अथवा वेवेष्टि विष्णुः मानं मायः विष्णुर्मायो मानं परिमाणं यस्याः सा

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥ महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ॥ ४ ॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥ भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ ५ ॥ इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ॥ जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ६ ॥ देवा ऊचुः ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताःस्म ताम् ॥ ७ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ८ ॥

सर्वव्यापिकेत्यर्थः ॥ ५ ॥ ६ ॥ शिवायै मंगलहेतवे भवान्यै नमः । पुंयोगे तु शिवस्य स्त्री शिवा । प्रकृतिः जगत्कारणं सत्त्वरजस्तमसां साम्यावस्था । यद्वा अंगमंत्रापेक्षया मूलमंत्रमात्रात्मिका देवता प्रकृतिः । यद्वा प्रत्ययात्पूर्वा प्रकृतिः । यदाहुः । " प्रकृतिः पार्वती साक्षात्प्रत्ययस्तु महेश्वरः । अर्द्धनारीश्वरः शब्दः कामधुग्वः प्रसीदतु ॥ " इति तस्यै नमः । भद्रायै नमः भद्रा सर्वमंगला भद्ररूपेत्यर्थः । तां प्रसिद्धामस्मद्वरदामंबां नियता जितेन्द्रियाः प्रणता नम्रीभवामः । स्मशब्दः पूरणेऽव्ययम् । नियत्यै प्रणतात्मनामिति पाठे भक्तिप्रह्वस्वभावानां पुंसां नियत्यै दिष्ट्यै नमः । भाग्यरूपायै इत्यर्थः । " दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः । " ॥ ७ ॥ रुद्रस्येव रौद्रमुग्ररूपमस्त्यस्या रौद्रा तस्यै नमः । रौद्रशब्दादर्शआदित्वादच् । " नेर्ध्रुव " इत्यप् । नित्यायै कालावस्थितायै । "गुरी उद्यमे" तुदादिरनुदात्तेतः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुरते गुरः इगुपधत्वात्कः । गुर एव गौरः स्वार्थेऽण् । स्त्रियां ङीप् । यद्वा वर्णवाचित्वेन रूढत्वात् " षिद्गौरादिभ्यश्च " इति निपातनात्साधुत्वे ङीष् । गौर्यै पार्व-त्यै नमः । गौरी गौरवर्णयोगात् । यद्वा " गुङ् अव्यक्ते शब्दे " अतः गुणादौ " ऋज्रेन्द्राग्र " इत्यादिसूत्रेण रनिवृद्धौ निपातितायां गवते गौरः । " गौरोऽरुणे सिते पीते " । धात्र्यै धरण्यै नमः उपमात्र्यै वा । " धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि । " ॥ ८ ॥ " ज्योतिःशास्त्रविशेषे स्याज्ज्योतिरक्षरतेजसोः । ज्योतिर्ना भास्करे क्लीबमग्निखद्योतदृष्टिषु ॥ " ज्योतिरस्त्यस्यां तस्यै ज्योत्स्नायै नमः । " चदि आह्लादने " । चन्दति चन्द्रः " रूप रूपक्रियायाम् । रूप रूपदर्शने च " चुरादिः । चंद्रं रूपयति तच्छीला चंद्ररूपिणी तस्यै नमः । चंद्रस्य रूपं करोति चंद्ररूपिणीति च व्युत्पत्तिः । " सुख-दुःख तत्क्रियायाम् " चुरादिः । सुखयति सुखा पचादित्वादच् तस्यै । कलासु साधुः कल्या शुभात्मिका वाणी । कल्यामणति कल्यं निरुक्तं वा अणति कथयति कल्याणी तस्यै नमः । अण्शब्दार्थः कर्म-

ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्म्मो नमो नमः ॥ ९ ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै
शर्वाण्यै ते नमो नमः ॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिणि ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥ १० ॥

ण्यण् । किंच जगद्भिः ऋद्ध्यै सिद्ध्यै च प्रणतां वंदितां जगज्जननीं देवीं प्रति नमः नतिं कुर्मः कुर्मो इति पाठे । प्रणमंतीति प्रणंतः तेषां प्रणतामिति षष्ठीबहुवच-नांतं बोध्यम् । तथा च प्रणतां प्रणमतामृद्ध्यै सिद्ध्यै च नमः इत्यलवेश्वरभट्टाः । कूर्म्यै इति पाठे कूर्मसंबंधिन्यै शक्त्यै नमः ॥९॥ निष्क्रांता ऋतेः सन्मार्गान्निर्ऋतिः अलक्ष्मीः अन्यायोपार्जिता लक्ष्मीः । " स्यादलक्ष्मीस्तु निर्ऋतिः " निर्ऋतेः उपमाकृतिर्नैर्ऋती तस्यै अलक्ष्मीरूपायै शर्वाण्यै शंभुपत्न्यै नमो नमः । यद्वा निश्चिता ऋतिः सत्यता येन स निर्ऋतिः । निर्ऋतेर्दिक्पालस्येयं नैर्ऋती तस्यै निर्ऋत्युपार्जितलक्ष्मीरूपायै नमः । अथ च भुवं बिभ्रतीति भूभृतः आदि मंडूकादिनागादि-कुलपर्वतादिमनुप्रभृतिराजानस्तेषां लक्ष्मीरूपायै नमः । शर्वस्य स्त्री शर्वाणी । " इंद्रवरुण " इत्यादिना पुंयोगे ङीषानुकौ । हे सर्वकारिणि देवि, तुभ्यं दुर्गायै सततं नमः । दुःखेन गम्यते दुर्गा । यद्वा दुःखेन गच्छत्यस्यां दुर्गा । " सुदुरोरधिकरणे " इति वक्तव्याड्डमेर्डः । तथा हे देवि, तुभ्यं दुर्गपारायै दुर्गं पारं यस्याः ॥४०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महामायाख्यासिंधोः सा दुर्गपारा । यद्वा पिपर्ति पारा । “ पॄ पालनपूरणयोः ” । यद्वा दुर्गाः पारा पारयंतो गणा यस्याः तस्यै । हे देवि, तुभ्यं सारायै संसार-सागरे वरायै श्रेष्ठायै सततं नमः । तुभ्यं ख्यात्यै विख्यातिरूपायै सततं नमः । तुभ्यं कृष्णायै कृष्णवर्णायै कालरात्र्यै नमः । हे देवि, तुभ्यं धूम्रायै धूम्रवर्णायै नमः । सर्वं करोति सर्वकारिणि संबुद्धिः ॥ १० ॥ “ सोमाट्ट्यण् ” । सौम्यं सोमदेवताकं सुंदरं च रूपम् अत्यर्थं सौम्यं यस्याः सातिसौम्या । रुद्रदेवताकं रुद्रसंबंधि वा रूपं रौद्रमत्यर्थं रौद्रं यस्याः साऽतिरौद्रा । ततश्च भजतामभजतां च यथाक्रममतिसौम्या चासावतिरौद्रा चेति कर्मधारयः । तस्यै वाङ्मोमारूपायै त्रिशक्त्यात्मिकायै नमो नमः । इति शक्तित्रयापेक्षं नमस्त्रयम् । सोमस्य भावः सौम्यम् । भावे ष्यञ् । रुद्रस्य भावः रौद्रं युवादित्वाद्भावे अण् । अतिक्रांतं सौम्यं यया साऽतिसौम्या । अतिक्रांतं रौद्रं यया साऽतिरौद्रा । ततः कर्मधारये सति तस्यै नम इत्यप्यनुसंधेयम् । जगतां प्राणभृतां प्रतिष्ठा आस्पदमाधारशक्तिः स्थानं तस्यै जगत्प्र-

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ॥ नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥ ११ ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥

तिष्ठारूपायै नमः । प्राणिनां प्राणधारणार्थं यत्स्थानं मूलाधारसंज्ञं तत्प्रतिष्ठेत्युच्यते । “ आस्पदं प्रतिष्ठायाम् ” इत्यास्पदशब्दपर्यायः प्रतिष्ठाशब्दः । “ दिवु क्रीडादौ ” । दीव्यतीति देवी तस्यै क्रीडाविजिगीषाद्यर्थक्रियाकारिण्यै नमः । करणं कृतिः प्रयत्नः सर्गस्थितिप्रत्यवहारविषयः प्रयत्नोऽत्र विवक्षितः । तस्यै प्रयत्नरूपायै नमः । नमस्यानां त्रित्वादित्वादिह नमस्त्रित्वम् । कर्त्र्यै इति पाठे तृन्नंतत्वाज्जगदिति कर्म विवक्षितम् । जगत्करणशीलायै नम इत्यर्थः ॥ ११ ॥ या देवी वाङ्मोमात्मिका सर्वकालेषु कालत्रयात्मिका सर्वभूतेषु भूतात्मिका । अनात्मन्यात्मबुद्धिं जनयंती आत्मनि वाऽनात्मबुद्धिं जनयंती ममतावशंवदान् लोकान् प्रसूयमाना सर्वजननी महामाया भगवती विष्णुमायेति शब्दिता कथिता तस्यै त्रिगुणरूपायै प्रत्येकं कायवाङ्मनोभिः एकस्यै चैव वा देव्यै भक्तिश्रद्धातिशयद्योतनाय नमःशब्दो नमस्येन च सहाम्रेडितः । “ आम्रेडितं द्विस्त्रिरुक्तम् ” । चापले द्विर्वचनं संभ्रमेण वृत्तिश्चापलमित्थं हि न पौनरुक्त्यं दोषावहम् । यदुक्तम् । “ प्रहर्षहर्षशोकेषु स्व-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रदैन्यभयेषु च । स्तुत्यभ्यासानुवादेषु पौनरुक्त्यं न दुष्यति ॥ " सर्वाणि पृथिव्यादीनि भूतानि देहानि । इति प्रथमा देवी विष्णुमाया ॥ १२ ॥ अभिधीयते कथ्यते चुरादावात्मनेपदं " चित संचेतने संवेदने वा " । चेतनं चेतना बुधिरेवेति कथनं पौनरुक्त्यं यद्यपि वैशेषिकादौ दर्शने चेतनं चेतना बुद्धिरेव तथापि सांख्ये बुद्धिधर्मश्चित्तवृत्तिविशेषविजृंभितशक्तिश्चेतना इत्याश्रयणादपौनरुक्त्यम् । अन्ये तु चेतना चित्तवृतिविशेषशक्तिः संज्ञानं वा । बुद्धिस्तु स्वप्रकाशज्ञानस्वभावेत्याहुः । अन्ये तु निर्विकल्पज्ञानं चेतना बुद्धिः तद्विशेषावगतिः सविकल्पकज्ञानमित्यस्ति तयोर्भेद इत्याहुः । इति द्वितीया देवी चेतना ॥ १३ ॥ बुद्धिरित्येवंरूपेण सम्यक् स्थिता । यदभ्यधुः " संधारणे स्थितौ भृत्यौ (बुद्धिः) " । इति तृतीया देवी बुद्धिः ॥ १४ ॥ निद्रेति रूपं तस्यै नमः । " द्रा कुत्सायाम् " नियतं द्रात्यस्यां निद्रा

या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१३॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तयै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्मै नमस्तस्यै नमो नमः ॥ १५ ॥ या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु च्छायारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥

संवेशः । भुक्तान्नादिपरिपाकादिहेतुर्निरिंद्रियप्रदेशमलकोशे मनसोऽवस्थानं निद्रा । सर्वेंद्रियव्यापारविरतप्राणनं सुखनं निद्रेत्यन्ये । इति चतुर्थी देवी निद्रा ॥ १५ ॥ " क्षुध बुभुक्षायाम् " । संपदादित्वाद्भावे स्त्रियां क्विप् । क्षुध प्रातिपदिकम् । भोक्तुमिच्छा क्षुत् । अशना या बुभुक्षा क्षुत्तया क्षुधा । रूपेणेति पृथक् पदम् । यद्वा " वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । हलंतादपि टापं च यथा वाचा निशा दिशा ॥ " ततश्च क्षुधेति रूपं तेन क्षुधारूपेण क्षुधां विना प्राणिनां सुखं नास्ति । इति पञ्चमी देवी क्षुधा ॥ १६ ॥ छाया प्रतिबिंबरूपा सर्वभूतेषु तिष्ठति । " नष्टच्छायो मध्याह्नः " इत्यत्र तु आतपाभावाभावो विवक्षितः । " छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातपः । " प्रतिबिंबे यथा संक्रांतच्छायः आदर्शः । छयति च्छिनत्ति संतापं छाया । इति षष्ठी देवी छाया ॥ १७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

" शक्लृ शक्तौ " शकनं शक्तिः सामर्थ्यं वस्तुगतः स्वभावसिद्धो धर्मः शक्तिरिति रूपं तेन । शक्ति (:) प्रतिवस्तुप्रतिनियतार्थक्रियाकारित्वं वस्तुधर्मं इत्येके । वस्तुरूपमेव शक्तिर्नतु वस्तुनोऽन्यो धर्मः शक्तिरित्यन्येऽभ्युपजग्मुः । इह तु सर्वभूतेष्वित्याधाराधेयभावानुवाच्याच्छक्तिर्वस्तुधर्मं इत्येष पक्षोऽभ्युपगतः । इति सप्तमी देवी शक्तिः ॥ १८ ॥ सर्वाणि भूतानि पृथिव्यादीनि येषां देहानामारंभकत्वेन संति तानि सर्वभूतानि देहाः तेषु । " ञितृषः पिपासायाम् । " तृषिशुषिरासिभ्यः कित् " इति नः । तृष्णा उपभोगनिमित्तकोऽभिलाषः । " तृष्णाभिलषणं भोगे तृष्णा वनपिशाचिका । तृष्णे स्पृहापिपासे द्वे तद्रूपेहां-विका स्मृता ॥ " तर्षणं तृष्णा स्पृहा निरूढलक्षणत्वात् । इत्यष्टमी देवी तृष्णा ॥ १९ ॥ " क्षमूष् सहने " षित्वात् स्त्रियां क्षमा । बाहुलकात्तु क्तिनि क्षांतिः ।

या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १८ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९ ॥ या देवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥ या देवी सर्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥

" अनुनासिकस्य क्विझलोः क्ङिति " इति दीर्घः । क्षांतिः क्षमा तितिक्षामर्षः सहार्थकाः । क्षांतिस्तृष्णाविरोधिनी परयुक्तापकारं प्रत्युपेक्षा प्रतिकूलवेदना प्रत्युपेक्षा । इति नवमी देवी क्षांतिः ॥ २० ॥ नित्यैकानुगतप्रत्ययहेतुरनेकसमवायिनी जातिः । इति दशमी ॥ २१ ॥ लज्जाव्रीडे स्त्रियां " गुरोश्च हलः " इत्यप्रत्ययः । " झलां जश् झशि " इति जश् दः श्चुत्वं स्त्रियामजाद्यतष्टाप् । कर्त्तव्याकरणनिमित्तमकारणनिमित्तमन्यतः स्वतो वा जनितं लज्जनं संकोचनं लज्जेत्येकादशी ॥ २२ ॥ " शंम उपशमे " स्त्रियां क्तिन् । क्षांतिवद्दीर्घः । " शमथुस्तु शमः शांतिः " । कामक्रोधाद्यभावः । विकृतेंद्रियनिवृत्तिः शांतिरित्यन्ये । विषय-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्यावृत्तात्मतेत्यपरे । इति द्वादशी शांतिः ॥ २३ ॥ " डुधाञ् धारणपोषणयोः । श्रच्छब्दस्योपसंख्यानम् " इत्युपसर्गसंज्ञा । " आतश्चोपसर्गे " इति कः । स्त्रियां टाप् । श्रद्धनं श्रद्धा सम्प्रत्ययः स्पृहा । सम्प्रत्ययो भक्त्यतिशयः । " श्रद्धया परयोपेतः " इतिवत् । शास्त्रोक्तार्थो विपरीतबुद्धिः श्रद्धेत्यन्ये । आदरेणानुसरणं भक्तिः श्रद्धा त्वास्तिक्यबुद्धिरित्यपरे । इति त्रयोदशी ॥ २४ ॥ " कसु कांतौ । कमेर्णिङ् । आयादय आर्धधातुके वा । स्त्रियां क्तिन् । अनुनासिकस्य क्विझलोः क्ङिति " इति दीर्घः । शोभा कांतिः ज्योतिःस्वरूपोज्ज्वलतेत्याहुः इति चतुर्दशी ॥ २५ ॥ " लक्ष दर्शनांकनयोः " चुरादिः । " लक्षेर्मुट् च " इति ईः

या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥ या देवी सर्वभूतेषु धृतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२७॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम ॥२८॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता॥नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२९॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३०॥

तस्य मुडागमः । " नेड्वशिकृति । णेरनिटि " इति णिलोपः । लक्ष्मीः सा विभूतिश्च कायशोभा चेति पंचदशी ॥ २६ ॥ " धृञ् धारणे " भ्वादिः स्त्रियां क्तिन् । " धृतिः स्याद्धारणे धैर्यसौख्यसंतोषयोरपि । " इति षोडशी ॥ २७ ॥ " वृतु वर्त्तने " स्त्रियां क्तिन् । वर्त्तनं वृत्तिः वर्त्ततेऽनया वृत्तिः । " आजीवो जीविका वार्त्ता वृत्तिर्वर्तनजीवने । " वृत्तिर्जीवनोपायः । " युक्ते क्ष्मादावृते भूतं प्राण्यतीतसमे त्रिषु । भूतं क्लीवे ग्रहे युक्ते पृथिव्यादावृतेऽपि च ॥ " इति सप्तदशी ॥ २८ ॥ " स्याच्चिता स्मृतिराध्यानम् । " अनुभूतस्य भावनाख्यसंस्कारहेतुको ज्ञानविशेषः स्मृतिः । इत्यष्टादशी ॥ २९ ॥ " दय रक्षणे । षिद्भिदादिभ्योऽङ् " दयंतेऽ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नया दया । परदुःखप्रहाणेच्छा परदुःखसमभाक्त्वं वा दया । इत्येकोनविंशी ॥३०॥ नीतिर्नयः इति विंशी देवी नीतिः ॥ ३१ ॥ " तुष प्रीतौ " तुष्टिः प्रीतिरानन्दः । विषययोगमवाप्य तदभिलाषो परमस्तुष्टिरित्यपरे । अन्ये तु विषयोपभोगं प्राप्य तदभिलाषत (स्त) दवाप्य प्राप्तं परमं सुखमित्याहुः । इत्येकविंशी ॥ ३२ ॥ " पुष पुष्टौ " । पुष्टिरवयवोपचयः इति द्वाविंशी ॥ ३३ ॥ मात्यस्यां गर्भ इति माता । " जनयित्री प्रसूर्माता " । यद्वा " मान पूजायाम् " । मान्यते पूज्यते माता । उणादौ " नप्तृनेष्टृत्वष्टृ " इत्यादिसूत्रेण निपात्यते । यद्वा अष्टौ मातृनाम्न्य आद्याः शक्तयः याः विना भूतसृष्टिरेव न घटते । " ब्राह्मी माहेश्वरी चैंद्री वाराही

या देवी सर्वभूतेषु नीतिरूपेण संस्थिता॥नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३१॥या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३२॥ या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो
नमः॥३३॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३४॥या देवी सर्वभूतेषु भ्रांतिरू-
पेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३५॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या॥भूतेषु सततं व्याप्त्यै
तस्यै देव्यै नमो नमः ॥३६॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३७॥

वैष्णवी तथा । कौमारी चर्ममुण्डा च काली संकर्षणीति च ॥ " इति त्रयोविंशी ॥ ३४ ॥ " भ्रांतिर्मिथ्यामतिर्भ्रमः " । अतस्मिंस्तदिति ज्ञानं भ्रांतिः । इति चतुर्विंशी देवी भ्रांतिः ॥ ३५ ॥ इत्थं विष्णुमायादिमूर्त्तयो देव्याः सर्वभूतेषु वर्त्तमाना भ्रांत्यंताः चतुर्विंशति प्रदर्शिताः । या देवी भूतानां पृथिव्यादीनां पंचानामधिष्ठात्री आधारशक्तिः स्वामिनी ईश्वरी व्यापिनी या च देवी अपरेष्वखिलेषु भूतेषु विशिष्टेषु प्राणिषु वर्त्तमानानां भूतानां प्राणिनामिन्द्रियाणां मनोनेत्ररसनघ्राणत्वक्कर्मणां वाधिष्ठात्री तस्यै व्याप्तिरूपायै सततं नमो नमः । एतेन सर्वगतत्वमुक्तं देव्याः ॥ ३६ ॥ " चिञ् चयने " । चयनं चितिरविकारता कूटरूपता तद्रूपेण ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यद्वा " चिती संज्ञाने । स्त्रियामिक्षुष्यादिभ्यः " इति इक्प्रत्ययः । चेतनं चितिः संज्ञानरूपेण या देवी एतत् कृत्स्नमखिलं जगव्द्याप्य स्थिता तस्यै नमो नमः पुनः पुनर्नेतरनेककर्तृकत्वादनेकस्तोतृकत्वाच्च न पौनरुक्त्यमार्थं शाब्दं वा शंकनीयम् ॥३७॥ पूर्वं पुराकल्पे सुरैः स्तुता तथाभीष्टसंश्रयादभीष्टस्य वस्तुनः संश्रयात्कारणात् । सुरेंद्रः शक्रः ईशः शंकरः दिनेशः सूर्यस्तैः सेविता । अत एव भद्रमणति भद्राणी अस्तु भद्रमिति कथयंती । अत एव शुभहेतुः सा ईश्वरी नोऽस्माकं देवानां शुभानि मंगलानि करोतु । किंच नः अस्माकमापदश्च विरोधिजनितदुःखानि चाभिहंतु । सुरेंद्रेण दिनेषु सेवितेति पाठे सुरेंद्रेण शक्रेण दिनेषु प्रत्यहं सेविता । शुभानि भद्राणीति च्छेदे यानि नः शुभानि जगद्धितानि कर्माणि प्रार्थनीयानि तानि भद्राण्यनुकूलानि अवाधानि अविघ्नानि करोत्वित्यर्थः। अभीष्टसंश्रयेति पाठे अभीष्टः वांछितः

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता॥करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः॥३८॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो भक्तिविनम्रमूर्तिभिः॥३९॥ ऋषिरुवाच॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन॥४०॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा॥४१॥ स्तोत्रं ममैतत्क्रियते शुंभदैत्यनिराकृतैः॥ देवैः समेतैः समरे निशुंभेन पराजितैः॥४२॥

संश्रियमाणः संश्रय इत्यर्थो यस्याः सकाशाद्भवति सा ॥३८॥सा देवी नः शुभहेतुरित्युक्तं सा केत्याह। या देवी सांप्रतमिदानीमुद्धतदैत्यतापितैः निर्मर्यादैर्बलोल्बणैः दैत्यैः शुंभादिभिस्तापितैः संतापितैरस्माभिः सुरैरीशा स्वामिनी नमस्यते सेव्यते। या देवी भक्तिनम्रमूर्तिभिः सुरैः स्मृता च स्मृतैव सती तत्क्षण एव नोऽस्माकं सर्वा आपदः हंति । सर्वापदो यतः स्युस्तान् सर्वापदः शत्रून् वा । ईशा पचाद्यच् इगुपधज्ञाप्रीकिरः को वा । सांप्रतमव्ययम् । भक्त्या विनम्रा मूर्त्तयः काया येषां तैः । ॥४३॥
नमस्यति इति " नमो वरिवश्चित्रङः क्यच् । नमसः पूजायाम् । भावकर्मणोः सार्वधातुके यक् । यस्य हलः । क्यस्य विभाषा " इति यलोपः ॥३९॥ हे नृपनन्दन हे सुरथ, एवमित्थं स्तवाभियुक्तानां स्तुतिपराणां देवानामग्रतः तत्र हिमाद्रौ पार्वती देवी जाह्नव्या गंगायास्तोये स्नातुं जलक्रीडां कर्त्तुमभ्याययौ ॥४०॥ सा देवानामग्रतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

किं कृतवतीत्याह । सा सुभ्रूः पार्वती तान् देवान् पृष्टवती । किं हे सुराः, अत्र हिमवति पर्वते भवद्भिः का स्तूयते इति । शोभने भ्रुवौ यस्याः सा ततः तां पार्वतीं प्रति तावद्देवैरेवोत्तरदानमुचितं किंतु ततः प्रागेव तस्याः शरीराद्विनिर्गत्य शिवामाद्यां देवीं पार्वतीं प्रत्याह । इयं ब्रह्मादिसर्वदेवतेनोमया शिवानामाद्या शक्तिरवसेया । तथाहि । अस्याः पार्वत्याः शरीरं कोश इव शरीरकोशः तत उद्भूता शिवा देवी पार्वती प्रत्यब्रवीत् । " कोशोऽस्त्री कुड्मले खड्गे पिधानेर्थौघादिव्ययोः ।" ॥४१॥४२॥ किमब्रवीत्तदाह । शुंभेन प्रत्यादिष्टैः समस्तैर्देवैः मम एतत्स्तोत्रं क्रियते इत्यब्रवीत् । यद्यस्मात्तस्याः पार्वत्याः शरीरकोशादंबिका निःसृता निर्गता । ततः कारणात्समस्तलोकेषु कौशिकीति गीयते कथ्यते । कोशेन व्यतिनिर्गमनात्कौशिकी । तेन दीव्यतीति ठक् । यद्वा । कोशाद्या निर्गता सा कोशे निवृत्तेवेति " निवृत्तेऽक्षद्यूतादिभ्यः " इति ठक् ॥ ४३ ॥ सा भगवती पार्वत्यपि स्वशरीरकोशात्तस्यां सर्वदेवतेजोमय्यां कौशिक्यां विनिर्गतायां सत्यां कृष्णाभूत् कृष्णवर्णा समजनिष्ट । ततश्च

शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते॥४३॥ तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥ कालिकेति समाख्याता हिमाचलकृताश्रया॥४४॥ ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥ ददर्श चण्डो मुण्डश्च भृत्यौ शुंभनिशुंभयोः॥४५॥ ताभ्यां शुंभाय चाख्याता सातीव सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती हिमाचलम् ॥ ४६ ॥

सा पार्वती कालिकेति समाख्याता सती हिमाचले कृताश्रया कृतनिलयाभूत् । कृष्णवर्णार्थात्कालशब्दात्तद्वति वर्त्तमानात्संज्ञायां जानपदसूत्रेण ङीप् संज्ञायां कन् । " केणः " इति ह्रस्वः । " काली हैमवतीश्वरी " । इह महामाया देवकार्यार्थं विष्णुयोगनिद्राभूत् ततः पार्वत्यभूत्ततः कौशिक्यभूत्तत्सा देवकृतस्तुतिमंगीकर्तुं ततः कालिकाभूत्सैवांबिका नामेत्याह ॥ ४४ ॥ ततोऽनंतरम् । यद्वा ततस्तत्र हिमाचले आद्यादित्वात्तसिः । शुंभनिशुंभयोः भृत्यौ सेवकौ चंडो मुंडश्च तौ परमतितरां सुमनोहरं रूपं बिभ्राणामंबिकां कालिकाख्यां पार्वतीं ददर्श । सुमनोहरामिति पाठे देवीविशेषणम् । " चडि कोपे " चंडते चंडः । " मुडि खंडने " मुंडति मुंडयति मुंडः ॥ ४५ ॥ सा रूपवती कालिका देवी ताभ्यां चंडमुंडाभ्यां शुंभाय आख्याता च शुंभसमक्षमुक्ता । किं हे महाराज शुंभदैत्येश्वर, समधिगतसर्वैश्वर्य, सावधानो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भव। अतीव सुमनोहरा कापि स्त्री आस्ते। किं कुर्वती हिमाचलं भासयंती स्वयं श्यामा श्यामाभिः शोभाभिरदभ्रशुभ्रशोभाढ्यं हिमाद्रिं पार्वती आस्ते। आख्याता अतीवेत्यत्र वैवक्षिकसंधिकार्यम्। शुंभायेति "क्रियाग्रहणं कर्त्तव्यम्" इति संप्रदानत्वं पत्ये शेते इतिवत्। सुष्ठु मनो हरति सुमनोहरा। "हरतेरनुद्यमनेऽच्"। यद्वा इः कामः वसुनि धने येषां ते इवसवः कामधनाः तेषां मनः हरति इति इवसुमनोहरा अत्यर्थमिवसुमनोहरा इत्यंबिकां प्रत्यनिष्टोऽर्थः तस्याः पातिव्रत्यभंगप्रसंगात्। इष्टोऽर्थस्त्वेषः। शोभनं मनो यस्य सुमनाः शंभुः तं हरति अर्धांगहरत्वात्सुमनोहरा। अतितरां सुमनोहरा। यद्वा "पैओवै शोषणे"। ई कामं वायति शोषयति इवः शिवः। यद्वा ईं कामं वाति गच्छति इवः शिवः। "आतोऽनुपसर्गे कः"। इवस्य सुमनोहरा अत्यधिकं सुमनोहरा अतीवसुमनोहरा। यद्वा इश्च कामः ई च लक्ष्मीः वसवश्चाष्टौ ईवसवः अतिक्रांत ईवसून् अतीवसुः शंभुः तस्य मनोहरा। "ध्रुवो धरश्च सोमश्च ह्यापश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ ध्रुवा-

नैव तादृक्क्वचिद्रूपं दृष्टं केनचिदुत्तमम्॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर॥ ४७॥

स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा॥ सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति॥ ४८॥

दयः॥" ॥ ४६॥ हे असुरेश्वर शुंभ, क्वचिदपि भुवने केनचिदपि पुंसा तादृक् तादृशमुत्तममतिसुन्दरं रूपमाकारः नैव दृष्टं नैवालोकि। असौ कापि देवं स्त्री। यद्वा कापि कृताभिषेका राज्ञि इति त्वया ज्ञायताम्। अथ त्वयासौ गृह्यतामुपादीयतां चेति अंबिकां प्रति अनिष्टोऽन्वयः। इष्टस्त्वेषः। तादृगुत्तमं क्वचिद्रूपं ज्ञानरूपं कापि केनचिद्दृष्टं न। तस्मादसौ देवी कापि परदेवता इति त्वया ज्ञायताम्। असौ कापि स्त्री अवलास्तीति नैव ज्ञायताम्। अपि त्वसौ देवी गृह्यतां चात्मसंरक्षणार्थमाश्रीयतामिति हितोपदेशः। शुंभं प्रति ताटस्थ्येन॥ ४७॥ हे दैत्येंद्र, त्विषा दीप्त्या दिशः दशापि ककुभः द्योतयंती अंगकांत्या भासयंती। अतिचार्वंगी अत्यंतं चारु मनोहरमंगं यस्याः सा। स्त्रीरत्नं रत्नं हि मनोहरत्वेनोत्कृष्टं सा पुनरुत्कृष्टा तिष्ठति तां भवान् द्रष्टुमर्हतीत्ययमंबिकां प्रत्यनिष्टोऽन्वयः। इष्टस्त्वेषः। हे दैत्येंद्र, सा नूनं स्त्रीरत्नं सा नूनमतिचार्वंगी किं तया ते कृतं स्यात् तां भवान् द्रष्टुमर्हति। यः तां दोषबुद्ध्या पश्येन्नश्येत्स तदैव तस्मात्तां द्रष्टुं भवान्मा यततामिति शुंभं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रति ताटस्थ्येन हितोपदेशः । रमंतेऽस्मिन्नराः । " रत्नं रत्नमिति प्रख्या मणावेव न केवलम् । जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते ॥ " ॥४८॥ हे प्रभो शुंभ, यानि त्रैलोक्ये गजाश्वादीनि तत्तज्जातिप्रधानान्युत्कृष्टानि रत्नानि तथा पद्मरागादयो मणयः रत्नानि तानि समस्तानि सांप्रतमधुना ते तव गृहे वर्त्तते वै प्रसिद्धमेवैतत् । ताटस्थ्येऽपि प्रायेणैषोऽन्वयः । हे प्रभो, त्वं दूतवचनात्तामानयितुं यतेथाश्चेत्तर्हि यानि त्रैलोक्ये गजाश्वादीनि वै प्रसिद्धानि मणयश्च रत्नानि संप्रति ते गृहे संति तद्दर्शनोत्तरकालं तु न स्युः । किंतु त्रैलोक्ये एव तानि यथास्थानं स्युरिति हितोपदेशः । गजाश्वादिशब्दविवक्षितरत्नजातानि नामतो निर्दिशति ॥ ४९ ॥ गजो रत्नमिति पाठः । उत्तरत्र रत्नप्रधानान्यसूचनार्थः । गजरत्नमित्यपि पाठे रत्नानीति वक्ष्यमाणरत्नोपसंहारवशात्सर्वत्र रत्नोपक्रमोऽप्यवगंतव्यः । यः पुरंदरादैरावतो गजः समानीतस्तद्गजरत्नं ते गृहे वर्त्तते । निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयंति सर्वनामानि पर्यायेण तल्लिंगभांजि भवंति । एति भ्राम्यत्यनयेतीरा तद्वा-

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं भांति ते गृहे ॥ ४९ ॥ ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥ पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ५० ॥ विमानं हंससंयुक्तमेतत्तिष्ठति तेंऽगणे ॥ रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ५१ ॥ निधिरेष महापद्मः समानीतो धनेश्वरात् ॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजाम् ॥ ५२ ॥

निरावान् सुरासमुद्रः तत्र जात ऐरावतः । पुराण्यरीणां दारयति पुरंदरः । गज इति रत्नं गजरत्नम् । अयं च यः पुरंदरात्पारिजाततरुः समानीतः तत्तरुरत्नं ते गृहे वर्त्तते । पारिणः पारिवतो अब्धेर्जातः पारिजाताख्यस्तरुः तथा पुरन्दरादेव यः उच्चैःश्रवा हयः समानीतः तद्धयरत्नं ते गृहे । उच्चैः श्रवसी यस्य स उच्चैःश्रवाः॥५०॥ हे प्रभो, यत् वेधसः ब्रह्मणः अद्भुतमाश्चर्यकारि विमानमासीत् हंसयुक्तं रत्नं भूतं रत्नत्वं प्राप्तं विमानमिहानीतं तत्ते गृहे तेंऽगणे तिष्ठति । विविक्तं मांति वर्त्तते यत्र देवाः विमानम् । " व्योमयानं विमानोऽस्त्री " ॥ ५१ ॥ धनेश्वरात्कुबेराद्य एष महापद्मो नाम निधिः समानीतः तदेतन्निधिरत्नं ते गृहे वर्त्तते । हे प्रभो, तुभ्यमब्धिः समुद्रः किंजल्किनीमविशीर्णकेसराम् अवयवगतधर्मः केसरवत्त्वं मालया अपि पंकजारब्धत्वादवयवावयव्यभेदोपचारात् प्राप्नुवंती कर्णस्थकुंडलेन कुंडलीतिवत्किंज-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लिकिनीत्युक्तं सर्वदाऽम्लानपंकजामशुष्ककमलां मालां ददौ । उपचारतः किंचिज्जलति जडीभवति किंजल्कः ॥ ५२ ॥ हे भो, यद्वारुणं वरुणसंबंधि कांचनस्रावि च्छत्रं छत्ररत्नं तव गेहे तिष्ठति नान्यत्र । कांचनं सुवर्णं स्रवति कांचनस्रावीति व्याख्यानमुत्कर्षाभावादुपेक्षणीयम् । यस्य गेहे निधयः संति तस्य स्वर्णस्राविणा छत्रेण किं स्यात् । कस्तर्हि विग्रहः कांत्या कांचनं स्वर्णं स्रवतीव वर्षतीव । यद्वा कांत्या कांचनवर्षी कल्पवृक्षः । यद्वा कांचनकांतिमिव कांतिं स्रवति । यद्वा कांचनस्येव कांतिं स्रवति कांचनस्रावि । पृषोदरादित्वादीप्सितसिद्ध्या कांतिशब्दलोपः । यद्वा " कचि दीप्तिबंधनयोः " । कंचनं दीप्तिः प्रभा । कांचनं दीप्तिः प्रभा कंचनमेव कांचनम् । " अन्येषामपि दृश्यते " इति दीर्घः पूरुषवत् । कांचनं दीप्तिं स्रवति तच्छीलम् । लावण्यस्रावि मुखमितिवदुत्प्रेक्षितमेतत् । कांचनं नाम वैदिकनिघंटुतः स्वार्णीकमंभः स्रवतीति तु व्याख्यानं कुशकाशावलम्बनम् । अथ द्वितीयोऽन्वयः । हे प्रभो, यद्वारुणं छत्ररत्नं कांचनस्रावि ते गृहेऽस्ति । कांचनस्रावीति

छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति ॥ तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ॥ ५३ ॥
मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ५४ ॥

सप्तम्येकवचनं गृहे इत्यस्य विशेषणम् । " स्रु गतौ । हेतुमति च " इति णिच् " ण्यंतात् क्विप्ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन " इति अकृत्वा वृद्ध्यावादेशौ णिलोपः । ततः " प्रत्ययलोपे प्रत्ययलक्षणम् " इति वृद्धिः आवादेशस्तु वर्णाश्रयविधौ प्रत्ययलक्षणान्नेष्यते । पुंसि कांचनानां स्रौः कांचनानां प्रापयिता । नपुंसके तु " ह्रस्वो नपुंसके प्रातिपदिकस्य । एच इग्घ्रस्वादेशे " कांचनस्रु त्रपुशब्दवद्रूपं " तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य " इति ङौ ह्रस्वश्च नुम् च न भवति । आवादेशः । कांचनस्रावि । पक्षे कांचनस्रुणि गृहे । हे प्रभो, स्यंदनवरः अयमिति को नु यः पुराकल्पे प्रजापतेर्ब्रह्मणः आसीत् तदिदं नाम रथरत्नं त्वया समानीतं स्यंदनेषु वरः श्रेष्ठः । " याने चक्रिणि युद्धार्थे शतांगः स्यंदनो रथः । " ॥ ५३ ॥ हे ईश स्वामिन् , मृत्योरंतकस्य या शक्तिरुत्क्रांतिदा नाम त्वया हृता । " भुजिमृङ्भ्यां युक्त्युकौ । मृत्युः स्त्रीपुंसयोरंते " । म्रियंतेऽस्मिन्नुपस्थितेंऽते प्राणिन इति मृत्युः । प्राणिनामायुषोंऽते या प्राणाकर्षिणी शक्तिः सा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उत्क्रांतिदोत्क्रांतिर्लिंगकायविनिर्गतिः । उत्क्रमणमुत्क्रांतिस्तां ददाति उत्क्रांतिदा । “ कासूसामर्थ्ययोः शक्तिर्देवतायामृषावपि । ” हे शुंभ, तव भ्रातुः निशुंभस्यापि परिग्रहे परिजने विषये सलिलराजस्य वरुणस्य पाशः आयुधं वर्त्तते । “ पत्नीपरिजनादानमूलशापाः परिग्रहाः । पाशो बंधनशस्त्रयोः ” ॥९४॥ किं च ते तव भ्रातुर्निशुंभस्य गृहेऽब्धिजाता रत्नाकरसमुद्भूताः समस्ता रत्नजातयश्च उत्तमरत्नप्रकाराः तिष्ठंति । “ जातिः सामान्यजन्मनोः ” । मुक्ताफलविद्रुमहरिन्मणिवज्रपद्मरागाद्या रत्नजातयः । हे शुंभ, तुभ्यं वह्निश्चापि देवः अग्निशौचे नाम वाससी वसने ददौ । अग्नौ निक्षेपतः शौचं विर्मलीकरणं ययोस्ते । कल्पवृक्षोपकल्पितम् स्वर्णमयमग्निदेवताकमग्निनिक्षेपेण विमलात्मकं वासोयुग्ममग्निशौचं वासः ॥ ९५ ॥ एवमुक्तरीत्या ऐरावतः समानीत इत्याद्यया हे दैत्येंद्र, यद्वा हे दैत्य, इंद्ररत्नानि इंद्रादिदेवानामैरावतादीनि रत्नानि तुभ्यमाहृतानि उपढौकितानि उपहारीकृतानि । एषा च कल्याण्यंबिका स्त्रीरत्नं वर्त्तते तत्कस्मात्कारणान्न गृह्यते । अयं त्वम्बिकां प्रत्य-

निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः॥वह्निश्चापि ददौ तुभ्यमग्निशौचे च वाससी॥९५॥एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते॥९६॥ऋषिरुवाच॥निशम्येति वचः शुंभः स तदा चंडमुंडयोः॥प्रेषयामास सुग्रीवं दूतं देव्या महासुरः ॥९७॥ शुम्भ उवाच ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥९८॥

निष्ठोऽर्थः । अयं त्विष्टोऽर्थस्तटस्थोक्तिसमाधिना । हे दैत्येंद्र, यद्यप्येवमैरावतादीनि रत्नानि तुभ्यमाहृतानि देवैः तथाप्येषांबिका तव कल्याणी शुभकारिणी न । कुतः यत एषा भगवती । त्वमन्यं यातीति त्वया । “ आतोनुपसर्गे कः ” । अन्यगामिनीति गृह्यते ज्ञायते । त्वशब्दोऽन्यवाचि सर्वादिषु पठ्यते । त्वमन्यं महेश्वरं याति त्वयाऽन्ययाऽन्यपत्नी महेशपत्नी दैत्यसंहारिणी अतः शुंभस्य शुभकारिणी न । तस्मात्तच्चिंतां त्यजेति हितोपदेशः ॥ ९६ ॥ महासुरः शुंभः तदा चण्डमुण्डयोरिति प्रागुपन्यस्तं वचः निशम्य श्रुत्वा सुग्रीवं नाम दूतं संदेशहरं देव्याः देवीमुद्दिश्य प्रेषयामास । शाम्यतिर्निपूर्वः श्रवणार्थः । “ इष गतौ ” प्रपूर्वः आद्गुणः । देव्या इति कर्माणि ल्यब्लोपे पञ्चमी । दूयतेऽनेन यथोक्तवादित्वात् परिताप्यते पर इति दूतः ॥ ९७ ॥ हे सुग्रीव हे दूत, त्वया तत्र गत्वा सा स्त्री मम वचनादिति च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इत्थं चेत्थं च साम्ना भेदेन चोपायेन वक्तव्या । तथैव सा संप्रीत्या हर्षेण लघु क्षिप्रमविलंबमभ्येति आभिमुख्येनागच्छति तथा कार्यं त्वया विधेयम् । अयं त्वंबिकायामनिष्टोऽर्थः । इष्टस्त्वयम् । अत्रापरेण मंत्रभेदबुद्धिसमाधिना ख्यायतेऽर्थः । हे दूत, त्वया लघु क्षिप्रं तथा कार्यम् मदभिप्रायादन्यत्वेन कर्त्तव्यम् । तत्कथम् यथा मयि विषये अभिद्यमानं वचनं निंदा येषां ते अवचना असुरास्तानत्ति उपसंहरत्यवचनात् असुरसंहारिणीत्यर्थः । पुनः किंभूतांबिका एति गच्छति विनश्यति इत् तस्मिन् इति शुम्भे निशुम्भे च विषये । वक्तव्या सा वक्तव्यप्रतिक्षेपा । " असु क्षेपणे " असनमासः । वक्तव्यो वचनीयः आसः प्रतिक्षेपो न्यक्कारो यया सा वक्तव्या सा । पुनः किंभूता । मम ममेत्यव्ययं ममशब्दोऽत्र मायावचनः निर्ममो योगी स ममः संसारीतिवत् मायारूपेत्यर्थः । पुनः किंभूता । संप्रीत्या " प्रीङ् प्रीतौ " दिवादिः प्रीतिः प्रीः स्त्रियां सम्पदादित्वाद्भावे क्विप् । समीचीना प्रीः प्रीतिर्येषां ते संप्रियो बुधाः । ईयतेऽवश्यं प्राप्यते तयोरुपासकैरित्या संप्राप्या । आदंतं रूपम् ।

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ तां च देवीं ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ५९ ॥

दूत उवाच ॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ६० ॥

॥ ५८ ॥ स सुग्रीवो नाम दूतः यत्र यस्मिन्नतिशोभने शैलोद्देशे पर्वतप्रदेशे असौ देव्यास्ते तिष्ठति तत्र गत्वा ततः तदनंतरं तां देवीं श्लक्ष्णं समुचितं संगतं सुकुमारं यथा स्यात्तथा मधुरया श्राव्याक्षरपदया गिरा वाचा प्राह च । शुम्भोदितसंदेशाभिप्रायगर्भं संदर्भमकथयत् । प्राहेति प्रशब्द उपसर्गप्रतिरूपको निपातः । आहेति तिङंतप्रतिरूपकमव्ययं सामावृत्ति । श्लक्ष्णमिति " श्लिष् आलिंगने । श्लिषेरचोपधायाः " इति क्स्नः । कत्वषत्वे ॥ ५९ ॥ हे देवि, सावधाना भव । अस्ति खलु दैत्येश्वरः लोकत्रये परम उत्कृष्ट ईश्वरः स्वामी तेन शुम्भेन त्वत्सकाशं प्रति प्रेषितः दूतः संदेशहरोऽहमिहागतोऽस्मि । दैत्यग्रहणं जातिख्यापनाय । त्रैलोक्यग्रहणं देव्याः प्ररोचनार्थम् । दूतग्रहणं तन्निग्रहपरिहाराय । " दूतोक्तं सदसद्वापि श्रुत्वा कार्यं हिताहितम् । दूतो न निग्रहीतव्य इति नीतिविदो विदुः ॥ " आदौ देवीत्युक्तत्वाद्देव्या एव जयः सूच्यते । यतः दीव्यति विजिगीषते देवी । हे देवि, तेन शुम्भेन दूतः प्रेषितः त्वत् देवीतः स शुम्भः काशं तृणं गतः स्यान्नतु जयमि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यपि देवीपारिषदोक्तिलेशोऽनुसंधेयः ॥ ६० ॥ हे देवि, यः सदा सर्वदा सर्वासु देवयोनिषु विषयेषु अव्याहताज्ञः अप्रतिहतशासनः निर्जिताखिलदैत्यारिः निर्जिता अभिभूता अखिलाः दैत्यारयः देवा येन शुंभो यदाह तद्वचनं शृणुष्वाकर्णय । " व्यत्ययो बहुलम् " इत्यात्मनेपदम् । " व्येञ् संवरणे " । संवरणमाच्छादनं क्विप् अं विष्णुं व्ययति संवृणोति आच्छादयति व्याप्नोत्यविद्यात्वेनेति अवीर्विष्णुमाया तया अव्यया देव्या आहता आज्ञास्य शुंभस्य सः अव्याहताज्ञो भविष्यति । " निर्निश्चयनिषेधयोः " । निर्जिता अजिता अखिला देवा येन स तथोक्तो भविष्यतीत्यपि देवीपार्षदोक्तिलेशोऽप्यनुसंधेयः ॥ ६१ ॥ शुंभ आहेदम् । " पटैकदेशे दग्धे पटो दग्धः " इत्यवयवे एकदेशे अप्यवयवीसमुदायो वर्त्तते क्वचिदवयवावयविनोरभेदोपचारात्प्रयोगेषु तद्वत्त्रैलोक्यं ममस्वं वर्त्तते इत्युक्ते किं त्रैलोक्यमेकदेशवृत्त्या विवक्षितमिहेति कस्यचिच्छंका स्यादतस्तामपनेतुमाखिलमिति अखिलमित्येवोक्ते एकैकोऽपि लोकोऽखिलो भवत्यखण्डवृत्तित्वद्भुवनस्येत्यतस्त्रैलोक्यमित्युक्तम् । इह

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु॥निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत्॥६१॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥
यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् ॥६२॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृतं देवेंद्रवाहनम् ॥६३॥

ममेति विभक्तिप्रतिरूपमव्ययं मायावाचि निर्ममो योगीतिवत् । मम माया देव्याः त्रैलोक्यमित्युक्तम् । मायाया अखिलं स्वं वर्त्तते तत्कुतः शुंभस्येत्यपि देवीपार्षदोक्तिलेशोऽप्यनुसंधेयः । देवाः मम शुंभस्य वशानुगाः । वशः कांतिरिच्छा । मदिच्छामनुवर्तंते नतु शुंभस्येत्यपि देवीपार्षदोक्तिलेशोऽनुसंधेयः । तत्तद्देवतोद्देशेन पृथक् पृथक् विहितान् तान् सर्वान् यज्ञभागानाहुतिरूपान्यज्ञांशान् अहमेव शुंभः पृथक् पृथगिंद्रियादितत्तद्देवताकायव्यूहमुपाश्रित्य उपाश्नामि उपभुंजे । " अश् भोजने " क्र्यादिः । अहमिति विभक्तिप्रतिरूपकमव्ययमविद्यावाचि अविद्या वाऽतस्मिंस्तद्बुद्धिः सा च देव्येव यज्ञभागानुपाश्नातीति कुतः शुंभस्य यज्ञभागोपभोग इत्यपि देवीपार्षदोक्तिलेशोऽनुसंधेयः ॥ ६२ ॥ त्रिष्वपि लोकेषु वराणि श्रेष्ठानि रत्नानि स्त्रीरत्नानि मम वश्यानि विधेयानि । वशं कांतिमिच्छां गतानीत्यर्थः । " वशंगतः " इति यत्प्रत्ययः । तथैव तद्वदेव बलवत्त्वत एव । गजरत्नं देवेंद्रवाहनम् । " वाहनमाहितात् " इति णत्वं नात्र भवति । आहितत्वस्याविवक्षितत्वात् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अत्र हि देवेंद्रस्य वाहनमित्येतस्य स्वस्वामिभावसंबन्धमात्रं विवक्षितत्वम् । यद्वाहने आरोपितं यतोऽखिलं तदाहितमुच्यते । इक्षुवाहणमित्यत्र इक्षवो वाहने आरोपिता इति कृत्वा णत्वं भवति ॥ ६३ ॥ क्षीराण्युदकानि यस्य स क्षीरोदः क्षिराब्धिः उत्तरपदे “ उदकस्योदः संज्ञायाम् ” इत्यत्र संज्ञायामुत्तरपदस्योदकशब्दस्योदादेशो वक्तव्यः । क्षीरोदस्य मथनं तत उद्भूतमुच्चैःश्रवससंज्ञम् । “ श्रु गतौ । श्रु श्रवणे ” । उच्चैः शृणोति गच्छति उच्चैःश्रवाः । पचाद्यच् । सहसंज्ञया चेतनया नाम्ना च वर्तते ससंज्ञः । “ सहस्य सः संज्ञायां वोपसर्जनस्य ” इति ततः कर्मधारयः । उच्चैःश्रवश्चासौ ससंज्ञश्च उच्चैःश्रवससंज्ञः । अश्वविशेषणत्वे पुँल्लिंगः । अश्वरत्नविशेषणत्वे तु नपुंसकलिंगमुच्चैःश्रवससंज्ञम् । अथवा प्रशस्ते श्रवसी यस्य सः श्रवसः मत्वर्थे अर्शआदित्वादच् । जवेन मानेन च उत्कृष्टत्वादुच्चैरित्युच्यते । उच्चैश्चासौ श्रवस उच्चैःश्रवस इति संज्ञा यस्य सः । अश्वरत्नविशेषणत्वे उच्चैःश्रवससंज्ञं तु मद्भीतैरमरैः प्रणिपत्य मत्पादपद्मेऽर्पितमुपायनीकृतम् “ उपायनमुपग्राह

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥६४॥ यानि चान्यानि देवेषु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥६५॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ ६६ ॥

उपहारस्तथोपदा । ” अत्रापि मायावाचि ममेत्यव्ययम् । मायादेव्यै अमरैर्भक्तिनम्रैरश्वरत्नं प्रणिपत्य समर्पितं तत्त्रैलोक्ये गृहे यस्या यत्र क्वाप्यस्तु अयं तु शुंभोऽन्यदीयं ममेदमिति मुधाभिमन्यते । इति देवीपार्षदोक्तिः ॥ ६४ ॥ हे शोभने देवि, देवेषु वा गंधर्वेषु देवगायनेषु वा उरगेषु नागेषु वा यानि चान्यानि रत्नत्वमुत्कृष्टत्वं प्राप्तानि भूतानि शरीरभांजि मनोहराणि स्त्रीरूपाणि संति (तानि) सर्वाणि मय्येव विषये वर्त्तते । आः सखि शोभने, गर्वस्थोऽसावित्थमभूत् वादी शुंभः शांभवीयं देव्येव भूतमयी भूतमित्थमाचष्ट यानि देवेषु गंधर्वेषु उरगेषु वा रत्नभूतानि रत्नतां प्राप्तानि भूतानि कृतानि सत्यानि तत्स्थानि संति तानि मय्येव देव्यामेव ॥४७॥
वर्त्तमानानि नान्यत्र । अथवा इतोऽन्यानि च यानि च रत्नभूतानि पृथिव्यादीनि संति तानि सर्वाणि विश्वरूपत्वेन विश्वमातृत्वेन मय्येव देव्यां वर्त्तंते न शुंभ इति देवीसखीजनोक्तिलेशोऽप्यनुसंधेयः॥६५॥ हे देवि, लोकेऽस्मिन् रत्नभूतां भूलोके हिमालयनिवासिनीं मानिनीं त्वां स्त्रीरत्नभूतां स्त्रीरत्नजातां स्त्रीजात्युत्कृष्टां तां प्राप्तवर्तीं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वयं शुंभनामानो मन्यामहे । सा एवंविधा त्वमस्मानुपागच्छ प्राप्नुहि । कुत इत्यत आह । यतो वयं रत्नभुजो राजानः । यदुक्तम् । " स्वराष्ट्रमन्यतो रक्षत्यन्यदीयं क्षिणोति च । वर्द्धेतोपायवान्नित्यं रत्नहारी स पार्थिवः ॥ " देवीष्टार्थस्त्वेषः । उपागच्छेत्यत्र उ पाः गच्छेति च्छेदः । तत्र " उ संबुद्धौ रुषोक्ते च शिववाचि त्वनव्ययम् । " पाने पिबतिः रक्षायां पातिः पायतिः शोषणे क्विप् । पायति शत्रून् शोषयति पाः उरिव रुद्र इव पा उपाः । हे देवि, कालाग्निरुद्र इव पायंती शत्रून् शोषयंती सती अस्मानिति शुम्भादीन् त्वामाकारयमाणाञ्छत्रून् शोषयितुं गच्छ यां हीति देवीपार्षदोक्तिलेशोऽप्यनुसंधेयः । यद्वा " असु क्षेपणे " दिवादिः क्विप् अस्यत्यरीन् क्षिपत्यधिक्षिपति न्यक्करोति अः " अत्वसंतस्य च " इति उपधादीर्घः अधातोरिति प्रतिषेधान्न भवति " पैओवै शोषणे " पायंति शोषयंति लोकानिति पास्तेषां पां शुंभादीनां दैत्यानां अः आसिका क्षेपिका अधिक्षेपिका न्यक्कारिकेति पाः । पा अः पाः उ इति संबुद्धावव्ययम् । उ हे देवि, त्वमस्मानुपागच्छेति शुंभादिभिः रत्नभुग्भिः दैत्यैराकारितासि । सा त्वं पाः सती गच्छ पायतो जगंति शोषयतः शुंभादीनस्यंती अधिक्षिपंती गच्छ याहि । कुत इत्यत आह ।

मां वा ममानुजं वापि निशुंभमुरुविक्रमम् ॥ भज त्वं चंचलापांगि रत्नभूतासि वै यतः ॥ ६७ ॥

यतस्ते रत्नभुजः । " भुजो कौटिल्ये " तुदादिः क्विप् । भुजंति कौटिल्येन वर्त्तंते भुजः रत्नेषूत्कृष्टेषु विषयेषु भुजः कौटिल्येनान्यायेन वर्त्तमानाः रत्नभुजः अतः तेषां शुभादीनां कुटिलादीनां न्यक्करणाय गमनं युक्तमुत्पश्याम इतीति देवीपार्षदोक्तिः ॥६६॥ " चलाचलः स्यात्तरलश्चंचलश्चपलश्चलः । " चंचलौ नेत्रांतनिरीक्षणेन तरलौ अपांगौ नेत्रांतौ यस्याः सा चंचलापांगी । हे चंचलापांगि, हे वरारोहे, त्वं यतो रत्नभूतासि सौंदर्येण उत्कृष्टतां प्राप्तासि ततो वै अनुनीयसे " न रत्नमन्विष्यति मृष्यते हि तत् " इति न्यायतः प्रार्थ्यसे ततश्च मां निशुंभं वा भज आश्रय । उरुर्विक्रमः शौर्यलक्षणो यस्य तं मम अनुजं कनिष्ठं भ्रातरं निशुंभं वापि भज संश्रय । त्वं हि रत्नं रत्नभाजश्च राजान इव वयं च राजानः तस्मात्त्वमस्मानेव भज नान्यानिति शुंभानुकूलोऽभिप्रायोऽयम् । " वै स्यात्संबोधने पादपूरणेऽनुनयेऽपि च । " देव्यनुकूलार्थस्त्वेषः । " सप्तम्यां जनेर्डः । अन्येष्वपि दृश्यते " इत्यत्र सूत्रे अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वंतरादपि डो भवति " कारकांतरेषूपपदे च " इति वचनात् " पिष्लृ संचूर्णने " इत्यस्मादाङ्पूर्वाच्चंचलोपपदात् डः टिलोपः । सा चंचला न्यायादपध्वस्तान् दैत्यानासमंतादभिव्याप्य पिनष्टि संचूर्णयति इति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चंचलापमंगगात्रं यस्याः सा चंचलापांगी। अंगगात्रकंठेभ्यश्चोपसंख्यानाद्वा ङीष् । हे चंचलापांगि, हे दुष्टदैत्योपसंचूर्णनसन्नद्धगात्रे, एवंविधा त्वं शुंभेन आकारितासि किमिति मां वा अनुजं निशुंभं वा भजेत्याहूतासि यतश्च त्वं रत्नभूतासि वै अनुनीयसे प्रार्थ्यसे च ततः। त्वं मां वेति शुंभमम गच्छ याहि अनुजं वापीति निशुंभमम गच्छ याहि अम इत्येतत् “ अम गतौ ” इत्यतो भ्वादेर्लोटि रूपं तच्च मां वा। अम मा अनुजमिति पदच्छेदात्क्रियते किंविशिष्टा त्वं मा। “ मः शिवो वा रमायां च मा निषेधेऽव्ययं मतम्। ” मं शिवं शंभुमसति गच्छति शंभुना सह दीव्यति चेति विगृह्य “ अस गतिदीप्त्यादानेषु ” इत्यसतेः पूर्ववदपिशब्दविहितो डः डिति टेरस्शब्दस्य लोपः स्त्रियां मा इति रूपम्। ततश्च तादृशी शांभवी चंचलापांगी दुष्टदैत्यसंहारसज्जांगी सती त्वमुरु विपुलं यथा स्यात्तथा शुंभादिषु विषयेषु विक्रमं भज शौर्यं समाश्रयेति देवीपार्षदोक्तिलेशोऽप्यनुसंधेयः। यद्वा चंचलापांगि रत्नभूतासि। वा ऐ यतः इति च्छेदः। “एकार उच्यते विष्णुरैकारः स्यान्महेश्वरः।” ममेति मायावाच्यव्ययम्। “यती प्रयत्ने” यतनं यत् स्त्रियां भावे संपदादित्वाद्वा क्विप्। ऐ महेश्वरस्येव कालाग्निरुद्रस्येव यतं यत्नं प्राप्य हे मम हे माये देवि, मां हंतुं

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ६८ ॥

निशुंभं च हंतुं महांतं विक्रमं पादविक्षेपं पराक्रमं वा भजेति देवीपार्षदोक्तिः। चंचलान्न्यायादपभ्रष्टानपकर्तुं हिंसितुमंगति प्राप्नोति तच्छीला चंचलापांगी अगिर्गत्यर्थः। रत्नभूतश्चासावसिश्चेति रत्नभूतासिः। चंचलापांगि रत्नभूतासि वा (?) “ वा गतिगन्धनयोः। आतोऽनुपसर्गे कः ” ॥६७॥ हे देवि, त्वं मम शुंभस्य परिग्रहात्पत्नीत्वेन स्वीकारादतुलमनुपमं परं श्रेष्ठमैश्वर्यं परमेषु श्रेष्ठेषु स्वामितां च प्राप्स्यासि। व्यत्ययेनात्मनेपदम्। यद्वा मया शुंभेन त्वं परमैश्वर्यं प्राप्स्यसे प्रापयतेः कर्मणि लृटि थासः से रूपम्। हे देवि, एतत्सर्वं प्रागुक्तं शुंभाभिप्रायगर्भं बुद्ध्या समालोच्य विचार्य मत्परिग्रहतां व्रज प्राप्नुहि। “ परिग्रहः परिजने पत्न्यां स्वीकारमूलयोः। ” यदाहुः। “ पत्नीपरिजनादानमूलशापाः परिग्रहाः। ” इति शुंभानुकूलोऽर्थः। देव्यनुकूलोऽर्थस्त्वेषः । हे देवि, त्वं परमा सर्वोत्कृष्टा। यद्वा परा उत्कृष्टा मा लक्ष्मीः त्वमेवेति अतुलमैश्वर्यं प्राप्स्यसीति यत्सत्यमेवैतत्। किं चित्रम्। किंच मत्परिग्रहात्। “ मदी हर्षे ” माद्यति मद् क्विप्। यः मद् माद्यन् परिग्रहः मातृमुख्यः परिवारः तं प्राप्य परमैश्वर्यं प्राप्स्यसे इत्येतदपि सिद्धमेवैतत्। मत्परिग्रहादिति कर्मणि ल्यब्लोपे पञ्चमी। हे देवि, त्वमेतद्बुद्ध्या समालोच्य मा- ॥४८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्यत्परिग्रहो मातृमुख्यः परिजनो यस्याः सा मत्परिग्रहा तस्याः भावः मत्परिग्रहता तां व्रज प्राप्नुहि । यः खल्विमाश्चित्रा गावो मे संतीत्यादौ बुद्ध्या समालोचते स एव चित्रगुतां प्राप्नोति तद्वदियमपि देवी प्रेमतः आत्मनो मन्माद्यन् परिग्रहोऽस्तीति बुद्ध्या समालोच्य पश्चान्माद्यत्परिग्रहतां व्रजतीति देवीपार्षदोक्तिः । " त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः " ॥ ६८ ॥ ततः संदेशश्रवणसमय इत्येवं शुंभेन दूतद्वारा उक्ता कथिता । देवी गंभीरा अगाधाभिप्राया दैत्यान् हंतुकामा अत एवांतःस्मिता । शुंभो दुरात्मा मां प्रति देवतामित्थमाहेति सोत्प्रासमंतस्तंभितहासा तं हंतुमनाः सती जगौ । दूतं वाचमुचितामूचेऽकथयत् । दुर्गा दुरवगाहा । भगवती समग्रैश्वर्यरूपा । भद्रा क्षेमरूपा यया इदं जगद्धार्यते " गै शब्दे । आत औ णलः । " अयं भावः इति दूतेन व्यभिचारिभावेन उक्तापि देवी न सा असा तादृशी नाभूत् । अतिपतिव्रता शुंभादिभिः सह रंतुकामा नाभूत् । किंतु अतदा कालांतरे हंतुकामैवाभूत् ॥ ६९ ॥ अत्र शुंभेऽपि विषये सत्यमुक्तं हे दूत, अत्र त्वया

ऋषिरुवाच ॥ इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ६९ ॥

देव्युवाच ॥ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥७०॥

किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ ७१ ॥

मिथ्यापदं किंचिन्न उदितं न उक्तम् । तथाहि । शुंभस्त्रैलोक्याधिपतिर्भवती निशुंभोऽपि च तादृशः शुंभसदृश एव । मिथ्येत्यव्ययम् । इदं हि सोल्लुंठनं वचः । अनिति जीवति अनः । पचाद्यच् । अयेन शुभावहविधिना अनः अयानः । हे अयान दूत, त्वयात्रास्यां पतिव्रतायां देव्यां विषये यदसंभाविते किंचिन्मिथ्या उदितमुक्तं शुंभं निशुंभं वा भजेति तत्तु सत्यमुक्तं हीनम् । त्रैलोक्याधिपतिः शुंभ इति यत् । एतत्सत्यं यतः शुंभः त्रैलोक्यस्याधेर्मानसपीडायाः पतिः उत्पादकत्वेन स्वामी यतश्च स तादृश एव निशुंभोऽपि । " पुंस्याधिर्मानसी व्यथा " । त्रैलोक्यस्य त्वधिपतिरियं देव्येवेति देवीपार्षदाभिप्रायतः सोत्प्रासतावसेया ॥ ७० ॥ " किं वितर्के परिप्रश्ने क्षेपे निंदाप्रकारयोः । किमव्ययं वितर्के तु तु स्याद्भेदेऽवधारणे ॥ " शुंभः त्रैलोक्याधिपतिः सत्यं किं त्वत्रास्मिन् शुंभे पत्यावाश्रयितव्ये विषये मम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विचारोऽस्ति पृथक् प्रतिनियतः । मया यत्प्राक् प्रतिज्ञातं तर्त्कि मिथ्या क्रियते । मया देव्याऽल्पबुद्धित्वादनालोच्य पुरा बाल्यकाले या प्रतिज्ञा कृता सा त्वया दूतेन श्रूयताम् । कृता मयेति वा पाठः । " अत सातत्यगमने " । अल्पबुद्धित्वमतति सततं गच्छति सदाप्नोतीति अल्पबुद्धित्वात् क्विपि रूपम् । संबुद्धौ हे अल्पबुद्धित्वात् हे स्वल्पधिषण हे दूत, त्वयोक्तं शुंभं निशुंभं वा भजेति तत्र या प्रतिज्ञा भर्त्तरि विषये कृता सा श्रूयतां सा चेत् घटेत् मे भर्त्ता । अन्यथा यन्मया प्रतिज्ञातं तन्न स्यात् । " मानिनो निरयं यांति यावदाभूतसंप्लवम् । " ॥७१॥ कासौ प्रतिज्ञा । " जि अभिभवे । जि जये " इत्ययं त्वकर्मकः । यो मे दर्पं गर्वं व्यपोहति द्रावयति दूरीकरोति । "दर्पो हर्षणमोहनयोः। गर्वोऽभिमानोऽहंकारो दर्पोऽहंकारसूर्ययोः। ऊह वितर्के" आत्मनेपदी । " उपसर्गादस्यत्यूह्योर्वा वचनम् " इति परस्मैपदम् । यो मे देव्याः प्रतिबलो लोके अधिबलः सबलः स्यात्प्रतिबलः विपक्षः प्रतियोगी वा स्यात्स मे भर्त्ता भविष्यतीति प्रतिज्ञास्वरूपम् । लोके जयंती अभिभवित्री

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ ७२ ॥
तदागच्छतु शुंभोऽत्र निशुंभो वा महासुरः ॥ मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥ ७३ ॥

शक्तिरियमेव नैतां कोऽपि नेतुं शक्नोति । लोके दर्पात्माऽहंकाररूपा शक्तिरियमेव नैतां कोऽपि प्रच्यावयितुं शक्नोति । लोके बलरूपा शक्तिरियमेव नैव तां कोऽपि प्रच्यावयितुं शक्नोति । इत्यभिप्रायेण प्रतिज्ञातमित्थं देव्या । यः संग्रामे तुल्ये संसारग्रामे मां लक्ष्मीं संपदं जयति परमवैराग्ययोगादभिभवति । योऽमेऽलक्ष्मीके दैत्यवर्गे दर्पं हर्षणं गर्वं च व्यपोहति । यो लोके मे देव्याः अप्रतिबलः अप्रतिपक्षः अनुकूलः स महेश्वरो मे भर्त्ता धारकः पोषकश्च नान्य इति देव्याः परमोऽभिप्रायोऽयं देवीपार्षदैः सहृदयैरूहितः ॥ ७२ ॥ पाणिग्रहणं करोतु । तयोरन्यतरः। अत्र मत्प्रतिज्ञापरिपालने चिरेण कालेन किं साध्यं किं विलंबेन कृतं स्यात् । "आदानस्य प्रदानस्य कर्त्तव्यस्य च कर्मणः । क्षिप्रमक्रियमाणस्य कालः पिबति तत्फलम् ॥ " मत्पाणौ प्रभुशत्रुः तत्फलं द्रक्ष्यति सः इति देव्याशयः । तत्तस्मात्प्रतिज्ञातः कारणाच्छुंभो निशुंभो वा आगच्छतु । तेन किं स्यात् तदनादृत्य जित्वा जेता त्रैलोक्यविजयी महानसुरः महासुरः महादेवः मां गृह्णातु अत्र मद्ग्रहणे किं चिरेण- ॥४९॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ति देव्याः परमाभिप्रायं देवीसख्यः स्वस्वचेतःसु ऊहंते । " जि अभिभवे । अन्येभ्योऽपि दृश्यंते " इति क्वनिपि ह्रस्वस्य पिति कृति तुगागमः नांतः । चिरेणातिकालेन अव्ययं चानव्ययं चेदम् ॥ ७३ ॥ " लिप उपदेहे " उपदेह उपचयः । अवपूर्वस्तु लिपिर्गर्वे वर्त्तते । यदभ्यधुः । " गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः । दर्पोऽवलेपोऽहंता च " । हे देवि, त्वमवलिप्तासि मैवं भूः एवं गर्विता मा भूः । त्वं ममाग्रे एवं यदवोचः यो मां जयति संग्रामे इत्यादि तदागच्छतु शुंभोऽत्रेत्यादि चेति प्रतिज्ञाव्याजेन खलु त्वं केवलमहमहमिकामवोचो मैवं ब्रूहि । कुत इत्याह । त्रैलोक्ये शुंभनिशुंभयोरग्रे योद्धुकामः कः पुमांस्तिष्ठेत् न कोऽपि अबला त्वं योत्स्यसे इति का कथा । इति शुंभानुकूलोऽभिप्रायः । अवलिप्तान् सगर्वान् दैत्यानस्यति अधिक्षिपति अवलिप्तासि । " असु क्षेपे " । कर्मण्यणि टिड्ढाणञ्सूत्रेण ङीपि रूपं तत्संबुद्धौ हे अवलिप्तासि हे मदोद्धतमर्द्दनि, यतः त्वं मा लक्ष्मीः अतो ममाग्रतः सखीजनस्य पुरतः एवं ब्रूहि यो मां जयति संग्रामे इत्यादि त्रैलोक्ये अग्रे पुरो-

दूत उवाच ॥ अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ॥७४॥
अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका ॥ ७५ ॥

भावि संग्रामे शुंभनिशुंभयोर्मध्ये कः पुमान् त्वया समं योद्धुं तिष्ठेदपि तु न कोऽपि । यदा तदग्रे शुंभनिशुंभयोः संबंधी कः पुमान् योद्धुकामः तिष्ठेन्न कोऽपि इति देव्याः सखीजनाशयोऽनुसंधेयः ॥७४॥ हे देवि, हे भव्ये, अन्येषामपि शुंभव्यतिरिक्तानां दैत्यानां धूम्रलोचनप्रभृतीनां युधि सर्वे देवा योद्धुकामाः संमुखा न तिष्ठंति । किं पुनः त्वमेकिका अबला दैत्यानां पुरतः योद्धुमक्षमेति किं पुनर्वक्तव्यमिति शुंभानुकूलोऽर्थः । हे देवि, अन्येषामपि दैत्यानां संमुखा युधि सर्वे देवा न तिष्ठंति चेत् मा तिष्ठंतु । त्वं पुनः त्वं तु स्त्री सत्यपि समस्तशक्त्यधिदेवतारूपा एकाकिन्येव असहायशूरा योद्धुमन्येषां दैत्यानां संमुखी किं न तिष्ठसि अपि तु योद्धुं संमुखी तिष्ठस्येवेति देवीसखीजनाभिप्रायोऽनुसंधेयः । " वै स्यात्संबोधने पादपूरणेऽनुनयेऽपि च । एकाकी त्वेक एकलः । प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः " ॥ ७५ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे देवि, येषां संयुगे इंद्राद्याः सर्वे देवाः संमुखाः न तस्थुः न तस्थिवांसः तेषां शुंभादीनां दैत्यानां संमुखं त्वं स्त्री अबला योद्धुं कथं प्रयास्यसि अभिगमिष्यसि। विवाहनिमित्तप्रतिज्ञापालनाय शुंभादिभिः सह स्त्रियास्तव युद्धं न घटते अपि तद्युद्धं विनैव शुंभेनाहूता त्वं तं भज व्रजेति शुंभानुकूलोऽर्थः । देवीसखीजनाभिप्रायोऽन्य एव । यथा हे देवि, त्वमिंद्राद्याः " आस उपवेशने " कर्त्तरि क्विप् आस्त आः सांतः इंद्रादिषु आः आसीनाः इंद्राद्याः इंद्रादिभिर्देवैर्ध्याता सती तेष्वासीनासि । त्वं सकला कलाभिः सह वर्त्तमाना । हे देवि, त्वं देवाः सांतम् । " दिवु क्रीडाविजिगीषादौ । सर्वधातुभ्योऽसुन् । " दीव्यति देवाः " अत्वसंतस्य " इत्युपधादीर्घः । देवाः विजिगीषमाणासि । पुनः कथंभूता त्वम् । येषां शुम्भादीनां संयुगे इन्द्राद्याः न तस्थुः तेषां स्त्री प्रयासी असि स्त्रीः प्रयासंती भर्तृविनाशाजनितदुःखाः कुर्वंती । "यसु प्रयत्ने" णिच् । कर्मण्यण् ङीप् । एवंविधासि । तेषां संयुगे संमुखं कथं न स्थास्यसि अपि तु योद्धुं प्रयास्यासि इति । " संभवत्येकवाक्यत्वे वाक्यभे-

इंद्राद्यास्सकला देवास्तस्थुर्येषां न संयुगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ ७६ ॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः ॥ केशाकर्षणनिर्धूतगौरवामागमिष्यसि ॥ ७७ ॥

दस्तु नेष्यते । अर्थांतरे विवक्षायां वाक्यभेदो न दुष्यति ॥" यद्वा हे देवि, इन्द्राद्याः सकला देवाः येषां शुंभादीनां संयुगे संमुखं न तस्थुः स्थातुं न शेकुः । एतावता तेषां शुम्भादीनां संमुखे योद्धुं विजेतुं त्वं कथं न प्रयास्यसि । इति देवीसखीजनाभिप्रायः । यद्वा तस्थुः या ईषामिति च्छेदः । " ईष गतिहिंसादर्शनेषु " भ्वादिरात्मनेपदी कर्तरि क्विप् । ईषंते हिंसंति ईषः हिंसकास्तेषामीषां हिंसकानां शुम्भादीनां संयुगे इन्द्राद्याः न तस्थुः ते खलु भीरवः। हे देवि, या त्वं स्व्यपि सर्वशक्तिरूपावतीर्णासि । सा भगवती त्वं तेषां संमुखे कथं न प्रयास्यसि योद्धुमपि तु प्रयास्यस्येवेति ॥ ७६ ॥ हे देवि, सा त्वं प्रागुक्तप्रतिज्ञापालनपटीयसी विवोढुमनाः मया ॥५०॥
दूतेन उक्ता कथितैव सती । यद्वा त्वद्गौरवाभिवांछिना मया दूतेन उपादिष्टा सती प्रतिज्ञाभंगभयं परित्यज्यानपत्रपा सती शुम्भनिशुंभयोः पार्श्वं गच्छ । यतः त्वमित्थं सदुपदेशमाश्रयंती केशाकर्षणनिर्धूता गौरवा सती मा गमिष्यसि । मा इत्यङिदव्ययं निषेधार्थकम् । अन्यथा माङि लुङ् स्यात् । केशानां शिरोरुहाणामाक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षेणेन निर्द्धूतं कम्पितमपास्तमपनीयं गौरवं गुरुत्वं बहुमान्यत्वं यस्याः सा इत्थंभूता सती नागमिष्यसि । अन्यथा त्वं मदुपदेशपराङ्मुखी सती प्रतिज्ञां पालयितुं संग्रामं कर्तुकामापि तमलभमानात्रैवासीना केशपाशाकर्षणापाकृतबहुमान्यता सती बलादाकृष्यमाणा शुम्भनिशुम्भयोः पार्श्वं गमिष्यसि इति शुंभानुकूलोऽर्थः । देवीसखीविवक्षितस्त्वन्य एव यथा । हे देवि, सा त्वं दुरात्मना दूतेन इत्थमुक्ताऽत एव संजातक्रोधा सती मया सख्या सह शुम्भनिशुम्भयोः पार्श्वं गच्छ । ततस्तयोः केशाकर्षणनिर्द्धूतगौरवा शुम्भनिशुम्भयोः केशानामाकर्षणेन निर्द्धूतं निरस्तं गौरवं दैत्येश्वरत्वं यया सा तृतीयार्थे बहुव्रीहिः । एवंविधा त्वं पुनरपि अमा सखीजनस्य समीपमागमिष्यसीति । " अमा सह समीपे च । त्यक्तं हीनं विधुतं समुज्झितं धूतमुत्सृष्टे । " गौरवान्नागमिष्यसीति पाठे तु हे देवि, मया त्वद्गौरववांछिना दूतेन उपविष्टा सती मत्पार्श्वे इति पाठे द्वितीयाद्विवचनांतम् । मद्वचनाचेन्न गच्छेः तर्हि गौरवाद्बहुमानान्नागमिष्यसि किंतु केशाकर्षणनिर्द्धूता आगमिष्यसि । " निर्निश्चयनिषेधयोः " । निर्द्धूता अत्यक्ता केशाकर्षणेन निर्द्धूता बद्धा गृहीता बन्दीकृता सत्यपमानादागमिष्यसि । गौरवात्तु नागमिष्यसि इति शुम्भानुकूलोऽर्थः । देव्य-

देव्युवाच ॥ एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ ७८ ॥

नुकूलस्त्वेषः । हे देवि, कृतप्रतिज्ञा त्वं तेन दुरात्मना शुम्भेन मां भजेत्युक्ता सती अतः सक्रोधा मया सख्या सह शुम्भनिशुम्भयोः पार्श्वं हननाय गच्छ । ततश्च तयोः निर्द्धूतमत्यक्तं निगृहीतं केशाकर्षणं यया सा । आहिताग्न्यादित्वादग्न्याहित इतिवन्निष्ठांतस्य परनिपातः । निर्द्धूतशत्रुकेशाकर्षणा सती अत्यक्तकेशाकर्षणा सत्यगौरवान्नागमिष्यसि । गौरवादेव सन्मानादेव निजस्थानं पुनः आगमिष्यसि इति देवीसखीजनाभिप्रायः । गौरवादागमिष्यसीति वा पाठः । यद्वा कः ब्रह्मा अश्च विष्णुः ईशश्च महेशः केशास्तेषामाकर्षणं ध्यानेन वशीकरणं हृद्यवस्थापनं तव धूतं त्यक्तम् । निर्निषेधे । निर्द्धूतमत्यक्तं केशाकर्षणं यैः ऋषिभिस्तेषां केशाकर्षणनिर्द्धूतानामृषीणामासमंतादभिव्याप्य वर्त्तमानां गौरवमान्यत्वं तददंति नाशयंति ये दैत्यास्ते केशाकर्षणगौरवादः । " पैओवै शोषणे " तान्केशाकर्षणनिर्द्धूतगौरवादो दैत्यान् वायति शोषयति केशाकर्षणनिर्द्धूतगौरवादा । " आतोऽनुपसर्गे कः " । एवंविधा सती आगमिष्यसि अनुस्यूतब्रह्मविष्णुमहेशानां गौरवादो दैत्याः । " अद भक्षणे " क्विप् । तान् वायंती शोषयंती सत्यपास्यसि स्वस्थानमिति सखीजनाभीष्टाभिप्रायः ॥ ७७ ॥ हे दूत, त्वया यदुक्तं शुंभो बली वीर्यवान् निशुंभश्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वीर्यवान् इति एतदेवं नान्यथा । अहं तु किं करोमि यद्यस्मान्मे मम प्रतिज्ञा इयमस्ति पुरा प्रागेव मयानालोचिता विचारिता नाभूत् । " संभावितं प्रतिज्ञाय निर्वोढव्यं मनीषिभिः । प्रतिज्ञयाप्यसंभा० ' निर्वोढव्यं कथं न तैः ॥ निर्वोढव्यं प्रतिज्ञातं तर्कितं वाप्यतर्कितम् । प्रतिज्ञातपरित्यक्तेः प्राणत्यक्तिर्वरं नृणाम् ॥ वीरकर्म तदेतच्च वीर्यमित्यभिधीयते । इवेत्थमर्थयोरेवम् । यत्तद्यतस्ततो हेतौ " । मया पुराऽनालोचिताप्यविचारितापि मे प्रतिज्ञा ईदृश्येवाभूत् । अतश्चाहं किं करोमि युद्धादन्यत् किंतु युद्धमेव करोमि । किंच बली शुंभो निशुंभश्चातिवीर्यवानिति दूतेन यो गर्व उक्तस्तमनर्वमपि गर्वमर्वं करोमि । एवमेतत् इदमित्थमेवेति देव्याः परमोऽभिप्रायः ॥ ७८ ॥ हे दूत, स त्वं गच्छ निजस्थानं याहि । मया देव्या यदेतदुक्तं प्रतिज्ञाप्रमुखं वचनं तदेव सर्वमादृतः आकलितवान् सन्नसुरेंद्रायाचक्ष्व आख्याहि । स च स एव शुम्भः यद्युक्तमुचितं यच्चानुचितं तत्करोतु । यदेतत्सर्वमादितः पाठे आदित आरभ्य असुरेंद्रायाचक्ष्व । चक्षिङो लोटि रूपम् । स च यद्युक्तमुचितं तत्करोतु

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु तत् ॥७९॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देव्या दूतसंवादो नाम पंचमोऽध्यायः ॥ ५ ॥ ऋषिरुवाच ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥१॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥२॥

॥ ७९ ॥ इति श्रीमद्राजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्त्तिविरचितायां शांतनव्यां देवीमाहात्म्यटीकायां देवीदूतसंवादः पंचमोऽध्यायः ॥ ५ ॥ हे सुरथ, इति प्रागुक्तं देव्या वचः आकर्ण्य श्रुत्वा अमर्षेण क्रोधेन पूरितः पूर्णः स दूतः समागम्य देवीशैलात्सकाशादागत्य दैत्यराजाय शुम्भाय विस्ताराच्छब्दप्रपंचनात्समाचष्ट अकथयत् । चक्षिङो लङि रूपम् ॥ १ ॥ असुराणां राट् दैत्यराजः शुम्भस्तस्य दूतस्य मुखाद्यद्वाक्यं यद्वा तस्या देव्या वाक्यं प्रतिकूलमाकर्ण्य श्रुत्वा ततोऽसौ सक्रोधः सन् दैत्यानामधिपं धूम्रलोचनं नाम महासुरं प्राह प्रस्थापयामास । प्र इत्युपसर्गप्रतिरूपकमाहेति तिङंतप्रतिरूपकमव्ययम् । हे शुम्भ, त्वत्पार्श्वे देवी नायाति त्वया सह योद्धुमिच्छति तां जेतुमुद्युंक्ष्व । इति दूतवचः श्रुत्वा देव्यानयनाय शुंभो धूम्रलोचनं प्रस्थापयामास ॥ २ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे धूम्रलोचन, त्वं स्वसैन्यपरिवारितः सन् दुष्टां केशानामाकर्षणेन विह्वलां विवशां तां नितंबिनीमाशु क्षिप्रं बलादानय प्रापय मामिति शेषः। "नी प्रापणे" द्विकर्मकः। इत्थं शुंभस्याचरणं सन्मंत्रशक्तिरहितश्च तमिदमनीतिक्रमालोच्य हितकारी नीतिविशारदोऽमात्यः कश्चिद्धूम्रलोचनं प्रस्थातुमुक्तमुपदिश्योपदिशति। कथम् तामानय बलाद्दुष्टामित्यत्र तंत्रेण श्वेतो धावतीतिवदर्थांतरसृष्टौ पदांतरसृष्टिरिष्टैवेति ताम आनय इति च्छेदः क्रियते। तथाहि। अनेकार्थसकृदुच्चरणं तन्त्रमाहुः। तत्र अ इति निषेधेऽव्ययम्। "अमानोनाः प्रतिषेधेऽव्ययाख्याः" इति वचनात्। अतश्च धूम्रलोचन, त्वं स्वसैन्यपरिवारितः सन् तां देवीमाशु क्षिप्रं बलाद्बलमाश्रित्य अ आनय (माआ) नय। कीदृशीं तां पूर्ववत्तंत्रेण आनय बलाद्दुष्टामित्येकं पदम्। अविद्यमानः नयो नीतिर्येषां ते अनयाः शुंभादयस्तेषामिमानि बलानि आनयानि (तानि) च तानि बलानि च आनय बलानि (तानि) अतंति सततं गच्छंति भजंति आनयबलाटः। "अत सातत्यगमने" क्विप्। तेषु आनयबलात्सु आनयसंबंधिबलमाश्रु

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ३ ॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ॥ स हंतव्योऽमरो वापि यक्षो गंधर्व एव वा ॥ ४ ॥

पुरुषेषु दुष्टा विरुद्धा क्रूरा तामानयबलाद्दुष्टामित्येकं पदम्। यद्वा केशानां ब्रह्मादीनामात्मशक्तेरात्ममहामायाकेशात्सकाशाज्जगदुत्पत्तिस्थितिलयकारिणी। तत्तदवसरेषूचितेष्वाकर्षणं केशाकर्षणं स्वमायानिलीनब्रह्मादिप्रकटीकरणमाह्वानं तद्विषये विशेषेण ह्वलति चलति विजृंभते केशाकर्षणविह्वला ताम्। "ह्वल चलने" पचाद्यच्। इति देवीष्टार्थप्रतिपत्तिव्याख्यानतो दैत्यविध्वंसो न भवतीति नीतिविदमात्याभिप्रायः ॥ ३ ॥ हे धूम्रलोचन, तस्या देव्याः परित्राणं रक्षणं ददातीति तत्परित्राणदः। "आतोऽनुपसर्गे कः"। यः कश्चिन्मरो मर्त्यो वा अमरो देवो वा यक्षो वापि गंधर्वो वापि परः शत्रुः परस्तां जिघृक्षुरन्यः। चकारान्नागादिर्वा विपक्षत्वेन उत्तिष्ठते उद्युंक्ते यदि स हंतव्य एव न स्थापनीयः। "उदोऽनूर्ध्वकर्मणि" इत्यात्मनेपदम्। यक्षः कुबेरादिः। गंधर्वस्तुंबुरुप्रभृतिः। पक्षांतरे यद्ययं शुंभो नीतिरहितो यदा इत्थमादिक्षत् पराक्रियमानयेति तत्र नीतिपरोऽमात्यः प्राह। हे धूम्रलोचन, तस्याः देव्याः सकाशात्परित्राणं येषां ते तदेकशरणा देवादयः। "दो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अवखंडने ”। तान् द्यति खंडयति इति तत्परित्राणदः। तद्भक्तहिंसापरः शत्रुर्यः कश्चिन्मरो मर्त्यो वा अमरो देवो वा यक्षः कुबेरादिः गंधर्वस्तुंबुरुप्रभृतिर्वा चकारा- दैत्यो वान्यस्तद्द्वेषी वा राक्षसो वा लंकानिवासी नागो वा सद्यो हंतव्य एवेति तस्मात्तां नानय। आनयसि चेत्तामापदमेवानयसि दैत्यकुलविध्वंसिनी सेति नीतिवि- दमात्योक्त्या देवीष्टार्थसिद्धिः ॥ ४ ॥ ततस्तेन शुंभेन शीघ्रं गच्छतामानयेत्याज्ञप्त आदिष्टः स धूम्रलोचनः दैत्यः षष्ट्या गुणितानां सहस्राणां संख्येयानामसुराणां संघट्टेन वृतः द्रुतं क्षिप्रं ययौ। सहस्राणां षष्ट्या वृतः असुराणां सम्बंधीनि सहस्राणि तेषां संबंधीनि या षष्टिस्तया वृतो द्रुतं ययौ। आज्ञप्त इति “ ज्ञप् मारण- तोषणनिशामनेषु ” मिच्चेति चुरादिः। कर्मणि क्तः। “ वा दांत ” सूत्रे ज्ञप्त इति निपातनात् वा इट् प्रतिषेधोऽणि लुप्तोपधाया ह्रस्वता च । “ ज्ञा नियोजने ” चुरादिरेव। अतो निष्ठायामाज्ञप्त इत्येव ॥ ५ ॥ ततः शुंभनिर्देशतः स धूम्रलोचनः तुहिनाचलसंस्थितां हिमाचलस्थां तां देवीं दृष्ट्वा उच्चैर्जगाद अत्युच्चैरुवाच। हे देवि,

ऋषिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ५ ॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥ ६ ॥

त्वं शुम्भनिशुम्भयोर्मूलं समीपं प्रयाहि गच्छेति। “ मूलमाद्ये शिफायां स्याद्भे निकुंजेंऽतिकेऽपि च। ” इति शुंभानुकूलोऽर्थः। देव्यनुकूलस्त्वेषः। हे देवि, त्वं “ मूल प्रतिष्ठायाम् ” भ्वादिः। मूलनं मूलः। भावे घञ्। तं मूलं प्रभुतां याहि प्राप्नुहीति स देवीसखीजनः तुहिनाचलसंस्थितां तां दृष्ट्वा उच्चैर्जगाद। कीदृशी देवी शुम्भनिशुम्भयोः। “ शुम्भ भासनहिंसनयोः ” भ्वादिः परस्मैपदी। शुम्भति रणे भासति हिनस्ति चेति शुंभो दैत्यः। पचाद्यच्। नितरां शुंभनं हिंसनं नि- शुम्भः। भावे घञ्। शुम्भस्य दैत्यस्य निशुम्भः हिंसनं तस्मिन् विषये यतमाना। “ सप्तम्यां जनेर्डः। अन्येष्वपि दृश्यते ” इत्यत्रापिशब्दात्सर्वोपाधिव्यभिचारः इति वचनाद्धात्वंतरेऽपि कारकांतरेऽपि च डो भवति। डित्यभस्यापि टिलोपः। स्त्रियां टाप्। अवति रक्षति पापेभ्यः ऊः उवौ उवः। शुम्भनिशुंभया चासौ उश्चेति विगृह्य कर्मधारये आद्गुणे च शुम्भनिशुम्भयोः। यद्वा शुम्भनिशुम्भया देवी। कीदृशी। ऊः इति पदच्छेदः। “ अव रक्षणे ” । क्विप्। “ ज्वरत्वरस्रिव्यविमवामु- ॥९२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पधायाश्च " इति वकारस्य अकारस्य ऊठादेशद्वये सवर्णदीर्घत्वे ऊः । रक्षिकेति । संस्थितां सम्यगवस्थिताम् । " संस्थाधारे स्थितौ मृतौ " ॥ ६ ॥ हे देवि, अद्यास्मिन्नहनि भवती प्रीत्या स्वरुच्या मद्भर्तारं स्वामिनं शुम्भं नोपैष्यसि चेद्यदि नागमिष्यति ततः तर्हि एषोऽहं धूम्रलोचनः अधुनैव बलात्कारेण केशानामाकर्षणादाश्रथनाद्विह्वलां विवशां भवतीं मम भर्तारं स्वामिनं शुम्भं नयामि प्रापयामि । वर्त्तमानसामीप्ये भविष्यति लट् । उपैष्यतीति भवच्छब्दप्रयोगे प्रथमपुरुष एव । एत्येधत्यूठ्सु वृद्धिः । इति शुम्भानुकूलोऽर्थः । देव्यास्त्वनुकूलस्त्वेषः । अद्यभवती मन्मां सखीजनं आप्तवर्गं प्राप्य । कर्मणि ल्यब्लोपे पंचमी । अबलाद्बलात्कारेण तत एव प्रीत्या हर्षेण भर्त्तारं शिवं न न उपैष्याति चेत् उपगमिष्यति चेत् । द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः । तत एषोऽहं सखीजनः तां केशाकर्षणविह्वलां यामि प्राप्नोमि जानामि । कः ब्रह्मा अः विष्णुः तौ कौ ब्रह्मविष्णू तयोरीशः स्वामी शिवः केशः तस्याकर्षणमाह्वानं तस्मिन् विषये विह्वलां लज्जितत्वात् । यद्वा उपा एष्यतीति च्छेदः । नचेत्प्रीत्येत्येकपदम् । " उः संबुद्धौ रुषोक्तौ च शिववाचि त्वनव्ययम् । " धूम्रलोचन आह । उ हे देवि, अद्य भवती

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यसि ॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ७ ॥

मद्भर्त्तारं शुम्भमेष्यति प्राप्स्यति । किंभूता सती । "पा रक्षणे" । पांति रक्षंति निबारयंति पाः । कर्त्तरि क्विपि जसि रूपम् । " अज गतिक्षेपणयोः " । पो रक्षकान् शुम्भपरिवारानजति क्षिपति दूरीकरोति पा देवी । " सप्तम्यां जनेर्डः । अन्येष्वपि दृश्यते " इत्यत्रापिशब्दः सर्वोपाधिव्यभिचारार्थ इति वचनाद्धात्वंतरादपि कारकांतरेऽपि च डो भवति । " डित्यभस्यापि " इति अजशब्दस्य टेर्लोपः । स्त्रियामजाद्यतष्टाप् । हल्ङ्याद्लिोपे सति पा इति रूपम् । पा शुंभरक्षकक्षेपिका देवी शुंभं हंतुमेष्यतीत्यर्थः । पुनः किंभूता न चेत्प्रीत्या आकारांतमेतत् । " चिती संज्ञाने " चेतंति केचन तानन्ये प्रयुंजते इति " हेतुमति च " इति णिच् ततः क्विप् । " णेरनिटि । वेरपृक्तस्य " लोपः प्रत्ययलक्षणेन गुणः । चेतो देवर्ष्यादयः तेषु चेत्सु बोधयितृषु प्रीतिः स्नेहश्चेत्प्रीतिः । न इति नञोऽन्य एव निषेधार्थो निपातः । न विद्यमाना चेत्प्रीतिर्येषां दैत्यानां ते नचेत्प्रीतयः । " नलोपो नञः " इति चास्ति नतु नशब्दस्याप्यननुबंधकस्य । " उज्झ उत्सर्गे " । नचेत्प्रीतीन् अविद्यमानविबुधप्रीतीन् दैत्यान् उज्झति उत्सृजति हिनस्तीति पूर्ववड्डप्रत्यये डित्यभस्यापि टेर्लोपः स च उज्झेरेव स्त्रियां डांतादाप् । " इको यणचि " ।

१४ दु. शां.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हल्ङ्याादिलोपः । नचेत्प्रीत्या देवी दैत्यानुपैष्यति ततोऽयाहं धूम्रलोचनः योद्धुमनाः सन् भवति बलाद्बलं सैन्यं प्राप्य कर्मणि ल्यब्लोपे पंचमी । न यामि न गच्छामि मद्भर्तारं च न गच्छामीत्यर्थः । किंभूतां भवतीम् । एषकेशाकर्षणविह्वलामित्येकं पदम् । "ईष गतिहिंसादर्शनेषु" भ्वादिरात्मनेपदी आङ्पूर्वः । आसमंतादीषंति हिंसंति एषः । पचाद्यच् । एषाणां हिंसकानां दैत्यानां केशाः मूर्द्धजाः तेषामाकर्षणं तस्मिन् विषये विशेषेण ह्वला । "ह्वल चलने" पचाद्यच् । एषकेशाकर्षणविह्वलां दैत्यकेशग्रहणसज्जामित्ययं देवीशब्दार्थः ॥ ७ ॥ हे धूम्रलोचन, त्वं बलवान् सामर्थ्ययुक्तः बलेन सैन्येन संवृतः वेष्टितः । अथ च दैत्येश्वरशुम्भेन प्रहितः प्रस्थापितः बलात्केशाकर्षणादेः मामबलां नयसि ततोऽहं ते तव किं करोमि स्त्रीत्वाद्युद्धादिकं कर्त्तुमक्षमास्मीति शुम्भानुकूलोऽर्थः । देव्यनुमतस्त्वेषः । हे धूम्रलोचन, त्वं शुम्भेन प्रस्थापितोऽसि एवं च सति त्वामहं पृच्छामि । बलमत्तीति बलात् अहं मां देवीं ते धूम्रलोचनस्य संबंधि वस्तु किं नयसि किं प्रापयसि । नयेर्द्विकर्मत्वात्

देव्युवाच ॥ दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः ॥ बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥ ८ ॥

ऋषिरुवाच ॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥ हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥ ९ ॥

"अजां ग्रामं नयति" इतिवत्प्रधानमप्रधानं चेति कर्मद्वयं वक्तव्यम् । तत्र बलादं मां देवीं प्रधानं कर्म द्वितीयं किं स्यात्तद्वद । अथेह प्रकृतत्वाद्बलादं मां देवीं शुम्भं चेन्नयसि तर्हि बलादमिति कृत्वा तस्य बलं सामर्थ्यमत्स्यामि । अथ बलादं मां शुम्भसैन्यं प्रति नयसि बलादहं तदेवात्स्यामि संहरिष्यामिं । ततस्ते किं करोमि किमस्ति ते यत्करोम्यहं यत्किंचिदस्ति तदपि विनष्टं करोमीति क्रोधावेशोत्थो देव्यभिप्रायः ॥ ८ ॥ इत्येवं देव्योक्तः स धूम्रलोचनः असुरः तां देवीमभ्यधावत् वेगेनाभ्यद्रवत् । "सृ गतौ" सर्त्तेर्वेगितायां गतौ धावादेशो वक्तव्यः । यद्वा "धावु गतिशुद्ध्योः" उभयपदी । ततोऽनंतरं सांबिका देवी तं धूम्रलोचनं क्रोधानलज्वालागर्भेण हुंकारेणैव भस्मचकार भस्मीचकार । "हुं वितर्के परिप्रश्नेऽभित्सायां भर्त्सने भये ।" भस्मसाच्चकारेति वा पाठः । "विभाषा साति कार्त्स्न्ये" इति अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्त्तरि च्विरित्यस्मिन्विषये कृत्स्नतायां गम्यमानायां सातिप्रत्ययः । अभस्म भस्म चकार कार्त्स्न्येन भस्मसाच्चकार । ॥९३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धूम्रलोचनशरीरं कृत्स्नमपि (भस्म) चकारेत्यर्थः। अंतर्वर्तिविभक्त्याश्रितेन पदत्वेन नलोपत्वेन पादांतयतिच्छांदसत्वेन ॥ ९ ॥ अथ धूम्रलोचने भस्मीकृते तथा क्रुद्धमसुराणां महासैन्यं कर्तृ तीक्ष्णैः सायकैः शरैस्तथा शक्तिसहितैः परश्वधैः परशुभिश्चायुधैः कुठारैरंबिकां ववर्ष शरसंपातेन शक्तिपरशुपातेन च देवीं संछादयामास। शक्तिपरश्वधैरिति मध्यमपदलोपी समासः । द्वंद्वे तु सेनांगत्वादेकवद्भावः स्यात्। इहासुरमहासैन्यं कर्तृ अंबिकामायुधैर्ववर्ष तदा सिंह एव युयुधे नैवांबिकेति कस्यचिदाकांक्षा स्यात् किमंबिका असुरशरसंपाततः न जीवति यद्यप्युत्तरत्र सा समानीयतां लब्धिति तदमृततोपपत्स्यते तथापि सा महासुरशरसंपाततः मूर्च्छिता सती पुनरुत्थाय योद्धुमक्षमाभूत्। अन्यथा युध्यतैव किं नेति वीरकर्मण्यपकर्षः स्यात्। अतः सोऽपि युयुधे तद्यथा। तत्रैव श्लोके अंबिका आम् भवति पदच्छेदः। अंबिका कर्त्री महासैन्यं कर्म। " उ प्रश्नेऽङ्गीकृतौ रोष आं स्मृतौ चावधारणे। " अथ धूम्रलोचनः संग्रामे देव्या भस्मीकृत इति आम् इति मनसा

अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १० ॥
ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ॥ पपातासुरसेनायां सिंहो देव्यास्तु वाहनः ॥ ११ ॥
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रम्य चरणेनान्यान्निजघान महासुरान् ॥ १२ ॥

स्मृत्वा क्रुद्धमसुराणां महासैन्यं कर्म अंबिकापि तथा तद्वदेव क्रुद्धा सती सायकादिभिर्ववर्ष असुरसेनां छादयामास। यद्वा आमित्यवधारणे। अथ तथा क्रुद्धमसुराणां महासैन्यं कर्म अंबिका आम् अंबिकैव ववर्ष नत्वसुरसैन्यमंबिका इति अंबिकाया एव वीरकर्मण्युत्कर्षः ॥ १० ॥ ततः कोपाद्धुतसटः कंपितस्कंधकेसरः स सिंहो देव्या वाहनं वाहनीभूतो देव्याः सिंहः सुभैरवमतिभयंकरं नादं गर्जनं कृत्वाऽसुरसेनायां हंतुं पपात उत्प्लुत्य निपपात। स्ववाहनमिति पाठे अन्यसाधारणं वाहनं देव्या एव सिंहो वाहनं नान्यस्येति। स इति पाठे स प्रसिद्धः सिंहः भीरोरयं त्रासकारी भैरवः त्रिलिंगः। " वाहनमाहितात् " इति निर्देशाद्वाहनशब्दो नपुंसकलिंगः। असुरसेनायां निपत्य सिंहः किमकार्षीदिति तत्राह ॥ ११ ॥ स सिंहः पंचास्यः करप्रहारेण कांश्चिद्दैत्यान् जघान। आस्येन अपरांश्च दैत्यान् मुखेन जघान।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चरणेनाक्रम्य अन्यान् जघान जिहिंस । स सिंहः खलु पंचास्यः एकमास्यं वक्रम् आस्यवद्घातकत्वात्करद्वयं चरणद्वयं चास्यचतुष्टयं पञ्चास्यानि युद्धसाधनानि यस्य स पंचास्यः । आक्रम्य चाधरेणान्यानित्यपि पाठे अधरेण चरणभागेनाक्रम्यान्यान्महासुरान् जघानेत्येवार्थः । अन्यथाऽधरेणोष्ठेन महासुराणामाक्रमणं न संभवति । अथ देवीप्रभावात्सम्भवेत् । तस्याप्यास्येन चापरान् जघानेत्यास्यग्रहणेनैवाधारस्यापि युद्धसाधनत्वेन ग्रहणस्य सिद्धत्वात् पुनरधरेणेति केयं वाचोयुक्तिरुक्तिमताम् । यद्वा अधरेण ओष्ठेन स्फुरितेन प्रकटितः कोपोऽधर इत्युपचर्यते । अधरेण कोपेनाक्रम्य । यद्वा अविद्यमाना धरा भूर्यत्र सोऽधरः आकाशदेशः । अंतरिक्षेणाक्रम्य निरुध्य ॥ १२ ॥ स केसरी सिंहः केषांचिद्दैत्यानां कोष्ठान् जठराभ्यंतरान्देशान् नखैर्नखैरुत्पाटयामास विदारयामास । पटभाषार्थश्चुरादिः । धात्वनेकार्थत्वेन प्रयोगतो विदारणार्थः । "असाकल्ये तु चिच्चन। पुंसि कोष्ठोंऽतर्जठरं कुसूलोंऽतर्गृहं तथा।" कोष्ठानि केसरी तु पाठे व्यत्ययेन छांदसं नपुंसकत्वम् । यद्वा

केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरांसि कृतवान् पृथक् ॥ १३ ॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १४ ॥

कोष्ठान् इ केसरी इति च्छेदः । इः कामः इना कामेन चरति इचारी अनिवारितप्रसरः केसरीत्यर्थः । मध्यमपदलोपी समासः । तथा तलप्रहारेण हस्ततलाघातेन चपेटेन चपेटया चपेटघातेन केषांचिद्दैत्यानां शरीरेभ्यः शिरांसि पृथग्भूतानि चकार । करनखपंजरेण शिरांसि च्छित्त्वा भुवि पातयामासेत्यर्थः । "पाणौ चपेटप्रतलप्रहस्तौ विस्तृतांगुलौ ।" केचिदाहुः । तलाभ्यां प्रतलाभ्यां प्रवर्तितत्वेन प्रहारेण शिरांसि पृथक् कृतवानिति युक्तमेतत् । यदभ्यधुः । "द्वौ संहतौ सिंहतलौ प्रतलौ वामदक्षिणौ ।" द्वौ प्रतलौ प्रसृततलौ संहतौ वामदक्षिणौ मिलितौ सिंहतलौ सिंहतलाख्यौ कथ्येते । सिंहो मिलिताभ्यां चपेटाभ्यां हंति ॥ १३ ॥ तथा शौर्यभाजा तेन सिंहेन अपरे शत्रवः विच्छिन्नबाहुशिरसः कृताः । बाहवश्च शिरांसि च बाहुशिरः प्राण्यंगत्वादेकवद्भावः । विच्छिन्नं बाहुशिरो येषां ते । तथा धुतकेसरः सः केशरी अन्येषां महासु-

---

१ यद्वा अधस्तापदचारतः शरीरस्याधस्तादधोभागेन उरोदेशेनाक्रम्य इत्यधिकमेकस्मिन् पुस्तके ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

राणां कोष्ठादन्तर्जठराज्जठरांतर्देशात्कोष्ठं विदार्य कर्मणि ल्यब्लोपे पञ्चमी । रुधिरं पपौ । "पा पाने" एतेन सिंहस्यापि वीरपानौचिती कथिता । "वीरपानं तु यत्पानं वृत्ते भाविनिवारणे ।" ॥ १४ ॥ तेन केसरिणा देव्या वाहनेन अतिकोपिना अत एव क्षणेनैवैतत्प्रसिद्धं बलं सैन्यम् । यद्वा तस्य धूम्रलोचनस्य बलं सैन्यं क्षयं नाशं नीतं प्रापितम् । " निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः । निलयापचयौ क्षयौ । आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्मवर्ष्म च ।" ॥१५॥ इह श्रवणा कोपना ज्ञापना क्रियात्रयापेक्षैककर्तृकत्वेन श्लोकयुग्मस्यैकोऽन्वयः । देव्या तत्प्रसिद्धं धूम्रलोचनमसुरं निहतं भस्मितं श्रुत्वा ततः देवीकेसरिणा देव्याः सिंहेन तस्य धूम्रलोचनस्य कृत्स्नं बलं सैन्यं क्षपितं नाशितं च श्रुत्वा दैत्याधिपतिः शुंभः कोपतः प्रस्फुरिताऽधरः संरंभकंपितोष्ठः सन् चुकोप चुक्रोध । अथ तौ प्रसिद्धौ प्रागदृष्टदेवीकौ चण्डमुण्डौ महासुरौ कर्मभूतौ आज्ञापयामास निजभृत्यौ नियुयुजे । क्षपितमिति " क्षप प्रेरणे " चुरादिः । अदन्तः । क्षयितमिति पाठे क्षयः संजातोऽस्ये-

क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा देव्या वाहनेनातिकोपिना ॥१५॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ॥ बलं च क्षपितं कृत्स्नं देवीकेसरिणा ततः ॥ १६ ॥ चुकोप दैत्याधिपतिः शुंभः प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥ १७ ॥ हे चंड हे मुंड बलैर्बहुभिः परिवारितौ ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ १८ ॥

ति तारकादित्वादितच् । आज्ञापयामास । " ज्ञा नियोजने " चुरादिः ॥ १६ ॥ १७ ॥ हे चण्ड मुण्ड, युवां बहुभिः बलैः परिवारितौ गच्छतं कुत्र यत्र सा देवी पर्वते गत्वा च गत्वैव क्षिप्रं लघु सा देवी समानीयतां युवाभ्यामिति शेषः । गच्छतमिति गमेर्लोण्मध्यमपुरुषस्य द्विवचनस्य थसस्तम् लोटो लङ्वदतिदेशात् । सेत्यभिहितं कर्म । मामिति द्वितीयं कर्म ज्ञेयमजा ग्रामं नीयतामितिवत् । प्रधानं कर्माभिहितं नाप्रधानम् । इति शुंभानुकूलोऽर्थः । देव्यनुकूलस्त्वेषः । तथाहि । गच्छतं तत्र गत्वा तु सा आसम् आ नीयताम् लघु इति पदच्छेदः । " असु क्षेपणे " भावे घञ् । असनमासः क्षेपोऽधःकारो न्यक्कारः । " आस्तु स्यात् कोपपीडयोः" । ततश्चण्डमुण्डयोरागमनं दृष्ट्वा सखीवर्गो देवीमाचष्ट । हे देवि, त्वमाः कोपेन तत्र गच्छ कुत्र यत्र चण्डमुण्डौ स्तः । मत्वा तु पुनस्तं चण्डं मुण्डं च आह्वयस्व ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे चण्ड हे मुण्ड, योद्धुमागच्छेति । किंच तु पुनस्तया देव्या लघु शीघ्रं सा चण्डमुण्डसम्वन्धिनी सेना आसं क्षेपं विनाशं च नीयतां योज्यतामिति ॥ १८ ॥ हे चण्ड मुण्ड, सैन्यानि युष्माभिः सा देवी केशेषु आकृष्य वद्ध्वा वा रज्जुभिः सा समानीयताम् । केशाकर्षणे वन्धने च वो युष्माकं यदि पक्षांतरे संशयः स्यात्तदा युधि संग्रामेऽशेषायुधैः साधनैस्तद्युक्तैर्वा सर्वैरसुरैर्युष्माभिः सा देवी निहन्यतां विघ्निता निजाधीना कर्त्तव्या । यद्वा विशेषेण निहंतव्या । विघ्ना वश्या कर्त्तव्येति शुम्भानुकूलोऽर्थः । देव्यनुकूलस्त्वेषः । देवी स्ववर्गानादिक्षत् । हे मदीयाः गणाः, युष्माभिः चण्डो मुण्डश्च केशेष्वाकृष्य वद्ध्वा वा विनिहन्यतां यदि वो युष्माकं केशाकर्षणे बन्धने च वा संशयः स्यात् तदा युधि संयुगे अशेषायुधैः सर्वैर्युष्माभिः तैर्दैत्यगणापहारिभिः । इति देव्यभीष्टार्थः । अन्यथा देव्याः पराभिभववचःश्रवणादपकर्षः शक्यते । अथवा केशेष्वा आकृष्य अवा अयदिवः संशयो इति पदच्छेदः । कः ब्रह्मा अः विष्णुः ईशो रुद्रः तेषामिव इषवो बाणा यस्याः सा के-

केशेष्वाकृष्य वद्ध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥ १९ ॥

तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांविकाम् ॥ २० ॥

शेषुः तया देव्या केशेष्वा । आकृष्य वद्ध्वा दैत्यानव रक्ष । कान् अयदिवः अयेन लब्धा द्यौर्यैस्ते अयदिवो देवाः तानयदिवः संभृताः आभरणीकृताः शयवः चक्रमण्डल्याख्याः सर्पाः यया सा संशयुः कालिका देवी तत्संबुद्धौ हे संशयो, तस्या युधो युद्धस्य संवन्धिन्य आशाः तासु प्रयुक्तानि ईषा लांगलदंडा एवायुधानि यैः तैस्तदाशेषायुधाः दैत्याः तैरस्य विग्रहांतरं त्वग्रे वक्ष्ये इति कृतपदविवक्षितविग्रहाः । अत्रान्वयः । सखीभिर्देवी प्रार्थ्यते हे संशयो संभृतशयो हे संभृत, चक्रमण्डल्याख्यसर्पाभरणे कालिके देवि, त्वमयदिवः अयेन लब्धस्वर्गान् देवान् अव रक्ष । " अव रक्षणे " । हे देवि, केशेष्वा तृतीयांतमेतत् । ब्रह्मविष्णुरुद्रसदृशबाणया त्वया पाशेन दैत्यानाकृष्य आच्छित्त्वा लब्ध्वा वा तदाशेषायुधैर्युद्धादिक्प्रयुक्तैरायुधैः सर्वैरसुरैः सह च चण्डः मुण्डश्च दैत्यो विनिहन्यतां हिंस्यताम् ॥ १९ ॥ हे चण्ड मुण्ड, युष्माभिः दुष्टायां दैत्यद्वेषिण्यां तस्यां देव्यां हतायां ताडितायां परासूकृतायां वा तदीये सिंहे भुवि निपातिते व्यसूकृते वा शीघ्रमागम्यतां निज-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थानं प्राप्यताम् । अथ सा जीवंती आनेतुं शक्या चेत्तर्हि तामंबिकां गृहीत्वा बद्ध्वा शीघ्रमागम्यतां तद्दर्शने ममाभिलाषोऽस्तीति भावः । तस्यां हतायामित्यतिकोपप्रज्वलितात्मना पुंसा प्रबलशत्रौ मृधे मर्त्तोपद्रष्टुमिष्यते । अथवा क्रोधव्याकुलचेतसा तस्यां हतायां समागम्यतामितिवदुक्तम् । ततः पुनरपि उक्तम् । बद्ध्वा तु पटुतां जीवंतीमेव शीघ्रं गृहीत्वा युष्माभिरागम्यतामित्युक्तम्। नत्वंबिकाशब्दो मातृवाचीति शुम्भः कथं ब्रूयात्तामेवाभिगंतुकाम उच्यते । शुम्भादन्येषां सा अम्बिकैवेति तस्यां चण्डमुण्डादीनां रमणाभिलाषो न कर्त्तव्यः । इयं हि युष्माकमंबैवेति सूचयितुमंबिकामित्युक्तम् । मातृगमनं हि पशुपक्षीतरेषु स्वत एव गर्हित इति शुम्भानुकूलोऽर्थः । देव्यनुकूलस्त्वेषः । तस्यां हतायां दुष्टायां सिंहे च विनिपा आतिते । शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकामिति पदच्छेदः । हतायां इति हतेर्गत्यर्थे कर्मणि क्तः । विनिपा इति " पै शोषणे " कर्त्तरि क्विप् । विशेषेण नितरां पायति शत्रून् शोषयति विनिपा तया विनिपा देव्या आतिते इति ।

इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥

ऋषिरुवाच ॥ आज्ञप्तास्तु ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥ १ ॥

" अत सातत्यगमने " । अतनमातः भावे घञ् । आतः संजातोऽस्याः आतिता हे आतिते देवि, अम्बिकाशब्देन देवीहननं विवक्षितम् । तर्हि " अबि रबि लबि अवस्रंसने " इत्यतः कर्त्तरि ण्वुलि वोरेकादेशे इत्त्वे च अम्बते शत्रूणां गलेष्विति अम्बिका या रज्जुः विवाहकृता इति विवक्षितविग्रहः । अत्रायं देव्यनुकूलोऽन्वय उच्यते । हे सिंहे च अन्यत्र च आतिते हे जगद्रक्षणाय संजातसततगते हे देवि, तस्यां दुष्टायां देवविद्वेषिण्यां दैत्यसेनायां हतायां गतायामुपस्थितायां सत्यामथानन्तरं विनिपा विशेषेण नितरां पायंत्या शत्रून् शोषयंत्या त्वया देव्या आम्बिकां शत्रुगृहेषु लंबिकां पाशरज्जुं गृहीत्वा तां सेनां बद्ध्वा शीघ्रमागम्यतामिति सखीभिः देवी निगदितेति देवीष्टार्थसिद्धिः ॥ २० ॥ इति श्रीमद्राजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजश्रीशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां धूम्रलोचनवधः षष्ठोऽध्यायः ॥ ६ ॥ ततो धूम्रलोचनवधानंतरं शुम्भेनाज्ञप्ता आदिष्टाश्चंडमुण्डपुरोगमा दैत्याः चतुरंगबलोपेताः हस्त्यश्वरथपादातसमेताः अभ्युद्यतायुधाः सन्न-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्धवंद्धोन्मुखायुधाः संतः ययुः जग्मुः । आज्ञप्ता इति वादांतसूत्रेण निपातितः पुरोगमः पुरोगामी पुरः गच्छतः पुरोगमौ चण्डमुण्डौ पुरोगमौ येषां ते । " हस्त्यश्वरथपादातं सेनांगं स्याच्चतुष्टयम् । " चत्वार्यंगानि यत्र तत् बलं सैन्यं तेन उपेताः ययुरेव न पुनरायाता इति भावः ॥ १ ॥ ततः आगतास्ते चंडादयो दैत्या महत्युच्चे कांचनमये शैले शृंगे हिमाद्रिशिखरे स्थितस्य सिंहस्य उपरि व्यवस्थितां विशेषेणावस्थिताम् ईषदल्पो हासो यस्याः सा तां देवीं ददृशुः । " कचि दीप्तिबंधनयोः " भावे ल्युट् । कंचनस्य पीतदीधितिरूपस्येदमधिकरणत्वेन कांचनं शृंगं तस्मिन्निति व्युत्पाद्यते रूपम् । विविधवर्णसान्निध्याद्वर्णोत्कर्षो देव्या वर्णितः । शत्रूणां तु विरुद्धवर्णदर्शनाद्विवर्णमुखता सूच्यते । देवीमीषद्धासामिति यथा प्राग्धूम्रलोचनः ससैन्यः फलं प्रापत् चंडादिरपि प्राप्स्यति इति देव्याः सोत्प्रासो वर्णितः ॥ २ ॥ तत उद्यता उद्युक्तास्ते चण्डादयस्तां देवीं दृष्ट्वा समादातुमुद्यमं चक्रुः । हंतुं वा तत्समीप आसन् । आकृष्टाः आच्छिताः चापा यैस्ते च असीनां खड्गानां

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने ॥ २ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥ आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ३ ॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ४ ॥ भ्रुकुटी कुटिला तस्या ललाटफलकाद् द्रुतम् ॥ काली करालवदना विनिष्क्रांतासिपाशिनी ॥ ५ ॥

धराः धारकाः असिधराश्चेति द्वंद्वः । " आच्छि आयामे " आच्छिताः ॥ ३ ॥ ततो दैत्यानुपसंहर्त्तुमंबिका देवी तान् आगतानरीन् दैत्यान् प्रति उच्चैरतितरां कोपं चकार तदा कोपेन चास्या वदनं मुखं मष्या इव कृष्णो वर्णो यस्य तन्मषीवर्णमभूत् ॥ ४ ॥ यदंबिकामुखं कोपात्कृष्णवर्णमभूल्ललाटात्काली नाम देवी दैत्यान् विनाशयितुं जातेत्याह । शत्रुषु कुप्यंत्यास्तस्या देव्याः भ्रुकुटीकुटिलात् भ्रुवौ कुटी इव भ्रुकुटी । " इको ह्रस्वो ङ्यो गालवस्य " इति वा औत्तरपादिकं ह्रस्वत्वं वा अत्वं च भ्रुकुट्यादीनां तेन उभयविकल्पे त्रैरूप्यम् । भ्रूकुटी भ्रुकुटी भ्रकुटी वेति । भ्रूकुट्याः भ्रूभंगात् कुटिलं भुग्नं तस्माल्ललाटफलकात् ललाटं फलकमिव विशालत्वेन तस्मात्सकाशात् द्रुतं शीघ्रं करालवदना करालं भयंकरं दंतुरं वदनं यस्याः सा दंष्ट्राकरालवक्त्रा । असिः खड्गपाशश्चायुधमाकर्षणसाधनं तद्वती असिपा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिनी खड्गपाशपाणिः सती काली नाम शक्तिः कापि अपरा देवी विनिष्क्रांता ॥ ५ ॥ कीदृशी काली धरति बिभर्त्ति धरा विविधानि चित्राणि यस्य तत् विचित्रं खट्वाया अंगं तस्य धरा विचित्रखट्वांगधरा । यद्वा । विचित्रं खट्वासुरस्यांगं शरीरं मंबकोऽस्थिपंजरः कंकालाख्योऽत्र गृह्यते तस्य धरा । प्रेतनरखट्वांगधरेति चाहुः । नराणां प्रेतानां शिरसां माला नरमाला स्रक् विभूषणं यस्याः सा । नरमुण्डमालाविभूषणा । मध्यमपदलोपी समासः । द्विधा गता आपो यत्र तद्वीपं तदस्त्यस्य विवासत्वेन द्वीपी व्याघ्रः तस्य चर्म परीधानं वासो यस्याः सा । "अन्येषामपि दृश्यते" इति दीर्घः । शुष्कं मांसं यस्याः सा निर्मांसा अस्थिचर्ममात्रशरीरा । अत एवातितरां भैरवातिभयंकरा । अतिक्रांता भैरवान् भयंकरान् अतिभैरवा वा ॥ ६ ॥ पुनः कीदृशी अतिक्रांतं विस्तारमधित्यको विस्तारो यस्य वा तद्वदनं यस्याः सा अतिविस्तारवदना । " लल ईप्सायाम् " चुरादिराकुस्मीय आत्मनेपदी णिचि भावे ल्युटि लालनं ललनं त्वनित्यण्यन्तत्वपक्षे ज्ञेयम् । जिह्वाया ललनं अवलेढुमिच्छा

विचित्रखट्वांगधरा नरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥ ६ ॥ अतिविस्तारवदना जिह्वाललनभीषणा ॥ नि-
मग्ना रक्तनयना नादापूरितदिङ्मुखा ॥७॥ सा वेगेनाभिपतिता घातयन्ती महासुरान् ॥ सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥८॥

तेन भीषणा भयंकरा । निमग्ने नितरामन्तर्लीने अन्तर्गते आरक्ते नयने यस्याः सा निमग्नारक्तनयना । नादेन सिंहनादेन आसमन्तात्पूरितानि दिशामाशानामपि मुखानि द्वाराण्यन्तरालानि यस्याः सा । स्वांगाच्चोपसर्जनादसंयोगोपधाद्वा ङीष् । दिक्पूर्वपदात् ङीब्वा। वा टाप् तेन ङीषोऽपवादेन ङीपामुक्ते टाबेव । यद्वेह प्रागा-दिदिक्शब्दपूर्वकत्वाभावात् ङीपामुक्ते टाबेव ॥७ ॥ सा काली देवी वेगेनाभिपपात । महासुरान् घातयन्ती घातं कुर्वंती ताडयंती सती तत्र सैन्ये सुरारीणां देवद्विषां बलं सैन्यं कर्म अभक्षयत् । घातयन्तीति घातशब्दात् " तत्करोति" इति णिच् । अन्यथा घ्नतः प्रयुंक्ते घातयन्तीत्युक्ते घ्नंतु मामसुरा इति प्रत्युक्तवतीत्यर्थः स्यात् । यद्वा हन्तिर्गत्यर्थः घ्नतः गच्छतः पालयमानान् पलायध्वमिति प्रयुंजाना घातयंतीत्युच्यते । यद्वा गच्छतः पुरुषान् गच्छतेति प्रयुंजाना गमयन्तीत्युच्यते । यद्वा महासुरान् घातयन्तीत्यर्थः । स्वार्थे शिष्टप्रयोगतो णिच् ।" निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे णिजिष्यते । धात्वर्थानुप्रवेशोऽपि बुद्ध्यारोपाण्णिचं विना ॥ " इति वच-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नात् । “वेगः प्रवाहजवयोः”॥८॥ पुमान् पार्ष्णिस्तयोरधः। तयोः गुल्फयोरधः पश्चाद्भागः पार्ष्णिरिहोपमानात् पार्ष्णिमिव पार्ष्णिं गृह्णंति अवष्टभन्ते पार्ष्णिग्राहाः। “पार्ष्णिग्राहास्तु पृष्ठतः” । गजानां तु पार्ष्णिग्राहाः शिक्षकाः पृष्ठगाः । “अंकुशोऽस्त्री सृणिः स्त्रियाम्” । अंकुशान् गृह्णंतीत्यंकुशग्राहाः। कर्मण्यण् । युध्यन्ते प्रहरंति योधाः पचाद्यच् । घंटा गजानां पार्श्ववर्तिन्यः निद्रालस्यवारिण्योऽलंकारार्थाश्च तत्समन्वितान् वारयंति अरीनिति वारणा गजाः । नंद्यादित्वाल्ल्युः । एकेन हस्तेन समादाय संक्षिप्य गृहीत्वा मुखे चिक्षेप काली देवीति संबंधः । पार्ष्णिग्राहादिनिर्घंटां तैः सहितान् गजान् । चखादेत्यर्थः ॥ ९ ॥ किं कुर्वंती सा काली तथैव गजानिव योधं योद्धारमश्वारोहं जात्यैकवचनम् । तुरगैरश्वैः समं वक्त्रे निक्षिप्य दशनैः दंतैः साधनैरतिभैरवमतिभयंकरं मृत्युं चर्वयन्तीत्युच्यते । “गतिबुद्धिप्रत्यवसानार्थ” इति सूत्रेण अण्यंतावस्थायां यः कर्ता स ण्यंते कर्म भवति रथं सारथिनेत्यत्र जात्यैकवचनम् । रथान् सारथिभिः सह वक्त्रे निक्षिप्य दशनैः साधनैः अतिभैरवं मृत्युं

पार्ष्णिग्राहांकुशग्राहयोधघंटासमन्वितान् ॥ समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९॥ तथैव योधं तुरगै रथं सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवम् ॥१०॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥ पादेनाक्रम्य चैवान्यमसुरसान्यमपोथयत्॥११॥

चर्वयन्ती चर्वंतं चर्वेति प्रयुंजाना भुंक्ष्वेति प्रेरयंतीत्युच्यते । अत्र योधास्तुरगाः रथाः सारथयश्चव्र्याः चर्वको मृत्युः। पात्रं वक्त्रं परिवेषिका काली सैव चर्वयन्ती माता पुत्रमिवेति समाधिः । अत्राश्वारोहाः योद्धारः (?) । चर्वयन्तीति शप्श्यनोर्नित्यं नुम् । चर्वयतीति पाठेऽपि लिङ्विषये काले “ व्यत्ययो बहुलम् ” इति लट् ॥१०॥ हस्त्यश्वरथविध्वंसनानंतरं पदातिरूपसैन्यं विध्वंसयितुमाह । सा काली एकमसुरं ताडयितुं केशेषु जग्राह । अथ अपरं च दानवं ग्रीवायां शिरोधौ जग्राह । सा काली अन्यं दानवं पादेनैवाक्रम्य अपोथयत् हिंसितवती । यद्यपि युध्यत्युधाति हिंसार्थे भासार्थे पोथयेदित्यभिधानात् चुरादौ “ पुथ भासार्थे ” इति दृश्यते तथापि धात्वनेकार्थत्वेन पुथ हिंसार्थ इत्यपि ज्ञेयः । अथवा अपोटयदिति पाठः । “ पुट संचूर्णने ” चुरादिः । असूदयदिति पाठे “ षूद हिंसायाम् ” चुरादिः । अन्यं दानवमसुरसाक्रम्यापोथयत् ॥ ११ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सा काली देवी तैः चण्डमुण्डादिभिरसुरैर्मुक्तानि प्रयुक्तानि शस्त्राणि खड्गादीनि हस्तस्थानि तथा महांत्यस्त्राणि आग्नेयवायव्यादीनि क्षेप्याणि मुखेन जग्राह। अपि च तानि शस्त्राणि महाशस्त्राणि च मुखेन गृहीत्वा दशनैः साधनैः तया काल्या देव्या मथितान्यपि। "मथ विलोडने"। विलोडितानि चूर्णानि शस्त्रमस्त्रमायुधंति आयुधत्वेन एकत्वेऽपि तत्तज्जगत्याकारप्रयोगभेदेन भेदोऽस्त्येव तयोरित्याहुः। देवीशक्तिर्विचित्रा तेन घटत एवायमर्थः॥ १२॥ सा काली देवी दुरात्मनां दुष्टाशयानां बलिनां चण्डादीनां तत्प्रसिद्धं बलं सैन्यं ममर्द। "मृदस्तितिक्षायाम्" क्र्यादिः लिट्। चुक्षोद चूर्णीचकार। अन्यान् दैत्यानभक्षयच्च। तथा अन्यान् दैत्यानताडयत्। "तड आघाते" चुरादिः॥ १३॥ तया काल्या देव्या केचिदसुराः असिना मण्डलाग्रेण निहताः ताडिताः संतः विनाशं जग्मुः। तथा केचिदसुराः दंताग्राभिहताः विनाशं जग्मुः। खट्वाया अंगमंघ्रिः तेन ताडिताः खट्वांङ्ग पितृभूमिस्था श्मशानसिद्धिलब्धिदा

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि॥ १२॥ बलिनां तद्बलं सर्वमसुराणां महात्मनाम्॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा॥ १३॥ असिना निहताः केचित्केचित्खट्वांगताडिताः॥ जग्मुर्विनाशमसुरा दंताग्राभिहता रणे॥ १४॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम्॥ दृष्ट्वा चंडोऽभिदुद्राव तां कालीमतिभीषणाम्॥ १५॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः॥ १६॥

देवता तद्दत्तमंगमायुधमप्रतिहतशक्तिकम्। अन्ये त्वाहुः। खट्वासुरशरीरपंजरः खट्वाख्यमंगमिति। अन्ये तु प्रेतनरशरीरकीकसपंजरः कंकालः खट्वांगमित्याहुः। दंतानामग्राः भागाः तेषु वा भागास्तैरभिहताः॥ १४॥ काल्या देव्या क्षणमात्रेण यद्वा क्षणेन रणोत्सवेन। तत्प्रसिद्धं महद्बहुलं चंडादीनां सैन्यं निपातितं दृष्ट्वा प्रचंडविक्रमः चंडो दैत्यः तामतिभीषणामतिभयंकररूपविक्रमां कालीं देवीमभिदुद्राव। आभिमुख्येनोपद्रोतुमाडुढौके। क्षणेन तद्बलं सर्वमसुराणामिति पाठेऽपि स एवार्थः। अतिभीषणमिति पाठे तु क्रियाविशेषणमेतत् द्रु गतौ लिटि। अतिभीषयते अतिभीषणा नंद्यादित्वाल्ल्युः॥ १५॥ चंडस्तामभिद्रुत्य किमकार्षीदित्यत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आह । शराणां वर्षाणि संपातास्तैः महांति बहुलानि भीमानि घोराणि तैः भीमे भयंकरे अक्षिणी यस्याः सा तां " बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच् " समासांतः । महानसुरः मुंडा मस्तकानि क्षिप्तान्यपनीतानि यैस्तानि मुंडाक्षिप्तानि क्षिप्तमुंडानि । " वाहिताग्न्यादिषु " इति परनिपातः । सहस्रेण सहस्रशः । संख्यैकवचनाच्च वीप्सायां शस् । कुर्वंत्यनेनेति चक्रम् । घञर्थे कविधानम् । " कृञादीनां च के द्वे भवतः इति वक्तव्यम् " । अथान्वयः । महासुरः चंडः महाभीमैरतिभयंकरैः शरवर्षैः भीमाक्षीं भयंकरदृष्टिं कालीं देवीं छादयामास । " छद संवरणे " चुरादिः । किंच अन्ये त्वाहुः । चण्डः शरवर्षैः छादयामास । मुण्डस्तु क्षिप्तैरस्तैः चक्रैरायुधैः छादयामासेति । तत्तु उत्तरे अथ मुण्डोऽभ्यधावत्तामिति प्राधान्येन पृथङ् मुण्डस्य युद्धारम्भेण चिरोत्स्यते । तस्माच्चण्ड एव शरवर्षैः चक्रैश्च छादयामासेति युक्तं वक्तुं ततश्चात्र सविसर्गो मुण्डशब्दः पाठ्यताम् । किंतु निर्विसर्गः कृतसमासश्च ॥१६॥ तानि चण्डेन दैत्येन प्रयुक्तानि अनेकानि चक्राणि कर्तॄणि तन्मुखं तस्याः काल्याः मुखं कर्म विशमानानि प्रवेशनशीलानि बभुः। " भा दीप्तौ " शुशुभिरे । कानीव अर्कबिंबानीव। यथा सुबहूनि अर्कस्य बिंबानि मण्डलानि घनस्य

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरम् ॥ १७ ॥
ततो जहासातिरुषा भीमं भैरवनादिनी ॥ काली करालवक्त्रांतदुर्दर्शदशनोज्ज्वला ॥ १८ ॥

मेघस्य उदरमभ्यन्तरं प्रविशमानानि भांति तथा चक्राणीति । " नेर्विशः " इत्यात्मनेपदविधौ नेरुपसर्गस्याश्रयणादिह शानच् । कस्तर्हि ताच्छील्यवयोवचनशक्तिषु चानश्प्रत्ययो नादेशो लटः " न लोकाव्यय " इत्यादौ षष्ठीप्रतिषेधविधौ तृन्निति लटः शतृ इति तृशब्दमारभ्य तृनो नकारेण प्रत्याहृत्याश्रयणाच्चानश्योगे षष्ठीं बाधित्वा द्वितीया । " व्यत्ययो बहुलम् " इत्यात्मनेपदे तु लटः शानचि लादेशयोगे षष्ठीप्रतिषेधाद्द्वितीया । " विश प्रवेशने " सकर्मकः । उपदा विविशुस्तस्य नोत्सेकः कोशलेश्वरमितिवत् । उत्पातादौ बहून्यर्कबिंबानि संभवेयुः । अभूतं चौपम्यं द्रष्टव्यम् । " अर्कः स्फटिकसूर्ययोः । चक्रं राष्ट्रे रथांगे च सैन्ये शस्त्रे च कीर्तितम् । घनो मेघे मूर्तिगुणे त्रिषु मूर्तिनिरंतरे ॥ " ॥ १७ ॥ ततो रणोत्सवोल्लासतः काली देवी अतिरुषा क्रुधा भीमं भयंकरं यथा स्यात्तथा जहास हसितवती । कीदृशी भैरवं भयंकरं नदति भैरवनादिनी । यद्वा भैरवः कालाग्निरुद्रस्तद्वन्नदति गर्जति इति भैरवनादिनी । भैरवं नादयति नादोपेतं करोति दानवपशुबलिभोगोत्स- ॥५८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वतः कृतशृंगनादं कृतवती वा । पुनः कीदृशी करालं वक्त्रं तस्य अंतः मध्ये दुर्दर्शैः दुःखेन दृश्यमाना ये दशनाः दंताः दंष्ट्रास्तैरुज्ज्वला । हासः शुभ्रः तेन काली कृष्णापि सती उज्ज्वलेति वर्णोत्कर्षोक्तिः ॥ १८ ॥ सा काली विजिगीषुः सती महासिं महाखड्गमुत्थाय उत्थाप्य सज्जीकृत्य अंतर्भावितण्यर्थोऽस्तिष्ठतिः । यद्वा उत्थाय उद्यम्य ऊर्ध्वीकृत्य उत्पूर्वस्तिष्ठतिः क्वचित्प्रयोगवशतो गतिवचनः सकर्मकः । यद्वा उत्ताय्येति पाठः । " तय गतौ " णिच् । महासिं उत्तयमानं प्रयुज्य चण्डमधावत । ततः किं गृहीत्वेत्यादिः । अस्य चण्डस्य केशेषु गृहीत्वा आकृष्य तेन प्रसिद्धेनासिना शिरो मस्तकमच्छिनत् । उत्थाय च महासिंहमिति पाठे महांतं सिंहमुत्थायारुह्य देवी चण्डमधावतेति संबंधः । अथवा महासिं हं देवीति च्छेदः । " रुषोक्तौ तु हमव्ययम् " । देवी महासिं हम् उत्थाय्य उत्तोल्य हमिति रुषा चण्डमधावत अत एव तेनासिना अच्छिनदित्यन्वयः । उत्थाय च महासिंहादित्येवोक्तुः । उत्थाय अवरुह्य । उत्थाय्य च महासिंहमिति पाठे " सुपि स्थः

उत्थाय च महासिं हं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ १९ ॥
छिन्ने शिरसि दैत्येंद्रश्चक्रे नादं सुभैरवम् ॥ तेन नादेन महता त्रासितं भुवनत्रयम् ॥ २० ॥
अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितम् ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥

कः " । उच्चैस्तिष्ठति उत्था । " अय गतौ " । आङ्पूर्वः क्त्वो ल्यप् । आसमंतादयित्वा आय्य । देवी उत्था उत्थिता सती महासिंहं च आय्य आगत्य प्राप्येत्यन्वयः । अत्रैव पाठेऽर्थांतरम् । महासिंहं च आय्य प्राप्येति । उत्तरार्धान्वयः पूर्ववत् ॥ १९ ॥ दैत्येंद्रः चण्डस्तदैव शिरसि देव्या च्छिन्ने सति शिरश्छेदसमय एव पशुवत्सुभैरवं सुष्ठु भयंकरं नादं मुखेन ध्वनिं चक्रे । तेन महता नादेन शब्देन भुवनत्रयं त्रासितम् । " त्रसु उद्वेगे " णिचि कर्मणि क्तः उद्वेगं प्रापितम् । यद्वा त्रासः संजातोऽस्य तारकादिभ्य इतच् । किमसौ चंडः छिन्नशिरा अपि मायावित्वात्पुनरुत्थितो योद्धुं कथमन्यथायं नादोऽस्येति संजातत्रासमभूद्भुवनत्रयम् ॥ २० ॥ अथ चण्डः महासुरः काल्या देव्या निपातितं भ्रंशितं चण्डं दृष्ट्वा तां कालीमभ्यधावत् । अथ काली देवी रुषा तं मुण्डमपि खट्वांगेनाभिहतं ताडितं परासुं भूमावपात-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत् । “ मुण्डके त्रिषु मांडिते । दानवे पुंसि मुण्डः स्यान्मस्तके तु द्वयोरदः । मुण्डितं त्रिषु लिंगेषु मुंडो मुण्डत्वयोगिनि । ” ॥ २१ ॥ देव्या हतेभ्यः शेषमवशिष्टं सैन्यं कर्तृ सुमहावीर्यं सुमहद्वीर्यं प्रभावो यस्य सः तं चण्डं मुण्डं च देव्या निपातितं दृष्ट्वा भयातुरं सत् ततः युद्धभूमितः सकाशादपगत्य दिशो भेजे अपलायत भयेनातुरं विह्वलम् ॥ २२ ॥ सा काली देवी चण्डस्यासुरस्य शिरः तथा मुण्डस्यासुरस्येदं मौंडं शिरश्चेति मस्तकद्वयं गृहीत्वा । प्रचण्डः प्रगल्भः अट्टः अत्यधिकः हासस्तेन मिश्रं मिलितं प्रचण्डाट्टहासगर्भं यथा स्यात्तथा अभ्येत्यैव अंतिकमागत्यैव चंडिकामंबिकामासाद्य शक्तिं प्राह । प्राहेत्यव्ययं कालसामान्यद्योति यथा स्त्रियः किमप्यद्भुतं कार्यं विधाय स्वनायिकायै सह समाभाषंते खलु लोके तथेयमवोचत् । यद्वा यौ त्वां परदेवतां भुवनेश्वरीं प्रागालोक्य गत्वा शुम्भाय गृहाणेत्यक-

हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितम् ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२॥ शिरश्चंडस्य काली च गृहीत्वा मौण्ड-
मेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकाम् ॥२३॥ मया तवात्रोपहृतौ चण्डमुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च
हनिष्यसि ॥२४॥ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका वचः ॥२५॥
यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो लोके ख्याता देवी भविष्यसि ॥ २६ ॥

थयतां ताविमौ चण्डमुण्डौ पुनर्द्रष्टुमागतौ ताववलोकय लोकमातरीरिति सोत्प्रासो हासो युक्त एवेत्यलं विस्तरेण ॥२३॥ काली किमब्रवीच्चंडिकामित्याह । काल्युवाच । हे देवि, तव महापशू द्वौ चण्डमुण्डौ अत्र युद्धयज्ञे युद्धं यज्ञ इव तस्मिन्विषये मया काल्या उपाहृतौ समर्पितौ उपहारीकृतौ स्तः । अतश्च युद्धं यज्ञो यस्याः सा हे युद्धयज्ञे देवकार्यकारिणि, त्वं स्वयमेव शुम्भं निशुंभं च द्वौ महापशू देवगणप्रीत्यै हनिष्यसि । यद्वा युद्धयज्ञे विषये तथा देवगणप्रीत्यै यज्ञे महापशुर्नरः। तथा मया ऋत्विजेव चण्डमुण्डौ नाम महापशू द्वौ हतौ। अतः परं शुम्भं निशुंभं च महापशू त्वमेव हंतुमर्हसीति भावः॥२४॥ततोऽनंतरं कल्याणी कल्यां वाचं शुभामणंती कथयंती चंडिका भगवती तौ महासुरौ चण्डमुण्डौ काल्या आनीतौ दृष्ट्वा कालीं देवीं ललितमीप्सितं मनोहरं वचः उवाच उचितमुक्तवती ॥ २५ ॥ हे कालि, त्वं यस्मात्कार-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णाच्चण्डं मुण्डं च गृहीत्वा मामुपागतासि ततो लोके भुवने चामुंडेति ख्याता देवी भविष्यसि । " हस्ताभ्यां चण्डमुण्डौ (तु) किलागृह्णादसौ यतः । मत्वर्थकेऽच्य-तश्चण्डमुण्डा देव्यैव कथ्यते ॥ ततः पृषोदरादित्वात् शिष्टशब्दप्रयोगतः । चण्डशब्दस्य चात्वेन चामुण्डेति प्रसिध्यति ॥" अतश्चाहुः । पृषोदरादित्वाच्चण्डमुण्डस्थाने चामुंडा साध्येति । यत् यस्य करेऽस्ति तत्तस्यास्तीति तद्वान् स भवति दंडीतिवत् । यं करेण यागृह्णात्सा चण्डमुण्डवती कालीति मत्वर्थे अर्शआदित्वादचि स्त्रियां टापि चण्डशब्दस्य पृषोदरादित्वाचा इत्यादेशे चण्डमुण्डैव चामुंडेति चंडिकाभिप्रायः । यद्यपि शिरसी एव काल्या गृहीत्वा आनीते नतु चंडमुंडौ । तथापि क्वापि ग्रामैकदेशे दग्धे ग्रामो दग्धः " इतिवच्चंडमुण्डैकदेशयोः शिरसोश्चंडमुण्डौ समुदायौ तयोः प्रयुक्तौ शिष्टप्रयोगतः । कश्चित्त्वाख्यत् । " चस्तस्करः समाख्या तश्चंद्रमाश्चः समीरितः । " इत्यभिधानतः चान् तस्करान् मुण्डयति खण्डयति चमुण्डा । चमुंडैव चामुण्डेति "अन्येषामपि दृश्यते" इति पूरुषवद्दीर्घत्वमिति । तन्न । यस्माच्चंडं

इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये चंडमुंडवधो नाम सप्तमोऽध्यायः ॥ ७ ॥ ऋषिरुवाच ॥ चंडे च निहते दैत्ये मुण्डे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥१॥ ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ २ ॥

च मुंडं चेति चंडिकाभिप्रायतश्चामुंडेति प्रकृतार्थहानादप्रकृतार्थाभ्यनुज्ञानात्परमर्षिप्रणीतरूढशब्दार्थविग्रहव्याकोपप्रसंगाच्च ॥ २६ ॥ इति मार्कंडेयपुराणे श्रीराजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां चंडमुंडवधः सप्तमोऽध्यायः ॥ ७ ॥ अस्य श्लोकयुग्मस्यैकक्रियाकत्वादेककर्तृकत्वादे-कान्वयता च । तया काल्या देव्या चंडे निहते सति तथा मुंडे च विनिपातिते सति तथैव च सैन्येषु बहुष्वसंख्यातेषु क्षयितेषु सत्सु ततोऽनंतरं कोपपराधीनचेताः क्रोधपरवशचित्तः प्रतापवान् व्युग्रोग्रतेजस्कश्च भूत्वा असुरेश्वरः शुम्भः दैत्यानां सर्वसैन्यानामुद्योगं देवीं चण्डिकां प्रति प्रयाणोत्सुकतामादिदेश । देवीं प्रति सेनाभि-रभियात यूयमभिषेण्यतेत्यादिक्षत् । देवीं प्रत्यभिषेणयितुमुद्योगं कुरुतेत्याज्ञापयामास दैत्यसैन्यानीति भावः । उद्योगं सर्वसैन्यानामित्येव सिद्धे दैत्यानामिति प्राधा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्यख्यापनार्थम् । यद्वा सर्वाणि सैन्यानि येषां ते सर्वसैन्याः रक्तबीजप्रभृतयस्तेषामुद्योगमादिदेश । क्षयो नाशः संजातो येषां तानि क्षयितानि । यद्वा क्षपितेषु । " क्षप प्रेरणे " चुरादिः । प्रेरितेषु द्रावितेषु प्राणेभ्यो दूरीकृतेषु नाशितेष्विति यावत् । कोपे पराधीनमधीनं चेतो यस्य सः । यद्वा कोपे परमतिशयितमधीनं चेतो यस्य सः । असुराणामीश्वरः । यद्वा असून् प्राणान् राति गृह्णाति असुरः मृत्युः ईश्वरो यस्य स आसन्नमृत्युरित्यर्थः ॥ १ ॥ २ ॥ शुम्भ आदिशति । अद्यास्मिन्नहनि इदानीं वा ममाज्ञया षडशीति दैत्याः प्रधानभूताः उदायुधाः उद्यतशस्त्राः संतः सर्वैः बलैः सैन्यैः चतुरंगैः वृताः वेष्टिताः संतः निर्यांतु देव्या समं योद्धुम् । षड्भिरधिकाशीतिः षडशीतिः शाकपार्थिवादित्वात्समासः । " विंशत्याद्याः सदैकस्मिन् संख्याः संख्येयसंख्ययोः । " किं कंबूनां कंबुनाम्नां दैत्यानां चतुराशीतिः वृंदभेदाः स्वबलैर्वृताः निर्यांतु । चतुर्भिरधिकाशीतिः चतुराशीतिः पूर्ववदेकवचनम् । यदि चतुराशीति निर्विसर्गः पाठः तदा चतस्रः आशीतयः कंबूनां वक्तव्याः समा-

अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुराशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ३॥
कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धूम्राणां निर्गच्छन्तु ममाज्ञया ॥ ४ ॥

हृता इति विगृह्य समाहारद्वंद्वः। कंबूनां चतुराशीति कर्तृ । स्वबलैर्वृतं सत् । निर्यातु इति एकवचनांतत्वेन योज्यम् । एकत्वोक्तितः यथा वृक्षः फलति लता च फलति इत्येकवचनसंगतिः। चतुराशीति पाठे । " आन्महत " इत्यत्र सूत्रे आदिति योगविभागः शिष्टप्रयोगतः । "प्रागेकादशभ्यो छन्दसि" इति सूत्रकारव्यवहारालिंगात् " योगविभागादिष्टसिद्धिः " इत्यात्वं तच्च रेफात्परत एव । पृषोदरादित्वाद्वा । अन्येषामपि दृश्यत इति च अशीतिशब्दादीकारस्य दीर्घत्वं द्रष्टव्यम् । नैतत्सर्वत्र कर्त्तव्यमिति । चतस्रः आशीतय इत्यत्र " दशांतैकादिका संख्या संख्येयेष्वेव च त्रिषु । " कंबुः शंखः चतुरशीतिशंखपरिमिताः सेनास्ताभिः सहिताः दैत्याः॥३॥ ॥६०॥
वै प्रसिद्धानि कोटिवीर्यनामधेयानि कोटिगुणितवीर्याणि असुराणां पंचाशत्कुलानि वृंदानि निर्गच्छंतु ममाज्ञया देव्या समं योद्धुम् । कोटिसंख्यानि पञ्चाशदिति तु पाठे असुराणां कुलानि निर्गच्छंतु । कति पञ्चाशत् । पुनश्च कति तानि कोटिरिति संख्या येषां पञ्चाशतः कुलानां तानि कोटिसंख्यानि । एवं चैकत्र पंचाशत्को-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

टिसंख्यान्यसुराणां कुलानि । धूम्राणां धूम्रनाम्नामसुराणां शतं कुलानि । धौम्राणामिति पाठे । धूम्रस्यापत्यानि पुमांसः धौम्राः शिवादित्वादण् । अत इञोपवादः ॥४॥ कालकाः कालकनामानोऽसुराः कालं यमरूपमात्मानं शत्रुभ्यः कायति कथयति कालकः । कालकस्यापत्यानि कालकाः शिवादित्वादण् । यद्वा कलं मंद्रं कायति कलकस्तस्येमे कालकाः कलककुलोत्पन्नाः दैत्या अद्य ममाज्ञया त्वरिताः " ञित्वरा संभ्रमे " संभ्रमसहिताः सत्वराः संतः देव्या समं युद्धाय योद्धुं सज्जाः सायुधाः संतः निर्यांतु । तथा तद्वद्दौर्हृदा असुराः दुष्टं हृदयं यस्य स दुर्हृद्दैत्यः । " सुहृद्दुर्हृदौ मित्रामित्रयोः " इति निपातः। तस्यापत्यानि दौर्हृदाख्या दैत्याः । तथा मौर्याख्याः । मुरस्यापत्यानि गोत्राणि गर्गादित्वाद्यञ् । " यञञोश्च " इति लुक् कुतोऽत्र न । छांदसत्वाच्छंदोवत्पुराणानि भवंति । यद्वा मुरस्य भावः मौर्यं तद्वंतः मौर्याः अर्शआदित्वादच् । यद्वा मुरस्य भावः मौरी । ष्यञ् षित्वात् ङीष् । मौरीमर्हंति मौर्याः दंडादिभ्यो यः तेऽपि निर्यांतु । तथा कालकाया अपत्यानि कालकेयनामा-

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ॥५॥ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥६॥ आयातं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम्॥ ज्यास्वनैः पूरयामास धरणीगगनांतरम् ॥७॥

नोऽसुराः । " स्त्रीभ्यो ढक् " । कालकवंशजाताः । " शुभ्रादिभ्यश्च " इति ढक् ॥५॥ इत्येवमसुरानाज्ञाप्यादिश्य भैरवशासनः भैरवं भयंकरं शासनं यस्य सः । यद्वा भैरवान्मृत्योः शासनं यस्य स आसन्नमरणत्वात् । असुरपतिः शुम्भः बहुभिर्दानवैः वृतः सन् निर्जगाम देव्या समं योद्धुम् । किंभूतैः बहुभिः महासैन्यसहस्रैः महांति सैन्यसहस्राणि येषु तैः ॥ ६ ॥ आयांतं शुम्भम् । यद्वा " सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते । " सैन्यः पुंसि सेनायां समवेतः सेनायां वेति ण्यः । यद्वा आयांतं शुम्भम् । अतिस्थाने अपिशब्दश्चार्थे । तथायमन्वयः । अतिभीषणमतिभयंकरं तत्सैन्यं यस्य शुंभस्य स तत्सैन्यः । यद्वा ते सैन्याः सेनायां समवेताः संमिलिता हस्त्यश्वरथपादातादिसमूहा यस्य स तत्सैन्यः । तमायांतं शुम्भं दृष्ट्वा चांडिका देवी ज्यास्वनैः धनुष्याकृष्टा मौर्वी ज्या तट्टंकारध्वनिभिः । धरणीगगनांतरं द्यावापृथिव्यंतरालं पूरयामास । अथ द्वितीयोऽन्वयः । अतितरां भीषणो भयंकरः तत्सैन्यः तस्य शुम्भस्य सैन्यः सेनायां समवेतो हस्त्यश्वरथपादातसमूहः तमायांतं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दृष्ट्वा । अथ तृतीयोऽन्वयः। अतिभीषणं शुंभमायांतं दृष्ट्वा अतिभीषणं तत्सैन्यं तस्य शुम्भस्य सैन्यमपि सेनामायात् । आगच्छ दृष्ट्वा आयांतं शुम्भमायात् आगच्छ-
त्तत्सैन्यं शुंभसैन्यं नपुंसकलिंगम् । "पूरी आप्यायने" व्यापयामास । आयांतमिति शत्रन्तम् । आयातमिति पाठे कर्त्तरि क्तः । तं शुम्भं तत्सैन्यं च ॥७॥ सुमेधा
ऋषिः सुरथं राजानं संबोधयति । हे नृप, दत्तावधानो भव । ततः धनुर्ज्यास्वनानंतरं स सिंहश्चातीव सुतरां महांतं नादं कृतवान् । अंबिकापि घंटायाः स्वनेन नादेन
तन्नादं सिंहनादमबृंहयत् अवर्धयत् । "बृहि वृद्धौ" हेतौ णिच् लङ् । अडागमः । अंबिका चोपबृंहयदिति पाठे आगमशासनानित्यत्वादडागमाभावः । ततः
सिंह इति वा पाठः ॥८॥ धनुर्ज्यानादेन सिंहनादेन घंटानादेन च आसमंतात्पूरितानि दिशां मुखानि यया सा । एवंविधा काली तैस्त्रिविधैर्भीषणैः निनादैः विस्ता-
रितानना विवृतास्या स्फारितमुखा सती जिग्ये । "जि जये, जि अभिभवे । व्यत्ययो बहुलम्" इति कर्त्तर्यात्मनेपदं लोकोत्कर्षेण ववृते । यद्वा शत्रूनभिबभूव । यद्वा

ततः सिंहो महानादमतीव कृतवान्नृप ॥ घण्टास्वनेन तं नादमंबिका चोपबृंहयत् ॥८॥ धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥ निना-
दैर्भीषणैः काली जिग्ये विस्तारितानना ॥९॥ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥ देवीसिंहस्तथा काली शरौघैः परिवारिताः ॥१०॥

जिग्ये इति कर्माणि प्रयोगः । तथाहि । एवंभूता या काली देवी तया भीषणैर्नादैः शत्रुवर्गो जिग्ये अभिबभूवे । जज्ञे इति पाठे । "जनी प्रादुर्भावे" आत्मनेपदी ।
काली भीषणैर्निनादैर्विस्तारितानना जज्ञे । दैत्यानत्स्यामीति विवृतीकृतकरालवदना जाता । अथवा जज्ञे इति "ज्ञा अवबोधने" कर्मणि लिडात्मनेपदम् । भीषणै-
र्निनादैर्या विस्तारितानना दैत्यसैन्यानि सर्वाणि अमूनि प्रत्यवस्यतीति विकृतिकृतकरालवक्त्रा दृश्यते सा कालीति दैत्यैः जज्ञे अज्ञायि सा । सखीसमूहे वर्त्तमाना का
वा काली सखीति तत्साद्दृश्यतः संशयानैरथ तैर्भीषणैर्निनादैर्विशेषचिह्नैर्विस्तारितानना सर्वसैन्यग्रासाय विवृतास्या कालीति दैत्यैरज्ञायीति भावः ॥ ९ ॥ चतुर्दिशमि- ॥६१॥
त्येतत्पदं शकारांतम् । विनादविशेषणं चैतत् । अथ चेत्परिवारणक्रियाविशेषणं स्यात्तदा दिशाशब्देन टाबंतेन साधनीयम् । चतस्रः दिशो अधिकरणभूता यस्य
तन्निनादस्य स चतुर्दिशं चतुर्दिक्षु व्याप्तं तासां धनुर्ज्यासिंहघंटानां विनादमुपश्रुत्याकर्ण्य कुपितैः दैत्यसैन्यैः देवी आद्या शक्तिर्भगवती सिंहश्च वाहनीभूतः । काली

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च देवी ललाटोद्भवा । तथा च एताः तिस्रोऽपि शरौघैः शरव्रातैश्चतुर्दिशं यथा स्यात्तथा परिवारिताः परिवेष्टिताः कारिता विद्धा इति यावत् । " इकन्तादपि टापं च यथा वाचा निशा दिशा । " इति दिशाशब्दष्टाबंतोऽप्यस्ति । चतस्रो दिशा अधिकरणभूता यस्मिन् शरौघपरिवारणे कर्मणि तच्चतुर्दिशं क्रियाविशेषणानां कर्मत्वं नपुंसकैकत्वं च वक्तव्यम् ॥ १० ॥ युग्मम् । हे भूप, दत्तावधानो देवीमहिमानमाकर्णय । एतस्मिन् देवीदानवसंग्रामे प्रस्तुते सति अंतरे अवकाशे समये मध्ये वा सुरद्विषां विनाशाय अमरसैन्यानाममरसिंहानां देवश्रेष्ठानां वा भवाय भूत्यै अभिवृद्ध्यै स्थितये च अतिवीर्यबलान्विताः शक्तयः सामर्थ्यलक्षणाः । देवताश्च ब्रह्मेशगुहविष्णूनां तथा इंद्रस्य चापि पञ्चानां तेषां शरीरेभ्यो विनिष्क्रम्य निर्गत्य तद्रूपैर्ब्रह्मादिरूपैस्तदाकारैस्तादृशरूपैश्चंडिकां ययुः प्रविष्टवत्यः । ब्रह्मा च ईशश्च रुद्रः गुहश्च कुमारः विष्णुश्च नारायणः । ब्रह्मणः शरीराद्ब्रह्माणी निर्गता । रुद्रस्य शरीरान्माहेश्वरी । कुमारशरीरात् कौमारी । विष्णुशरीराद्वैष्णवी । इंद्रशरीरादैंद्री एताः

एतस्मिन्नंतरे भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवीर्यबलान्विताः ॥ ११ ॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १२ ॥ यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १३ ॥

देवीं प्रापुरित्यर्थः । " भवः कल्याणसंसारसत्तावाप्तीशजन्मसु । " अमरसिंहानामिति पाठे । अमराः सिंहा इव श्रेष्ठास्तेषाम् । " उपमितं व्याघ्रादिभिः सामान्याप्रयोगे " समस्यते । अभ्यधुश्च " स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ " बृंहति वर्द्धते ब्रह्मा । ईष्टे ईशः । गूहते सेनां संवृणोति गुहः । वेवेष्टि व्याप्नोति विशति वा विश्वं विष्णुः । इंदति परमैश्वर्येण राजते इंद्रः । शक्नोति शक्तिः क्तिच् । शक्यते कर्त्तुमनया वा शक्तिः क्तिन् ॥ ११ ॥ ॥ १२ ॥ तद्रूपैरिति यदुक्तं तदेव व्यक्तीकरोति । देवीदानवयुद्धं द्रष्टुमागतानां तेषां ब्रह्मादीनां शरीरेभ्यो विनिष्क्रम्यानुभावान्प्रकाश्य कायव्यूहेन प्रव्यक्ताकृतयो ब्रह्माण्यादयः शक्तयः चंडिकांशभूताः चंडिकां युद्धाय उत्साहयितुं ययुरिति प्रागुक्तं तदनेन स्पष्टयति । यस्य देवस्य ब्रह्मादेर्यद्रूपं य आकारः यथा भूषणवाहनं भूषणवाहनान्यनतिक्रम्य यस्य देवस्य यद्भूषणं यद्वाहनं तद्वदेव तादृशमेव वाहनमारूढवती तच्छक्तिः तस्य देवस्य सा शक्तिर्ब्रह्माण्यादिदेवता तद्वदेवायुधानि बिभ्रती ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सती हि निश्चये असुरान् योद्धुमाययौ । देवीसान्निध्यं संग्रामरंगस्थलीं चाजगाम ॥ १३ ॥ हंसः युक्तो योजितो विमानस्तस्मिन् तिष्ठति हंसयुक्तविमानस्था अक्षाणां स्फटिकमणीनां सूत्रं जपमाला अक्षसूत्रं कमंडलुश्च ताभ्यां सह वर्त्तमाना । एवं विशेषेण ब्रह्मणः शक्तिरसुरैः सह योद्धुमायाता सा खलु ब्रह्माणीत्यभिधीयते ।ब्रह्मणः स्त्री ब्रह्माणी अत्रानुगागमाभावाच्छिवागमप्रसिद्धं नामेदं कथ्यते । अत एव निरूढतामपेक्षितनियमासिद्धतामिति नारदर्षिः । यद्वा " वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः । अण शब्दे " । ब्रह्म अणति कथयति ब्रह्माणी । कर्मण्याणि स्त्रियां ङीप् । यद्वा ब्रह्माणमणति मदीयोऽयमिति ब्रह्माणी । "हंसो यतिविशेषे च प्राणश्वे-तच्छदेषु ना । " अत एव हंसैर्यतिविशेषैर्युक्तं विमानं विगतमानं परं ब्रह्म तत्र तिष्ठत्युपनिषद्रूपत्वादिति हंसयुक्तविमानस्था ब्राह्मी वाणी ब्रह्माणीत्यप्यर्थलेशः ॥१४॥ वृषं वृषभं धर्मं वारूढा । त्रीणि शूलानि शृंगाणि अग्राणि यस्य तत् श्रेष्ठं त्रिशूलवरं धरति त्रिशूलं त्रिशूलवरधारिणी । महांतः अहयः नागाः वलया यस्याः सा

हंसयुक्तविमानस्था साक्षसूत्रकमण्डलुः॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥१४॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥म-हाहिवलया प्राप्ता चन्द्ररेखा विभूषणा ॥१५॥ कौमारी शक्तिहस्ता च मयूरवरवाहना॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी ॥१६॥

एवंलक्षणा शक्तिः महेश्वरस्येयं माहेश्वरी प्राप्ता असुरैः समं योद्धुमागता । " शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे वृषः । अस्त्री शूलं रुगायुधम् । देवाहते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये । आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् । " लेखा कला प्रकृतौचित्यात् अन्यथा लेखा राजिः ॥ १५ ॥ शक्तिरायुधं हस्ते यस्याः सा अजा-द्यतष्टाप् । "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः इति वक्तव्यम् । " मयूरवरः श्रेष्ठमयूरः वाहनं यस्याः सा । "वाहनमाहितात्" इति णत्वं नाशंकनीयम् । आहि-तत्वाभावात् । नहि मयूरवरः वाहनमारोपितोऽस्ति वाहने यदारोपितमुह्यते तदारोपितमाहितमुच्यते । " रूप रूपक्रियायाम् " चुरादिः । गुहं कुमारमाकारेण रूपयति दर्शयति गुहरूपिणी । यद्वा गुहस्य रूपमस्यास्तीति गुहरूपिणी । " अत इनिः । ऋन्नेभ्यो ङीप् " । यद्वा गुहरूपं करोत्यात्मनि तदाचष्टे वा तच्छीला । गुहरूप-यतेर्णिनिः । अंबिका माता । कुमारस्येयं कुमारी ॥ १६ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गरुडस्योपरि " पूरणगुण " इत्यादिना षष्ठीसमासप्रतिषेधः कृदंताव्ययस्य तेन तदुपरि मदुपरीतिवत् षष्ठीति समासः । संस्थिता सम्यक् स्थिता । शंखः पांचजन्यः चक्रं सुदर्शनं गदा कौमोदकी शार्ङ्गं धनुः । हास्तिदंतः श्रृंगं तस्येदं शार्ङ्गं वैष्णवं धनुः । " अन्यदीयं तु चापीयं श्रृंगं माहिषमुच्यते । गवयं माहिषं शृंगं शार्ङ्गं चापादि यन्मयम् ॥ " खड्गश्च नंदकस्तेषां सेनांगत्वादेकवद्भावे नपुंसकत्वम् । तच्छंखाद्यं हस्ते यस्याः सा । विष्णोरियं वैष्णवी शक्तिर्देवता नारायणी । तथैव तद्वदेव ब्रह्माण्यादिवदेव योद्धुमभ्युपाययौ । यद्वा तथैव विष्णुवदेव वैष्णवी शक्तिरपि दैत्यान्प्रहर्तुं क्षमेति भावः । वैष्णव्याः शक्तेरायुधानि पंच बाहवस्तु चत्वार इति वैषम्यम् । आहुरत्र शंखशार्ङ्गे एकस्मिन् बाहौ । अंगुलिसक्तसूत्रलग्नः शंखो वादनार्थः । शार्ङ्गं तु मुष्टौ निविष्टमित्यवैषम्यम् । यद्वा युद्धे वादनार्थः शंखो वादनौचित्याद्वाहुमूलावलम्बीत्यवैषम्यम् । शंखो नामायुधं तस्य वादनार्थत्वादिति कश्चिदाह । तत्र शंखपाणिरित्यत्र पाणेः सप्तम्यंतस्य परनिपातत्वाभावप्रसंगात् ।

तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१७॥ जज्ञे वाराहमतुलं रूपं या बिभ्रती हरेः ॥ श-
क्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१८॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥१९॥

अस्ति च शंखस्य संग्रामे स्वनिस्वनत्रासाकुलशत्रुत्वादायुधत्वौचित्यमित्यलं विस्तरेण ॥ १७ ॥ पुनर्वैष्णवशक्त्यंतरमाविर्भूवेत्याह । हरेर्भगवतो विष्णोः अतुलबल-पराक्रमाभ्यामनुपमं च वराहस्येदं वाराहं रूपं या बिभ्रती सती भगवती जज्ञे । " जनी प्रादुर्भावे " अनुदात्तेत् कर्त्तरि लिट् । यद्वा " ज्ञा अवबोधने " कर्मणि लिट् । ऋषिभिः शास्त्रेण जज्ञे आज्ञायि । सापि हरेः शक्तिः नारायणी देवता । वराहस्येयं वाराही तां तनुं शरीरव्यक्तिं बिभ्रती आययौ ॥ १८ ॥ पुनर्वैष्णवशक्त्यंतरं प्रापदित्याह । सटानां स्कन्धकेसराणामाक्षेपेण कम्पनेन इतस्ततस्ताडनेन क्षिप्ताः प्रेरिता दूरीकृता नक्षत्राणां संहतयः समूहा यया सा । अत एव नृसिंहस्य भगवतः सदृशं वपुः बिभ्रती । अत एव नृसिंहस्येयं नारसिंही वैष्णवी शक्तिः योद्धुं तत्र प्राप्ता । ना चासौ सिंहश्च नृसिंहः । यद्वा ग्रामैकदेशे दग्धे ग्रामो दग्ध इतिवत् नुरेकदेशे नृशब्दः सिंहैकदेशे सिंहशब्दश्च वर्त्तते । ततश्च ना च सिंहश्च नृसिंहौ तौ यस्मिन् भगवतो विष्णोरवतारे नृसिंहः । मत्वर्थेऽर्श आदित्वादच् ॥ १९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वज्रमायुधं हस्ते यस्याः सा । गजराजोपरि स्थिता ऐरावताधिरूढा । सहस्रं नयनानि यस्याः सा । अत एव यथा शक्र इंद्रः समवस्थितोऽभूदाकारादिना तथैव सा- प्यैंद्री शक्तिः इंद्रस्येयमैंद्री । योद्धुं प्राप्ता । " यथा सादृश्ये " इत्यसादृश्य इति प्रतिषेधादव्ययीभावाभावे यथेति पृथक् पदम् । वज्रालंकृतहस्ता वा । " वज्रो स्त्री हीरके पवौ " । इंद्रस्य स्त्री इंद्राणी शक्तिस्त्वैंद्री । तदित्थं ब्रह्माण्याद्या देवशक्तयः सप्तेह कथिताः॥२०॥ ततोऽनंतरं ताभिर्ब्रह्माण्यादिभिर्देवशक्तिभिः परिवृतः ईशानो महेशः । चंडिकामाह । किमिति । मम शंभोः प्रीत्या स्नेहेन कारणेन असुरा हन्यंतां शीघ्रमिति। केचित्तु । चंडिकेति पठंति तदा परिवृता ईशानेति च स्त्रीलिंगत्वेन चंडिकाविशेषणे द्वे ततश्चायमन्वयः । ततो देवशक्त्यागमानंतरं ताभिर्देवशक्तिभिः परिवृता ईशाना ईशानशक्तिसंपन्ना चंडिका भगवती देवशक्तीः प्रत्याह । हे देवशक्तयः, भवतीभिः मम चंडिकायाः प्रीत्या स्नेहेन कारणेन शीघ्रमसुराः सर्वे हन्यंतामिति ॥२१॥ ततोऽनंतरं देवीशरीरात्तु चंडिकाशरीरादपि पुनः चंडिका शक्तिः

वज्रहस्ता तथैवैंद्री गजराजोपरि स्थिता ॥ सहस्रनयना प्राप्ता यथा शक्रस्तथैव सा ॥ २० ॥ ततः परिवृतस्ताभिरीशानो देवशक्ति- भिः ॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकाम् ॥ २१ ॥ ततो देवीशरीरात्तु विनिष्क्रांतातिभीषणा ॥ चंडिका शक्तिरत्युग्रा शि- वाशतनिनादिनी ॥ २२ ॥ सा चाह धूम्रजटिलमीशानमपराजिता ॥ दूत त्वं गच्छ भगवन्पार्श्वं शुंभनिशुंभयोः ॥ २३ ॥

विनिष्क्रांता प्रादुरभूत् । चंडिकायाः देव्याः शक्तिः कीदृशी । अतिभीषणा अत्यर्थभयकारिणी । अतिपाशिनीति पाठे प्रशस्तः पाशोऽस्त्यस्याः पाशिनी अतिक्रूरा पाशिन्यातिपाशिनी । पुनः कीदृशी अत्युग्राऽतिरौद्रा । पुनः कीदृशी । शिवानां शृगालानां शतेन कृतो निनादः सोऽस्त्यस्याः शिवाशतनिनादिनी । यद्वा शिवेत्य- नेन परमैश्वर्यं कथ्यते । शक्तिशक्तिमतोरभेदोपचारात् तस्या विशेषणम् । शतत्वसंख्यया निनदति तच्छीला शिवाशतनिनादिनी । शतमित्युपलक्षणम् । सर्वतः शब्दायमानेत्यर्थः । एतदुक्तं भवति । " यस्य देवस्य यद्रूपम् " इति वचनाच्चंडिका शक्तिर्विनिर्गता चंडिकाकृतिरेव शिवेति नाम्ना प्रादुरभूत् इति । यद्वा शिवाशतेन सह निनदतीति । अन्यथा उत्तरत्र " तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः । " इति शिवागतत्वं कथं स्यात् ॥ २२ ॥ अपराजिता परैः शत्रुभिरजिता । यद्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अविद्यमानः पर उत्कृष्टः शत्रुर्वा यस्याः सा अपरा जयति स्म जिता प्राप्तलोकोत्कर्षा । यद्वा अजः संजातो यस्याः सा अजिता पितामहमाता विष्णुमायेति यावत् । सा चंडिकायाः शक्तिर्देवता धूम्रजटिलमीशानं रुद्रमाह । किं हे भगवन्, दूतत्वं गच्छ दूतभावं भज । शुंभनिशुंभयोः पार्श्वं गच्छ याहि । चः समुच्चयार्थो भिन्नक्रमश्च । दूतत्वं गच्छ पार्श्वं चेति । योजनांतरे तु धूम्रजटिलमिति च्छेदः । दूत त्वं इति च्छेदः । सा चंडिकायाः शक्तिरपराजितानाम जटिलमीशानं जटाः संति यस्य स जटिलस्तम् । तुंदादिभ्य इलच् । आह किमिति । असुरेषु क्रोधाग्निपूर्णत्वात् धूम्रः कृष्णलोहितः । हे धूम्र हे भगवन्, त्वं दूत । लोण्मध्यमपुरुषैकवचनांतमेतत् । दूत इवाचरति दूतति । लोटस्तु " सेर्ह्यपिच्च । अतो हेर्लुक् " दूत दूत इवाचर । " सर्वप्रातिपदिकेभ्यः क्विब्वाचारे वक्तव्यः । यदि दूतवदाचर दूत इति उपमानादाचारे क्विबंततामनाश्रित्य मुख्यार्थे दूतशब्दात् त्वप्रत्ययः क्रियते यैः येषां हे भगवन्निति सैश्वर्याद्युपेत पूजित, संबोधनं दूतत्वेऽतिनीचत्वे प्रत्युक्तामिति केयं वाचो-

ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ॥ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २४ ॥
त्रैलोक्यमिंद्रो लभतां देवाः संतु हविर्भुजः ॥ यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २५ ॥

युक्तिपटुत्वौचिती स्यात् । धूम्रश्चासौ जटिलश्चेत्येकपदत्वं वा । ततो विशेषणसमासः । धूम्राः जटाः यस्येति तु विगृह्य न कर्मधारयात् मत्वर्थीया इति प्रतिषेधादिलजभावाद्बहुव्रीहौ धूम्रजट इत्येव स्यात् ॥ २३ ॥ तत्र गत्वा किं ब्रवाणीत्यत आह । हे भगवन् हे रुद्र, त्रिभुवनं विजित्यैवातिगर्वितौ अस्मत्समः कोऽपि नास्तीति संजाताहंकारो शुंभं निशुम्भं च दानवौ हितं वक्ष्यमाणं ब्रूहि उपदिश । अथ ये चान्ये दानवाः तयोः । पक्षे संग्रामशूरंमन्यतया गर्विताः युद्धाय युद्धं कर्तुं समुपस्थिताः संगताः स्युः तानपि हितं वक्ष्यमाणं ब्रूहि । ब्रुविर्द्विकर्मकः । " अकथितं च " इत्यत्र ब्रूञ्शास्विति द्विकर्मकेषु परिगणितत्वादस्य ॥ २४॥ अनेन हितमाह चंडिकायाः शक्तिः । हे शुम्भादयो दैत्याः, यूयं सर्वेऽपि यदि जीवितुमिच्छथ तर्हि पातालं प्रयात । ततश्च इंद्रः त्रैलोक्यं लभतां प्राप्नोतु । इंद्रादयो देवाः हविर्भुजः यज्ञेषु हवींषि यथाभागं भुंजानाः संतु हवींषि भुंजंताम् । अग्निमुखेन देवतोद्देशेन हूयमानं होतव्यद्रव्यं घृतादिकं हविराहुः । अन्ये तु हूयते हविः सान्नाय्यमित्याहुः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

“ घृतमाज्यं हविः सर्पिर्हविष्यं च तदुच्यते । ” इच्छथ लटो मध्यस्थ इषुगमियमां छः शिति ॥ २५ ॥ अथ चेद्भवंतो दानवाः बलावलेपाद्बलगर्वात्कारणाद्युद्धकांक्षिणः स्युः तदा तर्हि मया समं योद्धुमागच्छत यूयं तत्फलं चावाप्स्यथ मच्छिवाश्च वः पिशितेन तृप्यंतु । मम शक्तिः परिवाराः शृगालश्च वः युष्माकं युधि खंडितानां पिशितेन मांसेन तृप्तिमाप्नुवंति । “ कुक्कुराश्च शृगालाश्च माहिषाश्च तथावयः । प्रिया भवंति शक्तीनां भैरवाणां च वै तथा ॥ गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः । दर्पोऽवलेपो हंतापि स्यादहंयुत्वमेव च ॥ काक्षि इच्छायाम् ” युद्धं कांक्षंति युद्धकांक्षिणः । “ तृप तृप्तौ ” दिवादिः तृप्यंतु । पिशितं तरसं मांसम् ॥ २६ ॥ यतः कारणात्तया शक्त्या स्वयं देव्या शिवः शंभुः दूत्येन दूतभावेन दूतकर्मणा वा नियुक्तः प्रेरितोऽभूत्ततः कारणात्सा चण्डिकायाः शक्तिः अस्मिन् मर्त्यानां लोके शिवदूतीति ख्यातिं कीर्तिं प्रसिद्धिं चागता प्राप्ता । “ सख्युर्यः दूतवणिग्भ्यां चेति वक्तव्यम् ” । दूतस्य भावः कर्म वेति यः । दूतशब्दात् ष्यञ्

बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥ २६ ॥
यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥ शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥ २७ ॥

तु न चेत् समुच्चायितो यतः । वणिज्या वाणिज्यमित्युक्तम् । अयं तु ब्राह्मणादिषु वणिज्शब्दस्य पाठात्सेत्स्यति । दूतशब्दस्तु न दृढादौ नापि ब्राह्मणादौ पठितः । यदभ्यधुः । दूत्यं तद्भावकर्मणीति । कश्चिदाह । दूत्यं दौत्यमुभयमपि भवति । वणिज्या वाणिज्यमितिवत् । दूतवणिग्भ्यां चेति चकारात् ष्यञपि भवतीति तन्न । सख्युर्यः दूतवणिग्भ्यां च । न केवलं सख्युरेव यः अपि तु दूतवणिग्भ्यां च यो भवतीति चकारेण य एव समुच्चीयते नतु ष्यञपि । यदि ष्यञपि चेत् समुच्चीयते तदा ब्राह्मणादौ वणिक्शब्दपाठो निरर्थकः स्यात् । चकारेणैव ष्यञ्सिद्धत्वात् । दौत्येनेति पाठे दूत्यमेव दौत्यं प्रज्ञादित्वादण् । शिवदूतीति “ दुतनिभ्यां दीर्घश्च ” इति क्तः । “ टुदु उपतापे । दुतनिभ्यां दीर्घश्च ” इत्यौणादिकः क्तः। शिवेन दूतयतीति शिवदूती यद्वा शिवं दूतं प्रेर्यं करोति शिवदूती । कर्मण्यणि स्त्रियां ङीप् । शिवे कर्मणि दूतयतेर्ण्यंतादणि रूपं शिवं दूतयति दूतं करोति तदाचष्ट इति णिजंतात्कर्मण्यण् । शिवदूतेत्यपि सभ्यः पाठः ॥ २७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ते शुभादयः महासुराः शर्वाख्यातं शृणोति हिनास्ति शर्वः तेन कथितं देव्याः शिवदूत्याः वचः संदेशं श्रुत्वाऽमर्षेण क्रोधेनापूरिताः जग्मुः। क्व यत्र कात्यायनी स्थिता । शर्वोक्तदेवीसंदिष्टसामवादोद्दीपितामर्षापूरिताः क्रियाः केवलमुत्तरमिति मन्वानाः सन्तस्तत्र ययुः । यत्र कतो नामार्षिस्तस्य गोत्रं स्त्री कात्यायनी । कात्यशब्दाद्गर्गादियञंतात् " सर्वत्र लोहितादिकतंतेभ्यः " इति स्त्रियां ष्फः फस्यायनादेशः षित्वात् ङीष् । उमा कात्यायनी गौरी । यतः कात्यायनी स्थितेति पाठे आद्यादित्वात्सप्तम्यर्थे तसिः यत्रेत्येवार्थः ॥२८॥ ततोऽनंतरममरारयः शुंभादयः उद्धतामर्षाः प्रवृद्धरोषाः संतः प्रथममेव । " कालाध्वनोः " इति द्वितीया । अस्या देव्या अग्रभागे उरसि शरशक्त्यृष्टिवृष्टिभिः शरसंपातैः शक्तिसंपातैः ऋष्टिपातैः खड्गाघातैश्च साधनैः तां देवीं ववर्षुः छादयामासुः।"वृषु सेचने । असंयोगाल्लिडपित्कित् । छंदो-

तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ॥ २८ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥ २९ ॥ सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलया ध्मातधनुर्मुक्तैर्महेषुभिः ॥३०॥ तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३१ ॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्माणी चाऽकरोच्छत्रून्येन येन स्म धावति ॥ ३२ ॥

वत्पुराणानि" । अन्यथा ववृषुरित्येव स्यात् । "कासूसामर्थ्ययोः शक्तिः" कासूस्तोमराख्यमायुधं ऋष्टिः खड्गः ॥२९॥ सा चंडिका च तत्प्रहितान् तैरसुरैः प्रयुक्तान् शरान् शूलान् शक्तीः परश्वधान् परशून् कुठारान् अन्यान्यप्यायुधानि लीलयाऽनायासेन ध्मातं मौर्वीटंकारेण शब्दितं धनुः ततो मुक्तैः प्रेरितैः महेषुभिः महद्भिः प्रशस्तैः इषुभिः शरैः चिच्छेद खंडयामास । शूलचक्रपरश्वधानीति वा पाठः॥३०॥ तदा संग्रामकाले तस्या देव्याः चंडिकायाः अग्रतः पुरस्ताद्दृष्टिपथे काली चण्डमुण्डमर्दनी तद्वत्तथा चंडिकेव युध्यमानानरीन् शूलेन कृताः पाताः प्रहारास्तैर्विदारितान् खट्वांगपोथितांश्च कुर्वती असुरशरीरकंकालपंजरमया (न्) युद्धेन पोथितान् कुर्वती सती व्यचरत् ॥३१॥ ब्रह्माणी शक्तिः ब्राह्मी येन येन यथा धावति स्म योद्धुं गच्छति स्म तत्र तत्र पथि शत्रून् कमंडलौ जलं तस्याक्षेपादाकर्षणात् । यद्वा कमंडलोः सका-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शादुद्धृतस्य जलस्याक्षेपात्प्रोक्षणाद्धेतोः हतवीर्यान् हतौजसश्च हतदीप्तिबलान् अकरोत्। “ ओजो दीप्तिर्बलेऽपि स्यात् ” । कमंडलुजलाक्षेपादिति वा पाठः। अथवा धावतीत्यत्र व्यत्ययेन बहुवचनम् । येन येन अन्यायेन धावंति स्म लोकानुपद्रवंति स्म तान् दैत्यान् ॥ ३२ ॥ देव्या अग्रे महेश्वरस्येयं शक्तिर्माहेश्वरी त्रिशूलेन दैत्यान् जघान । अतिकोपनेति प्रत्येकं विशेषणं विष्णोरियं वैष्णवी चक्रेण दैत्यान् जघान । तथा कुमारस्येयं कौमारी गुहशक्तिः शक्त्या आयुधेन इति माहेश्वर्यादिशक्तित्रयपराक्रमो वर्णितः । अतिकोपना । “ कुप क्रोधे । क्रुधमंडार्थेभ्यश्च ” इति युच् ॥ ३३ ॥ इंद्रस्येयमैंद्री शक्तिः तस्याः कुलिशं वज्रं तस्य पातेन । शतं शतं शतशः । संख्यैकवचनाच्च वीप्सायां शस् । दैत्या दानवाश्च विदारिताः अत एव रुधिरौघप्रवर्षिणः संतः पृथ्व्यां पेतुः पतिताः । विदारिता इति । “ दृ विदारणे ” क्र्यादिः हेतुमति कर्मणि क्तः । अन्यथा विदीर्णाः स्युः चुरादौ चापि । “ दारिते भिन्नभेदितौ ” । यद्वा विदारणं विदारः स संजात एषां विदारिताः । रु-

माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥३३॥ ऐंद्री कुलिशपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥३४॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३५ ॥ नखैर्विदारितांश्चान्यान्भक्षयंती महासुरान् ॥ नारसिंही चचाराजौ नादापूर्णदिगंतरा॥ ३६ ॥

धिराणामोघास्तेषां प्रवर्षाणि तद्वंतः । “ ओघो वृंदेंऽभसां रये ” । यद्यप्यसुरा दैत्यदैतेयदनुजेंद्रारिदानवा इत्यभेदेनाभ्यधुः तथापि मातृभेदतोऽभेदो नास्ति । अत एव समानार्थत्वविवक्षूणामपि समानार्थानामेकशेषो न कृतः ॥ ३४ ॥ वराहस्य भगवतो विष्णोरियं वाराही मूर्तिः कायो यस्याः सा तस्याः यद्वा वराहस्यायं वाराहो विष्णोरवतारः तस्येव मूर्तिः यस्याः सा तस्याः वराहमूर्त्याः तुंडं मुखम् । “ तुडि तोडने ” । तुण्डत्यनेन खंडयतीति तुण्डं तेन कृतः प्रहारस्तेन विध्वस्ताः व्यसूकृताः असुरास्तस्याः संबंधिन्यौ ये द्वे दंष्ट्रे तयोरग्रभागौ ताभ्यां क्षतानि वक्षांसि येषां ते दंष्ट्राग्रक्षतवक्षसः । तस्या एव चक्रेण वैष्णवायुधेन विदारिताः संतो न्यपतन् रणभुवि पतिताः ॥ ३५ ॥ नादेन सिंहनादेनासमंतादभिव्याप्य पूर्णानि पूरितानि दिशामंतराण्यंतरालानि यया सा । नादापूरितदिङ्मुखेति वा पाठः । “ वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दांतशांतपूर्ण " इति पूरिते निपात्यते । नरसिंहस्य भगवतो विष्णोरवतारस्येयं शक्तिर्नारसिंही आजौ युद्धे चचार विजहार । किंकुर्वती नखैरायुधैर्विदारितान् स्फुटितगात्रानन्यान्महासुरान् भक्षयंती । अथवा च अ आन्यानिति च्छेदः । अ इति प्रतिषेधार्थमव्ययम् । आन्यानिति । "अण प्राणने " णिच्यचो यत् आननीया आन्याः जीवयितुमर्हाः । अ आन्याः दुष्टत्वान्मारणीयाः । तान् महतोऽसुरान् भक्षयंती नारसिंही खलु मारयति खादति च । " समित्याजिसमिद्युधः । समे क्ष्मांशे रणे प्याजिः । युद्धभागक्षणेष्वाजिः । " अनेन नारसिंहीपराक्रमः कथितः ॥ ३६ ॥ शिवदूत्या चंडिकोत्पन्नशक्त्या । चण्डाट्टहासैः भयंकरैः अभिदूषिताः प्रापितवैकृत्याः प्रापितमूर्च्छाः असुराः पृथिव्यां पेतुः । अथ तदा पतितान्नरान्सैव शिवदूती चखाद भक्षयामास । चंडिकाशरीराद्विनिर्गताया शिवं दूतमकरोत्सा शिवदूती तत्पराक्रम उक्तः ॥३७॥ इत्युक्तरीत्या मातॄणां ब्रह्माण्यादीनां गणं समूहं क्रुद्धं क्रोधाविष्टमत एव विविधैरभ्युपायैः संग्रामसाधनैरमोघैः महासुरान् मर्दयंतं दृष्ट्वा देवा-

चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥ ३७ ॥

इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३८ ॥

पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ३९ ॥

नामरयो दैत्यास्तेषां सैनिकाः सेनासमवेताः नेशुः "णश् अदर्शने " अदर्शनमगुः । पलाय्य ययुरिति यावत् । " ब्रह्माणी वैष्णवी रौद्री कौमारी शिवदूतिका । ऐंद्री च नारसिंही च वाराही चाष्ट मातरः॥" अणिमेत्यन्या मातरोऽष्टौ । " ब्राह्मी माहेश्वरी चैंद्री वाराही वैष्णवी तथा । कौमारी चर्ममुंडा च काली संकर्षणी तथा ॥ " इति "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही च तथेंद्राणी चामुण्डाः सप्त मातरः॥" इत्यनेन । अन्ये त्वाहुः । "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही चैव माहेंद्री चामुंडाः सप्त मातरः ॥ " ॥ ३८ ॥ रक्तं बीजं यस्य स रक्तबीजो महासुरः । दैत्यान् मातृगणेन ब्रह्माण्यादिमातृसमूहेनार्दितान् अत एव पलायनपरान् दृष्ट्वा क्रुद्धः सन् कर्तरि क्तः । देव्या सह योद्धुमभ्याययौ । रक्तं बीजयति बीजं करोति रक्तबीजः । कर्मण्यण् । " अर्द हिंसायाम् " ॥ ३९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अस्य रक्तवीजासुरस्य शरीरात् रक्तबिंदुः रक्ताः पृषतः यदा भूमौ पतति तदा तत्प्रमाणः रक्तवीजासुरशरीरपरिमाणः महासुरः मेदिन्याः सकाशात्समुत्पतति समुत्पद्यते। अतश्च रक्तवीजो रक्तबिंदुवीजो रक्तबिंदुश्चेति ख्यातोऽभूत्। रक्तबिंदुरित्येकवचनमुपलक्षणम्। तेन यावन्तस्तद्रक्ताबिंदवः पतंति तावंत एव तादृशा एव रक्तवीजासुरसमा एव महासुरा भूमितः समुत्पद्यंते। मेदिन्यामिति पाठे अधिकरणं विवक्षितम्॥ ४०॥ स महासुरो रक्तवीजो गदापाणिः सन् इन्द्रशक्त्या ऐंद्र्या सह युयुधे। ततः ऐंद्री स्ववज्रेण निजायुधेन कुलिशेन रक्तवीजमताडयत्। "वंधुजीवप्रसूनेन सदृशा रक्तबिंदवः। रक्तबिंदुः क्षितिस्पृक्च सन् जायते तत्समोऽसुरः॥"॥ ४१॥ ऐंद्र्या कुलिशेन वज्रेणाहतस्य रक्तवीजशरीरतः वहुलं शोणितमाशु सुस्राव भूमौ पपात। ततः शोणितात्तस्यैव रक्तवीजस्यैव

रक्तबिंदुर्यदा भूमौ पतत्यस्य शरीरतः॥ समुत्पतति मेदिन्यास्तत्प्रमाणस्तदासुरः॥४०॥ युयुधे स गदापाणिरिंद्रशक्त्या महासुरः॥ ततश्चैंद्री स्ववज्रेण रक्तवीजमताडयत्॥ ४१॥ कुलिशेन हतस्याशु बहु सुस्राव शोणितम्॥ समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः॥ ४२॥ यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः॥ तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः॥ ४३॥ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः॥ समं मातृभिरत्युग्रशस्त्रपातातिभीषणम्॥ ४४॥

रूपमाकृतिर्येषां ते तद्रूपास्तस्य रक्तवीजस्यैव पराक्रमो येषां ते तत्पराक्रमाश्च योधा योद्धारः। रक्तवीजरक्तजासुररक्तात्तु नोत्पद्यन्त इत्यत उक्तं तद्रूपा इति। "स्रु गतौ" इत्यादिः। कुलिशेनाहत इति प्रथमांतपाठे। घटः स्रवतीतिवदकर्मकत्वेन शोणितं सुस्राव जगाम प्राप्तवानित्यर्थः। विवक्षायां सकर्मकतास्त्येव। अहतस्य रक्तबिंदोः शरीरतः शोणितं कर्तृ सुस्रावेत्यत्राकर्मकत्वं तु घटात्पयः स्रवतीतिवत्कर्मनिरपेक्षत्वादवसेयम्॥ ४२॥ तस्य रक्तवीजस्य शरीरात् यावंतः यत्परिमाणाः यावत्संख्याकाः रक्तबिंदवः पृथिव्यां पतितास्तावंत एव तत्परिमाणा एव तत्संख्याका एव पुरुषाः दैत्याः तस्य रक्तवीजस्य तुल्यबलाश्च तुल्यविक्रमाश्च जाताः समजनितेत्यर्थः। वीर्यं वीरस्य कर्म च बलं प्राणसामर्थ्यम्। "विक्रमस्तु पदाक्रांतौ शौर्ये चापि प्रकीर्तितः। विक्रमस्त्वतिशक्तिता"॥ ४३॥ तत्र संग्रामे ते रक्त-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वीजासुररक्तसम्भवाः पुरुषाः दैत्याः मातृभिः ब्रह्माण्यादिभिः समं सार्द्धमत्युग्रमतिदारुणं यथा स्यात्तथा शस्त्राणां पातैरतिभीषणमतिभयंकरं च यथा स्यात्तथा युयुधुः । " व्यत्ययो बहुलम् " इति परस्मैपदम् ॥४४॥ पुनश्च पुनरपि ऐंद्र्या शक्त्या कृतेन वज्रपातेन अस्य रक्तबीजस्य शिरो मस्तकं यदा क्षतं दलितं भग्नमभूत्तदा ततः वज्रताडिताच्छिरसः सकाशान्निर्गलितं रक्तं कर्तृ उवाह प्रवहति स्म प्रवाहीबभूवेति यावत् । ततस्तस्माच्च रक्तप्रवाहात् सहस्रं सहस्रं सहस्रशः पुरुषाः दैत्याः जाताः । ववाहेति । "वह प्रापणे । लिट्यभ्यासस्योभयेषाम्" इति संप्रसारणं तु " संज्ञापूर्वको विधिरनित्यः " इति नेत्याहुः । वहिरसंप्रसारणप्रकृत्यंतरतया दन्त्योष्ठ्यादिरस्तीत्यपरे । " वाहृ प्रयत्ने " इत्यस्यात्मनेपदानित्यत्वाद्ववाहेत्यपरे । चक्षिङो ङित्करणमनुदात्तेल्लक्षणात्मनेपदानित्यत्वे ज्ञापकमाहुः । ववेत्यव्ययम् । वव इति प्रथमरक्तनिःसरणजनितध्वनिमाहेत्यन्ये । वव इत्येवशब्दमाह । रक्तं कर्तृ प्रथमत इत्यर्थः । उवाहेत्यर्थे वव इति शब्दानुकरणम् । तेन अनुकार्यानुकरणयोर्भेदस्याविवक्षितत्वादसत्यर्थवत्त्वे गवित्ययमाहेतिवद्विभक्त्युत्पत्त्यभावः अन्यथा ववमाहेति स्यात् । केचित्तु कृतसंप्रसारणमुवाहेत्येव पेठुः । वयं तु ब्रूमः । संप्रसारणमत्र कर्तव्यं कृते तस्मिन् संप्रसारणाच्चेत्यत्र पूर्वरूपत्वे नित्ये प्राप्ते " वा छंदसि " इत्यनुवृत्तौ पूर्वरूपत्वाभावपक्षे " मित्रावरुणौ यज्यमानौ " इतिवत्पुनःप्रसंगविज्ञानात् " इको यणचि" इति यणादेश एव श्रूयते । छन्दोवत्पुराणानि च भवंतीति । तदित्थम् । "पाठव्याख्या च धातूनां दृश्यंते स्वैरिणः क्वचित् । प्रयोग एव भगवांस्तानवस्थापयत्यपि ॥ " ॥४५॥ समरे संग्रामे विष्णोरियं वैष्णवी शक्तिरेनं रक्तबीजं चक्रेण अभिजघान अथवा च सा ऐंद्री एनं रक्तबीजमसुरेश्वरं गदया ताडयामास । यद्वा ऐंद्रीतमित्येकं पदं प्राक् । ऐंद्र्या शक्त्या इतः योद्धुं प्राप्तस्तं रक्तबीजं सा वैष्णवी शक्तिः चक्रेण उरसि जघान । न केवलं चक्रेण गदया ताडयामास ॥ ४६ ॥ वैष्णव्याः चक्रेण भिन्नस्य विदारितस्य रक्तबीजस्य रुधिरस्रावसम्भवैः रक्तप्रवाहसमुद्भवैस्तत्प्रमाणैः रक्तबीजशरीरपरिमितैः सहस्रं सहस्रं तेन सहस्रशः । यद्वा सह-

पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जातास्सहस्रशः ॥ ४५ ॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥
गदया ताडयामास ऐंद्री तमसुरेश्वरम् ॥ ४६ ॥ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥ सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्रेण सहस्रेण सहस्रशः। संख्यैकवचनाच्च वीप्सायां शस्। महासुरैः जगद्भुवनं व्याप्तं व्याकीर्णम्। अवर्णनीयैरसंख्याकैस्त्रैलोक्यं व्याप्तमिति भावः ॥ ४७ ॥ कुमारस्येयं कौमारी शक्तिर्देवता शक्त्या आयुधेन रक्तबीजं महासुरं जघान। तथा वाराही असिना खड्गेन तं रक्तबीजं जघान। तथा माहेश्वरी त्रिशूलेन तं जघान। क्वचित्तु पाठः।"माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम्। ताडयामास हृदये न चचाल तथापि सा॥" इति दृश्यते। यद्यपि हृदये सा ताडयामास तं तथापि सः रक्तबीजः संग्रामान्न चचाल नापजगामेत्यर्थः ॥ ४८ ॥ स चापि रक्तबीजो महासुरः कोपसमाविष्टः कोपानलज्वालाकुलः सन् गदया सर्वा एव मातृः ब्रह्माण्यादीः शक्तीः पृथक् प्रत्येकमहनत् अताडयत्। दैत्यः महासुर इत्युक्ते कुतो न पौनरुक्त्यं स्यात्। सामान्यतो दैत्योऽसावित्युक्त्वा सामर्थ्यतो महांश्चासावसुरश्चेत्यतिशयप्रदर्शनादपौनरुक्त्यम्। यद्वा दितेरपत्यं दैत्यः असून् राति गृह्णाति असुरः। "आतोऽनुपसर्गे कः"। महांश्चासावसुरश्चेति। यद्वा महांतः असुराः यस्य सः।यद्वा

शक्त्या जघान कौमारी वाराही च तथासिना॥ माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम्॥ ४८॥
स चापि गदया दैत्यः सर्वा एवाहनत्पृथक्॥ मातृः कोपसमाविष्टो रक्तबीजो महासुरः॥ ४९॥
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि॥ पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः॥ ५०॥

मं महादेवं जहाति महः महश्चासावसुरश्च। "मः शिवश्चन्द्रमाश्च स्यात्। ओहाक् त्यागे। आतोऽनुपसर्गे कः"। अहनदिति "हन हिंसागत्योः" लङस्तिप्। अदिप्रभृतिभ्यः शपो लुक्। "संज्ञापूर्वको विधिरनित्यः" इति नेत्याहुः। यद्वा हंतीति हनः पचाद्यच्। हन इवाचरत्। "सर्वप्रातिपदिकेभ्यः क्विब्वाचारे वक्तव्यः"। सनाद्यंतत्वाद्धातुत्वात् हनशब्दाल्लङस्तिप्। अडागमः॥ ४९॥ शक्तिशूलादिभिरायुधैर्बहुभिः प्रकारैराहतस्य रक्तबीजस्य वै प्रसिद्धो यो रक्तौघः। वेगवद्रुधिरप्रवाहः पपात बभ्रंश। तेन रक्तौघेन शतशः शतं शतमसुरा आसन् शतं शतमित्युपलक्षणम्। सहस्रशः लक्षशः कोटिशः बहुशः असुराः रक्तबीजसमाना आसन्। शक्तीनां देवीनां शूलादीन्यायुधीनात्यपि यथायोग्यं व्याख्या। ब्रह्माण्या आयुधं शत्रुघ्नो मन्त्रः वैष्णव्याश्चक्रं माहेश्वर्याः शूलं पिनाकाख्यं धनुश्च। का- ॥६७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ल्याः शूलं चक्रं च ॥ ५० ॥ असुरस्य रक्तबीजस्य यदसृक् रक्तं तस्माद्भूमिष्ठात्सकाशात्संभूतैरपि उद्दिष्टनामधेयैरसुरैः रक्तबीजसदृशैर्घातुकैः सकलं जगत्त्रैलोक्यं व्याप्तमासीत् । ततो देवा उत्तममत्यधिकं भयमाजग्मुः । अहो किमेतदासीदहो खल्वसौ शांतिकर्मणि वेतालोदयः । यज्जगद्रक्षणार्थो दैत्यक्षयार्थः संग्रामः प्रारब्धो भगवन्त्या स तावन्नाभूत्प्रत्युत रक्तबीजरक्तजैरसंख्यातैर्घातुकैर्दैत्यैर्जगदापूर्णं पीड्यते हंततदिति देवाः साध्वसमापुरतितमामिति भावः । " पटैकदेशे दग्धे पटो दग्धः " इतिवज्जगदेकदेशोऽपि जगदेवेति साकल्येन जगद्व्याप्तमित्युक्तम् । सकलमित्येवोक्ते किं तदिति साकांक्षं स्यात्तत उभयमप्युक्तम् ॥ ५१ ॥ चंडिका देवी सुरान् देवान्विषण्णान् विषादसहितान् दृष्ट्वा सत्वरा संभ्रमोपेता सती तान् प्राह । मा यूयं विषीदत सुस्था भवतेत्यब्रवीत् । अधुनैव वः शत्रून् छिनद्मीत्याश्वासयंती देवानुक्तवतीत्यर्थः । अथ देवानित्थमाश्वास्य चंडिका देवी कालीमुवाच । हे चामुंडे, त्वदीयं वदनं विस्तीर्णं विशालं कुरु रचयेति कालीमादिक्षत् । इत्थं भिन्नकर्मत्वात्प्राहो-

तैश्चासुरासृक्संभूतैरसुरैस्सकलं जगत् ॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ॥ ५१ ॥ तान्विषण्णान्सुरान् दृष्ट्वा चंडिका प्राह सत्वरा ॥
उवाच काली चामुंडे विस्तीर्णं वदनं कुरु ॥ ५२ ॥ मच्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान् ॥ रक्तबिंदोः प्रतीच्छ त्वं वक्रेणानेन वेगिना ॥ ५३ ॥

वाचेत्यपौनरुक्त्यं द्रष्टव्यम् । यद्वा । अप्रा अहसत् त्वरेति च्छेदः। प्रा पूरणे अदादिः । अं विष्णुं प्रातिश्वर्येण पूरयत्यसौ । "आतोऽनुपसर्गे कः"। विष्णुमायेत्यर्थः । त्वरा । " ञित्वरा संभ्रमे " त्वरते त्वरा पचाद्यच् त्वरमाणा सती अहसत् । एतावतैव रक्तबीजरक्तजंतुदर्शनेनैवैते भीता इति देवानहसत् ।"हसे हसने" लङि रूपम् । प्राहसत् त्वरेत्यपि च्छेदे स एवार्थः । त्वरते इति त्वरा । अत एव प्राहसत्तदेत्यपि पाठे तदा देवानां भयोदयकाले इति स एवार्थोऽवशिष्टः । यद्वा । प्राह सत्वरेत्येकं पदम् । प्राहस्तु रणमूर्द्धनि । प्राहे युद्धमूर्धनि सत्वरा । यल्लक्ष्यं देवीपुराणे । प्रययौ प्राह काम्ययेति ॥५२॥ देवी पुनः प्राह हे चामुंडे, अनेन विस्तीर्णीकृतेन वेगिना वेगयुक्तेन त्वदीयेन वक्रेण महासुरान् रक्तबीजात् सकाशान्मम शस्त्रपातेभ्यः संभूतान्समुत्पन्नान् रक्तानां रुधिराणां बिंदून्प्रतीच्छ गृहाण पिबेत्यर्थः । " इष इच्छायाम् " प्रतिपूर्वो ग्रहणार्थः । रक्तबीजादित्यपादानं यावत्तद्रक्तबिंदवः क्षितिं न स्पृशंति तावदेवांतरिक्षे तान् मुखेन गृहाणेति सूचनार्थम् । अन्यथा रक्तबिंदवः क्षितिं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्पृशंतस्तत्समानान्महासुरानुपजनयेयुरिति भावः ॥ ५३ ॥ हे चामुंडे, त्वं तस्माद्रक्तबीजरक्ताद्धुत्पन्नान्महासुरान् भक्षयंती रणे संग्रामे चर विहर । ततः किं फलिष्यतीत्याह । एवमनेन प्रकारेण एष रक्तबीजः क्षीणरक्तः सन् क्षयं नाशं परासुतां गमिष्यति प्राप्स्यति । रक्तबीजरक्तजाः दैत्याः किं करिष्यंतीत्यत आह । हे चामुंडे, अपरे च ये रक्तबीजरक्तजा महासुरा उग्रा अतिरौद्राः संति तेऽपि च त्वया भक्ष्यमाणाः संतः पुनर्नैवोत्पत्स्यंति । " पद गतौ " अनुदात्तेत्त्वादात्मनेपदी । चक्षिङो ङित्करणादनुदात्तेत्त्वनिमित्तात्मनेपदस्यानित्यत्वमवसीयत इति परस्मैपदं भवति । अन्यथोत्पत्स्यंते इत्येव स्यात् ॥ ५४ ॥ इत्युक्तप्रकारेण चंडिका देवी विजिगीषुः सती तां काली इत्थं कुर्विति उक्त्वा तं रक्तबीजं शूलेन एकाग्रलोहदंडेन त्रिशूलेन वाभिमुख्येन उरसि जघान । काली च मुखेन रक्तबीजस्य शोणितं जगृहे अभू-

भक्षयंती चर रणे तदुत्पन्नान्महासुरान् ॥ एवमेषः क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५४ ॥ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यं-
ति चापरे ॥ ऋषिरुवाच ॥ इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥ मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥ ५५ ॥
ततोऽसावाजघानाथ गदया तत्र चंडिकाम् ॥ न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ॥ ५६ ॥ तस्याहतस्य देहात्तु बहु सुस्राव
शोणितम् ॥ यतस्ततः स्ववक्त्रेण चामुंडा संप्रतीच्छति ॥ ५७ ॥

मिष्ठमंतरिक्षे जग्राह अपिबत् ॥ ५५ ॥ तत्र रणे देव्या शूले प्रयुक्ते सति ततोऽनंतरमसौ रक्तबीजः गदया चंडिकादेवीमाजघान अथ गदापातानंतरमसौ गदापातः अस्याः देव्याः अल्पिकामपि वेदनां न चक्रे नैव चकार । देव्याः परमानन्दब्रह्मत्वाद्दुःखलेशोऽपि कुत इति भावः । " आङो यमहनः " इत्यात्मनेपदमकर्मकादेव भवति । अन्यथा आजघ्न इति स्यात् । वेदना पीडनं बाधा व्यथनं दुःखनं व्यथा ॥ ५६ ॥ चंडिकादेव्या शस्त्रैराहतस्य तस्य रक्तबीजस्य देहात् यतो यतः यच्च यच्च बहु शोणितं सुस्राव ततस्तच्च तच्च शोणितं कर्म चामुंडा काली विस्तीर्णीकृतेन वदनेन संप्रतीच्छति जगृहे पपाविति भावः । यतस्तत इत्याद्यादित्वात्तसिर्यथायोगम् । यद्वा तस्य देहात्सकाशाद्यतो यतो द्वारतो द्वारात्सुस्राव ततस्ततो द्वारात्सकाशात्स्ववक्त्रेण प्रतीच्छति स्म चामुंडेत्यर्थः । तद्वक्त्रेणेति पाठे तेन विस्तारितेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वक्रेणेत्यर्थः । यतस्तत इत्यर्थं प्रति केचिद्व्याचख्युः । इतस्तत इति क्वचित्पाठः ॥ ५७ ॥ अस्याः काल्या मुखे रक्तपाताद्रक्तबीजरुधिरपतनात्समुद्गताः समुत्पन्ना ये महासुरास्तान् चामुंडा काली चखाद । अथ तस्य रक्तबीजस्य शोणितं च पपौ ॥५८॥ देवी चंडिका शूलेन चक्रेण । क्वचिद्वज्रेणेति पाठः । बाणैः असिभिः खड्गैः रिष्टिभिः खड्गप्रभेदैस्तं रक्तबीजं जघान । कीदृशम् । चामुंडया पीतं शोणितं यस्य तम् । ननु बाणबाहुल्यं युक्तमेव । असिबाहुल्यं किमर्थमुच्यते । असिकृतप्रहारा असय इत्युच्यंते । एवं रिष्टयोऽपि । असिभिरिष्टिभिरित्यत्र सलोपे छांदसत्वम् । यद्वा " रोरि " इति रेफलोपे " ढ्रलोपे पूर्वस्य दीर्घो णः " इति दीर्घाभावश्छांदसः । ऋष्टिभिरिति पाठेऽपि सलोपसमाधानं छांदसं ज्ञेयम् । यद्वा यष्टिभिरिति विवक्षायां संप्रसारणपूर्वरूपत्वे इष्टिभिः यष्टिभिरित्यर्थः । तथा च संधिर्युक्त एव ॥५९॥ हे महीपाल सुरथ, देव्याः शस्त्रसंहतितः शस्त्रसमूहाद्धेतोः हतस्ताडितः । यद्वा आद्यादित्वात्तसिः । शस्त्रसंहत्या हतः । यद्वा शस्त्रसंहतिमेत्य हतः। कर्मणि ल्यब्लोपे

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितम् ॥५८॥ देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः॥ जघान रक्तबीजं तं चामुंडा पीतशोणितम् ॥ ५९ ॥ स पपात महीपृष्ठे शस्त्रसंहतितो हतः ॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ६० ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥ तेषां मातृगणो मत्तो ननर्ताऽसृङ्मदोद्धतः ॥ ६१ ॥

पंचमी । चामुण्डया निःशेषपीतत्वात् नीरक्तश्च सन् रक्तबीजः मर्त्तुं महीपृष्ठे भूमेरुपरि पपात । शस्त्रसंघसमाहत इति पाठे " सप्तम्यां जनेर्डः । अन्येष्वपि दृश्यते " इत्यपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वंतरादपि डो भवति कारकांतरेऽपि चेति वचनात् । शस्त्राणि संहति समाहरति राशीकरोति शस्त्रसंहतिः युद्धं तेन समाहतः । शस्त्रसंघसमाहत इत्यन्वयपाठः । " संघसार्थौ तु जंतुभिः " इत्यभिधानात् । प्राण्यारब्धः समूहः संघः । यद्वा मेघसंघवदुपचारात्संघ इव संघः शस्त्राणां संघः समूहः । शस्त्राणि जंतुवच्चेष्टंते ॥ ६० ॥ हे नृप सुरथ, दत्तावधानः शृणु । ततो रक्तबीजवधानंतरं ते प्राग्विषण्णाः त्रिदशाः देवाः संप्रति अतुलमसदृशमपरिमितं हर्षमवापुः । अथ च तेषां रक्तबीजादिदैत्यानामसृङ्मदोद्धतः रुधिरपानमदोत्कटः । अत एव मत्तः मदघूर्णितः मातॄणां ब्रह्माण्यादीनां गणः समूहः आनं-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दतः ननर्त्त नृत्याति स्म । एतेन युद्धावसाने वीरपानं सूचितम् । " वीरपानं तु यत्पानं वृत्ते भाविनिवारणे । रुधिरासृग्लोहितास्ररक्तक्षतजशोणितम् ॥ " ॥६१॥ इति मार्कंडेयपुराणे श्रीराजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां रक्तबीजवधोऽष्टमोऽध्यायः ॥८॥ हे भगवन् हे सुमेधोमहर्षे, हे अमम ममतारहित, भवता त्वया मम सुरथस्य शृण्वतः रक्तबीजवधाश्रितं तद्वधविषयं विचित्रमद्भुतमिदं देव्याश्चरितस्य माहात्म्यं महात्मता आख्यातं कथितम् । रक्तबीजवधस्तेन वाश्रितम् । यद्वा रक्तबीजवधेन एन विष्णुना श्रितमाश्रितं रक्तबीजवधेन दुष्करेण संतुष्टेन विष्णुना अहो इदमद्भुतमिति श्लाघितमित्यर्थः । यद्वा आकारस्तु पितामहः । आ ब्रह्मणा श्रितम् । आदृतं स्तुतमित्यर्थः । रक्तबीजवधोश्रितमिति पाठे । आ ब्रह्मा अः विष्णुः उकारस्तु महेश्वरः एषां समाहारद्वंद्वैकव-

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥ ८ ॥ राजोवाच ॥ विचित्रमिदमाख्यातं भगवन् भवता मम ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ १ ॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः ॥ २ ॥ ऋषिरुवाच ॥ चकार कोपमतुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥ ३ ॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुंभोऽथ मुख्यया सुरसेनया ॥ ४ ॥

द्भावौ । द्वयोराद्ययोः संधौ सवर्णदीर्घः । तत उना सहाऽऽद्गुणः ओ इति प्रातिपदिकम् । " ह्रस्वो नपुंसके प्रातिपदिकस्य " । उना श्रितमुश्रितम् । रक्तबीजवधेनातिदुःसाध्येन लीलया देव्या कृतेन संतुष्यता उना ब्रह्मविष्णुरुद्रेण श्रितमादृतम् ॥१॥ हे सुमेधः ऋषे, देव्या रक्तबीजे निपातिते सत्यतिकोपनः शुंभो निशुम्भश्च भूयः अत्यधिकं च । भूयः पुनः यत्कर्म संग्रामलक्षणं कार्यं चकार तदहं सुरथो भूयोऽधिकं यथा स्यात्तथा श्रोतुमिच्छामि । " पुरुहं पुरु भूयिष्ठं स्फिरं भूयश्च भूरि च । " ॥ २ ॥ हे राजन्, देव्या रक्तबीजे निपातिते सति ततोऽन्येषु च दानवेषु देव्या हतेषु सत्सु शुंभासुरो निशुम्भश्चासुरः अतुलमनुपमममर्यादं कोपं क्रोधं चकार । " अभ्यामर्दसमाघातसंग्रामाभ्यागमाहवाः ।" आह्वयंतेऽत्र स्पर्द्धयेत्याहवः । देव्या हन्यमानं हतं महासैन्यं विलोक्याथ अमर्षं क्रोधमुद्वमन् उद्गिरन् क्रोधाविष्टः सन् ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उद्वहन्निति पाठे धारयन् सन् निशुम्भः मुख्यया निजया असुरसेनया आसुर्या सेना तया सहाभ्यधावत् । इन्यमानं " वर्त्तमानसामीप्ये वर्त्तमानवद्वा " इति लटः कर्मणि शानच् । यद्यप्युद्वहनं पाणिपीडनं तथापि धात्वनेकार्थतया धारणमर्थः । अन्यथा " सदृशीमुद्वहेत्कन्याम् " इतिवदुद्वहनं पाणिपीडनं स्यात् ॥ ३ ॥ ४ ॥ तस्य निशुम्भाग्रतः पुरस्तात्तथा पृष्ठे पश्चाद्भागे तथा पार्श्वयोर्वामदक्षिणभागयोः वर्त्तमानाः महासुराः संदष्टौष्ठपुटाः रोषदष्टाधरौष्ठाः संतः देवीं हंतुमुपाययुः उपसमीपमाजग्मुः । उत्तरौष्ठापेक्षयात्र रोषप्रकरणादोष्ठोऽधरो विवक्षितः । अन्यथाऽभिधाने ओष्ठशब्दोऽधरपर्याय एव । अधरशब्दोऽप्योष्ठपर्याय एव । यदाहुः । " ओष्ठाधरौ तु रदनच्छदौ दशनवाससी । " इति । "ओष्ठमात्रेऽधरः स्मृतः " इति च । ओष्ठशब्देन परस्य संसक्तापिधानं वस्तु उच्यते । ओष्ठः पुट इव ओष्ठपुटः संदष्ट ओष्ठपुटो यैस्ते । "पुट संश्लेषणे" । पुटचते संश्लिष्यते पुटः ॥५॥ स्वबलैर्वृतः स्वैरात्मीयैः सैन्यैर्वेष्टितः महावीर्यः महाप्रभावः शूरः शुम्भोऽपि प्रथमं मातृभिर्ब्रह्माण्यादिभिः

तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥ ५ ॥ आजगाम महावीर्यः शुंभोऽपि स्वबलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ६ ॥ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥ ७ ॥ चिच्छेदाऽस्तांच्छरांस्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ॥ ८ ॥

समं युद्धं कृत्वा अथ कोपात्क्रोधावेशाच्चंडिकां देवीं निहंतुमाजगाम । शुम्भो न जानाति चंडिका भगवती हंतुं न शक्येति भावमावेदयितुं कोपादित्युक्तम् ॥ ६ ॥ ततोऽनंतरं तयोरतीवात्यर्थमुग्रं रौद्रं शराणां वर्षं वृष्टिं वर्षतोः शुम्भनिशुम्भयोः । देव्या सह युद्धमासीत् । कयोरिव वर्षतोः मेघयोरिव । यथा मेघौ पृथग्भूतौ वर्षतः वृष्टिधाराः ॥ ७ ॥ तथा ताभ्यां शुम्भनिशुम्भाभ्यामस्तान् क्षिप्तान्प्रेरितान् शरान् बाणान् चंडिका देवी स्वैः शराणामुत्करैः पुंजैः । यद्वा स्वेषामात्मीयानां शराणामुत्करैः स्वस्याः आत्मनः शराणामुत्करैर्वा । " सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियाम् कॄ विक्षेपे " उत्कीर्यते उत्कराः। कर्मणि ऋदोरप् । स्तोमैः चिच्छेद खंडयामास । अथ च सा तावसुरौ शुम्भनिशुम्भावपि कर्मभूतौ अंगेषु तदीयेषु प्रत्यंगं प्रतिरोमकूपं शस्त्रौघैर्बाणाद्यायुधव्यूहैस्ताडयामास ॥८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निशुम्भः निशितं तीक्ष्णं खड्गं मंडलाग्रं सुप्रभं प्रभामंडलभास्वरं चर्म च फलकमादाय गृहीत्वा देव्याः उत्तमं श्रेष्ठं वाहनं सिंहं मूर्ध्नि मस्तके अताडयत् । "तड आघाते" चुरादिः । निशितं क्ष्णुतं तेजितमिति यावत् । सुप्रभमिति खड्गस्य विशेषणं चर्मणश्च । "संभवे व्यभिचारे च स्याद्विशेषणमर्थवत्" ॥९॥ निशुम्भेन वाहने सिंहे ताडिते सति देवी चंडिका क्षुरप्रेण क्षुरं मात्याकारेण पूरयति सुखेनानुकरोति क्षुरप्रो बाणविशेषः। तेन निशुंभस्य उत्तमं श्रेष्ठमसिं खड्गं चिच्छेद । आश्वविलंबेनाष्टचंद्रकं च तेनैव क्षुरप्रेण चिच्छेदैकप्रयत्नेन असिं चर्म च विदारयामासेत्यर्थः । अष्टौ चंद्रा यस्मिंस्तदष्टचंद्रकं लिखिताष्टचंद्रकमित्यर्थः । यद्वा अष्टः व्याप्तः चंद्रः कर्पूरो यस्मिन् विलिप्तोऽस्ति तदष्टचंद्रकम् । "अशू व्याप्तौ" कर्त्तरि क्तः । यद्वा अष्टौ चंद्रांश्चित्रितान् कायति अष्टचंद्रकम् । अष्टानां चंद्राणां समाहारोऽष्टचंद्रं तत्कायत्यात्मलक्ष्यत्वेन लिखितं कथयत्यष्टचंद्रकम् । कर्पूरश्चंद्रसंज्ञकः ॥ १० ॥ देव्या चर्मणि द्विधाकृते खड्गे च छिन्ने द्विधाकृते सति निशुंभोऽसुरः देवीं प्रति शक्तिमायुधविशेषं चिक्षेप युयुजे । देवी अभिमुखागतां तामप्यस्य निशुंभस्य शक्तिं चक्रेण द्विधा चक्रे चिच्छेद । न केवलं तद्द्वयमेव अपि तु तदीयां शक्तिमपि चिच्छेद ॥११॥ अथानंतरं कोपेनाध्मातः कोपाविष्टः कोपाध्मातः कोपाग्नियुक्तः निशुंभः दानवः देवीमुद्दिश्य शूलं जग्राह प्रयुयुजे इत्यर्थः । अथ देवी मुखमायांतं तं चापि शूलं मुष्टिपातेन मुष्टेः प्रहारेण अचूर्णयत् । सत्यापपाशसूत्रेण अवध्वंसने चूर्णप्रातिपदिकाण्णिच् । अवध्वंसितवतीत्यर्थः । अथवा "चूर्ण प्रेरणसंप्रेरणयोः" चुरादिः । शूलं पुंस्यपि । "ध्मा शब्दाग्निसंयोगयोः" कोपेनाध्मातः अग्निदीपितः । कर्मणि क्तः । "स्त्रीपुंसयोः स्मृतो मुष्टिः" ॥१२॥ अथ सोऽपि निशुंभोऽपि गदामादाय गृहीत्वा

निशुंभो निशितं खड्गं चर्म चादाय सुप्रभम् ॥ अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥ ९ ॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ॥ निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकम् ॥ १० ॥ छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥ तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥११॥ कोपाध्मातो निशुंभोऽथ शूलं जग्राह दानवः ॥ आयांतं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १२ ॥ अथादाय गदां सोऽपि चिक्षेप चंडिकां प्रति ॥ सापि देव्यास्त्रिशूलेन भिन्ना भस्मत्वमागता ॥ १३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चंडिकां प्रति चिक्षेप । सापि निशुंभप्रेरिता गदा देव्या कर्तृभूतया त्रिशूलेनाग्निवीजगर्भेण करणेन भिन्ना विदारिता सती भस्मत्वमागता भस्मीवभूवेत्यर्थः । आविव्याध गदां सोऽपीति पाठे सोऽपि निशुंभोऽपि चंडिकां प्रति गदां चिक्षेप आविव्याध ततश्च यदि गदया देवीं विव्याध निशुम्भस्तर्हि देवीप्रयुक्तत्रिशूलेन भस्मीकरणवर्णनं निशुंभप्रयुक्तगदायाः विफलं स्यात् । देव्या उत्कर्षाभावात् । देवीविषयं व्यधनं गदायामेवेति । त्रिशूलेन गदाया भस्मतास्तु मा वा भूत् किं तया कृतं स्यात् । पाटच्चरलुटितवेश्मनि यामिकजागरणसंतत्यापि वा किं कृतं स्यादिति । क्वचिदाविव्याथ गदां सोऽपीति पाठः । आविध्य भ्रामयित्वेत्यर्थः । अत्रापि पाठे गदां भ्रामयामासेत्यर्थाश्रयेन किंचिद्दुष्यति वैदुष्यमिष्यमाणार्थसिद्धेरिति चेन्मतमायुष्मतः । मैवं मंस्था शब्दशक्तिस्वाभाव्यादाविद्धो मणिरित्यादौ विध्यतिराङ्पूर्वोऽपि ताडनार्थ एव प्रसिद्धो नतु जातु परिभ्रमणवृत्तिरित्यलं विस्तरेण । प्रकृतमनुसरामः ॥ १३ ॥ ततः गदायां भस्मीकृतायां तदनंतरं परशुहस्तं परश्वधपा-

ततः परशुहस्तं तमायांतं दैत्यपुंगवम् ॥ आहत्य देवी बाणौघैरपातयत भूतले ॥ १४ ॥ तस्मिन्निपतिते भूमौ निशुंभे भीमविक्रमे ॥
भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिकाम् ॥ १५ ॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः
॥ १६ ॥ तमायांतं समालोक्य देवी शंखमवादयत् ॥ ज्याशब्दं चापि धनुषश्चकारातीव दुस्सहम् ॥ १७ ॥

णिमाभिमुखमायांतं तं निशुंभं देवी चंडिका बाणौघैः शरव्यूहैः आहत्य ताडयित्वा भूतलेऽवनितलेऽपातयत् प्रभ्रंशयामास । निशुंभो मूर्च्छां प्रापितो न तावन्मारितोऽस्तीदानीमग्रे ततो निशुम्भः संप्राप्य चेतनामात्तकार्मुक इति श्रवणात् ॥ १४ ॥ तस्मिन् भीमविक्रमे घोरपराक्रमे निशुंभे भ्रातरि भूमौ निपतिते मूर्च्छिते सति भ्राता शुम्भः अतीव संक्रुद्धः अतितरां क्रोधाविष्टः सन्नंबिकां देवीं हंतुं प्रययौ ॥ १५ ॥ तथा तेन प्रकारेण तदा तस्मिन्काले अत्युच्चैः रथस्थः रथारूढः सः शुंभः अत्युच्चैः गृहीतपरमायुधैः अतुलैरनुपमैः अष्टाभिर्भुजैर्बाहुभिः अशेषं कृत्स्नं नभः आकाशमंडलं व्याप्याक्रम्य बभौ शुशुभे ॥ १६ ॥ देवी चण्डिका तं शुम्भं संमुखमायांतमागच्छंतं विलोक्य शंखमवादयत् पूरयामास । किंच अतवातितरां दुःसहं सोढुमशक्यं धनुषः ज्याया धनुरारोपे मौर्व्याः शब्दं टंकारस्वनं चकार । शंख-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वनश्चापस्वनो युद्धोत्साहं जनयति । " मौर्वी ज्या शिंजिनी गुणः " । आरोपितज्यास्वनार्थं धनुर्ग्रहणम् । धनुःशब्दोऽर्द्धर्चादित्वात्पुंनपुंसकलिंगः । " धनुर्वंशविवृद्धोऽपि निर्गुणः किं करिष्यति । " दुःखेन सह्यो दुःसहस्तम् । " स्वत्यतीव च निर्भरे " ॥ १७ ॥ समस्तदैत्यसैन्यानां सकलासुरसेनानां तेजसां वधं विनाशं विदधाति करोति तेन । यद्वा तेजसां वधस्य विधायः भावे घञ् सोऽस्त्यस्य स तथोक्तः । तेन निजघंटास्वनेन च ककुभो दशापि दिशः पूरमामास संवर्द्धयामास । " पूरी आप्यायने " दिवादिः । आप्यायनं वृद्धिः । " हेतुमति च " इति णिच् । कास्प्रत्ययादाममन्त्रे लिटि । स्वनेन चेति चकारेण शंखज्यानिजघंटास्वनैः दिशः पूरयामासेत्येतदुक्तं स्वनत्रयं समुच्चीयते । " तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि संस्तौ । अधिक्षेपाद्यमानादेः प्रयुक्तस्य परेण यत् ॥ प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् । " ॥ १८ ॥ ततः शंखादिस्वनानंतरं सिंहः केसरी त्याजिताः वर्जिताः इभानां गजानां महांतो मदा यैस्तैस्तैः दूरीकृतमत्तेभमदप्रवाहैः । सिंह-

पूरयामास ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥१८॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥

पूरयामास गगनं गां तथैव दिशो दश ॥ १९ ॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥ कराभ्यां तन्निदानेन प्राक्स्वनास्ते

तिरोहिताः ॥ २० ॥ अट्टाट्टहासमशिवं शिवदूती चकार ह ॥ तः शब्दैरसुरास्त्रेसुः शुंभः कोपं परं ययौ ॥ २१ ॥

गर्जनश्रवणाद्गजाः खलु निर्मदाः स्युः । महानादैः महद्भिः कंठीरवस्यास्यनादैः कंठगर्जनैः गगनमाकाशं पूरयामास । तथैव तैर्महानादैः गां पृथ्वीं पूरयामास । तथैव दश दिशः पूरयामास । क्वचित्तु गां तथोपदिशो दशेति पाठः। उपशब्द आधिक्ये पूरितशंखज्याघंटानां नादापेक्षया सिंहनादोऽधिकः यतोऽसौ गगनादिकं सर्वं पूरयामास ॥ १९ ॥ ततः सिंहनादानंतरं काली चामुण्डा गगनमाकाशं समुत्पत्य गगनं क्ष्मामताडयत् । कराभ्यां पाणिभ्यामाहतवती । यद्वा समुत्पत्योड्डीय गगनं क्ष्मां च द्यावापृथिव्यौ द्वे अपि कराभ्यामताडयत् । ततः तन्निनादेन द्यावापृथिव्यां घातजनितध्वनिना ते प्राक् उक्ताः शंखज्याघंटासिंहस्वनाः तिरोहिता आच्छादिता आसन् । अल्पो ध्वनिराधिकध्वनिना हि तिरोधीयते ॥२०॥ चांडिकाशरीरोत्पन्ना शिवदूती दैत्यानामशिवं कर्णकटु यथा स्यात्तथा अट्टाट्टहासमत्युच्चहासं चकार ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ह प्रसिद्धम् । तैरट्टाट्टहासजनितैः शब्दैर्ध्वनिभिः सुराः त्रेषुः। " त्रसु उद्वेगे " । उद्वेगमापुः । एत्वाभ्यासलोपौ । शुम्भस्तु परमाधिकं कोपं ययौ प्राप । " अट्ट अतिक्रमहिंसनयोः" । अट्टनमट्टः अतिक्रम उल्लंघनम् । शत्रूनुल्लंघ्योल्लंघ्य हसनमट्टाट्टहासः। यद्वा अट्टेन नादेनातिक्रमेण हासः अट्टाट्टहासः। "नित्यवीप्सयोः" इति वीप्सायां द्विर्वचनम् । "कर्मधारयवदुत्तरेषु" इति सुपो लोपः। अट्टट्टहासमिति पाठे अट्टट्टहासः महाहासः शकंध्वादित्वात्पररूपत्वं तम् । यद्वा अट्टेष्वट्टेषु हिंसकेषु हासः। यद्वा अट्टेष्वट्टेषु अतिक्रामत्स्वतिक्रामत्सु हासः। इह कश्चित्त्वाह । अट्टः शकटध्वनिरिति तन्न प्रमाणाभावात् । स एवाह अट्टोऽतिशय इति तच्च न वीप्सातोऽन्यत्राट्टशब्दस्य केवलस्यातिशयार्थतायां प्रयोगाभावात् । यथोक्तं तेनैव । अट्टः शकटातिशयार्थेष्विति तच्च पापात्पापीयः प्रमाणानुपन्यासात् ॥ २१ ॥ हे शुम्भ दुरात्मन्, त्वं स्वदूतं प्रत्यक्षिपः तिष्ठ तिष्ठ मावयासीः तत्फलमद्य पश्ये । किमतो निष्ठुरालापेन प्रयत्नोदिता (?) क्रिया केवलमुत्तरमत्रेति । यदांबिका देवी व्याजहार तदा तस्मिन् काले

दुरात्मंस्तिष्ठ तिष्ठेति व्याजहारांबिका यदा ॥ तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥ २२ ॥
शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ॥ आयांती वह्निकूटाभा सा निरस्ता महोल्कया ॥ २३ ॥
सिंहनादेन शुंभस्य व्याप्तं लोकत्रयान्तरम् ॥ निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २४ ॥

आकाशसंस्थितैर्देवैराकाशस्थैः जयेत्यभिहिते जय शत्रूनभिभवेत्युक्तम्। अथवा आजि युद्धं कुरु आजयेत्यर्थलेशो ज्ञेयः। तिष्ठ तिष्ठेति कोपे संभ्रमे वा द्विरुक्तिः॥२२॥ शुम्भेनागत्य ढौकित्वा ज्वालया तेजसातिभीषणा या शक्तिः मुक्ता प्रेरिता सा आयांती सती चंडिकया कर्तृभूतया महोल्कया साधनीभूतया शक्त्या निरस्ता निवारिताभूत् । वह्निकूटाभा अग्निपुंजकांतिः महोल्कया बृहदंगारकाष्ठज्वालयेत्यपि कश्चिदव्याख्यत् । " ज्वल दीप्तौ । ज्वलितिकसंतेभ्यो णः " कर्त्तरि । ज्वलति ज्वालः ज्वाला च । " वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम् । माया निश्चलयंत्रेषु कैतवानृतराशिषु ॥ आयोधने शैलशृंगे सीरांगे कूटमास्त्रियाम् ।" महत्युल्का ज्वाला यस्याः सा महोल्का नाम शक्तिः चंडिकाया आयुधम् । निरस्तः प्रहितो युक्तः प्रेरितः क्षिप्त उज्झितः। विसृष्टो दवितो दूरीकृतो बाणादिमोक्षणे ॥२३॥ हे अवनीपते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुरथ, यद्यपि शुंभस्य सिंहनादेन कंठगर्जेनेन लोकत्रयांतरं व्याप्तमजनिष्ट तथापि स जितवान् शुम्भकृतसिंहनादमातिमहत्तरमपि तत्सैनिकनिर्घातनिःस्वन एव ततोऽप्यधिकतमत्वात्तमभिभूतवानिति भावः । निर्हणनं निश्चितो घातः मारणं निर्घातः तस्य निःस्वनः शब्दः यः खलु देवीं प्रति शुम्भसैनिकैः समरे रसावेशतः कंठतः कथितः । तां निर्जहि निर्जहि मारय मारयेति शब्दः समभूत् स निर्घातनिस्वनोऽत्र विवक्षितः । अथवा निश्चयेन घ्नंति शत्रूनेभिरिति निर्घाताः खड्गाद्यायुधसमूहास्तेषां निस्वनः परस्पराहतिजनितो ध्वनिः अथवा आकस्मिक एव गगनादत्यायतः ज्योतिःपातो यः स निर्घातः स निर्घोषः तस्य यः स्यान्निस्वनो घोरः भयंकरः निर्घातनिस्वन इव शुम्भस्य पात इवोत्पातः । अत एवमसुरं जितवान् जिगाय । शुंभो जितवान् प्रकाशप्रकर्षमप्राप्य ननाशेत्यर्थः । महाध्वनिर्यावापृथिवीव्यापी निर्घनगगनतः पतति य उत्पातोऽनर्थकरः स निर्घातः । पृषोदरादित्वात्साधुः । अथवा यस्य प्रथमतः सिंहनादेन लोकत्रयं व्याप्तं स शुम्भः पश्चान्निर्घातस्य दानवनाशकारिण उत्पातरूपस्यैव निर्गतो स्वनो यस्य स निर्घातनिस्वनः । अघेन पापेन व्याप्तमुरः प्रधानमंगं तेन उपलक्षितः सन् अजितवान् अभिभूतवान् देवी-

शुंभमुक्ताञ्छरान्देवी शुंभस्तत्प्रहिताञ्छरान् ॥ चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥ २५ ॥
ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ॥ स तदाभिहतो भूमौ मूर्च्छितो निपपात ह ॥ २६ ॥

मिति शेषः । यद्वा येन सिंहस्य देवीवाहनस्य नादेन कंठगर्जेनेन लोकत्रयं व्याप्तं स एव जितवान् सन् लोकेषूत्कृष्टः सन् शुम्भस्य घोरः निर्घातनिःस्वनः बभूव । महोत्पातः पापात्मनामनभ्युदयकारीत्याहुः॥२४॥ अथ देवी उग्रैः स्वशरैः आत्मबाणैः शतशः शतं शतं सहस्रशः सहस्रं सहस्रं शुम्भमुक्तान् शरान् चिच्छेद । शरान्स्वशरैरिति च उभयविशेषणं यथायोगं द्रष्टव्यम् । अथ शुम्भश्च उग्रैः स्वशरैस्तत्प्रहितान् तया देव्या प्रहितान् प्रेरितानुग्रान् शतशः शतं शतं शरान् चिच्छेद चिच्छेद चेति समत्वमनयोस्तावदित्यर्थः ॥ २५ ॥ सा चंडिका देवी ततः शुम्भेन समरसाम्यतः तदसहमाना अत एव क्रुद्धा सती तं शुम्भं दैत्यं शूलेनायुधेनाभिजघान । शुम्भः तदा तस्मिन् काले निहतः । यद्वा तदा निहतस्तया देव्या आनिहत आसमंतान्नितरां हतः अत एव मूर्च्छितः सन् भूमौ निपपात । मूर्च्छा संजातास्य मूर्च्छितः स तदा हत इति तु च्छेदे देव्या शूलेन निहतः स शुम्भः आनिहतः न निहतः न मारितः न परासूकृतः । किं तर्हि मूर्च्छितः सन् भूमौ निपपातेत्यर्थः॥२६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ततः परशुहस्तमित्यत्र प्राक् निशुम्भं देवी भूतलेऽपातयदित्युक्तं ततस्तस्य पुनरुज्जीवनपूर्वकं संग्रामं प्रस्तोतुमाहर्षिः । ततः भूतले पतनादनंतरम् । यद्वा ततः शुम्भे मूर्च्छिते सति निशुम्भः प्राङ् मूर्च्छितः पश्चाच्चेतनां संज्ञां प्राप्य आत्तकार्मुकः गृहीतशरासनः सन् शरैर्देवीं चण्डिकां तथा कालीं चामुण्डां केसरिणं सिंहं च आजघान । " आङो यमहनः " इत्यात्मनेपदविधावकर्मकाधिकारात्सकर्मकत्वे तु नात्मनेपदम् । "आजघ्ने विषमविलोचनस्य वक्षः" इत्यत्र तु स्वांगकर्मकाच्चेति वक्तव्यात्मनेपदं वक्षसेत्यध्याहृत्य विषमविलोचनस्य वक्षसा सह संगत्यार्जुनः स्वं वक्षः जघ्ने इत्यर्थः । यद्वा विषमविलोचनस्य समीपो भूत्वार्जुनः स्वं वक्षः आजघ्ने आस्फोटितवानित्यर्थः ॥ २७ ॥ दितेर्जातो दितिजः असुरः दनोर्जाता दनुजास्तेषामीश्वरः स निशुम्भो मायावी पुनश्च बाहूनामयुतं दशसहस्रीं कृत्वा अयुतबा-

ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः॥ आजघान शरैर्देवीं कालीं केसरिणं तथा ॥२७॥ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ॥ चक्रायुधेन दितिजश्छादयामास चंडिकाम् ॥ २८ ॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥ २९ ॥ ततो निशुंभो वेगेन गदामादाय चंडिकाम् ॥ अभ्यधावत वै हंतुं दैत्यसेनासमावृतः ॥ ३० ॥ तस्यापतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारेण स च शूलं समाददे ॥ ३१ ॥

हुर्भूत्वा चक्राणामायुधानामयुतेन दशसहस्र्या चंडिकां छादयामास । " छद संवरणे " ताडयामासेत्यर्थः । "रथांगायुधसैन्येषु चक्रं राष्ट्रसमूहयोः।" ॥ २८ ॥ ततोऽनंतरं दुर्गार्तिनाशिनी दुरुत्तरदुःखदावनी । भगवती दुर्गा चण्डिका देवी क्रुद्धा सती स्वबाणैस्तानि शुम्भेन प्रेरितानि चक्राणि चिच्छेद । किंच निशुम्भप्रहितान् सायकानाशुगांश्च चिच्छेद । दुर्गा गहनाकृतिरार्तिः पीडा तां नाशयंती " सुदुरोरधिकरणे च " इति गमेर्डः । " आर्तिः पीडा धनुःकोट्योः शरे खड्गे च सायकः । षो अंतकर्मणि " स्यति अंतं करोति सायकः ॥ २९ ॥ ततः चक्राशुगभंजनतः निशुम्भः वेगेन गदामादाय गृहीत्वा दैत्यानां सैन्यैः समावृतः परिवृतः सन् चण्डिकां हंतुं ताडयितुमभ्यधावत । " धावु गतिशुद्ध्योः " स्वरितेत्त्वाल्लङ आत्मनेपदम् । जवाहवयोर्वेगः ॥ ३० ॥ आपतत आद्रवत एव आगच्छत एव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आपतनसमसमय एव तस्य निशुम्भस्य गदां चण्डिका देवी शितधारेण तीक्ष्णधारेण खड्गेन मण्डलाग्रेण आशु शीघ्रं चिच्छेद । ततश्च स शुम्भः भग्नगदायुधः शूलमायुधं समादद्दे जग्राह । शूलं गृहीत्वा चण्डिकां हंतुमाडुढौके इति भावः । शिते निशिते द्वे धारे यस्य स शितधारः समादद्दे । " आङो दोनास्य विहरणे " आत्मनेपदम् । यद्वा ञित्त्वादात्मनेपदम् ॥ ३१ ॥ चंडिका देवी अमरार्द्दनम् । " अर्द्द हिंसायाम् " चुरादिः । अर्द्दयते हिनस्ति अर्द्दनः नंद्यादित्वाल्युः । योरनो णिलोपश्च । अमराणामर्द्दनस्तं शूलहस्तं निशुम्भमायांतमागच्छंतं वीक्ष्य वेगेन संभ्रमेण स्वेन यथा स्यात्तथा आविद्धेन उत्क्षिप्तेनागृहीतेन वा शूलेनायुधेन हृदि वक्षसि विव्याध ताडयामास । "व्यध ताडने"। लिटचभ्यासस्योभयेषां सम्प्रसारणम् । आविध्येत्युक्तेऽपि ग्रहिज्यादिना संप्रसारणम् । हृदीति प्रकरणान्निशुम्भस्येति गम्यते । " क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः । प्रयोगतोऽनुवर्त्तव्या अनेकार्था हि धातवः ॥ " तेन आविध्येति विवक्षितार्थसिद्धिः ॥ ३२ ॥ देव्या

शूलहस्तं समायांतं निशुंभममरार्द्दनम् ॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ॥ ३२ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३३ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३४ ॥ ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३५ ॥

शूलेन भिन्नस्य विद्धस्य तस्य निशुम्भस्य हृदयाद्वक्षसः सकाशान्महाबलः महाप्राणसमर्थः महावीर्यः महत्तरवीरकर्मा देवीं प्रतितिष्ठेति वदन् अतः क्व यास्यसि मदग्रतोऽद्योति भाषमाणः अपरः शूलिनः निशुम्भादन्यः पुरुषः पुमान् निःसृतः निरगात् । अपर इति देहे भेदनं तु निशुम्भरूपक्षेत्रज्ञत्वेन । अत एव न परः अपर इत्यर्थोऽनुसंधेयः । " क्षेत्रज्ञ आत्मा पुरुषः । पुरुषावात्ममानवौ " ॥३३॥ तत इति च्छेदः खड्गेन ततः असौ आपतदिति च्छेदः। ततोऽनंतरं देवी स्वनवदुच्चैस्तरां सशब्दं यथा स्यात्तथा प्रहस्य रे रे तिष्ठ तिष्ठ माया शर्वाणी तन्मयीं मायामुपेत्य मामेव हंतुं पुनरुदेष्यसि उदेहि पुनस्तर्हि प्रहरिष्यामीति हसित्वा तस्य निष्क्रामतः पुरुषस्य प्राक्तननिशुम्भशरीरान्निर्गच्छतः निशुम्भदैत्यावतारस्य शिरः मस्तकं खड्गेन चिच्छेद । ततोऽसौ तु निशुम्भो भुवि रणक्षितौ अपतत् ॥ ३४॥ निशुम्भे मृते ॥७३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदन्यांस्तदीयानसुरान् किं चकार देव्यतः परमित्यत आहार्षिः । ततः निशुम्भपतनादनंतरम् । यद्वा ततः निशुम्भादपरान् कानप्यसुरान् सिंहः देवीवाहनं पंचास्यः चखाद भक्षयामास । कथंभूतान् उग्रान् रौद्रान् । यद्वा उग्रदंष्ट्राभिः क्षुण्णाः संपिष्टाः शिरोधरा ग्रीवा येषां ते तान् शिरोधरः शिरोधिः । धरतीति धरः पचाद्यच् शिरसो धरः । शिरो धरतीति विग्रहे कर्मण्यण् (?) ततः सिंहभक्षितेभ्योऽपरांस्तानसुरान् काली चामुण्डा चखाद । तथापि सिंहकालीखादितशेषाः येऽपरेऽसुराः दैत्यास्तान् शिवदूती चखाद । चंडिकाशरीरतो निष्क्रांता शक्तिः शिवदूतीत्युच्यते । उग्रमिति पाठे रौद्रं भयंकरं यथा स्यात्तथा दंष्ट्राक्षुण्णशिरोधरानसुरान् सिंहः काली शिवदूती चखादेत्यर्थः ॥ ३५ ॥ केचिन्महासुराः कौमार्याः शक्त्या आयुधेन निर्भिन्नास्ताडिताः संतः नेशुः । " णश् अदर्शने " । अत्यंतादर्शनमत्रादर्शनं न पश्यंति स्म प्राणानित्याहुः । अन्ये महासुराः ब्रह्माण्याः शक्तेः मंत्रः गुप्तभाषणीयो वर्णमयो निगमागमाद्योपदेशगम्यः प्रणवादिः । तेन पवित्रीकृतेन तोयेन

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः॥ ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः॥३६॥ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥
वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि ॥३७॥ खंडंखंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ॥३८॥

वारिणा निराकृताः प्रमथादयस्ताः ॥ ३६ ॥ माहेश्वरस्येयं माहेश्वरी तस्याः शूलेन भिन्नाः विदारिताः संतः अपरे दैत्याः रणभूमौ पेतुः पतंति स्म । वराहस्य भगवतो विष्णोः शक्तिर्वाराही तस्यास्तुंडं वक्रं पोत्रं वक्त्राग्रं तेन कृतो घातस्ताडनं प्रहारः । तेन केचिदसुराश्चूर्णिताः भुवि पेतुः ॥ ३७ ॥ विष्णोरियं वैष्णवी शक्तिर्देवता तया चक्रेण वैष्णवायुधेन केचिद्दानवाः खंडंखंडं कृताः खंडत्वप्रकारं प्रापिताः खंडीकृताः शकलीकृता इति यावत् । " प्रकारे गुणवचनस्य" इति द्विर्वचनम् । खंडखंडमिति पाठे " कर्मधारयवदुत्तरेषु " इति कर्मधारयत्वातिदेशात्सुपो लुक् । खंडसदृशाः कृता इत्यर्थः । प्रकारो भेदः सादृश्यं च । तदिह सादृश्यं गृह्यते । नन्वत्र दानव इत्येकवचने भवितव्यम् । कर्मधारयवदित्यतिदेशेऽपि खंडाः कृता इति भवितव्यं पुंल्लिंगेन च । अत्राहुः । खंडशब्दस्य गुणवचनत्वाद्गुणमुक्त्वा गुणिनि यो वर्त्तते स गुणवचन इति गुणवचनस्य लक्षणम् । तस्माद्गुणवचनः विशेषणं च भवति इति क्रियाविशेषणानां कर्मत्वं पुंनपुंसकैकत्वं भवतीति वक्तव्यमिति न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बहुवचनं नापि पुँल्लिंगमिति । अन्ये त्वाहुः । खंडखंडमिति च योगोऽयं चतुरक्षर इति । इंद्रस्य इयं शक्तिरैंद्री तस्या हस्ताग्रं तेन विमुक्तं प्रेरितं वज्रं तेन अपरे दानवाः विनेशुः विनष्टाः ॥ ३८ ॥ केचिदसुराः महाहवं युद्धं प्राप्य कर्मणि ल्यब्लोपे पंचमी । केचित्त्वसुराः महतः आहवात्सकाशान्नष्टाः पलाय्य गताः । अपरे निशुम्भसैन्येऽवशिष्टा असुराः सर्वेऽपि काल्या चामुंडया चंडिकादेहनिष्क्रांता शिवदूती तया मृगाधिपः देवीवाहनं सिंहः तेन च भक्षिताः खादिताः । कर्मणि क्तः । काली च शिवदूती मृगाधिपश्च । "चार्थे द्वंद्वः । परवल्लिंगं द्वंद्वतत्पुरुषयोः" । एवं निशुंभे निशुम्भसैन्यं च देव्या संग्रामे न्यपाति ॥३९॥ इति मार्कंडेये राजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां निशुम्भवधो नाम नवमोऽध्यायः॥९॥ अथ शुंभो दैत्येश्वरः प्राणसंमितं प्राणतुल्यं भ्रातरं निशुंभं दृष्ट्वा देव्या निहतं बलं च सैन्यं हन्यमानम् । " वर्त्तमानसामीप्ये वर्त्तमानवद्वा " इति कर्मणि लटः शानच् । हतं दृष्ट्वा क्रुद्धः सन् देवीं वचनमब्रवीत् । ब्रुवि-

केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ३९ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुंभवधो नाम नवमोऽध्यायः ॥ ९ ॥ ऋषिरुवाच ॥ निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥ १ ॥ बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह ॥ अन्यासां बलमाश्रित्य युध्यसे यातिमानिनी ॥ २ ॥

र्द्विकर्मकः । देव्या निशुंभो निपातित इति व्यपदेशमात्रमेतत् । स खलु मे प्राणभूतः स च निहतो हंत मे प्राणा एव हताः किमतः परमवशिष्टमिष्टमिति सूचयितुं प्राणसंमितमित्युक्तम् ॥ १ ॥ शुंभो देवीमाह । हे दुर्गे दुष्टे सर्वदानवनाशिनि, सा त्वं गर्वमहंकारं मा वह मा आश्रय । कस्माद्गर्वं मा आवह । बलावलेपात् । अवलेपोऽत्र लेपनं लेपः सम्बंधः अवकृष्ट आश्रितः संबंधः अवलेपः बलस्य सामर्थ्यस्यावलेपात् । " अवलेपस्तु गर्वे स्याल्लेपने भूषणेऽपि च ।" अत्र सम्बन्धार्थः ।गर्वार्थे गृह्यमात्रे बलावलेपाद्बलगर्वाद्गर्वं मा आवहेत्यनेनान्वयेन विद्यागर्वाद्गर्वं करोतीति वेदाधिक्यं दोषः स्यात् । बलाद्गर्वं मा वहेत्येतावतैव निराकांक्षत्वस्य सिद्धत्वादवलेपादित्यस्याधिकत्वेन वैयर्थ्यं स्यात् । सा त्वमित्युक्तं सा केत्याह । या त्वमन्यासां ब्रह्माण्यादीनां बलमाश्रित्यातिमानिनी सती नितरामहंकारवती सती युध्यसे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदित्थं कथमसि त्वमतिमानिनी यदन्यबलेन युध्यसे नतु स्वबलेनेति शुम्भाभिप्रायः । युध्यसे चेति पाठे चशब्दः स्वव्याघातकतां समुच्चिनोति देव्याः । तथाहि त्वं बलस्य दर्पादौद्धत्याद्गर्वं मा आवह अथ च ते बलमेव नास्ति । कुतस्ते बलावलेपः संगतः बलं तु तदन्यदीयं सैषा ते व्याहतिः । अन्यासां बलमाश्रित्य युध्यसे च अतिमानिनी चेति यद्यन्यबलेन युध्यसे कुतस्ते तर्ह्यतिमानिनीत्वम् । यद्यपि मानिनी त्वं कुतस्ते तर्हि योद्धुमन्यबलाश्रयणं युज्यते कर्तुं तस्मादस्माद्व्याघाताच्च तत्समुच्चयप्रसंगो मा भूदिति शुंभाभिप्रायांतरम् । अतिमानिनि इति संबुद्ध्यंतत्वपाठे तु सोल्लुंठमेतत् । त्वं खल्वखिलैरपि शूरमानिभिर्मुख्या क्रियसे । अथ तर्हि कथं त्वमन्यासां बलमाश्रित्य युध्यसे । अतस्ते कुतो मानः कुतस्तरां त्वं मानिनी कुतस्तमां च त्वमतिमानिनीत्याहूयसे । ततस्तरां ततस्तमां च मा गर्वमावहेति शुम्भाभिप्रायांतरमेतत् । अथवा त्वमसत्यसंधाप्यासि यतस्ततो दुष्टासि । हे दुष्टे, यदुक्तं त्वया यो मां जयति संग्रामे यो मे इति त्वया संग्रामे किं कृतं किं च त्वन्यासां बलमासाद्य युध्यसे। काल्या चण्डमुण्डौ निहतौ तद्बलं त्वत्सिंहेन संवृतं रक्तबीजरक्तपानं काली किल कलयामास। निशुंभोऽपि ब्रह्माण्यादीनां बलमाश्रित्य निपातितः । अस्मद्बलान्यपि ताभिरेव निहतानीति तस्मात्संग्रामप्रतिज्ञापि कदर्थिता त्वयेति साधूक्तं हे दुष्टे, इति शुम्भाभिप्रायांतरम् । देवीपार्षदाभिप्रायस्त्वन्यः । बलावलेपादुष्टे इत्येकं पदं संबुद्ध्यंतं चैतत् । हे बलालेपादुष्टे हे दुर्गे, सा त्वं गर्वं दर्पमावह आश्रय । अवलेपोऽहंकारः । "अत सातत्यगमने" । आङ्पूर्वः क्विप् । आसमंतादतति आत् । बले सैन्ये सामर्थ्ये च विषये अवलेपो गर्वस्तेन आत् सततमुपद्रोतुमागतामुपद्रोता यः स बलावलेपाद्दैत्यः उपद्रवकारी तस्मिन्विषये दुष्टा हिंस्रा । तस्याः संबोधनम् । किंभूता त्वं मा लक्ष्मीर्लोकमाता किंविशिष्टं गर्वमन्यासां द्वितीयांतमेतदाकारांतं प्राणिहितमुत्पाद्य हिंसकम् । "श्वस प्राणने । अन च" इत्येत इत्ययं धातुः । अनिति (अनः पचाद्यच् अनाय) प्राणिनोहितः अन्यः प्राणिहितं मुन्यादि । "षो अंतकर्मणि" । अदंतत्वात् छांदसो विच् प्रयोगतो भाषायां च स्यात् । तमन्यं प्राणिहितं मुन्यादि न स्यति न अंतं नयति असाः । अन्यस्य असाः अन्यासाः तमन्यासाम् । आकारांतपुँल्लिंगद्वितीयैकवचनांतं पदम् । सोमपामितिवत् । प्राणिहितं मुनिजनरक्षणमित्यर्थः । येन गर्वेण सात्त्विकरक्षणं भवति तं गर्वं कुर्वित्यर्थः । या त्वं बलमाश्रित्य युध्यसे किंविशिष्टा त्वमतिमानिनी । "मान पूजायाम्" माननं मानः भावे घञ् । सोऽस्त्यस्या मानिनी अतितरां मानिनी अतिमानिनी अत्यर्थपूजायुक्तेत्यर्थः । इत्थमयं देवीष्टाभिप्रायो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

देवीपार्षदैरूहितोऽवधारणीयः । बलावलेपादुष्टे त्वमिति पाठे बले विषये अवलेपेन गर्वेण आसमंतात् दुष्टा विकृता विरुद्धा । इति शुंभानुकूलोऽप्यर्थः । देव्यनुकूलोऽर्थस्त्वेषः । बलावलेपेन अदुष्टा अविकृतेत्युभयत्राप्यर्थभेदोऽवगंतव्यः ॥ २ ॥ हे दुष्ट हे असूयक हे शुम्भ, अत्रास्मिञ्जगति भुवनत्रयेऽपि अहमेकैव । "एकमेवाद्वितीयम्" इति श्रुतेः परमात्मरूपाहमेकैवास्मि । यद्वा अहमहंकाररूपा मायाकृतिः चण्डिकाख्यया एकाहमस्मि । मम देव्याः द्वितीया परा नास्ति । अस्ति चेत्कथंचन सा मदन्या नैव । हे शुम्भ, इतः पश्य । एताः ब्रह्माण्याद्याः मद्विभूतयः मय्येव देव्यामेव विशंत्यः संति । मम देव्याः विभूतयः कायव्यूहसृष्टिसम्पदः पश्य मृगो धावति इतिवद्वाक्यार्थरूपं कर्मेह द्रष्टव्यम् । एताः शक्तयः मत्कायव्यूहसिद्धिसंसिद्धसृष्टिसम्पदः मद्विभूतयः मदवताराः मय्येव विशंत्यः इति यत्तत्पश्येत्यर्थः । यद्वा । जगदेव जगती एकैवाहं जगती एकैव जगती अहम् । अत्र ऐक्ये सति अत्रत्यामेकस्यां मयि जगत्यां ऐक्येन स्थितायां सत्यां मत्तो जगतीतः सकाशाज्ज-

देव्युवाच ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥ ३ ॥
ऋषिरुवाच ॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ ४ ॥

गतीतो मत्तः सकाशाच्चापरा द्वितीया व्यक्तिः का मम स्यात् । न कापि । तस्मान्मज्जगत्योरैक्यात् । हे दुष्ट हे असूयक, इतः पश्य । "जगतो नाहमन्या स्यां स्यान्मदन्यज्जगच्च न । जगतो मम चाप्यैक्याद्व्यक्तिरन्या ततोऽस्तु का ॥ अहं च जगती चैका जगती मन्मयी यतः । दुग्धवद्दधि चाप्येकं दधि दुग्धमयं यतः॥" दुष्टेति । "परस्त्रीलोलुपत्वेन स्वस्त्री त्यक्ता धवैर्यतः । हंति वैवस्वतो राजा नृणामायुःशतं च तत् ॥ मद्वाक्यं हि शिवेनोक्तं त्वया त्यक्तं दुरात्मना । अतस्त्वां शुम्भ हन्म्याजौ हतदैवं हतप्रभम् ॥ इत्यभिप्रायतो देव्या हे दुष्टेत्यभ्यभाषितः । अथ वैतन्न बोध्यं चेत् फलव्यक्तिर्भविष्यति ॥" ॥३॥ हे सुरथ, ततः मय्येव विशंत्यः संति शक्तयः इत्युक्तेरनंतरं ताः समस्ताः अष्टौ ब्रह्माणीप्रमुखाः शक्तयः देव्यः देवतास्तस्या आद्यायाः देव्याः चण्डिकायाः एव तनौ शरीरे लयमैक्यं जग्मुस्तदा अम्बिका देवी एकैवासीत् अद्वितीयांबिकैवातिष्ठत् एकैव जाता ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हे शुम्भ, इह रणक्षितौ अहं चण्डिका देवी बहुभिरनेकैः यैः कृत्वा विभूत्या विभवेन विभुत्वेन व्यापकत्वेनैश्वर्येण वा यद्बहुत्वमास्थिता अंगीकृतवत्यस्मि तद्बहुत्वं मया संहृतम्। तस्मादहमेकैव तिष्ठामि त्वमाजौ युद्धे स्थिरो भव। यत्तदिति बहुत्वसामान्यमपेक्ष्यैकवचनम्। आस्थितेति गत्यर्थाकर्मकसूत्रेण तिष्ठतेः कर्तरि क्तः। आजौ इति पदं काकाक्षिगोलकन्यायेनोभयत्रापि सम्बध्यम्। अहमेकैव तिष्ठाम्याजौ आजौ त्वं स्थिरो भवेति ॥ ५ ॥ ततोऽनंतरं देव्याः शुम्भस्य च उभयोः युद्धं प्रववृते प्रावर्तिष्ट। कीदृशं सर्वेषां देवानामसुराणां च पश्यतामालोकयतामुभयेषां दारुणं भयंकरम्। यदि शुम्भो जेष्यति तदा देवानां शुम्भतो भयं स्यात्। यदि च देवी जेष्यति तदासुराणां देवीतः भयं स्यात्। तस्मादुभयेषां दारुणम्। यद्वा पश्यतामित्युक्तत्वाद्द्रष्टॄणां भयहेतुस्तद्युद्धमित्यर्थः। उभयशब्दः संख्यावाचित्वात्सर्वतो मत्वा वाच्यलिंगतावगंतव्या ॥ ६ ॥ भूयः बहुतरमित्यर्थः। भूपेति पाठे सुरथस्य सम्बोधनम्। हे भूप, सुदारुणैः बाणवृष्टिभिस्तयोर्देव्याः शुम्भस्य च युद्धमभूत्।

देव्युवाच ॥ अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥५॥ ऋषिरुवाच॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ ६ ॥ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥७॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका ॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥८॥

ततश्च उभयोर्देव्याः शुम्भस्य च यल्लिंगं तदिह स्यादिति होमशब्दस्य स्त्रीपुँल्लिंगम्। तथा तद्वत् शितैस्तेजितैस्तीक्ष्णैः शस्त्रैः सुदारुणैः सुष्ठु भयंकरैः खड्गादिभिः हस्ताग्रग्राह्यैरायुधैः सर्वलोकभयंकरं युद्धमभूत्। तथा शितैः सुदारुणैः घोरतरैरस्त्रैश्च मंत्रवद्भिः सायकैः क्षेप्तव्यैः। आयुधभेदादेर्युद्धभेदः। आयुधसाम्याद्युद्धसाम्यम्। तथास्त्रैश्चैवेति पाठे स एवार्थः। तुल्यजातीयैरायुधैस्तौ युयुधाते इत्यर्थः ॥ ७ ॥ अथ अंबिका देवी दैत्येंद्रविषये यानि शतं शतं शतशः दिव्यानि दिवि भवानि दिव्यानि समन्त्राणि सदैवतानि अस्त्राणि मुमुचे प्रयुक्तवती। तानि दैत्येंद्रः शुम्भस्तत्प्रतीघातकर्तृभिः तत्तदस्त्रविध्वंसिभिरस्त्रैर्बभंज। "भंजो आमर्दने"। योगेन खंडयामास। आग्नेयास्त्राणि वारुणास्त्रैर्विघ्नितानि वारुणास्त्राणि वायव्यास्त्रैर्विघ्नितानि वायव्यास्त्राणि पवनाशनपन्नगास्त्रैर्विघ्नितानि पन्नगास्त्राणि गरुडास्त्रैरित्थमन्या-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्यपि प्रत्यस्त्राण्यस्त्रशास्त्रसिद्धान्यवगंतव्यानि । “द्युप्रागपागुदक्प्रतीचो यत्” शैषिकः । मुमुचे “मुच्ऌ मोक्षणे” । तेषामंबिकाप्रयुक्तानां प्रतीघातः विघातः । “उपसर्गस्य घञ्यमनुष्ये बहुलम्” दीर्घः । तस्य कर्तॄणि प्रत्यस्त्राणि तैः । जनिकर्तुः प्रकृतिरिलिंगात्समासः ॥ ८ ॥ परमेश्वरी चण्डिका तेन मुक्तानि प्रेरितानि दिव्यानि दिवि भवानि उग्रहुंकारोच्चारणादिभिर्लीलयैवाप्रयत्नेनैव बभंज भनक्ति स्म । आदिशब्दादस्त्रैश्च । उग्रः रौद्रः । स एव हुमिति रोषेणोच्चरणं शब्दस्तदादिभिरस्त्रैः। परमा ईश्वरी परमेश्वरी ॥ ९ ॥ ततः दिव्यास्त्रभंजनानंतरं सः असुरः शुम्भः देवीं चण्डिकां शराणां शतैरसंख्यातैः शरसहस्रैश्चाच्छादयत । “छद संवरणे” चुरादिः पिहितौ आङ्पूर्वः । लङ् णिचश्चेत्यात्मनेपदम् । सा च देव्यपि तत्कुपिता तादिति हेतौ पृथक् पदम् । तस्माच्छरशतैराच्छादनाद्धेतोः कुपिता सती । इषुभिर्बाणैर्धनुश्चापं शुम्भस्य शरासनं चिच्छेद ।

मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥९॥ ततश्शरशतैर्देवीमाच्छादयत सोऽसुरः ॥ सा च तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ ११ ॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत तां हंतुं दैत्यानामधिपेश्वरः ॥ १२ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥ १३ ॥

इषुभिरिति बहुवचनं पुनःपुनर्धनुश्छेदं पुनःपुनर्द्धनुर्ग्रहणं सूचयितुमाश्रितमन्यथैकस्य धनुषश्छेदे कर्त्तव्ये धनुश्छेदं चेषुणेत्येव ब्रूयादनंतामोघशक्तित्वाद्देवीषोः ॥ १० ॥ अथ दैत्येंद्रः शुम्भः धनुषि शरासने देव्या छिन्ने सति तथाप्रकारेण शक्तिमायुधमाददे जग्राह । अथ देवी अस्य शुम्भस्य करे स्थितां प्रेषयितुं गृहीतां तां शक्तिमपि चक्रेणायुधेन छिच्छेद करोत्थितामिति पाठे करादुत्थितां उदयं यांतीम्। अपिशब्द उक्तसमुच्चये । प्राग् धनुश्चिच्छेद तदनु शक्तिमपि समाददे इत्यपि पाठे स एवार्थः ॥ ११ ॥ ततः शक्तिच्छेदनानंतरं दैत्यानामाधिपाः धूम्रलोचनादयः तेषामीश्वरः शुम्भः खड्गं चंद्रहासमुपादाय भानुमत् किरणयुक्तं शतचंद्रं शतं लिखिताः चंद्राः यस्मिन् फलके तत्फलकं च गृहीत्वा तां देवीं हंतुमभ्यधावत ॥ १२ ॥ चंडिका देवी तस्य आपतत एव्यत एव शुम्भस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

आशु तत्क्षण एव धनुर्मुक्तेश्चापात्सकाशान्निर्गमितैः शितैस्तीक्ष्णैर्बाणैरर्ककरामलमर्ककैः संगतैराश्लिष्टत्वात् प्रतिफलितार्ककिरणत्वादमलं खड्गं चिच्छेद । अथ च बाणैरर्ककरामलं प्रति फलितैरर्कस्य करैः सह संपर्कलाभादमलं फलकं च चिच्छेद । बाणैरिति बहुवचनात् खड्गं चूर्णयांचकारेति सूच्यते ॥ १३ ॥ न केवलं खड्गं चर्म च चिच्छेद अपि तु अश्वांश्च छित्त्वा शरैः पातयामास । सारथिना सह रथं च पातयामास व्यत्यस्तावयवं चकार । तदा स दैत्यः घोरं भयंकरं मुद्गरं घनं जग्राह । कदिशः हताश्वः निहतरथवाहनः छिन्नधन्वा छिन्नं धनुर्यस्य बहुव्रीहौ धनुषश्चेत्यनङ् समासांतः । विसारथिः सारथिरहितः । अंबिकाया निधने उद्यतः कृतोद्यमः ॥१४॥ सा देवी निशितैस्तीक्ष्णैः शरैरापततः प्रहर्तुमिच्छतः शुम्भस्य मुद्गरमायुधविशेषं चिच्छेद । तथापि छिन्नमुद्गरोऽपि वेगवान् वेगधारी मुष्टिमुद्यम्य ऊर्ध्वीकृत्य

अश्वांश्च पातयामास रथं सारथिना सह ॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ १४ ॥ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥ १५ ॥ स मुष्टिं पातयामास हृदये दैत्यपुंगवः ॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ १६ ॥ तलप्रहाराभिहतो निपपात महीतले ॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥ १७ ॥

तां देवीमभ्यधावत् । सर्त्तेस्त्वरितायां गतौ धावादेशः ॥१५॥ स दैत्यपुंगवः शुम्भो देव्या वक्षसि मुष्टिं रत्निं बद्धांगुलिसंनिवेशं पातयामास प्रयुक्तवान् । " अक्लीबे मुष्टिरत्नी द्वौ "। पुमान् गौः पुंगवः " गोरतद्धितलुकि " इति टच् समासांतः। दैत्यः पुंगव इव बलवान् । " स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥" उपमितं व्याघ्रादिभिः सामान्याप्रयोगे समस्यते । सा तदा देवी तलेन करतलेन तं शुम्भमपि उरसि वक्षस्यताडयत् । " अस्त्री तलमधोदेशे स्वरूपे पृष्ठतस्तलम् । वितस्तौ च चपेटे च ततो ज्यारक्षणे तलम्॥"॥१६॥स दैत्यानां राजा शुम्भः । "राजाहःसखिभ्यष्टच्"। देवी कृततलप्रहारेण चपेटघातेन अभिहतः वक्षसि ताडितः महीतले निपपात । अथ स दैत्यराजः सहसा वेगेन अतर्क्येण बलेन च पुनः तथैव निपतनात् प्रागिव उत्थितः उदस्थादुच्चैः स्थितिमाप॥१७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महीतलादुत्पत्य उड्डीय देवीं प्रगृह्य गृहीत्वा उच्चैर्गगनमाकाशमास्थितः आरूढः । आङ्पूर्वात्तिष्ठतेः सकर्मकाद्गत्यर्थाकर्मसूत्रेण कर्त्तरि क्तः । आस्थितवान् आङः स्थः प्रतिज्ञानमर्थः गगनं स्थानत्वेन प्रतिज्ञातवान् । तत्रापि गगनेऽपि सा चंडिका निराधारा निरधिकरणा सत्येव तेन सह युयुधे । यद्वा " निर्निश्चयनिषेधयोः " । निश्चयश्चाबाध्याध्यवसायः निराधारा अहमेव सर्वशक्तिसमन्विता शत्रुमुपसंहरिष्यामीति निश्चयज्ञानाधारा । यद्वा चंडिकाशब्दब्रह्मरूपतया आकाशस्थितया साधारत्वादंनिराधारां ॥ १८ ॥ तदा गगनारोहणकाले प्रथमं खे आकाशे दैत्यः शुम्भः चंडिका च दुर्गा परस्परं नियुद्धं बाहुयुद्धं नाम प्रधनं चक्रतुः चक्राते । कीदृशं नियुद्धं सिद्धाश्च मुनयश्च सिद्धमुनयः । ननु च द्वंद्वे घिपूर्वं स्यात् नैतत् प्राप्तस्य च बाधास्येयेऽपि । (?) यद्वा सिद्धैः सहिता मुनयः तेषां विश्वावसुप्रभृतीनां मुनीनां नारदादीनां पश्यतां विस्मयस्याश्चर्यस्य कारकं जनकम् । इह केचित्सिद्धमपनीय युद्धं पेठुः । नियुद्धं नाम युद्धं प्रथमं चक्रतुरित्यर्थः । केचित्तु

उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ तत्रापि सा निराधारा युयुधे तेन चंडिका ॥ १८ ॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परम् ॥ चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥ १९ ॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥ २० ॥ स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्यधावत दुष्टात्मा चंडिकानिधनेच्छया ॥ २१ ॥

प्रथममपनीय प्रधनं पेठुः । " कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः । समासवच्च बहुलम् " इति सुडमौ । परस्य क्रियायां परः करोति परस्यापि परः परस्परम् ॥ १९ ॥ अंबिका देवी तेन शुम्भेन सह सुचिरं चिरतरं कालं नियुद्धं कृत्वा ततोऽनंतरं शुम्भमुत्पात्य उत्क्षिप्य चरणमुद्धृत्य भ्रामयामास ततो भ्रामयित्वा तं शुम्भं वलयाकारेणोर्ध्वतः भ्रामयित्वा धरणीतले चिक्षेप पातयामास।इह भ्रमणे अमंतत्वान्मित्त्वात् "मितां ह्रस्वः" इति ह्रस्वत्वम् । भ्रमयामासेति सभ्यः पाठः। यद्वा वेत्यनुवर्त्य मितां ह्रस्वः सा च व्यवस्थितविभाषा । तेन क्वचित्प्रयोगे पुराणादौ संक्रामयतीतिवद्भ्रामयामासेत्यपि सभ्य एव । इह उत्पाद्य उत्पात्य उत्क्षिप्येति पाठत्रयम् । " भ्रमु अनवस्थाने " णेरयादेशः । " क्षिप प्रेरणे " लिट् ॥ २० ॥ देव्या क्षिप्तः स दुरात्मा शुम्भः धरणीं प्राप्य वेगितः संजातवेगः सन् । वेगत इति पाठे ॥७७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेगात् वेगवानिति वा पाठः । चण्डिकानिधनेच्छया मुष्टिमुद्यम्य उत्क्षिप्य उद्यतं कृत्वाभ्यधावत । देवीत्यर्थ उच्यते । चण्डिकायाः सकाशात्प्राप्तव्यं यत् निधनं मरणं तत्रेच्छया यतः अभ्यागच्छत् । अथात्यये पलाय्य चेद्गच्छेदसौ न म्रियेतैवेति । दुष्ट आत्मा स्वभावो यस्य सः । "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।" ॥२१॥ सर्वेषां दैत्यानां जनेश्वरं राजानं शुम्भं ततो देवी वक्षसि उरसि शूलेन भित्त्वा विदार्य जगत्यां भूमौ पातयामास । "जगती जगतीच्छन्दोविशेषेऽपि क्षितावपि ।" ॥ २२ ॥ देव्याः शूलमायुधं तस्याग्रं तेन विक्षतः हतः । "क्षिणु क्षणु हिंसायाम्" द्वावपि णांतौ तनादी । तेन क्षितः क्षत इति पाठद्वयम् । कर्मणि क्तः । "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" । स शुम्भः गतासुः निर्गतप्राणः सन् उर्व्यां भूमौ पपात । किं कुर्वन् सकलां देवीं पृथ्वीं चालयन् । कथंभूतां पृथ्वीं अब्धयश्च द्वीपाश्च तैः सह वर्त्तमानाम् । पुनः कीदृशीं सपर्वतां पर्वतैः सह वर्त्तमानाम् । चालयन्निति । "चल कम्पने" णिचि कम्पने चलिर्मित् ।

तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् ॥ जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥ २२ ॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २३ ॥ ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥२४॥ उत्पातमेघास्सोल्का ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्गवाहिन्यस्तथा शुंभे निपातिते ॥ २५ ॥

वायुश्चलयति वल्लीमीषत्कम्पयति । अन्यत्र न मित् वायुश्चालयति घनश्रेणीं देशांतरं प्रापयतीत्यर्थः । अत्र तु स्थानांतरप्रापणं धात्वर्थः तेनात्र मित्त्वाभावात् ह्रस्वत्वाभावः । कश्चिदाह । चलनं चालः तं करोति णिच् लटः शतृप्रत्ययः प्रयोजकव्यापाराभावाण्णिचोऽत्रासंभवादिति तन्न । मृतस्यापि उपचारात्स्वाभाव्याद्वा प्रयोजकव्यापारसंभवात् । मृतः पुत्रो मातरं रोदयति धनमानंदयतीतिवन्मृताचेतनयोरप्यस्त्येव प्रयोजकव्यापार इति प्रागुक्त एव मित्त्वभावाभावोपाय आश्रयितव्यः॥२३॥ देव्या तस्मिन् दुरात्मनि शुम्भे हते सति ततो हेतुतः अखिलं विश्वं प्रसन्नमभवत् । तथाहि । जगल्लोकः स्वास्थ्यमनाकुलत्वमतीव अतितरामाप । नभः आकाशं च निर्मलं निष्पांसु अभवत् । "विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् । "विष्टपं भुवनं जगत्" ॥ २४ ॥ प्राक् शुम्भमरणात्पूर्वं सोल्काः उल्कासहिताः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ये उत्पातमेघाः देवलोकशुभाय चागताः । शांतिमगमन्निति भावः । उल्का ज्वाला । यदाहुः । "लंका शेफालिका टीका धातकी पञ्जिकाढकी । सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका ॥" देव्या शुंभे निपातिते सति तथा अनाकुलाः सरितः नद्यः मार्गवाहिन्यः मार्गाददूरगा आसन् । पूर्वमाकुलत्वादुत्पथगामिन्यः अधुना तु तद्वैपरीत्यमितास्ता इति भावः ॥ २५ ॥ देव्या तस्मिञ्छुम्भे निहते सति ततो हेतुतः सर्वदेवगणाः इंद्रादयः हर्षनिर्भरमानसाः निःशेषेण भरः पोषः पूर्णता यत्र तानि निर्भराणि हर्षेण निर्भराणि मानसानि येषां ते बभूवुः । अथ च गंधर्वाः हाहाहूहूप्रभृतयः ललितं मनोहरं यथा स्यात्तथा देव्याः पराक्रमं जगुः गायंति स्म ॥ २६ ॥ गीतमुक्त्वा वाद्यं नृत्यं चाह । देवगणविशेषाः अवादयन् तथान्ये एवाप्सरोगणाः ननृतुः नृत्यंति स्म । वाताः पुण्याः शैत्यमांद्यसौरभ्य-

ततो देवगणास्सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते तस्मिन् गंधर्वा ललितं जगुः ॥ २६ ॥ अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वातास्सुप्रभोऽभूद्दिवाकरः ॥ २७ ॥ जज्वलुश्चाग्नयश्शांताः शांता दिग्जनितस्वनाः ॥२८॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभवधो नाम दशमोऽध्यायः ॥ १० ॥ ऋषिरुवाच ॥ देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्नि-पुरोगमास्ताम् ॥ कात्यायनीं तुष्टुवुरिष्टलम्भाद्विकासिवक्त्राब्जविकासिताशाः ॥ १ ॥

युक्ताः ववुः वांति स्म पुण्याः रजःशून्याश्च । तथा दिवाकरः सूर्यः सुप्रभः सुतेजस्कः अभूत् ॥ २७ ॥ अग्नयः आहवनीयादयः शांताः निर्मलाः संतः जज्वलुः ज्वलंति स्म । "ज्वल दीप्तौ" । लिट् उस् । शुंभे निहते यज्ञाः प्रवृत्ता इत्यर्थः । दिग्जनितस्वना उत्पातशब्दाः शांता उपशांतिमगुः । यद्वा दैत्यार्दितदेवादि-हाहाकारस्वनाः शांता इत्यर्थः ॥ २८ ॥ इति मार्कंडेये राजाधिराजतोमरान्वयश्रीशंतनुविरचितायां देवीमाहात्म्यटीकायां शुम्भवधे दशमोऽध्यायः ॥ १० ॥ देव्या चण्डिकया तत्र संग्रामे महासुरेंद्रे शुम्भे हते सति सेंद्रा इंद्रसहिताः वह्निपुरोगमाः अग्न्यादयः सुरा देवा इष्टलाभात् शुम्भनिहतलक्षणात्संतुष्टाः अत एव विकासिवक्त्राः दीप्तवदनाः प्रसन्नमुखाः सुष्ठु विकासिता आशा दिशो येषां ते तां शुम्भमर्दिनीं कात्यायनीं चण्डिकां तुष्टुवुः । "ष्टुञ् स्तुतौ" । विकाशिवक्त्राब्जविकाशिताशा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इति पाठे । "काश दीप्तौ" तालव्यांतः । काशनं काशः काशो येषां तानि काशीनि विकाशीनि वक्त्राण्येव अब्जानि कमलानि यासां ताः विकाशिवक्त्राब्जाः । काशः संजातो यासां ताः काशिताः विशेषेण काशिताश्च आशाश्च विकाशिताशाः। काशितांसा इति पाठे सुरा इष्टलाभाद्विकाशिवक्त्राब्जाः विकाशितांसाश्च भवंति । अंसो भुजशिरः । ततः कर्मधारयः । महांतो सुरास्तमिंद्रे श्रेष्ठे कतो महर्षिस्तस्यापत्यं स्त्री गर्गादिपाठात्कात्यशब्दाद्गर्गादियञंतात् " सर्वत्र लोहितादिकतंतेभ्यः " इति ष्फः। षित्त्वात् ङीष् । फस्यायनादेशः कात्यायनी ॥१॥ देवा ऊचुः । देवीं स्तोतुं स्तवोपयोगीनि वाक्यानि उक्तवंतः प्रपन्ना अनन्यशरणाः शरणार्थिनः भक्तिनम्रास्तेषामार्तिं पीडां हरतीति प्रपन्नार्त्तिहरा । "हरतेरनुद्यमनेऽच्" स्त्रियां टाप् । हे प्रपन्नार्त्तिहरे देवि, त्वं प्रसीद प्रसन्ना भव । पाघ्रादिना सदेः सीदभावः । अखिलस्य जगतः मातः जननि, त्वं प्रसीद । हे विश्वस्य ईश्वरि व्यापिके, त्वं प्रसीद । हे देवि, त्वं विश्वं पाहि लक्ष्मीरूपेण सर्वं जगद्रक्ष । हे देवि, त्वं चराचरस्य

देवा ऊचुः ॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ २ ॥

आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि ॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ॥ ३ ॥

त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया ॥ संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ४ ॥

जगतः ईश्वरी विष्णुमायात्मतया व्यापिकासि । चराश्चाचराश्च चराचरम् । " सर्वो द्वंद्वो विभाषैकवद्भवति " अन्यथा " चर गतौ " पचाद्यच् । चरिचलिपतिवदीनामच्याक्चाभ्यासस्येत्यनेन चराचरम् । जंगमात्मकमेव स्यान्नाजंगममपि । यदाहुः । " चरिष्णु जंगमचरं त्रसमिंगं चराचरम् ।" ॥ २ ॥ हे देवि, त्वं यतः हेतोः पृथिवीस्वरूपेण स्थितासि । अतः जगतः विश्वस्याधारभूता त्वम् एकैव नान्या । हे अलंघ्यवीर्ये लंघितुमशक्यबले, अपां स्वरूपस्थितया त्वयैव एकया एतत्कृत्स्नं जगदाप्यायते सर्वमाप्यायते । " प्यायी वृद्धौ " णिच् कर्मणि लट् । अपां जलानां स्वरूपेण स्थितया त्वया ॥ ३ ॥ हे देवि, त्वमनंतवीर्या अक्षयबला । वैष्णवी विष्णुसंबंधिनी शक्तिरसि यथाशक्त्या विष्णुर्भगवानशेषलोकान् पालयति सा विष्णुसामर्थ्यलक्षणा त्वमेवेति भावः । विश्वस्य बीजं कारणं यल्लोकवेदप्रसिद्धं सा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परमा व्यापिनी महामाया त्वमेवासि । परमा उत्कृष्टादुत्तरा शक्तिर्न त्वदन्या सेति भावः । हे देवि, त्वया मायया एतत्समस्तं विश्वं संजातमोहं कृतं मोहितं मम-तायत्तं कृतम् । देवि, त्वं वै प्रसिद्धा ज्ञानवैराग्यरूपा उपनिषत्परमात्मतत्त्वावगमस्वभावा । प्रसन्ना सती भवनं भूः पुनः पुनरुद्भवः भुविरुत्पत्तिभूतप्रादुर्भाव इति यावत् । " भू सत्तायाम् । स्त्रियामिक् कृष्यादिभ्यः " इति इक्प्रत्ययः , उवङादेशः । भुवेरुत्पत्तितो मोचनं मुक्तिः मुक्तेः हेतुः कारणमसीत्यर्थः । भुवि भूमौ इत्यु-क्तेऽर्थपुष्ट्यभावस्तिष्ठतु ब्रह्मलोकादौ मुक्तिहेतुता न स्यादित्यव्याप्तिपरिजिहीर्षार्थोपलक्षणताश्रयेण जनितप्रतिपत्तिगौरवा दौर्गुण्या । भुविमुक्तिहेतुरित्येकं पदम् ॥ ४ ॥ हे देवि, समस्ताः श्रुत्यादयो विद्यास्तथैव भेदास्त्वत्प्रकारा एव त्वदंशा एव । तस्मात्तव विद्यानां परस्परं पार्थक्याभावात्ते का स्तुतिः प्रवर्त्तताम् । न कापि । कीदृशी स्तुतिः । स्तवमर्हति स्तव्यम् । दंडादिभ्यो यः। अन्यथा अचो यतं बाधित्वा एतिस्तु सूत्रेण क्यपि सति स्तुत्यं इत्येव स्यात् । स्तव्ये स्तोत्रार्हे वस्तुनि विषये परा

विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः ॥ ५ ॥

सर्वभूता यदा देवी भुक्तिमुक्तिप्रदायिनी ॥ त्वं स्तुता स्तुतये का वा भवंति परमोक्तयः ॥ ६ ॥

चापरा चेति पृथग्भूतोक्तिर्यस्यां सा स्तव्यपरा परोक्तिः । स्तुतिस्तुत्ययोः पृथक्त्वे खलु स्तुतिः प्रवर्तते एकत्वे का ते स्तुतिरस्त्विति भावः । तर्हि त्वं ब्राह्मी त्वं लक्ष्मीरित्याद्या स्तुतिरपि देव्या एकत्वेन न घटत इत्याह । समस्ताः सकलाः कलासहिताश्चतुःषष्टिकलोपेताः पातिव्रत्यादिधर्मोपेताः सृष्ट्यादिप्रातिनियतनैपुण्योपेताश्च ब्रह्माण्याद्या स्त्रियश्च तवैवांशा इति का ते स्तुतिः एकस्वरूपत्वात् । हे देवि, त्वया एकयैव अंबया मात्रा एतज्जगत्पूरितं पूर्णमाप्यायितम् । त्वमेव जगत् जगदेव त्व-मिति का ते स्तुतिः न कापि । अन्यदीयगुणानामन्यत्रारोपणवर्णनं स्तुतिः। अत्र तु सैव विद्येति सैव ब्राह्म्यादिस्त्रीति भेदाभावात्स्तव्यपरा परोक्तिः परमोक्तिरित्यर्थः। देवी न्यूना न भवतीति स्वभावतः श्रेष्ठोक्तिरित्येव तस्यामिति का ते स्तुतिरित्युक्तम् । न्यूनमधिकीकृत्योक्तिः स्तुतिरित्याविलक्षणम् । न्यूना भवति यतस्ततोऽधिका नैवेत्युक्तं का ते स्तुतिरिति ॥ ५ ॥ पुनरपि देव्यां स्तुतिर्न घटत इत्याह । परमोक्तिः स्तुतिरिति स्तुतिलक्षणम् । तत्र देवी सर्वभूता इतीदं स्तुतिपदम् । एवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

च सति ब्रूमः । हे देवि, भुक्तिमुक्तिप्रदायिनी त्वं यदा सर्वभूतासि सर्वात्मासि विश्वरूपासि इति स्तुताभूः । तदा स्तुतये स्तुत्यै स्युत्यर्थाः का वा नाम परमाः श्रेष्ठाः उक्तयः वर्णनास्तुतयः भवंति न कापि परमा श्रेष्ठा उक्तिः । वर्णने स्तुरीति लक्षणं ततश्च यच्च किंचित्पदार्थरूपं भावाभावात्मकं संभवेत्तन्नाम सर्वमित्युच्यते । सर्वभूता देवीति यदा स्तुता तदा सर्वस्य च देव्याश्चैक्यात्किं स्तुत्यं का वा स्तुतिः स्यादिति भवत्यर्थादाह । का वा भवंति परमोक्तय इति । काः परमोक्तयः याभिः स्तूयेत देवी न कापि । " युक्ते स्यादावृते भूतं प्राण्यतीते समे त्रिषु । " सर्वभूता सर्वेण विश्वेन समेत्यर्थः । कीदृशी देवी । अयदा शुभावहविधिदा । भुज्यते भोगः स्वर्गादिः मुक्तिर्मोक्षः तौ प्रददाति भुक्तिमुक्तिप्रदा । यद्वा भुक्तेर्मुक्तिर्वैराग्यं तां प्रददाति । प्रेदाज्ञः कः । अयते गच्छति व्याप्नोत्ययनी । " कृत्यल्युटो बहुलम् " इति कर्त्तरि ल्युट् । यद्वा " दय दाने " भुक्तिमुक्ती प्रदयते भुक्तिमुक्तिप्रदायिनी । णिनिः । यद्वा " प्रा पूरणे " भुक्तिमुक्ती प्राति पूरयति भुक्तिमुक्तिप्रा । " आ-

सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ७ ॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनी ॥ विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ८ ॥

तोऽनुपसर्गे कः " । दयिष्यते रक्षिष्यति दायिनी । भविष्यदाधमर्ण्ययोर्णिनिः । भुक्तिमुक्तिप्रा चासौ दायिनी रक्षित्री चेति कर्मधारयः पुंवद्भावः । भुक्तिमुक्तिप्रदायिनी ॥ ६ ॥ हे देवि, सर्वस्य जनस्य जंतोः हृदि चेतसि । बुद्धिरूपेण संस्थिते । हे स्वर्गापवर्गदे देवि नारायणि, नमोऽस्तु ते । हे देवि, संस्थिते सम्यगवस्थिते । " संस्थाधारे स्थितौ मृतौ " । स्वर्गं चापवर्गं च ददाति स्वर्गापवर्गदा । "आतोऽनुपसर्गे कः" नरः कश्चिदृषिः नरस्यापत्यं नारायणः। "नडादिभ्यः फक्" फस्यायनः। नारायणस्य स्त्री स्त्रीमायोपचारात् । नारायणी विष्णुमायेत्यर्थः । यद्वा " आपो नारा इति प्रोक्ताः " । नारमम्मयमयनमस्य नारायणः । संज्ञायां णत्वम् । यद्वा । नराणां समूहो नारमयनमस्य नारायणः तस्य स्त्री नारायणी लक्ष्मीः हे नारायणि, कात्यायनीं तुष्टुवुरिति कात्यायनीस्तुतौ प्रकृतायां नारायणीनमस्कृतिः स्त्रियः समस्तास्तदंशा एवेति प्रागुक्तेः । कार्यभेदमात्रत्वेऽपि वस्तुतस्तयोरैक्यादविरुद्धा ॥ ७ ॥ " अष्टादशनिमेषास्तु काष्ठा त्रिंशत्तु ताः कलाः । " इत्यभिधानात् । काष्ठा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कलातो न्यूनेति काष्ठाकलादिरूपेणेति पाठः सभ्यः । विश्वस्य खलु काष्ठा कलान्यूनेति काष्ठाकला । क्षणमुहूर्त्ताहोरात्रपक्षमासर्त्वयनसंवत्सरादिकालरूपेण परिणामप्रदायिनी । बाल्यादिवयोवस्थाविशेषेण वा तथा विश्वस्य उपरतौ अवसाने विषये या शक्तिस्तत्संबुद्धौ शक्ते रुद्ररूपत्वात् हे समर्थे,नारायणीति "अय गतौ । इण् गतौ । इ गतौ "अय्यते इयते वा अयनः परमात्मा कर्मणि ल्युट् । पुँल्लिंगतानुप्रयोगतः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति वचनात् नाराणामयनः नारायणः । " पूर्वपदात्संज्ञायामगः " इति णत्वम् । नारायणस्य परमात्मन इयं माया नारायणी । अन्यथा नारायणस्येयं नारायणी येति वृद्धाच्छः स्यात् । तस्मात्संबंधेऽणेव । परिणामः प्राणिकायावयवोपचयलक्षणा वृद्धिः तां प्रददाति परिणामप्रदायिनी सुप्यजातौ णिनिः । " आतो युक् चिण् कृतोः " । ज्ञापकासिद्धमनित्यमिति क्वचित्सोपसर्गादपि णिनिः। दुग्धं दधिरूपेण परिणमते इत्यादौ तु परिणामो रूपांतरावाप्तिर्दुग्धादिस्वरूपा द्विवर्त्तः । परिणामप्रदायिनीति पाठे । परितो मानं यत्नापरिच्छेदः। प्राणिकायादेः कालकृता शरीरावस्था यौवनादिवयः । तस्य परिच्छेदः परिमाणमेतावत्कालपरिमितामिदं बाल्यमिदं यौवनमित्यादि तत्प्रददाति परिणामप्रदायिनी

सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ९ ॥

॥ ८ ॥ सर्वाणि मंगलानि यतः स्युः सा सर्वमंगला । मंगलेभ्यो हिता मंगल्या । उगवादिभ्यो यत् । सर्वमंगला चासौ मंगल्या च । सर्वमंगलमांगल्ये इति वृद्धिपाठपक्षे तु । " मगि गतौ " मंग्यंते मंगलानि मंगलेभ्यो हिता मंगल्या मंगल्यैव मांगल्या । " अन्येषामपि दृश्यते " इति दीर्घः पूरुषवत् । कश्चित्त्वाह । " गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति कर्मणि ष्यञिति । तत्र तस्यार्थसंगत्यभावस्तावदास्तां स्त्रियां टापं बाधित्वा षित्त्वात् ङीषि मांगलीत्येव स्यात्तु मांगल्येति रूपसिद्धिरिति तदुपेक्षणीयं प्रेक्षावद्भिः । शिवा भवानी रुद्राणी । हे शिवे, यद्वा शिवा मंगलोपेतेति रमापि शिवा भवति । हे शिवे हे रमे, सर्वेषामर्थानां साधयित्री उमा रमा च । हे सर्वार्थसाधिके, " अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु । शरणं गृहरक्षित्रोः । " शरणेषु साधुः शरण्या । यत्र साधुरिति यत् । हे शरण्ये, सोमसूर्याग्निरूपाणि त्रीण्यंबकानि नेत्राण्यस्याः त्र्यंबका यद्वा त्रयोऽम्बकाः । उमा रमा च । हे त्र्यंबके, त्रयाणां लोकानामंबकः पितेत्यागमः । गौरी उमा । यद्वा । " गुङ् अव्यक्ते शब्दे " । गूयते अव्यक्तं गुप्तं शब्दायते मनसा गृह्यते धार्यते गौरी उमा रमा च । ऋज्रेन्द्राग्रवज्रादिसूत्रेण रनिप्रत्यये गुङो वृद्धिर्निपात्यते । " गौरोऽरुणे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सिते पीते "। गौरादित्वात् ङीष् । अयः शुभावहो विधिर्यत्र परमात्मनि स अयनः पामादित्वान्मत्वर्थीयो नः । "नृ नये" नयो नीतिः। भावे ऋदोरप् । नरणं नरः नरेण नयेन अयनः नरायणः परमात्मा तस्येयं माया नारायणी । हे नारायाणि, नमस्तेऽस्तु । " नमःस्वस्ति " इति चतुर्थी ॥९॥ जगतां सृष्टेः सर्गस्य स्थितेर्वर्तनस्य नाशनस्य प्रलयस्य । हे शक्तिभूते शक्तिरित्येवंभूता जाता हे शक्तिरूपे, यद्वा ब्राह्मी शक्तिः सृष्टौ वैष्णवी शक्तिः स्थितौ रौद्री शक्तिर्विनाशे तद्भूता त्रिशक्तिभूता या शक्तिस्तत्सामान्येन शक्तिभूता हे शक्तिभूते, यद्वा शक्तीनां भुवा परमात्मना उता संगता। " वेञ् तंतुसंताने "। यद्वा शक्तीनां भूरि अवताररूपा शक्तिभूतिः। हे शक्तिभूते, यद्वा शक्तीनां भुवः भूमयः ब्रह्मादयस्तेषामूतिः संघटना । तंतुनेव गुंफनं संतननं शक्तिभूतिः। वेञः स्त्रियां क्तिन् । हे सनातनि, "सायंचिरम्" इत्यादि-सूत्रेण ल्युस्तुट् च । स्त्रियां टित्वात् ङीप् । हे शाश्वति, हे गुणाश्रये, गुणाः सत्त्वादयः आश्रयो यस्याः सा । यद्वा गुणानामाश्रयो यत्र सा गुणाश्रया । यद्वा सत्त्वा-

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ १० ॥

शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥ ११ ॥

दिगुणयुक्ता गुणाः यथायोगं ब्रह्मादयः ते आश्रया यस्याः सा । हे गुणमये, "मय गतौ"। मयते गच्छाति लोकान्मया। पचाद्यचि स्त्रियां टाप् । गुणैर्मया गुणमया । गुणैर्गतिमतीत्यर्थः । यद्वा हेऽगुणमये, अगुणं ब्रह्म मयते । अगुणेन ब्रह्मणा मया गमनपरा अगुणमया । ब्रह्म तत्त्वेन मयमानेत्यर्थः । गुणमयीति पाठे गुणानां विकारः गुणमयी । यद्वाऽगुणमयी, " मयड्वैतयोर्भाषायाम् " इत्यादिना मयट् । ङीप् । यद्वा गुणेभ्यो हेतुभ्य आगता गुणमयी । हेतुमनुष्येभ्य इत्यधिकृत्य मयड्वेति । यद्वा गुणाः प्राकृता उच्यंतेऽस्यां गुणमयी । तत्प्रकृतवचने मयट् । अय्यते ईयते गम्यते अयना मुक्तिः ऋशब्दः अदितिवाची । उरपत्यानि आराः देवाः । नशब्दो नञ्समानार्थोऽननुबंधकः । न संत्यद्याप्यारा देवाः साधकत्वेन यत्र सा नारा नारा चासौ अयनी चेति नारायणी मुक्तिर्देवैरद्यापि दुष्प्राप्येत्यर्थः । तत्संबुद्धौ हे नारायणि ॥ १० ॥ शरणं रक्षितारमागताः रक्ष रक्षेति प्रपन्नाः शरणागताः त एव दीना आर्त्ताश्च दुःखिता लोकास्तेषामापद्भ्यो दुःखेभ्यः परित्राणं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तदेव परं मुख्यमुद्देश्यमयनं वर्त्म यस्याः सा तत्संबुद्धिः। सर्वलोकस्यार्त्तिहरे । हरतेरनुद्यमनेऽच् । हे दुःखनाशनि, हे देवि भगवति, न आरायणि नमः अः स्तुते इति च्छेदः । पूर्वमग्रे अः । " एङः पदांतादति " इत्यकारलोपः । प्रथमैकवचनस्य ऋकारस्य श्रवणमेव तथा च सति मो (:) इति भवति । अग्रे च स्तुते । ऋ इति देवमाता मः शिवः अः विष्णुः द्वौ प्रतिषेधौ प्रकृतमप्रतिषिद्धमर्थं गमयतः । उर्देवमातुरपत्यानि आराः ऋभवः देवाः । अय्यते ईयते (वा) अयनी आराणामयनी आरायनी या ध्यातव्या देवता आरायणी । " पूर्वपदात्संज्ञायामगः " इति णत्वं हे आरायणि, त्वां मः शिव अश्च विष्णुः न न स्तुते अपि तु स्तुते नौत्येव । " ष्टुञ् स्तुतौ" लडात्मनेपदम् ॥११॥ हंसैर्युक्तं विमानं तत्र तिष्ठति हे हंसयुक्तविमानस्थे, यद्वा हंसैः यतिविशेषैः सूर्यैः रूपैश्च युक्तमाश्रितं विमानं विगताहंकारं परब्रह्म तत्र तिष्ठति । " हंसः श्वेतगरुत्सूर्ययतिप्राणात्मसु स्मृतः । " हे ब्रह्माणीरूपधारिणि, कुशो दर्भस्तस्येदं कौशं कौशं च तदम्भश्च कौशांभः । " क्षर संचलने"। क्षरणं क्षरः। घञि "संज्ञापूर्वको विधिरनित्यः" इत्यत उपधावृद्ध्यभावः घञर्थे कविधानं वा । कौशांभसः क्षरः सेचनं तं करोति इति णिचि ण्वुल् । वोरः

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशांभःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ १२ ॥

कः स्त्रियां टाप् "प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः" इति इत्त्वम् । हे कौशांभःक्षरिके, शत्रुषु कुशोदकक्षेपणं कुर्वित्यर्थः । यदुक्तम् । कमंडलुजलाक्षेपे इत्यादि । यद्वा क्षरं करोति क्षरयति क्षरिका आसेक्त्री कौशांभसः क्षरिका । अणिजंतस्येति भावः । क्षरतेस्तु ण्वुलि क्षारिका । यद्वा कौशांभः क्षरति सिंचति कौशांभःक्षरी । कर्मण्यण् । ङीप् । स्वार्थे कः । " के णः " इति ह्रस्वः । यद्वा कुशसंबंधी अंभसः क्षरः आयुधत्वेन यस्याः सा कौशांभःक्षरका । शेषाद्विभाषा कप् । अत्र पक्षे अप् । सुपः पर इत्त्वं न भवति । ना अ आ ऋ आ आयनि न मा उः स्तुते इति च्छेदः । ना पुरुषः । " अकारो वासुदेवः स्यादाकारस्तु पितामहः । " ऋ इति देवमाता । ऋसुशब्दप्रयोगदर्शनात् । आ इति आङ् उपसर्गः । आयनि इति संबुद्ध्यंतम् । न मा इति द्वौ प्रतिषेधौ । उकारस्तु महेश्वरः । स्तुते इति " ष्टुञ् स्तुतौ " आत्मनेपदम् । " अय गतौ । कृत्यल्युटो बहुलम् " इति कर्मणि ल्युट् । आसमंतादय्यते ईयते वा आयनी उपासनी इष्टदेवता । उः देवमातुः आयनी । " इको यणचि " । रायनी । " पूर्वपदात्संज्ञायामगः" इति णत्वम् । हे रायणि, हे देवमातुरदितेरभीष्टदैवते, त्वम् । आश्च ब्रह्मा अः विष्णुः उः रुद्रः इति त्रिमूर्ति- ॥८१॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लक्षणः । ना पुरुषः मा न स्तुते न स्तुते इति मा अपि तु स्तौत्येव ॥ १२ ॥ " धृञ् धारणे " भ्वादिः । धरतीति धरा पचाद्यच् । त्रिशूलचंद्राहीनां धरा । अन्यथा कर्मण्यण् स्यात् । त्रिशूलादि धरतीति विग्रहश्रवणात् । त्रिशूलमायुधं चंद्रोऽत्रैककलात्मकः किरीटभूषणौचित्यात् । अहयः फणिनः । द्वंद्वे घि । बहुष्वनियमः । हे त्रिशूलचंद्राहिधरे, महान् वृषभस्तेन वाहिनी वाहवती । " ऋन्नेभ्यो ङीप् " । यद्वा महावृषभेण वाहयती स्वं महावृषभवाहिनी । बहुव्रीहौ महावृषभवाहनेति स्यात् । हे महावृषभवाहिनि, महेश्वरस्येयं शक्तिर्माहेश्वरी । तस्याः स्वरूपमाकारस्तेन ध्येयतया संभाविते । अनधातुः प्राणनार्थः । अननमनिः " इक् कृष्यादिभ्यः । स्त्रियाम् । कृदिकारादक्तिनः " इति ङीष् । अनी । इः कामः एः कामस्य तद्दैवतबीजस्य वा अनी प्राणरूपायनी । अं विष्णुं राति रक्षकत्वेन गृह्णाति अरा त्रिलोकी अरायाः यनी अरायणी । हे अरायणि, त्वां उः शिवः ना पुरुषः । न मा स्तुते अपि तु स्तौति ॥ १३ ॥ हे अनघे कौमारीरूपसंस्थाने, अत एव हे महाशक्तिधरे,

त्रिशूलचंद्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥ १३ ॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ॥ कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥ १४ ॥

अत एव मयूरकुक्कुटवृते, नमोऽस्तु ते । नारायणस्य भगवतो विश्वरूपस्येयमाकृतिः। नारायणी मूर्तिः। छांदसत्वाद्वृद्धाच्छमनाश्रित्य सामान्यतोऽणेव । यद्वा नराणामयनं नरायणं धर्मार्थकाममोक्षलक्षणं तस्येयं सा द्विधा तत्र जाता तत्साधयितुं च । शैषिकोऽण् । नारायणी । न विद्यते अघं यतः हे अनघे, यद्वा न विद्यते अः विष्णुः पूज्यो येषां ते अना दैत्याः तान् हंतीत्यनघा । " सप्तम्यां जनेर्डः । अन्येष्वपि दृश्यते " इत्यत्रापिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वंतरादपि कारकांतरेऽपि डो भवति । डित्यभस्यापि टेर्लोपः । पृषोदरादित्वात् हस्य घः । संस्थितिः सम्यगवस्थानं संनिवेशः संस्थानम् । कुमारस्य शक्तिधरस्येयं शक्तिर्देवता कौमारी कौमार्याः सकाशाद्रूपसंस्थानं यस्याः सा । यद्वा कौमारीषण्मुखीरूपसंस्थानशरीरावयवसंनिवेशविशेषो यस्याः सा तत्संबुद्धौ । महती शक्तिरायुधं महाशक्तिः तस्य धरा महाशक्तिधरा । अन्यथा तु विग्रहे कर्मण्यण् स्यात् । यद्वा महाशक्तिरतिसामर्थ्यम् । " मीञ् हिंसायाम् " क्र्यादिः । मीनात्यहीन्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मयूरः । मीनातेरूरन् । कुक्कुटश्चरणायुधः। कुगुचारणेन कुटति कुक्कुटः । "कुट कौटिल्ये" । पचाद्यच् । मयूरा वाहनीभूताः क्रीडार्थाश्च । कुक्कुटाश्च युद्धचातुर्यदिदृक्षौचित्योपार्जिताः । तैर्वृता वेष्टिता यत इयं कौमारी तेन बाल्योचिता कुक्कुटक्रीडोक्ता । यद्वा मयूरैः कुक्कुटैश्च वृतिरावरणं यस्याः सा । यद्वा क्रौंचवाराहचक्रादिव्यूहवत् मयूरकुक्कुटव्यूहौ च संग्रामोचितसैन्यसंनिवेशौ ज्ञेयौ । यदाहुः। " व्यूहस्तु बलविन्यासो भेदा दंडादयो युधि । दंडो मंगलभागौ चाप्युत्सन्नश्चावलो दृढः॥ व्यूहस्तेषां विशेषाः स्युश्चक्रव्यूहादयोऽपि च।" इति । ततश्च मयूरव्यूहकुक्कुटव्यूहाभ्यां वृता। यद्वा वाहनीभूतत्वान्मयूरैः कौमारी वृता। अथ चेयं कुक्कुटाख्यालंकारोपेतत्वात्कुक्कुटवृता । यदाहुः। "कुक्कुटस्ताम्रचूडे च भूषायामपि दृश्यते।" यद्वा मयूराः कुक्कुटा इव चित्रपुच्छवर्जिता मयूरकुक्कुटाः तैर्वृते । यदभ्यधुः।"आरक्तनेत्रपिच्छाग्रो मयूरः कुक्कुटः स्मृतः। बर्हेण वर्जितो बर्ही यः स मयूरकुक्कुटः॥" इति यादवप्रकाशः। कुमारो मयूरमारोहति कौमारी तु मयूरीम् । यद्वा मा लक्ष्मीः ।

शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥ १५ ॥
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे ॥ वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥ १६ ॥

आः पितामहः । इः कामः । उः शिवः । उत्त्राता रक्षको विष्णुः रोऽग्निः तैर्वृता मयूरवृता । अथ च सा कुक्कुटवृता । "कुक वृक आदाने" । भ्वादिरात्मनेपदी । ततः कर्त्तरि क्विप् । कोकंते कौमार्याः आज्ञामाददते दैत्यैः सह संग्रामयितुं कुकिदेवसैन्यानि तान्येव कुटुंबिदैत्यैः सह विरुद्धबुद्धीनि कुटानि च कुक्कुटानि देवसैन्यानि च तैर्वृता ॥ १४ ॥ हे वैष्णवीरूपे हे शंखादिगृहीतपरमायुधे हे देवि, प्रसीद । हे नारायणि नमस्तेऽस्तु । शंखश्च चक्रं च गदा च शार्ङ्गं च सेनांगत्वादेकवद्भावः । तानि गृहीतानि परमाण्यायुधानि यया सा । विष्णोरियं शक्तिर्वैष्णवी तस्या इव रूपं यस्यास्तत्संबुद्धिः ॥ १५ ॥ गृहीतमुग्रं रौद्रं च महच्चक्रं यया तत्संबुद्धिः। दंष्ट्रया उद्धृता वसुंधरा भूमिर्यया तत्संबुद्धिः । वराहस्य भगवतो विष्णोः रूपं तद्वती वराहरूपिणी । वराहसदृशरूपमात्मानं दर्शयंतीत्यर्थः । यद्वा सत्यापपाशसूत्रेण रूपादर्शने णिच् । वराहमेवात्मनो रूपं पश्यति वराहरूपिणी तत्संबुद्धिः । हे शिवे सर्वमंगले नारायणि, दशंति यया दंष्ट्रा । " दाम्नीशस ". इत्यादिना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दशतेः करणे ष्ट्रन् । षिद्गौरादिभ्यश्चेति ङीष् अनित्यः ततः स्त्रियां टाप् ॥ १६ ॥ उग्रेण नृसिंहरूपेण दैत्यान् हंतुं हे कृतोद्यमे, त्रैलोक्यस्य त्राणेन रक्षणेन महिते पूजिते, त्रैलोक्यत्राणसहिते इति वा पाठः । " अय गतौ " । अय्यते इत्ययनं चतुर्भद्रं नराणामयनं प्राप्तव्यं नरायणं तस्य प्रापयित्री नारायणी । चतुर्णां भद्राणां समाहारश्चतुर्भद्रम् । " आहुश्चत्वारि भद्राणि बलं धर्मः सुखं धनम् । " ॥ १७ ॥ किरीटं मुकुटं तद्वती हे किरीटिनि, महद्वज्रमायुधं यस्याः सा महावज्रा महाहीरा तत्संबुद्धिः । सहस्रं नयनानि समाहृतानि सहस्रनयनम् । पात्रादित्वात् ङीप् न भवति । तेन उज्ज्वलति प्रकाशते सहस्रनयनोज्ज्वला । यद्वा सहस्रनयने ज्वले इति पाठः । सहस्रं नयनानि यस्याः सा सहस्रनयना ज्वलिति ज्वाला । पचाद्यच् । हे ज्वले, अनुपसर्गादेव ज्वलितिकसंतेभ्यो णस्तु वा । तेन मुक्ते सोपसर्गादनुपसर्गाच्च ज्वलतेः

नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे ॥ त्रैलोक्यत्राणमहिते नारायणि नमोऽस्तु ते ॥ १७॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारायणि नमोऽस्तु ते ॥ १८ ॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले ॥ घोररूपे महारावे नारायणि नमोऽस्तु ते ॥१९॥ दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥ चामुंडे मुंडमथने नारायणि नमोऽस्तु ते ॥ २० ॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टे स्वधे ध्रुवे ॥ महारात्रे महामाये नारायणि नमोऽस्तु ते ॥ २१ ॥

पचाद्यच् भवत्येव । वृत्रो नाम दैत्यः कश्चित्तस्य प्राणान् हरति हे वृत्रप्राणहरे, चकारः उक्तमनुक्तं च समुच्चिनोति । इंद्रस्येयमैंद्री हे ऐंद्रि, ॥ १८ ॥ चंडिकाशरीरोत्था शिवदूती तस्याः स्वरूपेण हता दैत्या यया । हे हतदैत्ये, महद्बलं सामर्थ्यं सैन्यं च यस्याः हे महाबले, यद्वा महान् बलिरुपहारः पूजोपकरणं यस्याः महाबलिः हे महाबले, " करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियाम् । " घोरं भयानकं रूपं यस्याः हे घोररूपे, महानारावः शब्दो यस्याः शृगालपरिवारत्वात् हे महारावे, ॥ १९ ॥ दंष्ट्राभिः करालं भयंकरं वदनं यस्याः हे दंष्ट्राकरालवदने, " करालो दंतुरे तुंगे " । शिरसां माला विभूषणं यस्याः हे शिरोमालाविभूषणे, मुंडं दैत्यं मथ्नाति मुंडमथना । " मथ विलोडने " नंद्यादित्वात् ल्युः। यद्वा कर्त्तरि बहुलं ल्युट् । बाहुलकात् ङीबभावः। हे मुंडमथने, हे चामुंडे कालि, ॥२०॥ हे लक्ष्मि, हे लज्जे,

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स. श. हे महाविद्ये महतिविद्ये परमात्मगोचरज्ञानरूपे, यद्वा महाविद्ये हे महत्यविद्ये परमात्मेतरप्रपंचगोचरनानाज्ञानरूपे, हे श्रद्धे आस्तिक्यबुद्धिस्वभावे, हे पुष्टे शरीरावयवो- शां. टी.
॥८३॥ पचयरूपे, हे स्वधे पितृतृप्तिस्वरूपे, हे ध्रुवे शाश्वति ब्रह्मरूपे, हे महारात्रे हिरण्यगर्भावसानकालरूपे, यद्वा महारात्रे हे अनन्यतमोधिकरणकालरूपे, यद्वा महारात्रिः
सर्वप्राणिमोहकरी देव्येवोच्यते । अत एव हे महामाये सर्वजगत्कारणभूते । यद्वा हे महत्यमाये हे महारात्रि इति पाठे रात्रेश्चाजसाविति संज्ञायां ङीप् छन्दस्येव । अ० ११
तिमिरपटलैरवगुंठिता रात्र्य इति तु जसंतः प्रयोगः । वह्वादौ कृदिकारादक्तिनो वा ङीष् वक्तव्यः । उणादावदेस्त्रिन् । अत्रिर्मुनिः बाहुलकात् रातेरपि त्रिन् ।
रात्रिः रात्री च । राति सुखं रात्रिः ॥ २१ ॥ हे नारायणि, हे मेधे, नमोऽस्तु ते । " धीर्धारणावती मेधा " । अण्यते कथ्यते अणिः मेधादिः । " इक् कृष्या-
दिभ्यः " । कृदिकारादक्तिनो वा ङीष् । अणी मेधादिः । ई इत्यस्याः लक्ष्म्या अणीमेधादिः यणी नराणां समूहो नारं नारेणासमंतात् श्रिता यणी नारायणी ।

मेधे सरस्वति वरे भूते बाभ्रवि तामसि ॥ नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥ २२ ॥
सर्वतःपाणिपादांते सर्वतोक्षिशिरोमुखे ॥ सर्वतः श्रवणघ्राणे नारायणि नमोऽस्तु ते ॥ २३ ॥

हे वरे श्रेष्ठे, हे भूते अतीते, यद्वा " भूतिर्भस्मनि सम्पदि " । भूतिर्जन्म च । हे सम्पद्रूपे ऐश्वर्यादिरूपे, हे बाभ्रवि विभर्त्ति बभ्रुर्विष्णुस्तस्येयं भगिनी वैष्णवी
हे वाभ्रवि, " विपुले नकुले विष्णौ बभ्रुर्ना कपिले त्रिषु । " हे तामसि तमोगुणसम्बन्धिनि जगत्संहारकार्त्रि, नियता यत् हि नियते । (?) यद्वा " दैवं दिष्टं
भागधेयं भाग्यं स्त्री नियतिर्विधिः । " हे ईशे स्वामिनि, ईष्टे ईशा पचाद्यच् ॥२२॥ " अंतो नाशे स्वरूपे च निश्चयेऽवयवेऽवधौ । समीपेऽवसिते बंधे यमे मृत्यावने-
हसि ॥ " सर्वतः सर्वत्र पाणिपादमंतोऽवयवो यस्याः हे सर्वतःपाणिपादांते, पाणयश्च पादाश्च पाणिपादम् । प्राण्यंगत्वादेकवद्भावः । पादांत्रे इति पाठे सर्वतः ॥८३॥
पाणयश्च पादाश्च अंत्राणि च पुरी तत्संज्ञानि प्राणसूत्राणि यविशेषमिति अयनी पाणिपादाद्युपचितिः । नराणामयनी नरायणी नरायण्या इयमधिदेवता नारायणी ।
सर्वतोऽक्षीणि च शिरांसि च मुखानि च यस्याः सा हे तथोक्ते ॥ २३ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वं जगत्रयं स्वरूपं यस्याः सा हे सर्वस्वरूपे, यद्वा सर्वं स्वं रूपं यस्याः सा । हे सर्वस्य ईशे सर्वेशे, सर्वाः शक्तयः सामर्थ्यलक्षणा ब्रह्मादिलक्षणाश्च ताभिः समन्विता हे सर्वशक्तिसमन्विते, हे देवि, त्वं भयेभ्यः नः देवान् त्राहि छांदसं परस्मैपदम् । यद्वा त्रायते त्राः क्विपि रूपम् । त्रा इवाचर त्राहि रक्षिकेवाचर । सर्वप्रातिपदिकेभ्यः क्विब् वाचारे वा । त्राहीत्यव्ययं वा । हे दुर्गे देवि, नमस्ते तुभ्यमस्तु । भिन्नवाक्यस्थत्वाद्देवीतिपदद्वयं पौनरुक्त्येन न दुष्यति ॥२४॥ हे देवि, एतत्प्रत्यक्षसिद्धं ते तव वदनं सौम्यं सुंदरं लोचनत्रयेण सोमसूर्याग्निमयेनालंकृतं नः अस्मान् सर्वभीतिभ्यः समस्तभयेभ्यः । यद्वा सर्वा भियो याभ्यस्ताः सर्वभियः सर्वभियश्च ता ईतयश्च ताभ्यः पातु रक्षतु । हे कात्यायनि, नमस्ते तुभ्यमस्तु । ईतितोऽप्योषध्यभावादन्नाभावाद्यज्ञभागाभावाद्यज्ञभागभुजां भयाभावः प्रार्थनीयः । कतः कश्चिद्दषिस्तस्यापत्यं स्त्रीति गर्गादियञंतात् यञश्च " प्राचां ष्फस्तद्धितः " इत्याधिकृत्य "सर्वत्र लोहितादिकतंतेभ्यः" इति स्त्रियां ष्फः फस्यायनादेशः षित्त्वात् ङीष् का-

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥ २५ ॥ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥ त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥ २६ ॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७ ॥

त्यायनी । यद्वा कश्च ब्रह्मा अश्च विष्णुः तौ अततः सततं यथाक्रमं गच्छतः इति कात्यौ सरस्वती च । रमा च कर्मण्यण् । अण्णंतात् ङीप् । वाणीरमयोरासमंतादयनी परमा गतिः कात्यायनी । "सौम्यं स्यात्सुंदरे सोमदेवताके बुधे ग्रहे ।" ॥२५॥ भद्रा च सा काली च हे भद्रकालि, ज्वालाभिः करालं तुंगमत्युग्रमतिरौद्रमशेषाणामसुराणां सूदनं हिंसकम् । ते तव त्रिशूलं नोऽस्मान् भीतेर्भयात्पातु नमस्ते तुभ्यमस्तु । "षूद लक्षणे" हिंसायामनुदात्तेत्सूदते सूदनं नंद्यादित्वाल्ल्युः । अन्यथा " अनुदात्तेतश्च हलादेः " इति प्राप्तस्य युचः सूददीपदीक्षश्चेति प्रतिषेधात्सूदकामिति स्यात् ॥ २६ ॥ या तावकी घंटा स्वनेन नादेन जगदापूर्य पूरयित्वा दैत्यतेजांसि हिनस्ति सा नोऽस्मान् पापेभ्यः दैत्येभ्यश्च पातु । कं केभ्यः कमिव । जगत् कर्तृ लोकः अनोभ्यः सुतानिव अत्र छांदसत्वेन अनसशब्दात्पंचम्या भ्यस् तस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"सुपां सुलुक्" इत्यादिना लुक् । यथा लोकः शकटेभ्यः सुतान्पाति तथा । यद्वा "जनन्यां शकटेऽप्यनः। जनके शकटेऽप्यनः।" यथा अनः माता पिता च पापेभ्यः विघ्नेभ्यः पाति ॥ २७ ॥ हे चण्डिके, असुराणामसृक् रुधिरं वसा मेदस्तद्रूपः पंकस्तेन चर्चितः व्याप्तः ते तव करे हस्ते उज्ज्वलः । यद्वा करैः किरणैः उज्ज्वलः खड्गः नोऽस्माकं जगतां वा शुभाय भवतु । हे देवि, त्वां वयं नताः प्रणतामहे । " बालिहस्तांशवः कराः " ॥ २८ ॥ " नृ नये "। नृणंति न्यायेन व्यवहरंतीति नराः । हे देवि, त्वदाराधनेन तुष्टा सती त्वामाश्रितानां नराणामशेषान् रोगानपहंसि तेषां च काम्यकामान् कामानर्थान् ददासि । रजकस्य वस्त्रं ददातीतिवत्संप्रदानाभावात्षष्ठ्येव । हे देवि, त्वामाश्रितानां नराणां न विपत् आपन्न विद्यते । "हि हेताववधारणे" । त्वामाश्रिता नराः आश्रयतामाश्रीयमाणतां प्रयांति । आश्रीयंते

असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम् ॥ २८ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ २९ ॥ एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥ रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाऽम्बिके तत्प्रकरोति कान्या ॥ ३० ॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्वगर्तेऽतिमहांधकारे विभ्रामयस्येतदतीव विश्वम् ॥ ३१ ॥

आश्रयाः कर्मण्येरच् । अन्यैराश्रीयमाणतां सेव्यमानतां भजंतीत्यर्थः । राजत्वं देवत्वं वाप्नुवंतीति भावः ॥ २९ ॥ हे अंबिके देवि, अद्येदानीं त्वया आत्मतनुं निजतनुं बहुधा बहुप्रकारैः अनेकैः ब्रह्माण्यादिशक्तिरूपैः कृत्वा धर्मद्विषां यज्ञादिकर्मद्रोहिणां महासुराणां शुंभादीनां यत्कदनं विशसनं कृतं तदेव तदन्या स्त्री त्वत्तोऽपरा का देवता प्रकरोति का कर्तुं शक्तास्ति न कापि । त्वमेका कर्तुं शक्तोषि नान्येति भावः । धर्मोऽत्र वैदिकः । पारमर्षं सूत्रम् । " अथातो धर्मजिज्ञासा " । चोदना लक्षणोऽर्थो धर्म इति ॥ ३० ॥ हे देवि, विवेकाः युक्तायुक्तविचाराः दीपा इव महातमःपटलपाटनपटवस्तेषु । विद्यासु चतुर्दशसु दीपायमानासु आन्वीक्षिक्यादिषु । यद्वा विद्यासु ज्ञानप्रदमंत्ररूपासु । शास्त्रेषु मनुस्मृत्यादिषु तथाद्येषु वाक्येषु वैदिकेषु पुराणेषु विद्यमानेषु । अनादरे सप्तमी । तान्यनादृत्य तज्जन्यविवेकमपनीय ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अतिमहांधकारे ममत्वगर्त्ते एतद्विश्वमतीव विभ्रामयासि । सा त्वदन्या का । त्वमेव विष्णुमाया विश्वं मोहयासि ममत्वे योजयसि नान्या । विभ्रामयसीत्यनित्यो मितां ह्रस्वः । यद्वा हे देवि, आद्येषु वाक्येषु शास्त्रेषु शोभनेषु आर्षेषु शास्त्रेषु या वित्संविद्विदुषी वा । त्वद्देवीतः अन्या का न कापि । त्वमेव विज्ञान्येति भावः । अथ च हे देवि, एतद्विश्वं कर्म अतिमहांधकारे तमोगुणरूपे । ममेत्यव्ययम् । ममत्वं गर्त्त इव । तस्मिन् ममत्वगर्त्ते मोहकूपे अतीव विभ्रामयासि व्यालोडयसि । या सा त्वदन्या नास्ति । विभ्रामयतीति अन्यशब्दस्य शेषत्वात्प्रथमपुरुषः त्वदन्यः को भुंक्ते मदन्यः को भुंक्ते मदन्योऽन्यो भुंक्ते त्वदन्योऽन्यो भुंक्ते इतिवत् ॥३१॥ हे देवि, त्वं तत्र च तत्र स्थिता सती विश्वं परिपासि । तत्र क । यत्र च रक्षांसि दैत्याः उग्रविषाः नागाः तक्षकादयः यत्र च अरयः शत्रवः यत्र च दस्युबलानि चौरसमूहाः यत्र च दावानलः तथा यत्र चाब्धिमध्यं तत्र सर्वत्र उपद्रवप्रसंगे स्मृता सती पतितान् रक्षसीत्यर्थः । " दवदावौ वनारण्यवह्नी " ॥३२॥ हे देवि, त्वं विश्वेश्वरी इति

रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३२ ॥ विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ॥ विश्वेशवंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ॥३३॥ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः ॥ पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाकजनितांश्च महोपसर्गान् ॥३४॥

यदतः त्वं विश्वं परिपासि । यद्वा विश्वेश्वरी विश्वव्यापिनी असि अतः विश्वं परितो रक्षसि । यद्वा हे विश्वेश्वरि इति पाठः । हे देवि, त्वं विश्वात्मिकासि इति हेतोः विश्वं धारयसि । भवती विश्वस्य ईशः स्रष्टा रक्षिता संहर्ता च ब्रह्मादिस्तस्य वंद्या आभिवादनीया स्तुत्या च वर्त्तते । हे देवि, त्वत् त्वयि त्वयि विषये भक्तिनम्राः स्युस्ते विश्वस्याश्रया आधारभूताः जगतां धारयितारो भवंतीत्यर्थः ॥३३॥ हे देवि, त्वं नोऽस्माकं प्रसीद । यथैवाधुना इदानीं शुम्भाद्यसुरवधाद्धेतोः पर्यपीपलः तथैवाग्रेऽपि संभाविताया अरिभीतेः नित्यं परिपालय । हे देवि, त्वं सर्वजगतां पापानि प्रशमं क्षयमाशु क्षिप्रं नय । नयतिर्द्विकर्मकः । अथ च लोकानाम् । अत्र ह्यधर्मे उत्पातशब्देन विवक्षितः । नाशहेतुत्वात्तस्य पाकः परिणामस्तेन जनितानुपसर्गानुपद्रवान्वधपातादीनाशु प्रशांतिं प्रापयेति वयं देवाः त्वदेकशरणाः प्रार्थयामहे ततः प्रसीदे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्यर्थः । आशु उत्पातेत्यत्र संधिरविवक्षितः । आशु ह्युत्पातेति वा पाठः ॥ ३४ ॥ विश्वस्यार्तिं हरति हे विश्वार्तिहारिणि, त्वं प्रणतानां भक्तिनम्राणां प्रसीद । त्रयो लोकाः त्रैलोक्यं चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । तत्र वसंति ये तेषां तैर्वा हे ईड्ये स्तुत्ये, कृत्यानां कर्त्तरि वा षष्ठी । लोकानां वरदाऽभीष्टदा भव ॥ ३५ ॥ हे सुरगणाः, अहं युष्माकं वरदास्मि प्रीतास्मि यं वरं मनसा इच्छथ तं जगतामुपकारकं वरं वृणुध्वमहं प्रयच्छामि । दाणो यच्छः । "वृञ् वरणे" आत्मनेपदं ध्वम् । "स्वाभ्यां वामौ । स्वादिभ्यः श्नुः" । वृणीध्वमिति पाठे क्र्यादिः लोटो ध्वम् । "ईहल्यघोः । प्वादीनां ह्रस्वः" । यं तामिति पुंसि । "देवाद्वृते वरं श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये ।" वृणुध्वं प्रार्थयध्वमित्यर्थः ॥३६॥ हे अखिलस्य विश्वेश्वरि व्यापिके, हे त्रैलोक्यस्वामिनि, त्वया त्रैलोक्यस्य सर्वबाधाप्रशमनं सर्वदुःखोपशमः । सर्वाबाधेति पाठे "आङभिव्याप्तौ" । आसमंताद्बाधा आबाधा । अस्माकं वैरिणः दैत्यास्तेषां विनाशनमेवंविधं जगदुपकारकं कार्यं कर्त्तव्यमिति वरप्रार्थनम् । यद्वा

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥ ३५ ॥ देव्युवाच ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥३६॥ देवा ऊचुः ॥ सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥३७॥ देव्युवाच ॥ वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥३८॥

हे देवि अखिलेश्वरि, त्वया त्रैलोक्यस्य उपकारकं कर्म एतत्कार्यं कर्त्तव्यम् । कीदृशं तत् । सर्वबाधानां प्रशमनं अस्मद्वैरिणां विनाशनम् ॥ ३७ ॥ हे देवाः, शृणुत पूर्वं जगदुपकृत्यै एते पराक्रमा मया कृताः । अतः परमेष्यतोऽपि मत्कर्त्तव्यान्जगदुपकारान्भवतामपि तोषाय कथयामि । वैवस्वतमन्वन्तरे भविष्यत्यष्टाविंशतिमे युगे प्राप्ते सति शुम्भो निशुम्भश्चान्यावेव न त्विदानीं निहतौ यौ । ततोऽन्यावेव शुम्भनिशुम्भनामानौ दैत्यावुत्पत्स्येते उद्भविष्यतः। अष्टभिरधिका विंशतिः अष्टाविंशतिः "द्व्यष्टनः संख्यायाम्" इत्यात्त्वमष्टाविंशतेर्युगानां कृतादीनां पूरणं यद्युगं विष्णोरष्टमावतारोपलक्षितं तदष्टाविंशतितमम् ।"तस्य पूरणे डट्" इति डट् ।"प्रत्ययस्य विंशत्यादिभ्यंस्तमडन्यतरस्याम्" इति तमडागमः। तत्र पृषोदरादित्वात्तशब्दलोपः। यत्तु कश्चिदाह ।"माङ् माने" स्त्रियां भावे सम्पदादित्वात् क्विप् । मानं मा ॥८५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अष्टाविंशति मानं मा यस्य युगस्येति वाष्टाविंशतेरिव मानं यस्य युगस्येति वा विगृह्य बहुव्रीहौ नपुंसके ह्रस्वत्वे अष्टाविंशतिमं युगं ततः सप्तम्येकवचने अष्टाविंशतिमे इति । तावन्माने क्विपि घुमास्थादिना ईत्वप्रसंगो दुर्निवारस्तिष्ठतु युगमन्यपदार्थः । कथं स्यात् यावतां युगानामष्टाविंशतिः तत्परिमिता अपि युगरूपा अष्टाविंशतिसंख्याका एवान्यपदार्था इति अष्टाविंशतितममेव युगं द्वापरं तद्रूपं कलियुगादिरूपं न सेत्स्यतीति । यथा पञ्चसु पांडवेषु पंचमः सहदेवस्तत्र मा गमः पंच माः मानं यस्य स इत्युक्ते पंचानां पूरणः सहदेवोऽन्यपदार्थत्वेन न गृह्यते । किंतु पंचापि ते मिलिताः पञ्चत्वसंख्यापरिमिताः इति पञ्चपरिमिताः पञ्चमा इति युधिष्ठिरादयः । पञ्चाप्यऽन्ये पदार्थतया गृह्यंते नतु सहदेव एव । तस्मात्प्रागुक्त एव अष्टाविंशतिमे वा व्युत्पत्तिः पृषोदरादित्वेन सैव सभ्या । अष्टाविंशतिमे युगे द्वापरांते कलियुगादौ प्राप्ते । " यानाद्यंगे युगः पुंसि युगं युग्मे कृतादिषु । " ॥ ३८ ॥ ततोऽहं नंदगोपस्य कुले गृहे । " कुलं वंशे गृहेऽपि तत् " । जाता उत्पन्ना । यशोदाया

नंदगोपगृहे जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ॥ ३९ ॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४० ॥ भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ॥ ४१ ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकाम् ॥ ४२ ॥

नंदगोपस्त्रियाः गर्भात्संभवो जन्म यस्याः सा । विंध्याचलनिवासिनी सती तौ शुम्भनिशुम्भाख्यावसुरौ नाशयिष्यामि ॥ ३९ ॥ अहं पुनरपि वैवस्वतमन्वंतर एवाष्टाविंशतिमे युगे द्वापरेऽतीते कलौ युगे प्राप्ते विरुद्धा प्रजासु चित्तिर्ज्ञानं यस्य विप्रचित्तिर्नाम कश्चिद्दानवः तस्यापत्यानि वैप्रचित्ताः ताननतिरौद्रेण रूपेण पृथ्वीतले अवतीर्य प्रादुर्भावमुपेत्य हनिष्यामि । " तु स्याद्भेदेऽवधारणे " ॥ ४० ॥ तान्वैप्रचित्तान् महासुरान् उग्रान् भक्षयंत्याः मम दंताः रक्ता आरक्ता एव भविष्यंति अत एव दाडिमीपुष्पवदरुणवर्णाः भविष्यंति ॥ ४१ ॥ ततो हेतोः मां स्तुवंत्यः देवताः स्वर्गे सततं शश्वत् रक्तदंतिकासंज्ञया व्याहरिष्यंति कथयिष्यंति । देवा एव देवताः । स्वार्थे तल् । तथा मानवाश्च मर्त्यलोके भुवि मां सततं स्तुवंतः रक्ताः दंता यस्याः सा रक्तदंतिका तांस्तोष्यंति ॥ ४२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूयश्च पुनरपि शतं वर्षाणि परिमाणं यस्याः शतवार्षिकी ।"तदस्य परिमाणम्" इति वुञ् । तद्धितार्थे समासः। "वर्षस्याभविष्यति" इत्युत्तरपदवृद्धिः।"वर्षाल्लुक् च" इति पाक्षिको लुक् । स्त्रियां ङीप् । तस्यामनावृष्टौ सत्यामनंभसि नदीतडागादावपि जलशून्यायां भूमौ मुनिभिः संस्तुता । अयोनिजा सम्भविष्यामि स्वयमेवाविर्भवि-ष्यामि । न आसमन्ताद्वृष्टिरनावृष्टिः । यद्वा । नास्त्येवासमंताद्वृष्टिर्यस्यामितौ साऽनावृष्टिस्तस्याम् । संस्तुता संस्मृतेति पाठद्वयम् ॥४३॥ ततः प्रादुर्भावानंतरं नेत्राणां शतेन स्तोतॄन्मुनीन् निरीक्षिष्यामीति यत् ततो हेतोर्मां मनुजाः शतमक्षीणि यस्याः शताक्षी तामितीत्थमन्वर्थसंज्ञया कीर्त्तयिष्यंति। "ईक्ष दर्शने" अनुदात्तेत् छांदसं परस्मैपदम् । निरीक्षिष्ये यतो मुनीनिति वा पाठः ॥ ४४ ॥ हे सुरास्ततः शताक्षीति संकीर्त्तनादनंतरमहमात्मदेहसमुद्भवैः मम शरीरादुत्पद्यमानैः शाकैः प्राणधारकैः हरीतकैः पत्राद्यैः साधनैः आवृष्टेः आभविष्यंतीं वृष्टिमवधिं कृत्वा यावद्वृष्टिर्भवति तावंतं कालमखिलं समस्तं लोकं भरिष्यामि पोषयिष्यामि । "डुभृञ् धारणपोषण-

भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥ मुनिभिः संस्मृता भूमौ संभविष्याम्ययोनिजा ॥४३॥ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ॥ ४४ ॥ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥४५॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥४६॥

योः । ऋद्धनोस्ये " इतीडागमः । " अस्त्री शाकं हरीतकम् । शाकाख्यं पत्रपुष्पादि " । यदाहुः । " पत्रमूलकरीराग्रफलकांडास्थिरूढकाः । त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥ " ॥ ४५ ॥ तदा भुवि शाकंभरीति विख्यातिं संज्ञां च यास्यामि प्राप्स्यामि । तत्रैव तदैव च दुर्गमाख्यं महासुरं दुर्गमं नाम महांतमसुरं वधिष्यामि ।"जनिवध्योश्च" इति निर्देशाद्वधिः प्रकृत्यंतरमस्तीति विज्ञेयम् । "वध हिंसायाम्" भ्वादिः परस्मैपदी । हनिष्यामीति वा पाठः। शाकमिति मांतमव्ययं "चास्तिबिभर्ति" इति भरिः। "सर्वधातुभ्य इः " कृदिकारादक्तिनो वा ङीष् वक्तव्यः। सुप् सुपेति समासः। शाकंभरिः। यद्वा " फलेग्रहिरात्मंभरिश्च " इति चकारो-ऽनुक्तसमुच्चयार्थः । तेन लोकभरणार्थं स्वशरीरोद्भवानि शाकानि बिभर्ति शाकंभरिः । इप्रत्ययः । उपपदस्य नुमागमश्च । " पाठाव्याख्याश्च धातूनां दृश्यंते स्वैरिणः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्वचित् ।" तस्माद्दुर्गासुरवधाद्धेतोः विख्यातं प्रसिद्धं मे दुर्गादेवीति विख्यातं नामधेयं भविष्यति । दुर्गासुरो हंतव्यत्वेन यस्याः सा दुर्गा । अर्शआदित्वान्मत्वर्थीयोऽच् स्त्रियां टाप् ॥४६॥ हे देवाः, पुनश्च यदा हिमाचले भीमं घोरं रूपं कृत्वा रक्षोभ्यस्त्रस्तानां मुनीनां त्राणकारणाद्धेतोः रक्षांसि राक्षसान् भक्षयिष्यामि । क्षययिष्यामि पाठे क्षयं प्रापयिष्यामीति । "प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च" इति णिच् । अथवा "क्षय प्रेरणे" चुरादिः । प्रेरयिष्यामीत्यर्थः ॥ ४७॥ तदा मां देवीमानम्रमूर्त्तयः भक्तिप्रह्वकायाः संतः सर्वेऽपि मुनयः वसिष्ठादयः स्तोष्यंति । तत्ततः भीमरूपेण रक्षोभक्षणाद्धेतुतः विख्यातं प्रसिद्धं भीमादेवीति विश्रुतं नाम भ-

पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥४७॥ तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥४८॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ तदाहं भ्रामरं रूपं कृत्वा संख्येयषट्पदम् ॥ ४९ ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ ५० ॥ इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ तदा तदावतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५१ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देवैः कृता नारायणीस्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥

विष्यति । बिभ्यत्यस्मादिति भीमं "भीमादयोऽपादाने" निपातिताः ॥ ४८॥ हे देवाः, यदा त्रैलोक्ये अरुणो नाम महासुरः महाबाधां महतीं पीडां करिष्यति । लोकान्बाधिष्यते अतितरां तदा अहमसंख्येयषट्पदं भ्रामरं रूपं भ्रमरसंबंधिनीं मूर्तिं कृत्वा त्रैलोक्यस्य हितार्थाय अरुणं महासुरं वधिष्यामि तदा लोकाः सर्वत्र मां भ्रामरीत्येव स्तोष्यंति भ्रमरस्येयमाकृत्या भ्रामरी देवी । असंख्येयाः संख्यातुमशक्याः षट्पदाः भ्रमरमूर्तीर्भूत्वा अरुणासुरं हनिष्यति ततः सा भ्रामरीति नाम्ना लोकैः संकीर्त्तयिष्यते सर्वत्रेत्यर्थः । अरुणस्यापत्यं पुमानारुण इति च्छेदे अत इञं बाधित्वा शिवादित्वादण् वा ॥४९॥५०॥ इदानीं देव्यवताराणां तत्कार्याणां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चानंत्यात्साकल्येन वक्तुमशक्यत्वात्संक्षिप्य तत्कथामुपसंहरति । हे देवाः, इत्थमुक्तानुसारेण प्रकारेण यदा यदा दानवेभ्य उत्तिष्ठति उत्थास्यति वा दानवोत्था दानवेभ्यः समुद्भवा बाधा पीडा लोकानां भविष्यति उत्पत्स्यते । तदा तदा अहं तत्तत्कार्यानुरूपमवतीर्य प्रादुर्भावमवाप्य अरिसंक्षयं शत्रुविनाशं करिष्यामि । दानवोत्थेति सुपि स्थः कः कर्तरि ॥ ५१ ॥ इति मा०रा०श्रीमदु०शंतनु०देवीमा०टीकायां नारायणीस्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥ देव्युवाच ॥ यद्यपि प्रागपि देवान् देव्येवोवाच तथाप्यध्यायादौ देवीवचनस्य प्राधान्यं ध्वनयितुं देवीमाहात्म्याध्यानश्रवणादिफलप्राप्तिप्रामाण्यं च दर्शयितुं देव्येवोचितां वाचं देवानुक्तवती । यः पुरुषः समाहितः भक्तिश्रद्धान्वितो भूत्वा एभिः प्रागुक्तैः स्तवैः स्तोत्रैः पुनः पुनः नित्यं अविकल्पितं यथा भवति तथा शश्वद्वा मां देवीं स्तोष्यते तस्य पुंसः सकलां बाधां शमयिष्यामि असंशयं संशयाभावः । अर्थाभावेऽव्ययीभावः । यद्वा असंशयं यथा स्यात्तथा स्तोष्यते क्रियाफले कर्तृगते ञित्त्वादात्मनेपदम् । एभिरिति ब्रह्मकृतै-

देव्युवाच ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥ तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ १ ॥ मधुकैटभनाशं च महिषासुरघातनम् ॥ कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः॥२॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः॥ स्तोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥३॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ न भविष्यति दारिद्र्यं न चैवेष्टवियोजनम् ॥४॥

रिंद्रादिदेवकृतैश्च । हंसः सूर्यः परमात्मा । " असावादित्यो ब्रह्म " इति श्रुतेः । हंसस्य कला हंसकला.। बाध्यंते प्राणिनोऽनया बाधा संसृतिः अविद्यमाना हंसकला ब्रह्मविद्या यस्यां सा अहंसकला बाधा मोहरूपा ममता संसृतिः । तां बाधामसंशयं शमयिष्यामीत्यपि मुक्तिकामैरवगंतव्यम् । " रविश्वेतच्छदौ हंसौ " । यद्वा एभिः स्तवैः मां यः स्तोष्यते तस्याहंकारकृतां सकलां बाधां संसृतिं शमयिष्यामि ॥ १ ॥ त्रयाणामन्वयैक्यम् । ये पुरुषा एकचेतसः संतः सावधानाः संतः अष्टम्यां नवम्यां चतुर्दश्यां च पक्षद्वयेऽपि विशेषानुक्तितः यथाक्रममनपेक्ष्य मधुकैटभनाशनं च महिषासुरघातनं च तद्वच्छुंभनिशुम्भयोर्वधं च भक्त्या कीर्त्तयिष्यंति पठिष्यंति तद्वदेव ये श्रोष्यंति भक्त्या मम माहात्म्यमुत्तमं पुण्यतमं सर्वकामदुघं तेषां दुष्कृतं दुरितं सर्वसंचितं न किंचिदपि भविष्यति दुष्कृतोत्था आपदश्च न भविष्यंति ॥८७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विनश्यंतीत्यर्थः । न तेषां दारिद्र्यं भविष्यति आढ्यतैव भविष्यतीत्यर्थः। न च तेषामिष्टैः सह चेतनैरचेतनैश्च पुत्रादिभिर्द्धनादिभिश्च वियोजनं वियोगो भविष्यति । मधुकैटभयोर्नाशं यस्मिन् ग्रन्थे स तथोक्तः । हननं घातस्तस्य करणं घातनं ण्यंतात् ल्युट् । महिषासुरस्य घातनम् । सूदनमिति वा पाठः । " षूद क्षरणे हिंसायां च " वधो यस्मिन् ग्रंथे प्रतिपाद्यते स वधः । अर्शआदित्वादच् तम् । शुम्भनिशुंभयोरिति द्विवचनेन वधद्वयं सूच्यते । तेन वधानां वैषम्यादष्टम्यादिदिनत्रयेण यथाक्रमकीर्त्तनशंकापि दूरीकृता । एकमनन्यवृत्ति चेतो येषां ते । भजनं भक्तिरनन्यशरणतयाश्रयणम् । महांत आत्मनः अवतारा यस्याः सा महात्मा देवी तस्या भावः माहात्म्यम् ॥२॥३॥४॥ ये मम माहात्म्यं कीर्त्तयिष्यंति स्तोष्यंति च तेषां कदाचिदपि शत्रुतो भयं न संभविष्यति । दस्युतस्तस्करतोऽपि वा न । राजतोऽपि नृपाच्च । न शस्त्रतः आयुधतः न अनलतोऽग्नितः न तोयौघात् जलप्रवाहात् न सम्भविष्यतीत्यनेन सर्वत्र सम्बध्नाति ॥५॥ तस्माद्वांछितार्थसाधनत्वाद्धेतोः समाहितैः

शत्रुतो न भयं तेषां दस्युतो वा न राजतः ॥ न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ ५ ॥
तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥ ६ ॥
उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ७ ॥

सावधानैः कृतप्रयत्नैः पुंभिः परं प्रकृष्टं महत्पूजनीयम् । स्वस्त्ययनं क्षेमकरमयनं वर्त्म मम देव्या एतन्माहात्म्यं ग्रन्थसंदर्भरूपं भक्त्या पठितव्यं श्रोतव्यं च । एतन्माहात्म्यमिति बहुव्रीहिः । ग्रन्थसंदर्भरूपोऽन्यपदार्थः । शब्दस्यैव पठनश्रवणयोग्यत्वेन विषयभावात् । एतदिति तु पृथक्पदत्वे माहात्म्यं प्रतिपाद्यं तद्यत्रास्ति ग्रन्थबंधे सोऽप्युपचारान्मत्वर्थीयेन अर्शआद्यचा वा माहात्म्यशब्देनोच्यत इति पठनश्रवणयोग्यं द्रष्टव्यम् । " स्वस्त्याशीःक्षेमपुण्येषु मंगले चाव्ययं स्मृतम् ।" ॥६॥ मम देव्याः माहात्म्यं कर्तृ भक्तितः पठतां भक्तितः शृण्वतां च पुंसां महामारीसमुद्भवान् सर्वानुपसर्गानुपद्रवान् शमयेद्दूरीकुर्यात् । तथा तेषां पुंसां त्रिविधमुत्पातमाध्यात्मिकमाधिदैविकमाधिभौतिकम् । अध्यात्मिकं शरीरोत्पन्नं रागद्वेषादिकं व्याध्यादिकं च । आधिभौतिकं भूतप्रेतादिकजनितं भयभ्रमादिकम् । आधिदैविकं देव-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कृतं वज्रपातादिकं दारिद्र्यादिकं च । यद्वा भूर्भुवःस्वः संभवमुत्पातत्रयं शमयेत् । भौमं भूकंपादिकम् । आंतरिक्षमनभ्रगर्जनादि । स्वर्लोकजनितमसकृद्दनेकोडुपतनम् । महामारीति । " मृङ् प्राणत्यागे । स्त्रियामिक् कृष्यादिभ्यः" छांदसो गुणः । यद्वा औणादिकः सर्वधातुभ्य इन् । स्त्रियां कृदिकारादक्तिनो वा ङीष् । महती मारी महामारी " अन्येषामपि दृश्यते " इति पूरुषवद्दीर्घः । महामार्याः समुद्भवाः । यद्वा मरणं मरः ऋदोरप् । मरस्येयं प्रवृत्तिर्मारी । यद्वा मारयति मारः कालः मारस्य भावः मार्यं भावे ष्यञ् । मार्यमेव मारी स्त्रियां षित्त्वात् ङीष् ॥७॥ यत्र ममायतने गृहे प्रतिमादिमंदिरे एतत्प्रागुक्तचरितत्रयोपेतं माहात्म्यं नित्यं प्रतिदिनं सम्यगर्थतः पदतश्च शुद्धं पठ्यते भक्तितः पुंभिः तदायतनं सदा न विमोक्ष्यामि न त्यक्ष्यामि । तत्र गृहे खलु मे देव्याः सांनिध्यं सांनिधानं समवस्थानं स्थितं स्थितिमद्भूत् ॥८॥ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे च सर्वमेतन्मम चरितमुच्चार्यमवश्यं पठनीयम् । "ऋहलोर्ण्यत्" । श्राव्यमवश्यं श्रोतव्यं च । "ओरावश्यके" ण्यत् ।

यत्रैतत्पठ्यते सम्यङ् नित्यमायतने मम ॥ सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितम् ॥ ८ ॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ ९ ॥

यद्वा ण्यंतादचो यत् । श्राव्यं श्रावयितव्यं सर्वं जपनीयम् । एकदेशजपे तु च्छिद्रता स्यात् । महानवम्यादौ छागमेषमहापशुभिर्बलिदानं देवतोद्देशेन पशुसमर्पणम् । ददातेर्ल्युट् । पूजा पुष्पोपहारदीपादिसमर्पणम् । यद्वा । अलंकारवस्त्रस्रक्चन्दनवाहनच्छत्रचामरादिभिः । कुमारी सुवासिनी समर्चनं पूजा । अग्निकार्यं फाल्गुने मासि अग्निज्वालार्चनदेवीमाहात्म्यरूपमालामन्त्रपुरश्चरणांते विहितहोमोऽग्निकार्यम् । एतत्त्रयलक्षणो महोत्सवः । यद्वा चैत्रे वसंतोत्सवः। वैशाखे वारणपुष्पप्रचायिकोत्सवः । ज्येष्ठे जलक्रीडोत्सवः । आषाढे इन्द्रध्वजोत्थानोत्सवः । श्रावणे दोलोत्सवः । भाद्रपदे इन्द्रपाणिधनुरर्चनोत्सवः। आश्वयुजि शारदोत्सवः । कार्तिके दीपोत्सवः । मार्गशीर्षे मनूदयोत्सवः। पौषे निधिपूजोत्सवः। माघे मेरूत्सवः। फाल्गुने गन्धर्वोत्सवः। एतेषु संपूर्णं देवीचरितं पठनीयमिति भावः। यद्वा । महोत्सवः सर्वश्रुतियारायणम् । यद्वा वदतेः कर्त्तरि क्विप् । वदतीष्टदेवतामिति उत् देवीप्रणवः। महान् उत् मन्त्रो यत्र स महोत् स चासौ सवश्चेति महोत्सवः । मन्त्रदीक्षाख्यो यज्ञस्तस्मिन् । यद्वा । ॥८८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

"उन्दी क्लेदने"। उन्दनमुत्। स्त्रियां भावे सम्पदादिभ्यः क्विब्वा वक्तव्यः।उदः सवो दीक्षायज्ञः उत्सवः सुधोत्सवः सुधोत्सवो यत्र मन्त्रग्रहे स महोत्सवस्तस्मिन् ॥९॥ तथा तेन प्रकारेण इतिकर्त्तव्यतां गुरूपदिष्टेष्टदेवताराधनसामग्रीभावनीयोपक्रमोपसंहृतिक्रियाक्रमं जानता अजानता वापि भक्तिमता पुंसा कृतं बलिं बलिप्रदानं तथा तेन कृतां पूजां च। तथा तेन कृतं वह्नौ होमं तिलमध्वादिहोमद्रव्यप्रक्षेपं च प्रीत्याहं प्रतीच्छिष्यामि स्वीकरिष्याभि। " पतच्छ्रितं प्रतीच्छं स्यात्।" पतच्छ्रयणं प्रतीच्छा। प्रतीच्छास्त्यस्य प्रतीच्छः कश्चित्। अर्शआदित्वादच्। ततस्तद्वदाचरतीत्याचारे क्विप्। सनाद्यंतत्वाद्धातुत्वात्प्रतीच्छधातोर्भविष्यति काले लृट् स्यप्रत्ययः मिप् इडागमः। अतो लोपः। इण्कोः। आदेशप्रत्यययोः षत्वम्। प्रतीक्षिष्यामीति पाठे ईक्ष दर्शने अनुदात्तेत्त्वनिबंधनमात्मनेपदविधानमानित्यमिति चक्षिङो ङित्करणं ज्ञापकमित्युक्तत्वात्परस्मैपदम्। बलिपूजामित्येकपदत्वे तु बलिना पशुविशसनेन सह कृता पूजा बलिपूजा। बलिरूपा वा पूजा सत्कारस्तम् ॥ १० ॥

जानताजानता वापि बलिपूजां तथाकृताम् ॥ प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं यथाकृतम् ॥ १०॥ शरत्काले महापूजा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥११॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ १२ ॥ श्रुत्वा ममैतन्माहात्म्यं तथोत्पत्तीः पृथक् शुभाः ॥ पराक्रमांश्च युद्धेषु जायते निर्भयः पुमान् ॥१३॥

युग्मम्। या च प्रसिद्धा वार्षिकी महापूजा शरत्काले क्रियते तस्यां विषये मम एतन्माहात्म्यं चरित्रत्रयलक्षणं भक्तिसमन्वितः मनुष्यः पठित्वा श्रुत्वा च यथायोगं मत्प्रसादेन सर्वबाधाविनिर्मुक्तः धनधान्यसमन्वितः भविष्यति संशयो नात्र कर्तव्यः। वर्षेण निर्वृत्ता वार्षिकी सांवत्सरिकी " तेन निर्वृत्तः" इति ठक्। स्त्रियां ङीप्। सर्वाबाधेति पाठे आसमंताद्बाधा आबाधा ॥ ११ ॥ १२ ॥ एतच्चरित्रत्रयलक्षणं मम माहात्म्यं भक्तितः श्रुत्वा गुरुतो गृहीत्वार्थावबोधपर्यंतमधीत्य च पुमान् युद्धे निर्भयो जायते। तथा मम शुभाः जगदभ्युदयकरीः पृथगुत्पत्तीः ब्रह्माण्यादिमहाशक्तिरूपप्रादुर्भूतीः श्रुत्वा हृद्याकलय्य युद्धे निर्भयो जायते तथा मम पराक्रमांश्च वीरकर्माणि च श्रुत्वा। यद्वा युद्धेषु मम पराक्रमांश्च श्रुत्वा निर्भयो जायते पुमान्। तथा चोत्पत्तयः शुभा इति पाठे " व्यत्ययो बहुलम् " इति शसः प्रसंगे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जसः प्रयोगश्छांदसः । युद्धेष्विति बहुवचनमन्येष्वपि भयकारणेषु निर्भयत्वार्थम् । "यु मिश्रणे" अदादिः । सम्पदादित्वाद्भावे स्त्रियां क्विप् । यवनं युत् मिश्रणं पापसम्पर्कस्तस्यां युति । यद्वा । "युञ् बन्धने" क्र्यादिः यवनं युद्धंधनं तस्यां युति "ओहाङ् गतौ" सम्पदादित्वात् क्विप् । हीनं हाः निम्नादिगतिस्तस्याम् । इः कामस्तत्र विषये । युच्च हाश्च युश्च युद्धयः तेषु युद्धेषु ॥१३॥ भक्तितः मम माहात्म्यं शृण्वतां पुंसां रिपवः शत्रवः संक्षयं यांति कल्याणं च मंगलमुपपद्यते । "पद गतौ" दिवादिः । उप समीपं गच्छति । उपजायते इति वा पाठः। कुलं गोत्रं च नंदते । "टुनदि समृद्धौ" परस्मैपदी । "कर्त्तरि कर्मव्यतिहारे" इत्यात्मनेपदम् । यद्वा । ण्यंतात्कर्मकर्त्तरि यगात्मनेपदं च । "संततिर्गोत्रजननकुलान्यभिजनान्वयौ । कुलं गृहे च तालांके भूमिग्राहिणि तु त्रिषु ।" ॥ १४ ॥ उत्पातादिसूचितोपद्रवाणां सर्वत्र सर्वस्मिन् शांतिकर्मणि तथा दुःस्वप्नदर्शने दुष्टफलस्वप्नदर्शने । उग्रासु अत्यनिष्टफलासु ग्रहकृतासु पीडासु मम माहात्म्यं शृणुया-

रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १४ ॥ शांतिकर्मणि सर्वत्र तथा दुःस्वप्न-
दर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १५ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं च नृभिर्दृष्टं
सुस्वप्नमुपजायते ॥ १६ ॥ बालग्रहाभिभूतानां बालानां शांतिकारकम् ॥ संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥ १७ ॥

त्पुरुषः ततः सर्वबाधोपशांतिर्भवति सर्वेष्टार्थसिद्धिश्चेति भावः॥१५॥ पूर्वोक्तं पुनर्व्यनक्ति । मम माहात्म्यश्रवणादुपसर्गाः बाधाः अतिवृष्ट्यादयः शमं यांति । यद्वा। उपसर्गा उत्पाताः प्रकृतिविरुद्धेतयः। "अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम्।" तथा तत एव दारुणाः भयानकाः ग्रहपीडाः शन्यादिकृता बाधाः शमं शांतिं यांति । नृभिः दृष्टं दुःस्वप्नं सुस्वप्नमुपजायते । दुःस्वप्नसूचितं यद्दुष्टं फलं तत्सुस्वप्नसूचितमिव फलं संपद्यत इति भावः । अतर्कितप्राप्यफलो हि मणिमंत्रौषधदेवताप्रभावः । दुःस्वप्नसुस्वप्नयोर्नियते पुँल्लिंगत्वेऽपि बहुव्रीहौ फलेऽन्यपदार्थे विवक्षिते नपुंसकतोपपत्तिः । अर्द्धर्चादौ स्वप्नशब्दो नास्त्येव । अन्यथास्य पुंनपुंसकतोपपद्येत। दुःस्वप्नश्चेति पाठो वा ॥ १६ ॥ बालानां शिशूनां ग्रहाः पीडकाः पूतनादयः श्मशानादिवासिनो दृष्टिबंधिगलबंध्यंत्रबन्धिनाभिबन्धिशुक्रबंध्युपस्थबंधिरुधिरशोषि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पिशितशोषिमूत्रशोषिलालाशोषिप्रभृतयश्च तैरभिभूतानामाक्रांतानां शांतिकारकमुपशमनकारणं मम माहात्म्यश्रवणाद्युत्तममाश्रयणीयम् । किंच । नृणामेककार्यकारिणां कथंचित्परकृतोच्चाटनप्रयोगतः संघातभेदे प्रसक्ते सति मन्माहात्म्यश्रवणमेवोत्तमं मैत्रीकरणं मित्रत्वकरणसाधनम् ॥ १७ ॥ दुष्टं वृत्तं चरितं येषां ते दुर्वृत्ताः तेषामशेषाणां परं श्रेष्ठं बलहानिकरं बलनाशहेतुः मन्माहात्म्यम् । कृञो हेतौ टः । किंच रक्षसां मायोपजीविनां भूतानां बालग्रहादीनां पिशाचानां पिशिताशनानां तामसानां च पीडकानामदृश्यरूपाणां मम माहात्म्यस्य पठनादेव नाशनं दूरीकरणं भवति ॥१८॥ मम सांनिध्यकारकं नैकट्यकारकम् । संनिधिकारकमिति पाठेऽपि संनिधिः संनिधानम् इति व्याख्याश्रयणात्स एवार्थः । यद्वा संनिधिः महानिधिः महापद्मादिः तस्य कारकं प्रापकं पठ्यमानं सदिति भावः ॥ १९ ॥ युग्मम् । पुंभिरेभिः प्रकारैर्वत्सरेण या क्रियते मे मह्यं प्रीतिः सास्मिन्सन्माहात्म्ये सकृदेकवारमेव उच्चारिते पठिते श्रुते वा भक्तिमद्भिः सर्वकामदुघोपार्जितेव स्यात् । पशुभिः

दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥ रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१८॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ॥
सर्वं कृत्स्नमेतदादिमध्यावसानलक्षणम् ॥ १९ ॥ पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः ॥ विप्राणां भोजनैर्होमैः प्रेक्षणीयैरहर्निशम्
॥ २० ॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ प्रीतिर्मे क्रियते सास्मिन् सकृदुच्चरिते श्रुते ॥ २१ ॥

चतुष्पाद्भिः छागमेषमहिषमातंगादिभिः द्विपाद्भिर्महापशुभिश्च नरैः पुष्पैः सुरभिसंभृतैः अर्घैः पूजांगैर्मधुघृतादिभिः धूपैः कर्पूरागरुमृगमदादिगर्भितैर्बहुरूपादिभिर्नानाकृतिगन्धादिभिः चशब्दात् श्रीवासादिधूपा गृह्यंते । तैर्गंधैः गन्धसारघनसाररक्तचन्दनमृगमदकंकोलकालागरुकुंकुमादिभिः दीपैः कर्पूरघृतादिप्रवर्त्तितैर्माणिक्यमहोभिरुपकल्पितैः सूर्यमहोभिश्चन्द्रमहोभिरुडुमहोभिः परमात्मपरज्योतिर्भिश्चोपकल्पितैः । अत एवैवंविधैरुत्तमैः श्रेष्ठतमैः । तथा उत्तमैर्विविधैर्विप्राणां कर्त्तव्यैर्भोजनैः षड्रसोपेतैर्भोज्यै रत्नादिभिरुचितैः । तथा विविधैर्होमैः । तथाऽहर्निशं दिवानिशं विविधैः प्रेक्षणीयैर्दर्शनीयैर्नृत्यगीतवाद्यैः । तथान्यैश्च विविधैर्भोगैस्तथा दानैर्मत्प्रीत्यर्थैर्विविधैः । चशब्दाद्वस्त्रालंकारपूजादिभिः साधनैः वत्सरेण या मे प्रीतिः सकलकामदुघा भक्तैः क्रियते सास्मिन्प्राक् प्रपंचिते मम माहात्म्ये सकृदेकवारंभ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्त्या उच्चरिते पठिते श्रुते वा साधयितुं सुगमेत्यर्थः । यद्वा सकृत् सह द्वित्रैः पुंभिः पंचषैः सप्ताष्टैरेकद्वित्रिचतुरैरेकतयोच्चरिते श्रुते वेत्यर्थः । " सहार्थे चैकवारे च सदार्थे वाव्ययं सकृत् । " सकृत्सुचरिते श्रुते इति पाठे श्रुतशब्दतः श्रवणप्राधान्यं सुचरिते शोभने चरिते । प्रोक्षणीयैरहर्निशमिति पाठे तु कश्चिदाह । मन्त्रपूतजलोक्षणसंस्कृतहतच्छागादिपशुबालिरिति तन्न । पशुपुष्पार्घधूपैरिति पशुग्रहणेन पौनरुक्त्यप्रसंगात् । तत इत्थं त्वर्थोऽत्र वक्तव्यः । " उक्ष सेचने " । प्रत्यहं पंचामृताभिषेकैरविच्छिन्नपीयूषधाराभिषेकैर्वेति ॥ २० ॥ २१ ॥ मम देव्या माहात्म्यस्य श्रुतं श्रवणं कर्तृ । पापानि हरति अपनयति नपुंसके भावे क्तः । तद्योगे षष्ठ्येव । यद्वा मम माहात्म्यं श्रुतं सत् पापानि हरति । तथा भजतामारोग्यं प्रयच्छति दानप्रतिग्रहाभावात् षष्ठ्येव । मम जन्मनामुत्पत्तीनां ब्रह्माण्यादिरूपतया प्रादुर्भावानां कीर्त्तनं कथनं भूतेभ्यः हिंस्रेभ्यः भूतप्रेतपिशाचसिंहव्याघ्रग्रहादिभ्यः भक्तानां रक्षां करोति ॥ २२ ॥ युद्धेषु यद्दुष्टदैत्यनिबर्हणं मे देव्याः चरितं शस्त्रप्रयोगलक्षणं

श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥२२॥ युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥ तस्मिन् कृते वैरिकृतं भयं पुंसां न जायते ॥२३॥ युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥ ब्रह्मणा च कृता यास्ताः प्रयच्छंति शुभां गतिम् ॥ २४ ॥ अरण्ये प्रांतरे वापि दावाग्निपरिवारितः ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥ २५ ॥

संग्रामकौशलमभूत्तस्मिन्श्रुते सति श्रुतवतां पुंसां युद्धेषु ततोऽन्यत्र च वैरिकृतं भयं न जायते । निबर्हयति निबर्हणम् । नंद्यादित्वाल्ल्युः । दुष्टानां दैत्यानां निबर्हणं चरित्रम् ॥ २३ ॥ सुमेधसा मार्कंडेयेन च ततः पूर्वैश्च ब्रह्मर्षिभिः याः स्तुतयः कृताः तथापि ममतावर्ते मोहगर्ते निपातिताः महामायाप्रभावेणेत्यादयः ताश्च शुभां गतिं प्रयच्छंति पठ्यमानाः पठद्भ्यः पुंभ्यः याश्च ब्रह्मणा मधुकैटभभीतेन कृताः स्तुतयः विश्वेश्वरीं जगद्धात्रीमित्यादयः । अथ च युष्माभिरेव कृताः स्तुतयः देव्या यया ततमिदं जगदात्मशक्त्येत्यादयः । नमो देव्यै इत्यादयश्च । देवि प्रपन्नार्तिहरे प्रसीदेत्यादयश्च । तास्त्रिविधाः स्तुतयः ॥ २४ ॥ एकान्वयमिदं श्लोकचतुष्टयम् । अरण्ये विपिने वा वर्त्तमानः मम देव्या एतच्चरितं स्मरन्नरः संकटाद्दुःखघटनान्मुच्येत स्वयमेव । संकटं ना तु संबाधः । कर्मकर्त्तरि मुचेर्लिङ् । तथा प्रांतरे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वापि दूरे जनशून्यमार्गे । "प्रांतरं दूरशून्योऽध्वा" । तथा दावाग्निपरिवारितः सन्नपि वा । तथा दस्युभिः तस्करैर्वृतः वेष्टितो वा । तथा शून्ये निर्जनप्रदेशे शत्रुभिर्गृहीतो वा । तथा सिंहेन व्याघ्रेण वानुयातोऽनुद्रुतः । तथा वनहस्तिभिर्वृतो वा हंतुमनुयातः । तथा क्रुद्धेन राज्ञा वध्योऽयं वधार्होऽयमित्याज्ञप्तः । हंतुमाज्ञापितो वा । तथा बन्धगतोऽपि वा । तथा वातेन घूर्णितः व्याकुलितः बाधितोऽपास्तो वा । महार्णवे समुद्रे पोते नौकाविशेषे सांयात्रिकाः पोतवणिजः कथ्यंते तत्र स्थितौ वा । " पानपात्रे शिशौ पोतः " । तथा भृशदारुणेत्यर्थं भीषणे संग्रामे शस्त्रेष्वायुधेषु पतत्सु । सर्वाबाधासु सर्वा आसमंताद्बाधाः महाबाधाः तासु । सर्वबाधास्विति पाठे स एवार्थो भवत्यदूरविकर्षात् । घोरासु व्रणपीडासु वर्त्तमानो वा तथा वेदनासु तत्तद्दुःखानुभवेषु अभ्यर्दितः वर्तमानः यद्वा तीव्रवेदनयाऽभ्यर्दितः हिंसितोऽपि वा

सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बंधगतोऽपि वा ॥ २६ ॥ आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥ २७ ॥ सर्वबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ २८ ॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तदा ॥ दूरादेव पलायंते स्मरतश्चरितं मम ॥ २९ ॥ ऋषिरुवाच ॥ इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा ॥ पश्यतामेव देवानां तत्रैवांतरधीयत ॥ ३० ॥

सर्वत्रैतन्मम चरितं स्मरन्नरः संकटान्मुच्येत स्वयमेवेति योजनीयम् । इहारण्ये प्रांतरे वापीत्यतः श्लोकात्पूर्वं सिंहव्याघ्रानुयातो वेति पठंति केचित् । अतश्च मम प्रभावात्सिंहाद्या इत्युपपन्नं भवति ॥२५॥२६॥२७॥२८॥ मम प्रभावात्सामर्थ्यात्सिंहाद्यास्तथा दस्यवस्तस्करास्तथा वैरिणश्च शत्रवः चरितं स्मरतः पुरुषात्सकाशाद्दूरादेव पलायंते ॥२९॥ इत्थमुक्त्वा सा भगवती चंडविक्रमा प्रगल्भवीर्या चंडिका देवी पश्यतामेव देवानां तत्रैव पुरोभाग एवांतरधीयत । अंतर्धानमगात् । " श्रदंतरोरुपसर्गवद्वृत्तिर्वक्तव्या " । अंतः पूर्वाद्दधातेः कर्मकर्त्तरि लिङ् । यद्वा तान् देवान् त्रायते इति तत्रा पालयंती सत्येव स्वयमंतरधीयत । " आतोऽनुपसर्गे कः " । यद्वा तत्रैव देवशरीरेष्वेवांतरधीयत । स्वयमेव शरीरेष्वेवांतर्न्यलीयतेत्यर्थः । पश्यतामित्यनादरे षष्ठीति पक्षे यथा जननी सुतान्व्याजतोऽनाहत्यालोकनादन्तर्धत्ते तथेयमपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वजननी देवदर्शनतोऽन्तरधीयत स्वयमेवेति भावः ॥ ३० ॥ अथ ते देवा अपि देव्या विनिहतारयः नाशितशत्रवः अत एव यथा पुरा पूर्वकाल इव निरातंकाः कृच्छ्रजीवनतो निर्भयाः यज्ञभागभुजः यज्ञांशान् भुंजानाः संतः स्वाधिकारान् स्वव्यापारान् चक्रुः कृतवन्तः ॥ ३१ ॥ युधि संग्रामे देव्या तस्मिञ्जगद्विध्वंसिनि त्रैलोक्यभंजिनि महोग्रे अतुलविक्रमे अनुपमशक्तौ देवरिपौ ससैन्ये शुम्भे महावीर्ये निशुम्भे च निहते सति शेषाः दैत्याः पातालमाययुः बलिसद्म प्राविशन् । चशब्देन ससैन्ये इति विशेषणं लभ्यते । पतंत्यस्मिन्निति पातालम् ॥ ३२॥ हे भूप, एवमुक्तरीत्या सा भगवती नित्यापि ध्रुवा अविनश्वरा अविकारापि सती पुनःपुनः संभूय प्रादुर्भावमवाप्य जगतः परिपालनं कुरुते । उक्तं च प्रागपि । नित्यैव सा जगन्मूर्त्तिरिति । देवानां कार्यसिद्ध्यर्थमिति च ॥ ३३ ॥ सैव देवी विश्वं प्रसूयते जनयति।

तेऽपि देवा निरातंकाः स्वाधिकारान्यथा पुरा ॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥ ३१ ॥ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि ॥ जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे ॥ निशुंभे च महावीर्ये शेषाः पातालमाययुः ॥ ३२ ॥ एवं भगवती देवी सा नित्यापि पुनः पुनः ॥ संभूय कुरुते भूप जगतः परिपालनम् ॥ ३३ ॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥ ३४ ॥ व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले महामारीस्वरूपया ॥ ३५ ॥

" षूञ् प्राणिप्रसवे " दिवादिः । तथैव हेतुभूतया एतद्विश्वं मोह्यते " मुह वैचित्ये " दिवादिः । अविवेकेन योज्यते । ममतासहितं क्रियते । सा देवी भक्तैः याचिता सती विज्ञानं च प्रयच्छति । सैव देवी तुष्टा सती तपसा जनितसंतोषा सती वृद्धिं च संपदं च महतीं प्रयच्छति ददाति । तुष्टा ऋद्धिमिति तु पाठे असंहितया निर्देशः कृतः । " ऋत्यकः " इति तु प्रकृतिभावे तस्याकः स्थाने ह्रस्वत्वे च सती तुष्टऋद्धिमिति स्यात् । खट्वऋश्य इतिवत् । सा याचितार्थविज्ञानमिति पाठे अर्थेषु विज्ञानमिति विग्रहः । एतत्प्रागप्युक्तम् । " तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः । महामाया हरेरेषा तया " इति ॥ ३४ ॥ हे मनुजेश्वर सुरथ, महामारीस्वरूपया तया महाकाल्या महातामस्या महादेव्या एतत्सकलं ब्रह्मांडं त्रैलोक्यगर्भकं स्थानं व्याप्तम् । महाकाले प्रलयसमये । महांश्चासावकालश्चेति महाकालः अनि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्टकालः । यद्वा महांश्चासौ कालश्च महाकालः कालाग्निरुद्रस्तस्मिन्नुपस्थिते महाकाले महति प्रलयसमये । महांश्चासौ कालः कालाग्निरुद्रस्तस्येयं स्त्री महाकाली तया । मारयति संहरति मारः महांश्चासौ मारश्च महामारः रुद्रस्तस्य स्त्री महामारी सा स्वरूपं यस्याः सा देवी महामारीस्वरूपा तया । यद्वा मह उद्धव उत्सवः । महान् उत्सवानासमंतान्मारयति नाशयति महामारी महाप्रलयानलज्वाला तस्या इव रूपं यस्याः सा तया । " मृत्युजिह्वा महामारी जगत्संहारकारिणी । महारात्रिर्महानिद्रा महाकाल्यतितामसी ॥ सैव कालानलज्वाला सैवाविद्या तमःप्रसूः । सैव मोहप्रसूर्मृत्युः सैव सर्वाधिदेवता ॥ " ॥ ३५ ॥ अजा जन्मरहिता सनातनी नित्या देवी काले भूतानां प्रलयसमये तमोगुणमयी सती महामारीति कथ्यते । तथा काले उत्पत्तिसमये सैव भूतानां सर्गसमये रजःप्रधाना स्थितिं करोति ॥ ३६ ॥ भवकाले देवीसांनिध्यभवकाले नृणां गृहे सैव लक्ष्मी वृद्धिप्रदा । सम्पद्भवप्रदा भवति । प्रेदाङ्गः कः । तथा सैव देवी अभावे देवीसांनिध्याभावेऽलक्ष्मीः सम्पदः विनाशायाम-

सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३६ ॥ भवकाले नृणां सैव लक्ष्मी वृद्धिप्रदा गृहे ॥ सैवाभावे तथा लक्ष्मीर्विनाशायोपजायते ॥३७॥ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥ ३८ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देव्याश्चरितमाहात्म्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

वाय उपजायते । यत्र लक्ष्मीः तत्र देव्याः सांनिध्यम् । यत्र देव्याः सांनिध्यं न तत्र सम्पदपि नेत्यन्वयव्यतिरेकौ वेदितव्यौ ॥ ३७ ॥ नित्यं देवीसांनिध्यकारणं तत्फलं चोपदिशति सुमेधाऋषिः । हे नृप, सा देवी स्तुता स्तावकैः पदैः संकीर्तिता च तथा पुष्पैः संपूजिता च तथा गन्धैः कर्पूरचन्दनमृगमदादिभिर्विलिप्ता तथा धूपैर्बहुविधैर्धूपिता । तथा आदिग्रहणाद्वस्त्रालंकारतांबूलादिभिरानंदिता भक्तैः प्रणता च सती अप्रार्थितैव भक्तेभ्यः वित्तं धनं पुत्रांश्च आयुरारोग्यमैश्वर्यं चशब्दसूचितम् । धर्मे मतिं च शुभां गतिं च ददाति । यदुक्तं प्राक् । " सा विद्या परमा मुक्तेर्हेतुभूता सनातनी । संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ " ॥ ३८ ॥ इति मार्कंडेये राजाधिराजतोमरान्वयश्रीनदुद्धरणात्मजशंतनुचक्रवर्तिविरचितायां देवीमाहात्म्यटीकायां देव्याश्चरितमाहात्म्यं नाम द्वादशोऽध्यायः ॥ १२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऋषिरुवाच । सुमेधा भगवानृषिः सुरथं राजानमुचितां वाचमूचे । हे सुरथ, एतदुत्तमं श्रेष्ठतमं सर्वार्थसाधनं ते तुभ्यं कथितम् । सा च देवी एवंप्रभावा ईदृग्विधसामर्थ्या वर्तते । सा का यया देव्या सर्वजनन्या सर्वपोषिण्या सर्वसंहारिण्या इदं जगद्विश्वं धार्यते सृज्यते पाल्यते प्रत्यवसीयते च । यथाकालम् । "धृङ् अवस्थाने" णिच् । कर्मणि यक् । आत्मनेपदं च लटः। "क्रियावाचित्वमाख्यातुमेकोऽत्रार्थः प्रदर्शितः। प्रयोगतोऽनुसर्त्तव्या अनेकार्था हि धातवः॥" महात्मनो महामूर्तेर्देव्या भावे कर्मणि ब्राह्मणादित्वात् ष्यञि "नस्तद्धिते" इति टिलोपे माहात्म्यमिति सिद्धम् ॥१॥ भगवद्विष्णुमायया तयैव चंडिकयैव विद्याज्ञानं क्रियते उत्पाद्यते । परमात्मज्ञानसाधनं देव्यैवोपनिषद्रूपेति भावः । विष्णोर्माया भगवती विष्णुमाया भगवद्विष्णुमाया तया । यद्वा भगवान् विष्णुः भगवद्विष्णुस्तस्य मायया यदुक्तं सा विद्या परमा मुक्तेर्हेतुभूता इति । "ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ॥" हे राजन्, तया मोहरूपया देव्या त्वं विवेकी

ऋषिरुवाच ॥ एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥ एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥१॥ विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ मोह्यंते मोहिताश्चैव मोहमेष्यंति चापरे ॥ २ ॥ तामुपैहि महाराज शरणं परमेश्वरीम् ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ३ ॥

सन्नपि संप्रति मोह्यसे प्राक् मोहितोऽभूः । भविष्यति च काले मोहमेष्यसि च । तथा तथैव एष वैश्यश्च समाधिर्नाम मोह्यते मोहितश्च मोहमेष्यति च । तथैव तथैव युवाभ्यामन्येऽपि विवेकिनः पुमांसः अधिगतशास्त्राः संतोऽप्यपरे च तेभ्यश्चान्ये च सर्वे तथैव देव्या मोह्यंते मोहिताश्च मोहमेष्यंति च । यदुक्तं प्राक् । "तथापि ममतावर्त्ते मोहगर्त्ते निपातिता" इत्यादि ॥ २ ॥ प्राक् राज्ञा "भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।" इति यद्रहस्यं पृष्टं हे महाराज सुरथ, त्वं तां परमेश्वरीं देवीं शरणमुपेहि । उप इहि आङ्गुणः उपगच्छ शरणं व्रज । सैव देवी भगवत्येवाराधिता तपसा तोषिता सती नृणां पुंसां भोगस्वर्गापवर्गदा भुवि भोगदा । जन्मान्तरे स्वर्गदा । ततः अपवर्गदा मोक्षदा भवति । यतो ज्ञानदा तत एव मोक्षदा । ज्ञानादेव तु कैवल्यमिति सिद्धांततः। संप्रदानाभावाद्रजकस्य वस्त्रं ददातीतिवत्संबंधे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षष्ठचेव । नृणामिति । उपपूर्वे इण् गतौ । सेर्ह्यपिच्च । उप इहि इति स्थिते । " एत्येधत्यूठ्सु " इति वृद्धिर्न । तद्विधा वेचीत्यनुवर्त्तते । तत आङ्ग एवं बाधकाभावात् । आङ्पूर्वत्वेऽपि आ इहि इति स्थिते । वृद्धिं बाधित्वा " ओमाङोश्च " इति पररूपत्वे सति उपेहीत्येव रूपम् । उपैहीति वृद्धिकृतः पाठः छांदसः क्वाचित्कः । " सर्वे विधयश्छंदसि विकल्पंते " इति वचनात् । यद्वा एहीत्येतद्विभक्तिप्रतिरूपकमव्ययं पृषोदरादित्वात्साधुः । उप एहि उपेहि । महाराज, " राजाहःसखिभ्यष्टच् । न पूजनात् । पूजायां स्वतिग्रहणम् । अश्नोतेराशुकर्मणि वरट् चेच्चोपधायाः " परमामीश्वरीम् ॥ ३ ॥ युग्मम् । ऋषिरुवाच । मार्कंडेयो भगवान्मुनिः स्वशिष्यं क्रौष्टुकिं मुनिं वाचमुचितामूचे हे क्रौष्टुकिमुने, आकर्णय । इति प्रागुक्तप्रकारेण तस्य सुमेधसो ब्रह्मर्षेः वचः श्रुत्वा देवीमाराधयेति उपदेशवाक्यमाकर्ण्य सुरथो नाम नराधिपस्तं सुमेधसं महाभागं संशितव्रतमृषिं प्रणिपत्य प्रणामैराराध्य । पुत्रमित्रकलत्रादावतिममत्वेन अतिमोहेन शत्रुभिः राज्यापहरणेन च हेतुना निर्विण्णः दुःखि-

मार्कंडेय उवाच ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ प्रणिपत्य महाभागं तमृषिं संशितव्रतम् ॥४॥ निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ ५ ॥ संदर्शनार्थमंबाया नदीपुलिनसंस्थितः ॥ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ ६ ॥

तमानसः सन् सद्यः सपदि तपसे जगाम । तथा समाधिर्नाम वैश्यश्च तपसे जगाम । भगस्य ऐश्वर्यादेरिदं भागं महद्भागं यस्य महाभागस्तम् । संशितं यत्नेन प्रतिपादितं व्रतं यस्य येन स संशितव्रतस्तम् । " शो तनूकरणे " । कर्मणि क्तः । " शाच्छोरन्यतरस्याम् " । शातेरित्त्वं व्रते नित्यमिति वक्तव्यम् । शंसितव्रतमिति पाठे शंसतेः कर्मणि क्तः । शंसा वा संजाता यस्य शंसितं व्रतं शास्त्रोक्तमुपवासादि यस्य तम् । " शंसु स्तुतौ । निर्विण्णस्योपसंख्यानम् " इति णत्वम् । " विद्लृ लाभे, विद विचारणे वा " क्तः निष्ठानत्वम् ॥ ४ ॥ ५ ॥ अंबायाः जगज्जनन्या देव्याः संदर्शनार्थं प्रत्यक्षीकरणाय । नद्याः पुलिने द्वीपे तटविशेषे वा संस्थितः सैकते देशे सम्यगवस्थितः स राजा च सुरथः स वैश्यश्च समाधिर्नाम परं श्रेष्ठं सर्वार्थप्रदं केवलं देवीसूक्तं वैदिकमृग्विशेषं मंत्रं देव्यधिदैवतं देव्यां सुष्ठु शोभ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नमुक्तं प्रणीतं देव्यां वा विषये सूक्तमुपदिष्टमाचार्यैरागमीयं देवीप्रणवमग्निगर्भं वा एतदेव वा चरित्रत्रयं जपन् तपस्तेपे । केचित्तु वाग्ग्रहणादंबा माता मातृकेति मातृकामंत्ररूपं देवीसूक्तमाहुः । अपरे तु देवीसूक्तं पृथगस्ति रहस्ये तज्जपामित्याहुः । अन्ये त्वाहुः श्रुतिस्मृतिपुराणोक्तानि देवीसूक्तानीति । " संस्थाधारे स्थितौ मृतौ " तपस्तपःकर्मकस्यैवेति तपःकर्त्ता कर्मवद्भवति । उपवासादीनि तपांसि तापसं तपंति दुःखयंति स तापसस्स्वगस्थिभूतः स्ववांछितस्वर्गाद्यर्थं तपस्तप्यते । " तप संतापे " लिटि तपस्तेपे तपोऽर्जितवानित्यर्थः । अन्यकर्मकत्वे तु उत्तपति स्वर्णं सुवर्णकारः ॥ ६ ॥ तौ द्वौ राजा सुरथः वैश्यश्च समाधिस्तास्मिन्नद्याः पुलिने तटविशेषे । तोयोत्थितं तत्पुलिनम् । तत्र देव्याः मूर्त्तिमाकृतिं महीमयीं मृन्मयीं प्रतिमां विधाय । " मयङ्वैतयोर्भाषायामभक्ष्याच्छादनयोः " इति विकारावयवयोः मह्याः मयट् । तस्याः देव्याः अम्बिकायाः पुष्पधूपाग्नितर्पणैः पुष्पैः धूपैः अग्निकार्यैर्होमैः तर्पणैश्च विहितैस्तैरुचितैरर्हणां पूजामाराधनं चक्राते । पृथक् पृथक् विदधाते ।

तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ ७ ॥
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ ८ ॥

" मूर्त्तिः काठिन्यकाययोः । पूजा नमस्यापचितिः सपर्यार्चार्हणाः समाः । " पुष्पाणि धूपाः अग्नयस्तर्पणानि च तैः ॥ ७ ॥ " निर्निश्चयनिषेधयोः " । निराहारौ हविष्यादिना तावन्निश्चिताशनौ । ततः क्रमशो मूलाशनौ । यतात्मानौ विषयेभ्यो व्यावर्त्तितमनोनेत्रादिज्ञानेंद्रियौ निर्जितेंद्रियग्रामौ । " तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् । न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ " तन्मनस्कौ । तस्यामेवाध्यातुं मनो ययोस्तौ तथोक्तौ देवीध्यानपरौ । समाहितौ । गुरूपदिष्टार्थसावधानौ । निरस्तसंशयौ बहुविघ्नपरिहारपरौ । तौ सुरथवैश्यौ । निजगात्रसृगुक्षितम् । तपश्चरणकरणकाले परहिंसापराङ्मुखौ ईषच्छरीरोद्भवरक्तसिक्तमेवान्नमयं बलिं च ददतुः । " तुण्डजं बाहुजं वापि रक्तमांसमयं बलिम् । भक्त्यावेशान् महाशूरो महामायार्थमुत्सृजेत् ॥ " चशब्दान्निजशरीरजरुधिरचन्दनविलेपनं च देव्यै ददाते । एतेन शरीरं वा पातयामि मन्त्रं वा साधयामीति हठयोगः सूचितः ॥ ८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवमुक्तप्रकारेण समाराधयतोस्त्रिभिर्वर्षैः यतात्मनोः देव्यामवहितचेतसोस्तयोः क्षत्रियवैश्ययोः परितुष्टा । तत्कृतेन तपसाऽतिप्रीता । जगतां धात्री चण्डिका देवी प्रत्यक्षं भूयः प्राह कथयामास । प्राहेति विभक्तिप्रतिरूपकमव्ययम् । यतः चण्डिका जगद्धात्री ततस्तयोस्तापसयोः प्रत्यक्षीबभूव । अन्यथा तत्कृतेन घोरेण तपसाग्निनेव जगंति दह्येग्नेवेति भावः । जगंति दधाति जगद्धा । " आतोऽनुपसर्गे कः । अद् भक्षणे " तृन् तृज्वा अत्री संहर्त्री । यद्वा " ओहाक् त्यागे " । अतोऽपि के जगंति जहाति जगद्धा । ततोत्री मोक्त्री ॥ ९ ॥ देव्युवाच । देवी चंडिका राजानं सुरथं वैश्यं च समाधिना मानं वाचमूचे यत्प्रार्थ्यते इति । हे भूप, त्वया यत्प्रार्थ्यते हे कुलनन्दन कुलवर्द्धन वैश्य, त्वया यत्प्रार्थ्यते याच्यते तत् वसु सर्वं मत्तः देवीतः सकाशात्प्राप्यतां लभताम् । अहं परितुष्टास्मि । तच्च तच्च ते च ते च ददामि च । कुलस्य नन्दनः वैश्यः यतोऽसौ कुलात्सकाशाल्लक्ष्मीं न ग्रहीष्यति मोक्षकामत्वाद्वैराग्यभाक्त्वादिति भावः । द्वितीयार्द्धे प्रार्थ्यतामिति तु क्वचित्पाठः

एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥९॥ देव्युवाच ॥ यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन ॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥१०॥ मार्कंडेय उवाच ॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि॥ अत्रापि च निजं राज्यं हतशत्रुबलं बलात्॥११॥ सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः॥ममेत्यहमिति प्राज्ञः संगविच्युतिकारकम्॥१२॥

स पुनरुक्तः। प्राप्यतामिति तु पठ्यताम् । यद्वा वैश्यापेक्षया न पौनरुक्त्यम् । त्वया च प्रार्थ्यतामिति । ददामि तत् ददामि ते च इति पाठद्वयं क्वापि दृश्यते ॥१०॥ मार्कंडेयमुनिः स्वशिष्यं ततः देवीतः ततः देव्युक्त्यनन्तरं वा नृपः सुरथः अन्यजन्मनि एतज्जन्मापेक्षया अन्यदग्रिमं भावि यज्जन्म तस्मिन् । अविभ्रंशि अचलं राज्यम् । राज्ञो भावः कर्म वा राज्यं वव्रे प्रार्थयामास । मन्वन्तरत्वरूपम् । अथ च । अत्र अस्मिन्नपि जन्मन्यविभ्रंशि । " भ्रंशु अधःपतने " णिनिः । न विभ्रंशः अविभ्रंशः तद्युक्तं वा । अत्रैव निजे नगरे हतशत्रुबलं निजमात्मीयं राज्यमेव वव्रे प्रार्थयामास । हतं शत्रुबलं यत्र तथोक्तम् । " वृञ् वरणे " कर्त्तरि लिडात्मनेपदं वव्रे । " स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः । " ॥ ११ ॥ ततोऽनन्तरम् । प्राज्ञः मोक्षकांक्षित्वादतितरां बुद्धिमान् । निर्विण्णमानसः संसारदुःखोद्विग्नचे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तस्कः स समाधिर्नाम वैश्योऽप्यतिविरक्तः सन् । ज्ञानं मोक्षबुद्धिं वव्रे । कीदृशम् । ममेत्यहमित्येवं संगविच्युतिकारकम् । ममायं पुत्रोऽहं पिता ममेदं कुलमहं भर्त्ता ममेदं धनमहं स्वामी तस्येत्याद्यध्यासजनितः यः संगस्तस्य विच्युतिः विलयस्तस्याः कारकं करणम् । ममत्वं नाम मोहः संसृतिः अहंता च संसृतिस्तद्विलयकारकं ज्ञानमिति भावः । अतस्मिंस्तद्बुद्धिरध्यासः तेन निःसंगस्यैवात्मनो ममत्वमहं त्वं सर्वदुःखावहः संगः सर्वात्मना भाव्यते । तस्य संगस्य परमात्मरूपब्रह्मज्ञानं विच्युतिकारकं भवति । ममता चाहंता च संगः संसर्गेऽपेक्षा बुद्धिः द्वैतज्ञानं भेदनिबन्धनं तस्य विच्युतिकारकं विच्छेदजनकं मोक्षोपयोगि ज्ञानम् ॥ १२ ॥ हे नृपते हे सुरथ, भवान् स्वल्पैरहोभिः दिवसैः कतिपयैर्वासरैः रिपून् हत्वा स्थितवतः अस्खलितमचलितं तव राज्यं भविष्यति । तव राज्यम् । तच्च तत्रेति पाठद्वयम् । तत्रांतरे राज्यांतरे च ॥ १३ ॥ देव्युवाच । हे भूप, भवान् मृतः सन्नपि एतच्छरीरं परित्यक्तवानपि भूयः पुनरपि विवस्वतः सूर्याद्देवात्सवर्णायाश्च तत्पत्न्याः जन्म

देव्युवाच ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥ १३ ॥

मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ सावर्णिको मनुर्नाम भवान् भुवि भविष्यति ॥ १४ ॥

वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवांछितः ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ १५ ॥

उत्पत्तिं संप्राप्य सावर्णिको नाम मनुः राजा भविष्यति । सावर्णिरेव सावर्णिकः संज्ञायां कन् । वर्णेन सहितः सवर्णः ततः स्त्रीभ्यो ढकं बाधित्वा बाह्वादिपाठादिञ् सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ॥ १४ ॥ हे वैश्य हे वर्य, यद्वा हे वैश्येषु वर्य श्रेष्ठ, त्वया अस्मत्तः देवीतः यः वरः अभिवांछितः अस्ति तं वरं संसिद्ध्यै परमात्मरूपसंगत्यै प्रयच्छामि । ततश्च वरदानतस्तव ज्ञानं भविष्यति । मोक्षधीर्ज्ञानमुच्यते । अस्मत्त इति पञ्चमीबहुवचनं तस्मिन् । अतश्चैकत्वाभावात् " प्रत्ययोत्तरपदयोश्च " इति मादेशाभावः । ननु च अस्मत्त इति बहुवचनोपक्रमात्प्रयच्छाम इति बहुवचने भाव्यम् । तत्कथं प्रयच्छामीत्येकवचनं स्यात् । एवं तर्हि अस् मत्तः इति च्छेदः । " असु क्षेपणे " । अस्यति क्षिपति संसारं निराकरोति अस् । क्विपि रूपं वरस्य विशेषणम् । एकत्वात् मादेशः । अयस्मयादित्वात् भत्वात्पद-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वाभावादूत्वाद्यभावः । क्वचित्तु वैश्यवर्य, त्वया मत्तो वरो यश्चाभिवांछित इति वा पाठः । यद्वा "व्यत्ययो बहुलम्" इति एकवचनस्य बहुवचनम् । ततश्चास्मत्त इत्येव पाठः । वरणार्हो वर्यः । " क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः । मुख्यवर्यवरेण्याश्च प्रवर्हो न वराद्ध्यंवत् ॥ " ॥ १५ ॥ मार्कंडेयः मुनिः स्वशिष्यं वाचमूचिवान् हे क्रोष्टुकिमहर्षे, इति उक्तप्रकारेण तयोः क्षत्रियवैश्ययोः सुरथस्य च समाधेश्च । तथाभिलषितमभिवांछितमनतिक्रम्य अभीष्टं वरं दत्त्वा भक्त्या ताभ्यां लब्धवराभ्यामभिष्टुता त्वं जगतां स्रष्ट्री रक्षित्री संहर्त्री जननीत्यभिष्टुता संस्तुता सती सद्यः सा देवी भगवती चण्डिका सपद्यंतर्हिता बभूव अदृश्याभूत् ॥ १६ ॥ हे क्रोष्टुकिमहर्षे, एवं प्रागुक्तप्रकारेण सुरथः क्षत्रियर्षभः श्रेष्ठः क्षत्रियः देव्याः भगवत्याः सकाशाद्वरं लब्ध्वा प्राप्य इह राज्यमनुभूय ततस्तनुं त्यक्त्वा सवर्णायां सूर्याद्विवाजन्म समासाद्य सम्प्राप्य सावर्णिर्नाम मनू राजा भुवि भविता । कर्तरि भविष्यदनद्यतने लुट् । भविष्यतीत्यर्थः । मनुरित्ययं सप्तशतिकास्वरूपो महामालामन्त्रः सर्वे-

मार्कंडेय उवाच ॥ इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ १६ ॥ एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ १७ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥ समाप्तमिदं सप्तशत्याख्यं देवीमाहात्म्यम् ॥ छ ॥ छ ॥ छ ॥

षामधीयतां सर्वकामधुगिति सूचयितुमवसाने प्रायोजि भगवता श्रीमार्कंडेयेनेति सिद्धम् ॥ १७ ॥ संतः संतु परप्रयोजनकृतः कल्पद्रुमाभाः सदा स्वस्मिन्नेव पथि प्रवर्त्तनपराः सत्कीर्त्तयश्चापरे ॥ अन्ये निस्पृहणाश्रितश्रुतिपथा दीव्यंतु भव्याशयाः कोकंतः कलहप्रियाः खलजना जायंतु जीवंतु ते ॥१॥ सत्कृतिबालदिवाकरबिंबं सज्जनमानसराजसरोजम् ॥ संविकसेद्भिपश्यद्वश्यं नश्यति दुर्जनवत्कुमुदं ततु ॥ २ ॥ यावद्भूमिमुदित्वरद्युतिमणिश्रेणिस्फुरन्मूर्द्धसु""फूत्कारपयोधिकाननगिरित्रातोल्लसत्सत्फलम् ॥ धत्ते शेषमिवाहिमद्भुतवचा स्वस्थीकृता शेषगीस्तावच्छांतनवी तदा जयंतु च श्रीचण्डिकादीपिका ॥ ३ ॥ इति श्रीमार्कंडेयपुराणे श्रीराजाधिराजतोमरान्वयश्रीमदुद्धरणात्मजशंतनुचक्रवर्त्तिविरचितायां देवीमाहात्म्यटीकायां देवीमाहात्म्यं नाम त्रयोदशोऽध्यायः ॥१३॥ समाप्तेयं शांतनवीटीका सप्तशतिकायाः ॥ अपरं पुस्तकं वीक्ष्य शोधनीयं सदा बुधैः ॥ हीनाधिकैः स्वरैर्वर्णैरस्माकं दूषणं न हि ॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशाय नमः ॥ श्रीदुर्गादेव्यै नमः ॥ बंधूकबंधूभवदाननाया भासैव दासीकृतशोणसिंधोः ॥ सानंदवृंदारकवंदितांघ्रेर्भासः शिवाया वयमेव दासाः ॥ १ ॥ तिष्ये शिष्यैश्चतुभिर्योऽमुष्य लोकस्य शांतये । अवाततार तारात्मा तं वंदे शंकरं गुरुम् ॥ २ ॥ श्रीलक्ष्मीं मातरं रंगनाथाख्यं पितरं गुरुम् ॥ काशीनाथश्रीधराख्यौ गुरून्नत्वा यथामति ॥ ३ ॥ शैवोपनामकेनैव नीलकंठेन केनचित् ॥ सप्तशत्यंगषट्कस्य व्याख्यानं तन्यते मुदा ॥ ४ ॥ तत्र तावद्भगवत्युपासनायां केचिद्भ्रांता वदंति । मायारूपाया भगवत्या उपासना शास्त्रेषूक्ता तथा मायाया मिथ्यात्वान्मुक्तौ तस्या अनन्वयाच्चाश्रद्धेयेयमुपासनेति । ननु नेयं भ्रांतिः । तापनीये । " माया वा एषा नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति तस्मान्मायामेतां शक्तिं विद्याद्य एतां मायाशक्तिं वेद स मृत्युं जयति स पाप्मानं तरति सोऽमृतत्वं च गच्छति महतीं श्रियमश्नुते " इति । श्रुतौ " मायाशक्तिं वेदोपास्ते स मृत्युं जयति " इति कथनेन । तथा " त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया । संमोहितं देवि समस्तमेतत् " इत्यादिस्मृतिभिः विष्णोः शक्तेर्जडाया मायाया एवोपास्यत्वकीर्तनादिति चेन्न । देव्यथर्वशिरसि ।"सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवि साब्रवीदहं ब्रह्मरूपिणी मत्तः प्रकृतिपुरुषात्मकं जगत् " इति । तथा भुवनेश्वर्युपनिषदि । " अथातोंबोपनिषदं व्याख्यास्यामोऽथ ह्येनां ब्रह्मरंध्रे ब्रह्मस्वरूपिणीमाप्नोति " इति । तथा " भुवनाधीश्वरी तुर्यातीता विश्वविमोहिनी ।" इति । तथा भावनोपनिषदि "स्वात्मैव ललिता" इति श्रुतिभिः तथा त्रिपुरातापनीयसुंदरीतापनीयादिषु " परो रजसे सावदोम् " इति गायत्रीचतुर्थचरणप्रतिपाद्यब्रह्मवाचकत्वेन ह्रींकारबीजस्य कथने ह्रींकारमन्त्रस्य ब्रह्मदेवतात्वप्रतिपादकश्रुत्या च तथा कालीतारोपनिषदादिश्रुतिभिस्तथा स्मृतिभिश्च ब्रह्मरूपिण्या भगवत्या एवोपासनाकथनात् । तथा हि स्मृतयः । सूतसंहितायां पञ्चमाध्याये ।" अतः संसारनाशाय साक्षिणीमात्मरूपिणीम् । आराधयेत्परां शक्तिं प्रपंचोल्लासवर्जिताम् ॥ " इति । स्कांदे वेदारण्येश्वरमाहात्म्ये ।" परा तु सच्चिदानंदरूपिणी जगदंबिका । सैवाधिष्ठानरूपा स्याज्जगद्भ्रांतेश्चिदात्मनि ॥" इति । कूर्मपुराणे द्वादशाध्याये । "एतत्प्रदर्शितं विप्रा देव्या माहात्म्यमुत्तमम् । सर्ववेदांतवेदेषु निश्चितं ब्रह्मवादिभिः ॥ एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम् । योगिनस्तत्प्रपश्यंति महादेव्याः परं पदम् ॥ " इति । " परात्परतरं तत्त्वं शाश्वतं शिवमच्युतम् । अनंतं प्रकृतौ लीनं देव्यास्तत्परमं पदम् ॥ " इति । " शुद्धं निरंजनं शुभ्रं निर्गुणं दैन्यवर्जितम् । आत्मोपलब्धिविषयं देव्यास्तत्परमं पदम् ॥ " इति । तथा हालास्येश्वरमाहा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तन्ये मायाबीजार्थप्रस्तावे । " सत्स्वरूपः सदाकारो हकारो धर्मतत्परः । चिदाकारः शिवाकारो रेफः सर्वार्थसिद्धिदः ॥ आनंदरूपयोरैक्यादीकारः सर्वकामदः । बिंदुनादौ तदंतस्थौ भवेतां मोक्षदावुभौ ॥ सच्चिदानंदरूपं तु प्रोक्तं बीजं मनीषिभिः । सच्चिदानन्दरूपं यत्पदं ब्रह्म तदेव हि ॥ " इति । देवीभागवते । " निर्गुणा सगुणा चेति द्विधा प्रोक्ता मनीषिभिः । सगुणा रागिभिः सेव्या निर्गुणा तु विरागिभिः ॥ " इति । ब्रह्मांडपुराणे ललितोपाख्याने । " चितिस्तत्पदलक्ष्यार्था चिदेकरसरूपिणी । " इत्यादयोऽष्टादशपुराणेषूपपुराणेषु च स्मृतयो द्रष्टव्याः । ननु तर्हि षोडशीग्रहणाग्रहणयोः क्रियाविषयत्वात्तत्र शाखाभेदेन विकल्पसंभवेऽपि वस्तुस्वरूपस्यैकविधत्वात्तत्र विकल्पासंभवेन भगवतीस्वरूपस्य मायास्वरूपत्वप्रतिपादकस्तुत्या सह भगवत्या ब्रह्मरूपत्वप्रतिपादकश्रुतेर्विरोध इति चेन्न । मायाया वेदांतेषु मिथ्यात्वान्मिथ्यापदार्थस्याधिष्ठाने कल्पितत्वात्तस्याधिष्ठानसत्तातिरिक्तसत्ताभावान्मायायामधिष्ठानसत्ताप्रवेशान्मायास्वरूपोपासनायामपि सत्तारूपब्रह्मण एवोपासना संभवतीत्याशयेन मायास्वरूपत्वप्रतिपादनेऽपि विरोधाभावात् । यथा ब्रह्मण उपासनायामपि न केवलं ब्रह्मणो ग्रहणं किंतु शक्तिविशिष्टस्यैव शक्तेस्तदतिरेकेणाभावात् । केवलस्योपासनासंभवाच्च । तथा मायोपासनायामपि न केवलं मायाया अवस्थानमस्ति । येन केवलाया उपासनं संभवेत् । किंतु ब्रह्माधिष्ठानयुताया एवावस्थानमिति भगवत्या मायारूपत्वप्रतिपादनेऽपि फलतो ब्रह्मस्वरूपमेव भगवत्या सिध्यतीति श्रुत्योः परस्परं विरोधाभावात् । तदुक्तम् । " पावकस्योष्णतेवेयमुष्णांशोरिव दीधितिः । चंद्रस्य चंद्रिकेवेयं शिवस्य सहजा ध्रुवा ॥ " इति । तथा " स्वपदा स्वशिरश्छायां यद्वल्लंघितुमीहते । पादोद्देशे शिरो न स्यात्तथेयं बैंदवी कला ॥ " इति । तथा च यथाग्नौ होमेऽग्निशक्तौ होमोऽर्थसिद्ध एवमग्निशक्तौ होमेऽप्यग्नौ होमोऽर्थसिद्धस्तद्वन्मायाया भगवतीत्वेऽपि ब्रह्मण एव भगवतीत्वं सिद्धमिति तस्यैवोपासनायां ग्रहणं मायाया मिथ्यात्वप्रतिपादकवाक्येषु तु ब्रह्मणो मिथ्यात्वाभावात्केवलमायाया एव ग्रहणं तस्या मिथ्यात्वे तदधिष्ठानस्य सत्यत्वादुपासकस्योपास्यमायापदार्थांतर्गतब्रह्मांशस्य मोक्षदशायामनुस्यूतत्वान्न मुक्तावुपास्यस्वरूपत्यागः । अत एवांतर्यामिब्राह्मणे पृथिव्यादिमायांतानां पदार्थानां " यः पृथिव्यां तिष्ठन्यं पृथिवी न वेद । यस्य पृथिवी शरीरम् । यः पृथिवीमंतरो यमयति " इत्यादिनांतर्यामिचेतनसंबंधेनैव देवतात्वमुपवर्णितम् । तथा च " सर्वं खल्विदं ब्रह्म" इति श्रुतिरपि अनुगृहीता भवति तत्तदेतत्सर्वमभिप्रेत्य सूतसंहितायामुक्तम् । "चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः । अनुप्रविष्टा या संविन्नि-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विंकल्पा स्वयंप्रभा ॥ सदाकारा सदानंदा संसारोच्छेदकारिणी । सा शिवा परमा देवी शिवा भिन्ना शिवंकरी ॥ ” इति । यद्वा भगवतीस्वरूपप्रतिपादकवाक्येषु ये मायाशक्तिकलादिशब्दास्ते लक्षणया मायाविशिष्टशक्तिविशिष्टकलाविशिष्टब्रह्मबोधकास्तथा च मायाविशिष्टं शक्तिविशिष्टं कलाविशिष्टं यद्ब्रह्म तद्भगवतीपदवाच्यमिति फलितोऽर्थः । एतेन क्षुधारूपेण निद्रारूपेण भ्रांतिरूपेण स्मृतिरूपेणेत्यादिकेवलशक्तिवाचकपदानि व्याख्यातानि । तैः पदैस्तत्तच्छक्तिविशिष्टब्रह्मण एव सर्वत्र ग्रहणात् । अयमेवार्थः कालोत्तरे उक्तः शिवं प्रति देवीप्रश्नवाक्येन । “ भगवन् देवदेवेश मिथ्या मायेति विश्रुता । तस्याः कथमुपास्यत्वं भवेन्मुक्तावनन्वयात् ॥ श्रद्धा न जायते क्वापि मिथ्यावस्तुनि कुत्रचित् । देव्या उपासना चेयं श्रुता मायाश्रिता प्रभो ॥ संशयं छिंधि देवेश रहस्यं वद मे प्रभो । इति श्रुत्वा वचो देव्या भगवांश्चंद्रशेखरः ॥ उवाच वचनं दिव्यं लोकानां च हितप्रदम् । नाहं सुमुखि मायाया उपास्यत्वं ब्रुवे क्वचित् ॥ मायाधिष्ठानचैतन्यमुपास्यत्वेन कीर्तितम् । मायाशक्त्यादिशब्दाश्च विशिष्टस्यैव लक्षकाः ॥ तस्मान्मायादिशब्दैस्तु ब्रह्मैवोपास्यमुच्यते । ” इति । अत्र पूर्वार्द्धेन मायाधिष्ठानचैतन्येत्यनेन प्रथमपक्ष उक्तो मायाशक्त्यादीत्यनेनोत्तरार्द्धेन द्वितीयः पक्ष उपपादितः । एतदभिप्रायेणैव ब्रह्माण्डपुराणे मायावाचकस्य ह्रींकारस्य मायाविशिष्टब्रह्मवाचकत्वमुक्तम् । “ शक्त्यक्षराणि शेषाणि ह्रींकार उभयात्मकः । ” इति उभयात्मकः शिवशक्त्यात्मक इत्यर्थः । किंच मायायाः केवलाया उपास्यत्वं वदन्वादी भ्रांतः प्रष्टव्यः । जडाया उपास्यत्वे तत्तद्देवतारूपाणां प्राणेंद्रियमनआत्मजीवादिमत्त्वं कथं भवेत् । द्विविधं हि भगवतीस्वरूपम् । स्थूलं सूक्ष्मं च । तत्र सूक्ष्मं मुख्यं स्थूलं तु तत्तदुपासकानां दर्शनादिव्यवहारार्थं तत्तदुपासकैरुपासितं सूक्ष्मरूपमेव तु स्थूलं रूपं गृह्णाति । तत्रैवं सति सूक्ष्मरूपे चैतन्याननुप्रवेशे तद्गृहीते स्थूलरूपेऽपि चैतन्यस्याननुप्रवेशेन तत्तद्देवतानां प्राणनसंभाषणादिव्यवहारोच्छेद एव स्यात्तस्मादनिच्छयापि चैतन्यविशिष्टायाः एव तत्तच्छक्तेरुपास्यत्वं वक्तव्यमिति । नन्वेवं चेत्किमर्थं मायादिशब्दैर्व्यवहारो भगवत्याः शास्त्रेषु क्रियते लक्षणादिदोषाभावाय स्पष्टप्रतिपत्तये ब्रह्मादिशब्दैरेव कुतो न व्यवहारः क्रियते इति चेच्छृणु । चतुर्व्यूहात्मकं हि ब्रह्मणो रूपं विराड्हिरण्यगर्भाव्याकृतब्रह्मरूपं तत्र देव्युपासनाव्यूहांतर्गतस्य कस्य पदार्थस्येति शंकायां विराड्हिरण्यगर्भाव्याकृतानां तदधिष्ठातॄणां ब्रह्मविष्णुरुद्राणां च मैत्रायणीयश्रुताविकैकगुणमयत्वेन कीर्तनाद्गुणत्रयसाम्यावस्थायाः मायायाः प्रकृत्यादिशब्दवाच्यत्वेन तस्याश्च तुरीयब्रह्माश्रितत्वेन तदेव मायाविशिष्टं तुरीयं ब्रह्मैव भगवत्युपा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सनायां ग्राह्यमिति बृहदर्थप्रकाशनार्थं तथा मायादिशब्दैर्व्यवहारस्य करणात् । तथा च मैत्रायणी श्रुतिः । " तमो वा इदमेकमग्र आसीत्तत्परे स्यात्तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्वस्य रूपम् " इति । अनेन वाक्येन मायायास्तमःशब्दितायाः परेण ब्रह्मणा नित्यसंबंधप्रदर्शनेन जगत्कारणरूपं साम्यावस्थात्मकं प्रदर्शितं न ह्यन्यथा तमःप्रेरकत्वं साम्यावस्थमायोपाधिं विना निर्गुणस्य परमात्मनः संभवति । अग्रे च । " तस्यैतास्तनवोऽथ यो ह खलु वा वास्य तामसोंऽशोऽसौ योऽयं रुद्रो यो ह खलु वा वास्य राजसोंऽशोऽसौ ब्रह्मा यो ह खलु वा वास्य सात्त्विकोंऽशः स विष्णुः" इति गुणत्रयोपाधित्वं ब्रह्मविष्णुरुद्राणां प्रतिपादितम् । तथा पुराणादिषु च । " रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादयो हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥ " इत्यादि सर्वपुराणेषु ब्रह्मविष्णुरुद्राणामेकैकगुणवत्त्वमेव प्रतिपादितम् । नहि मायाप्रकृतिशक्त्यादिशब्दवाच्यं वस्तु ब्रह्मातिरिक्ताश्रयं भवति येन मायादिशब्दैरुपास्यं वस्तु मायाविशिष्टब्रह्मातिरिक्तं भवेत्किंतु मायाविशिष्टब्रह्मरूपमेवेति तैः शब्दैरुपास्यवस्तुनि प्रतिपादिते मायाविशिष्टब्रह्मरूपमेव भगवतीरूपमुपास्यं भवेदिति बोधनार्थमेव मायादिशब्दैर्भगवत्या उपासनकथनमिति । ननु तर्हि " त्वं वैष्णवी शक्तिरनंतवीर्या " इत्यत्रापि मायाशब्दो ब्रह्मविशिष्टमायावाचकः स्यात् । न चेष्टापत्तिः । तत्र केवलाया मायाया एव विवक्षितत्वादिति चेन्न । न ह्यस्माभिः सर्वत्र मायाशक्त्यादिशब्देन मायाविशिष्टं शक्तिविशिष्टं ब्रह्मैव सर्वत्र ग्राह्यमिति शपथः क्रियते येनातिप्रसंगः स्यात्किंतु क्वचित्संबंधिशब्दसमभिव्याहारे केवलमायाया एव ग्रहणं यथात्रैव तथा नाशप्रकरणे केवलमायाया ग्रहणं तथा सृष्टिस्थलेऽपि । "मन्मायाशक्तिसंकॢप्तं जगत्सर्वं चराचरम् । सापि मत्तः पृथग्विप्रा नास्त्येव परमार्थतः ॥ " इत्यादौ केवलमायाया ग्रहणमुपासनास्थले तु तद्विशिष्टब्रह्मणो ग्रहणमिति यथायथमूह्यम् । तथा च त्वं वैष्णवी शक्तिरित्यादौ अधिष्ठानकूटस्थब्रह्मरूपिणी या त्वं सा वैष्णवी या मायाशक्तिरस्ति तद्रूपा असीत्यर्थः । ब्रह्मणः सर्वाधिष्ठानत्वेन सर्वरूपत्वात् । तेन च ब्रह्मरूपत्वमेव भगवत्याः प्रतिपादितमेवमन्यत्राप्यूह्यम् । यद्वा ब्रह्मणो जगत्कारणस्योभयात्मकत्वात्क्वचिन्मायोपसर्जनब्रह्मण उपासनं तत्र शक्तिः सहायभूता । इदं च मतं शिवपुराणादिषु स्पष्टम् । " तस्मात्सह तया देवं हृदि पश्यंति ये शिवम् । तेषां शाश्वतिका शांतिर्नेतरेषां कदाचन ॥ " इति वचननिचयैः। क्वचिच्च ब्रह्मोपसर्जनमायाया उपासनं तत्र भगवतीविषये ब्रह्मोपसर्जनमायाया एवोपासनमिति दर्शयितुं मायाशक्त्यादिशब्दैः शास्त्रे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भगवत्या व्यवहारः क्रियते । इदं च मतं सर्वतंत्राभिमतं पुराणाभिमतं च । “ शिवेन सहितां देवीं भावयेद्भुवनेश्वरीम् । ” इति भुवनेश्वरीपारिजातादिवचननिचयात् । तदुक्तं कूर्मपुराणे । “ अस्यास्त्वनादिसंसिद्धमैश्वर्यमतुलं महत् । तत्संबंधादनंतैषा रुद्रेण परमात्मना ॥ ” इत्यादीनि वचनानि देवीभागवतादिसर्वपुराणेषु द्रष्टव्यानि । उभयपक्षेऽपि ब्रह्मणश्चिदंश उपासनायामागत एवेति न मुक्तावुपास्यस्वरूपानन्वयित्वरूपं दूषणं न वा श्रद्धेयतेति । इत्थं भगवत्युपासनायां स्वरूपे निर्णीते ब्रह्मविष्णुरुद्रशक्त्युपासनासु कस्योपासना वरिष्ठेत्यस्य विचारः क्रियते । तत्र “ सर्वं खल्विदं ब्रह्म ” इति सामानाधिकरण्येन सर्वपदार्थमात्रस्य ब्रह्मरूपत्वेऽपि भक्तानां चेतसोऽवलंबाय परमेश्वरेण मलिनशुद्धशुद्धतरशुद्धतमा विभूतयः शुद्धितारतम्येन कल्पितास्ताश्च गीतादिशास्त्रेषु विभूत्यध्याये छांदोग्यादिषु च । “ प्राणो ब्रह्मादित्यो ब्रह्म मनो ब्रह्म ” इत्यादिवाक्यैः प्रदर्शिताः । तत्र सर्वविभूतिषु ब्रह्मणः समानत्वेनावस्थानेऽपि यथा पात्रमणिकृपाणदर्पणादिषु शुद्धितारतम्येन प्रतिबिंबफलनस्यापि तारतम्यमेवं विभूतिषु शुद्धितारतम्येनैव ब्रह्मणः प्रसादकरणतारतम्यं प्रतिबिंबफलनतारतम्यं चेति याभिर्याभिर्विभूतिभिर्यथा यथा प्रतिबिंबफलनतारतम्यं प्रसादकरणतारतम्यं च भवति तथा तथा तस्या विभूतेरुत्कृष्टत्वमुत्कृष्टतरत्वमुत्कृष्टतमत्वमित्यादिव्यवहारः सर्वशास्त्रप्रसिद्धो निर्विवादस्तथा च सति ब्रह्मविष्णुरुद्राणामेकैकगुणोपाधित्वेनैकैकगुणापेक्षया साम्यावस्थायास्तमःसत्वादिगुणमूलभूतायाः सर्वोत्कृष्टत्वात् । किंच प्रथमतो ब्रह्मणि माया तस्याः ब्रह्मणोऽव्यवहितः संबंधस्तदुत्तरं गुणानामुद्भवान्मायाद्वारकः संबंधो गुणानामिति साम्यावस्थायामव्यवहितः संबंधो ब्रह्मण इति सैवोपासना मुख्या सर्वोत्कृष्टा चेति । सूतसंहितादिष्वपीयं रीतिरुक्ता । “ परतत्त्वप्रकाशस्तु रुद्रस्यैव महत्तरः । ब्रह्मविष्ण्वादिदेवानां न तथा मुनिपुंगवाः ॥ ” इत्यादि । “ रुद्रः कथंचित्कार्यार्थं मनुते रुद्ररूपताम् । न तथा देवताः सर्वाः परिस्फूर्त्यल्पताबलात् ॥ ” इति सूतगीतासु । ननु ब्रह्मविष्णुरुद्राणामेकैकगुणोपाधित्वे सर्वसंमते कथं साम्यावस्थात्मकत्वेनापि तेषां पुराणादिषूपवर्णनमिति चेन्न । तदंतर्गतब्रह्मण एव साम्यावस्थात्मकत्वेन तदभेदात्तेषामपि तदात्मकत्वकथनमित्याशयात् । अत एव तापनीये नृसिंहस्य सत्वोपहितविष्णोरवतारत्वे श्रुतिपुराणादिनिश्चितेऽपि साम्यावस्थात्मकत्वेन वर्णनं संगच्छते । तस्मान्मायाशक्त्याख्यब्रह्मरूपभगवत्युपासनैव मुख्या सर्वोत्कृष्टा चेति सैव सर्वकामार्थिभिर्मुमुक्षुभिश्चोत्कृष्टवस्तूपासनेच्छुभिराश्रयणीयेत्यर्थात्प्राप्तमपि पुराणांतरवचनैः स्पष्टमुपपाद्यंते । देवीभागवते । “ ब्रह्मविद्या जगद्धात्री सर्वेषां जननी तथा । यया सर्वमिदं व्याप्तं त्रैलोक्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सचराचरम् । सैव सेव्या च पूज्या च नान्यद्वै देवतांतरम् ॥ " इति । तथा तंत्रेषु । " एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् । भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् । भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ " इति । अनेन वचनेन भगवत्युपासनायाः संध्यादिकर्मवन्नित्यत्वं नित्यपदोच्चारणेन स्पष्टमेव बोधितं स्पष्टीकृतं चैतदस्माभिर्देवीभागवतटीकायाम् । तथा पुराणांतरे । " आराध्या परमा शक्तिः सर्वैरपि सुरासुरैः । नातः परतरं किंचिदधिकं भुवनत्रये ॥ " इति । तथा " ॐकारं पितृरूपेण गायत्रीं मातरं तथा । पितरौ यो न जानाति स विप्रस्त्वन्यरेतजः ॥ " तथा कालोत्तरे । " धिग् धिग् धिग् धिक्च तज्जन्म यो न पूजयते शिवाम् । जननीं सर्वजगतः करुणारससागराम् ॥ " इत्यादि पुराणेषु तंत्रेषु च बहूनि वचनानि द्रष्टव्यानि । विस्तरस्तु मत्कृतशक्तितत्त्वविमर्शिन्यां द्रष्टव्यः । इत्थं शक्तितत्वस्य सर्वोत्कृष्टस्य सर्वैरुपास्यस्योपासनाप्रकारा अधिकारिभेदेनानेकविधाः पूजास्तोत्रजपध्यानलयरूपाः । तदुक्तं भुवनेश्वरीसंहितायाम् । " पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः । जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥ " इति । पूजा चतुःषष्टिसंख्योपचारषोडशोपचारपंचोपचारभेदेन त्रिधा । मन्त्राश्च मायाबीजादयो बीजरूपाः । गायत्र्यादयो ऋग्रूपास्तदतिरिक्ताश्च नवार्णप्रभृतयो वैदिकाः । देव्यथर्वशिरसि भुवनेश्वरीतापनीयादिषु प्रसिद्धास्तैतिरीयशाखायां च ह्रीश्च ते लक्ष्मीश्च पत्न्याविति कंठरवेणैवोपात्तास्तांत्रिकाश्च चतुःषष्टितंत्रेषु प्रसिद्धा एव ध्यानलयादयश्च तंत्रेषु योगशास्त्रेषु श्वेताश्वतराद्युपनिषत्सु च । "ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम् ।" इत्यादिवाक्यैः प्रतिपादिता । स्तोत्राणि च सप्तशत्यादीनि मार्कंडेयपुराणादिषु प्रसिद्धानि । तत्र स्तोत्रेषु स्तोत्रद्वयमेव मुख्यं सप्तशतीरूपं कूर्मपुराणांतर्गतं देवीसहस्रनामाख्यं च । तंत्रेषु बहुधैतयोर्मुख्यत्वप्रतिपादनात् । स्तोत्रद्वयेऽपि सप्तशत्याख्यमेव मुख्यं सर्वेषां श्लोकानां मंत्ररूपत्वाच्चतुःषष्टितंत्रेष्वपि तस्यैव मुख्यत्वेन प्रतिपादितत्वाच्च । उक्तं च वेदागमे । " निर्विशेषपरा मंत्राः सविशेषपराश्च ये । प्रत्यध्यायं निरूढास्ते तेनेयं सर्वतः परा ॥ " इति । रुद्रयामले च । "अस्ति गुह्यतमं देव्या माहात्म्यं सर्वसिद्धिदम् । वाक्यैरर्थैश्च पद्यैश्च सप्तशत्याः शुभप्रदम् ॥ सविशेषपरं साक्षाच्चिच्छक्तिमहिमाश्रयम् । तात्पर्यगत्या तत्कृत्स्नं निर्विशेषचिदाश्रयम् ॥ " इति । तदुक्तं कात्यायनीतंत्रे । " अंगहीनो यथा देही सर्वकर्मसु न क्षमः । अंगषट्कविहीना तु तथा सप्तशतीस्तुतिः ॥ तस्मादेतत्पठित्वैव जपेत्सप्तशतीं पराम् । अन्यथा शापमाप्नोति हानिं चैव पदे पदे ॥ रावणाद्याः स्तोत्रमेतदंगहीनं निषेविरे । हता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रामेण ते यस्मान्नांगहीनं पठेत्ततः॥" इति । तद्यथामति व्याख्यायते ॥ तत्र कवचांशे ब्रह्माणं प्रति प्रश्नं करोति मार्कंडेयः—यद्गुह्यमिति ॥ लोके यत्परमुत्कृष्टं गुह्यमस्ति रहस्यमस्ति तन्मे ब्रूहि । तत्किं ब्रह्मरूपं नेत्याह । सर्वरक्षाकरं येन सर्वेषामपि रक्षा भवति नृणां पामरप्रभृतीनामपि तादृशमित्यर्थः। ब्रह्म तूत्तमाधिकारिणामेव रक्षकं न सर्वेषामित्यर्थः । ननु संत्यन्यानि कवचानि लोके इति चेत्सत्यं संति तथापि यद्भवता कस्यचित्कस्यापि नाख्यातं निधिबुद्ध्या स्थापितमस्ति तदित्यर्थः । तेन च निःसंशयमेव रक्षणं झटिति स्यादिति भावः । अन्यथा निधिबुद्ध्या तस्य रक्षणं निरर्थकं स्यादिति । ननु किमित्युत्कृष्टं वस्तु मया देयमिति चेत्तत्राह । हे पितामह, स्वसंत तिरक्षणार्थं पितामहेनावश्यं देयमित्यर्थः ॥ १ ॥ उत्तरमाह—ब्रह्मोवाच ॥ अस्तीति ॥ हे विप्र, त्वया यत्पृष्टं तादृशं देव्यास्तु देव्या एव कवचं पुण्यमेकं निधिबुद्ध्या स्थापितमस्ति तन्महामुने शृणुष्व। सर्वभूतोपकारार्थं प्रवृत्तत्वान्महामुने इति संबोधनम् ॥२॥ परं तु सा देवी नवमूर्त्यात्मिका ध्येयेत्यभिप्रायेण तासां मूर्ती-

मार्कण्डेय उवाच ॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मोवाच ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी ॥ तृतीयं चंद्रघंटेति कूष्मांडेति चतुर्थकम् ॥ ३ ॥

नां नामान्याह—प्रथममिति ॥ नामज्ञानेन तद्वाच्याकारस्य प्रसिद्धत्वादेव ज्ञानं भविष्यतीति भावः । सर्वोत्तरैश्वर्यवत्यपि भगवती शैलेन भक्तेनातितपश्चर्यया प्रार्थिता सती कारुण्यवशादतिनीचमपि पुत्रीत्वं स्वीकृतवतीत्यहो भक्तवात्सल्यं कियद्वर्णनीयं भगवत्या इति तत्त्वं कूर्मपुराणे स्पष्टमेतत् । ब्रह्मचारिणीति । ब्रह्म सच्चिदानंदरूपं तच्चारयितुं प्रापयितुं शीलं यस्याः सा ब्रह्मचारिणी । ब्रह्मरूपप्रदेत्यर्थः । चंद्रघंटेति । चंद्रो हस्तगतायां घंटायां यस्याश्चंद्रवन्निर्मला वा घंटा यस्याः सेत्यर्थः । यद्वा "आह्लादकारिणी देवी चंद्रघंटेति कीर्तिता ।" इति रहस्यागमोक्तेश्चंद्रं घंटयति प्रतिवादितया भाषते स्वस्याह्लादकारित्वाभिमानेनेति चंद्रघंटा चंद्रापेक्षयाप्यतिलीलावतीत्यर्थः । पटपुटेति दंडकपठितस्य चुरादेर्घटिधातोर्भाषार्थस्य पचाद्यचि रूपं चंद्रस्य घंटा चंद्रघंटा । कूष्मांडेति । कुत्सित ऊष्मा संतापस्तापत्रयरूपो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यस्मिन् संसारे स संसारः कूष्मा सोऽण्डे मांसपेश्यामुदररूपायां यस्याः सा कूष्मांडा तापत्रययुक्तसंसारभक्षणकर्त्रीत्यर्थः । " अंडः पेशी च मुष्कं च " इति मेदिनी ॥ ३ ॥ स्कंदेति । सनत्कुमारस्य भगवतीवीर्यादुद्भूतस्य स्कंद इति संज्ञा । " भगवान् सनत्कुमारस्तं स्कंद इत्याचक्षते " इति छांदोग्यश्रुतेस्तथा च ज्ञातिभिर्यदुदरे जन्माभिलषणीयमित्यतिशुद्धेत्यर्थः । कात्यायनीति । देवकार्यार्थं कात्यायनाश्रमे आविर्भूता तेन कन्यात्वेन स्वीकृतेति कात्यायनीति नाम भगवत्याः। अस्या निरंतरं कुमारीत्वेन पत्यनधीनतया स्वतंत्रत्वं बोधितम् । कालरात्रीति । सर्वमारकस्य कालस्यापि रात्रिर्नाशिकेत्यर्थः । प्रलये कालस्यापि नाशात् । " कृदिकारादक्तिनः " इति ङीष् । महागौरीति । इयं च महामानिनी नर्मोक्त्या शिवेन कालीत्युक्ते तपसा गौरवर्णस्य संपादितत्वात्कालीपुराणे स्पष्टमेतत् ॥ ४ ॥ सिद्धिदेति । इतीति

पंचमं स्कंदमातेति षष्ठं कात्यायनीति च ॥ सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥ ४ ॥ नवमं सिद्धिदा प्रोक्ता नव दुर्गाः प्रकीर्त्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ॥ ६ ॥ न तेषां जायते किंचिदशुभं रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं न हि ॥ ७ ॥

शेषः । सिद्धिदा इति नवममित्यन्वयः । मोक्षदेत्यर्थः । नव दुर्गा इति । योगिनः कायव्यूहवदेकस्या एव दुर्गाया एते नव भेदा ये शास्त्रे ध्येयत्वेन प्रोक्तास्ते मया कीर्तिता इत्यर्थः । अत एव देव्यास्तु कवचं पुण्यमित्येकवचनं संगच्छते । नाम्नां स्वकल्पितत्वशंकाव्युदासार्थमाह । उक्तान्येतानीति । महात्मना सर्वज्ञेन ब्रह्मणैव वेदेनैवैतान्युक्तानीत्यर्थः ॥ ५ ॥ इत्थं कवचपाठे ध्येयदेवतास्वरूपं गुणं च प्रदर्श्य तत्फले अविश्वासो नैव कर्तव्य इति कैमुतिकन्यायेनाह । अग्निनेति । योऽग्निना दह्यमानो रणे शत्रुमध्ये च गतः सन् शरणं गत इति शेषः । अथ ये विषमे दुर्गमे चातिसंकटे भयार्त्ताः भयपीडिताः संतः शरणं गताः ॥ ६ ॥ तेषां तस्य च भक्तिरहितेन स्मरणमात्रेणापि तज्जन्यं भयादिकं न भवतीत्याह । तत्तेषामिति ॥ ७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यैस्तु भक्त्या स्मृता भवति तेषां पूर्वोक्तं फलमृद्धिधर्मार्थकाममोक्षाणां च भवतीत्यत्र किं वक्तव्यमित्याह । यैस्त्विति । इदानीं देव्या अतिवात्सल्यं भक्त्युत्पादनार्थं दर्शयति । प्रेतसंस्थेति श्लोकद्वयेन ॥ ८ ॥ ९ ॥ ब्राह्मीत्यंतं सप्तमातृणां वर्णनम् । नानेति वक्ष्यमाणदेवीनां वर्णनम् ॥ १० ॥ दृश्यंते इति ॥ सप्तमातृभिन्नाः याश्च देव्यस्ता अपि भक्तरक्षणार्थं क्रोधसमाकुलाः रथमारूढाः जात्यैकवचनं रथानारूढा दृश्यंते अर्थाद्देवादिभिरिति बोध्यम् । तासामायुधान्याह । शंखमिति सार्धेन॥११॥ ॥ १२ ॥ दैत्यानामिति ॥ ताः सप्त मातरश्च शंखं चक्रमित्यादिश्लोकोक्तानीत्थमायुधानि धारयंति । किमर्थम् । दैत्यानां देहनाशार्थं भक्ताभयार्थं देवहितार्थं चेत्यर्थः ।

यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः प्रजायते ॥ प्रेतसंस्था तु चामुंडा वाराही महिषासना ॥ ८ ॥ ऐंद्री गजसमारूढा वैष्णवी गरुडासना ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ ९ ॥ ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥ नानाभरणशोभाढ्या नानारत्नोपशोभिताः ॥ १० ॥ दृश्यंते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ ११ ॥ खेटकं तोमरं चैव परशुं पाशमेव च ॥ कुंतायुधं त्रिशूलं च शार्ङ्गायुधमनुत्तमम् ॥१२॥ दैत्यानां देहनाशाय भक्तानामभयाय च ॥ धारयंत्यायुधानीत्थं देवानां च हिताय वै ॥१३॥ महाबले महोत्साहे महाभयविनाशिनि ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ॥१४॥ प्राच्यां रक्षतु मामैंद्री आग्नेय्यामग्निदेवता ॥ दक्षिणे रक्ष वाराहि नैर्ऋत्यां खड्गधारिणी ॥ १५ ॥

अयं भावः । अप्रार्थिता अपि एता महत्यो देवता जगद्रक्षणे वत्सलतयैव प्रवृत्ता मातृवत्ताः कुतो न मंदभाग्येन स्वरक्षणार्थं प्रार्थ्यंते इति॥१३॥ कवचपाठस्यादाविमं प्रार्थनामंत्रं पठित्वा पश्चात्कवचं पठनीयमित्यभिप्रायेणाह—महाबल इति ॥ महद्बलं मायाशक्तिरूपं यस्याः महानुत्साहो जगद्रक्षणे यस्याः महाभयं मृत्युरूपं तस्य ज्ञानदानेन नाशिनी । दुष्प्रेक्ष्ये दुर्दर्शनीये । " न संदृशे तिष्ठति रूपमस्य " इति श्रुतेः । शत्रूणां कामक्रोधादिकानाम् ॥१४॥ प्राच्यामिति ॥ प्राच्यां दिशि स्थिता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऐंद्री इंद्रशक्तिर्मां रक्षत्वित्यन्वयः । प्राच्यां स्थितं मामिति वा एवमुत्तरत्रापि । शक्तिशक्तिमतोरभेदादग्निरूपा देवता अग्निशक्तिरित्यर्थः । अत्र रक्षत्वित्यनुवृत्तिः । वरान् श्रेष्ठानप्याहंति स वराहो यमः आर्षः प्रयोगः तस्य शक्तिर्वाराही अर्णंतान्ङीप् यमशक्तिरित्यर्थः । दश दिक्पालप्रकरणात् । सप्तमात्रंतर्गता वा वाराही हे वाराहि, दक्षिणे देशे स्थिता त्वं मां रक्षेत्यर्थः । स्थितं मामिति । खड्गधारिणी निर्ऋतिशक्तिरित्यर्थः । रक्षत्वित्यस्य मध्ये मध्ये विच्छेदादध्याहारः कर्तव्यः ॥१५॥ मृगवाहिनी वायुदेवताया मृगवाहनत्वाद्वायुशक्तिरित्यर्थः। रक्षेदित्यनुवृत्तिः। कुत्सितः मारः मदः यस्य सः कुमारः कुबेरस्तस्येयं शक्तिः कौमारी दिक्पालप्रकरणात् । यद्यपि कौबेर्या रक्षणस्थानमग्रे वक्ष्यमाणमस्ति तथाप्येकस्या एव स्थानद्वयरक्षकत्वे बाधकाभावः । सप्तमात्रंतर्गता वा । शूलधारिणीशानशक्तिरित्यर्थः ॥ १६ ॥

प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ उदीच्यां रक्ष कौमारी ईशान्यां शूलधारिणी ॥१६॥ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं दश दिशो रक्षेच्चामुंडा शववाहना ॥ १७ ॥ जया मे चाग्रतः स्थातु विजया स्थातु पृष्ठतः ॥ अजिता वामपार्श्वे तु दक्षिणे चापराजिता ॥ १८ ॥ शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी ॥ १९ ॥ त्रिनेत्रा च भ्रुवोर्मध्ये यमघंटा च नासिके ॥ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ २० ॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी ॥ नासिकायां सुगंधा च उत्तरोष्ठे च चर्चिका ॥ २१ ॥

ऊर्ध्वमिति ॥ ब्रह्माणमानयति जीवयतीति कर्मण्यण् । हे ब्रह्माणि, ऊर्ध्वं स्थिता भवती मे मां रक्षेदित्यर्थः । मे ऊर्ध्वं भागमिति वा । एवमिति । दिक्पालदेवतावदेव मे मत्संबंधिनीर्दश दिशश्चामुंडा रक्षेदित्यर्थः । दशदिक्षु स्थिता चामुंडा मां रक्षेदिति पर्यवसितोऽर्थः अन्यथा केवलदिशां रक्षणे प्रयोजनाभावः ॥ १७ ॥ जया शक्तिः स्थातु तिष्ठतु मत्संरक्षणार्थम् । आर्षः प्रयोगः ॥ १८ ॥ शिखामिति ॥ उद्योतिनी नामिका देवी मम शिखायां स्थिता सती मच्छिखां रक्षेदिति सर्वत्र योज्यम् । उमा मूर्ध्नि व्यवस्थिता सती मूर्धानं रक्षेदित्यर्थः । एवं सर्वत्र यथायोग्यमध्याहार्यम् ॥ १९ ॥ नासिके नासापुटेत्यर्थः । उत्तरत्र नासिकाशब्देन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नासिकादंड इति ॥ २० ॥ २१ ॥ अधरे अधरोष्ठे इत्यर्थः ॥ २२ ॥ २३ ॥ कंठस्य बहिर्भागो बहिष्कंठः । नलिका कंठनालम् ॥ २४ ॥ स्कंधमारभ्य कूर्परपर्यंतो भागो बाहुस्तदारभ्यांगुलिपर्यंतो भागो हस्तः ॥ २५ ॥ कुक्षाविति सप्तम्यंतः पाठः प्राचीनसंमतः ॥ २६ ॥ २७ ॥ मेढ्रं लिंगम् । "मेढ्रो मेहनशेफसी" इति कोशः । गुदं महिषवाहिनीत्यपपाठः । ऊरू महिषवाहिनीति पाठः सम्यक् । गुह्यं गुह्येश्वरीति पूर्वोक्तविरोधात् । जानुस्थानात्पूर्वमूरुस्थानस्यैव सत्त्वाच्च ॥ २८ ॥

अधरे चामृतकला जिह्वायां च सरस्वती ॥ दंतान्रक्षतु कौमारी कंठदेशे तु चंडिका ॥ २२ ॥ घंटिका चित्रघंटा च महामाया च तालुके ॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला ॥ २३ ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ नीलग्रीवा बहिःकंठे नलिकां नलकूबरी ॥ २४ ॥ खड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधारिणी ॥ हस्तयोर्दंडिनी रक्षेदंबिका चांगुलीषु च ॥ २५ ॥ नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ॥ २६ ॥ हृदयं ललिता देवी ह्युदरं शूलधारिणी ॥ नाभिं च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥२७॥ भूतनाथा च मेढ्रं च ऊरू महिषवाहिनी॥ कट्यां भगवती रक्षेज्जानुनी विंध्यवासिनी ॥२८॥ जंघे महाबला प्रोक्ता जानुमध्ये विनायकी ॥ गुल्फयोर्नारसिंही च पादपृष्ठेऽमितौजसी ॥ २९ ॥ पादांगुलीः श्रीधरी च पादाधस्तलवासिनी ॥ नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥ ३० ॥ रोमकूपानि कौबेरी त्वचं वागीश्वरी तथा ॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३१ ॥

प्रोक्तागमादिशास्त्रेषु या महाबला सेत्यर्थः ॥ २९ ॥ पादाधः इति भिन्नपदम् । तलवासिनी पातालतलवासिनीत्यर्थः । यद्यपि नखाञ्छूलेश्वरी रक्षेदित्यत्र नखरक्षणमुक्तं तथापि यथैकस्या अपि देवतायाः स्थानद्वयरक्षकत्वं न विरुध्यते तथैव देवताद्वयस्यैकस्थाननिरूपितरक्षकत्वे बाधकाभाव इत्यभिप्रायेण नखान् दंष्ट्राकराली

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चेत्युक्तम् ॥ ३० ॥ ३१ ॥ पद्मकोशे पद्महृदयादिरूपमेव कोशो वासस्थानं यस्य श्वासस्य तास्मिन्वाते स्थिता सती तं रक्षतु इति यावत् इति केचित् । अग्रे प्राणानां रक्षणकथनात् । "पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् । " इति श्रुत्युक्तं हृदयमेव पद्मकोशशब्देन ग्राह्यमित्यपरे । आंत्राणि अम्धातोः क्र"अनुनासिकस्य क्वि०" इति दीर्घः । चूडामणिनाम्नी देवता रक्तासुरवधे प्रसिद्धा ॥ ३२ ॥ नखज्वालां नखनिष्ठं तेजः । अभेद्यानाम्नी सर्वसंधिषु स्थिता सती सर्वसंधीन् रक्षेदित्यर्थः । हे ब्रह्माणि, भवती मे शुक्रं रक्षेदित्यर्थः ॥ ३३ ॥ हे धर्मचारीणि, अत्र त्वमित्यध्याहारः । रक्षेति मध्यमपुरुषात् ॥३४॥ यशः कीर्तिमिति ॥ अत्र यद्यपि " यशः की-

आंत्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३२ ॥ ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु ॥ शुक्रं ब्रह्माणि रक्षेच्च च्छायां छत्रेश्वरी तथा ॥ ३३ ॥ अहंकारं मनो बुद्धिं रक्ष मे धर्मचारिणि ॥ प्राणापानौ तथा व्यानमुदानं च समानकम् ॥ ३४ ॥ यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु चक्रिणी ॥ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके ॥ ३५ ॥ पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता ॥ ३६ ॥ रक्षाहीनं तु यत्स्थानं कवचेन विवर्जितम् ॥ तत्सर्वं रक्ष मे देवी जयंती पापनाशिनी ॥ ३७ ॥

र्तिः समज्ञा च " इत्यमरोक्तेर्यशःकीर्तिशब्दौ एकार्थप्रतिपादकौ तथापि । " स जीवति यशो यस्य कीर्तिर्यस्य स जीवति । यशःकीर्तिपरिभ्रष्टो जीवबद्धो न जीवति ॥ " इत्यादिप्रयोगानुरोधात् । दानादिप्रभवा कीर्तिः शौर्यादिप्रभवं यशः इति भेदः । केचित्तु स्वल्पदेशव्याप्तं यशः बहुदेशव्यापिका कीर्तिरिति । हे इन्द्राणि, भवतीत्यध्याहारः ॥३५॥३६॥ रक्षेति ॥ यत्स्थानं रक्षया हीनं कुत इति चेत्कवचेन तु विवर्जितम् । कवचे तस्य स्थानस्योहो न कृतः । तत्सर्वं रक्ष मे देवि यतस्त्वं जयंती सर्वोत्कृष्टा पापनाशिनी भवसि ॥ ३७ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथ पितामहः फलस्तुतिं वक्तुमधिकारिणं प्रथममुपदिशति–पदमेकमिति ॥ यदि शुभमात्मन इच्छेत्तर्हि स पुरुषः कवचेन रहितः एकं पदमपि न गच्छेदिति क्षणमात्रमपि देवीस्मरणं विना न क्षपणीयमिति तात्पर्यम्। तदुक्तं पुराणेषु। "स्वपंस्तिष्ठन्व्रजन्मार्गे प्रलपन् भोजने रतः। कीर्तयेत्सततं देवीं स वै मुच्येत बंधनात् ॥" इति। इत्युपदिश्य फलं कथयति। कवचेनेत्यादिना ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ दैवी कला चित्कला ॥ ४२ ॥ ४३ ॥ स्थावरं वत्सनाभादि।

पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥ कवचेनावृतो नित्यं यत्र यत्र हि गच्छति ॥ ३८ ॥ तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः ॥ यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥ ३९ ॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुनः ॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥ ४० ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥ ४१ ॥ यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ॥ दैवी कला भवेत्तस्य त्रैलोक्ये चापराजितः ॥४२॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥ नश्यंति व्याधयः सर्वे लूताविस्फोटकादयः ॥ ४३ ॥ स्थावरं जंगमं वापि कृत्रिमं चापि यद्विषम् ॥ अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले ॥ ४४ ॥ भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥ सहजाः कुलजा माला डाकिनी शाकिनी तथा ॥४५॥ अंतरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ॥ ४६ ॥ ब्रह्मराक्षसवेतालाः कूष्मांडा भैरवादयः ॥ नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ ४७ ॥ मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् ॥ यशसा वर्धते सोऽपि कीर्त्तिमंडितभूतले ॥ ४८ ॥

जंगमं सर्पादि। कृत्रिमं परस्परयोगजन्यम्। यथा तुल्यपरिमाणयोर्मधुसर्पिषोर्योगादिजम्। अभिचाराणि परकृतानि ॥ ४४ ॥ कुलजादयो दुष्टदेवताजातिभेदाः। औपदेशिकाः। उपदेशेन तन्मात्रेण ये सिध्यंति ते क्षुद्रदेवताभेदाः ॥ ४५ ॥ ४६ ॥ ४७ ॥ राज्ञः सकाशादित्यर्थः ॥ ४८ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अधुन ।सप्तशत्यंगत्वं कवचस्य विधत्ते–जपेदिति ॥ पुरा प्रथमतः । अनंतनागो यावद्भूमंडलं धत्ते धारयति तावदित्यर्थः॥४९॥ परमं स्थानं मोक्षरूपं ज्ञानद्वारा प्राप्नोति नियमेन ॥ ५० ॥ महामाया सर्वकारणं मायाशबलं ब्रह्म तस्याः प्रसादतः । " यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् । " इति श्रुतेः । " य एतां मायाशक्तिं वेद स मृत्युं जयति स पाप्मानं तरति सोऽमृतत्वं च गच्छति " इति श्रुतेः । "अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः" इति श्रुतेश्च । " पार्वती परमा विद्या ब्रह्मविद्याप्रदायिनी । विशेषणैव जंतूनां नात्र संदेहकारणम् ॥ " इति सूतसंहितोक्तेश्च । कवचेऽस्मिन्सार्धपञ्चाशत्संख्याश्लोकसंग्रहः इति वाराहीतंत्रे । स्पष्टं चेदं गुप्तवत्यामुपोद्घाते । " आधिक्यन्यूनतादोषपरिहारजिहीर्षया । देवीनाम्नां क्रमस्यापि कथनं क्रियते मया ॥ " ते च श्लोकाः प्राचीनग्रंथस्थाः सांप्रदायिका एव लिख्यंते । " दश दिक्पालदेव्यश्च चामुंडा च ततः परम् ॥ जया च विजया चैवाप्यजिता चापराजिता ॥ १ ॥ उद्योतिनी ततश्चोमा मालाधारी यशस्विनी ॥ त्रिनेत्रा यमघंटा च शंखिनी द्वारवासिनी ॥ २ ॥ कालिका शांकरी पश्चात्सुगंधा चर्चिका तथा ॥ अमृतादिकला पश्चात्ततः स्यात्तु सरस्वती ॥ ३ ॥

जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा ॥ यावद्भूमंडलं धत्ते सशैलवनकाननम् ॥४९॥ तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रिकी ॥
देहांते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ ५० ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ इति तंत्रोक्तं देव्याः कवचम् ॥ १ ॥ ॥

कौमारी चंडिका चित्रघंटा माया महादिका ॥ कामाक्ष्यनंतरं सर्वमंगला भद्रकालिका ॥ ४ ॥ धनुर्धरी नीलग्रीवा ततः स्यान्नलकूबरी ॥ खड्गधारिणिका पूर्वं वज्रधारिण्यनंतरम् ॥ ५ ॥ दंडिनी चांबिका मूलेशानी स्यात्तु बलेश्वरी ॥ मनःशोकविनाशा स्याल्ललिता शूलधारिणी ॥ ६ ॥ कामिनी गुह्यपूर्वा स्यादीश्वरी च ततः परम् ॥ भूतनाथा ततः स्यात्तु महामहिषवाहिनी ॥ ७ ॥ भगवत्यपि विंध्यस्था महापूर्वा बला तथा ॥ विनायकी नारसिंही ततः पश्चान्मितौजसी ॥ ८ ॥ श्रीधर्यंते च पातालवासिन्यंते करालिनी ॥ ऊर्ध्वकेशी च कौबेरी वागीशी पार्वती तथा ॥ ९ ॥ कालरात्रिश्च मुकुटेशानी पद्मावती तथा ॥ चूडामणिस्तथा ज्वालामुख्यमेद्या ततः स्मृता ॥ १० ॥ ब्रह्माणी छत्रपूर्वा स्यादीश्वरी धर्मचारिणी ॥ चाक्रिणींद्रवधूश्चंडी महालक्ष्मीश्च भैरवी ॥ ११ ॥ क्षेमंपूर्वाकरी पश्चाद्विजया च जयंतिका ॥ इत्येताः सम्यगाख्याताः कवचस्थाश्च शक्तयः ॥ १२ ॥ " इति श्रीशैवोपनामकरंगभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतं सप्तशत्यंगकवचविवरणं समाप्तम् ॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अथार्गलाव्याख्यानम् ॥ तत्र प्रथमतो देवताया ध्यानोपयोगिगुणानाह—जयंतीति ॥ जयंती सर्वोत्कृष्टेत्यर्थः। गुणत्रयसाम्यावस्थोपाधिकब्रह्मरूपिण्या भगवत्याः सर्वकारणत्वात् । मंगलामंगं जननमरणादिरूपं सर्पणं लाति गृह्णाति नाशयति सा मोक्षप्रदा मंगलेत्युच्यते । "न तस्य प्राणा उत्क्रामंति" इति श्रुतेः। कलयति भक्षयति सर्वमेतत्प्रलयकाले इति काली।"ब्रह्म क्षत्रं चोभे भवत ओदनो मृत्युर्यस्योपसेचनम्" इति श्रुतेः। भद्रं मंगलं सुखं कलयति स्वीकरोति भक्तेभ्यो दातुमिति भद्रकाली । " भद्रकाली सुखप्रदा " इति रहस्यागमेऽर्थकथनात् ।" कपालोऽस्त्री शिरोऽस्थिन स्याद्घटादेः शकलेंऽबुजे। " इति मेदिनीकोशाद्ब्रह्मादीन्निहत्य तेषां कपालं गृहीत्वा प्रलयकाले अटतीति कपालिनी । प्रपंचरूपांबुजं हस्ते यस्या इति वा । कपालिनी मत्वर्थीय इनिः । " प्रपंचांबुजहस्ता च कपालिन्युच्यते परा । " इति रहस्यागमे दुःखेनाष्टांगयोगसर्वकर्मोपासनारूपेण क्लेशेन गम्यते प्राप्यते सा दुर्गा । "तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम् । " इति देव्यथर्वशिरसि । क्षमा भक्तानामन्येषां

मार्कंडेय उवाच ॥ जयंती मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ १ ॥

मधुकैटभविद्रावि विधातृवरदे नमः ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २ ॥

वा सर्वानपराधान्क्षमते सहते जननीत्वात्सातिशयकारुण्यवती क्षमेत्युच्यते । शिवा चिद्रूपिणीत्यर्थः। "चिन्मात्राश्रयमायायाः शक्त्याकारे द्विजोत्तमाः। अनुप्रविष्टा या संविन्निर्विकल्पा स्वयंप्रभा ॥ सदाकारा सदानंदा संसारोच्छेदकारिणी । सा शिवा परमा देवी शिवाभिन्ना शिवंकरी ॥ " इति सूतसंहितोक्तेः । धात्री सर्वप्रपंचधारणकर्त्री । " अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणा भाविभर्म्यहमिंद्राग्नी अहमश्विनो भाः " इत्यादिश्रुतेः । स्वाहा देवपोषिणी । स्वधा पितृपोषिणी । एतादृशपूर्वोक्तमहागुणवती या त्वमसि ततस्ते तुभ्यं नमो नमस्कार एवास्तु केवलं नतु तादृश्याः परिचर्यायाः सामर्थ्यमस्तीति भावः ॥ १ ॥ मध्विति ॥ मधुकैटभयोर्विद्राविणी नाशिनी च सा विधातुर्वरदा चेत्यर्थः । मधुकैटभनाशार्थं ब्रह्मणा स्तुता सती तस्मै वरं ददाविति कथा देवीभागवते प्रथमस्कंधे प्रसिद्धा । रूप्यते ज्ञायते इति रूपं परमात्मवस्तु । " रूपं भवेद्द्विदुरमंदकांतिः " इत्यागमात् । तद्देहि मह्यम् । यत्कृतनमस्कारेणैव प्रसन्ना सती तथा जयं जयत्यनेन परमात्मनः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वरूपमिति जयो वेदस्मृतिराशिस्ततो जयमुदीरयेदित्यत्र प्रसिद्धः । तं देहि यशो देहि । " सह नौ यशः " इति श्रुतिप्रसिद्धं तत्वज्ञानसंपादनजन्यं यशः । तद्देहि । द्विषः कामक्रोधादिशत्रून् जहि नाशय ॥ २ ॥ महिषेति ॥ महिषासुरस्य निर्नाशस्तस्य विधात्री कर्त्रीत्यर्थः । वरदे इति पृथक्पदम् ॥ ३ ॥ वंदितेति ॥ ब्रह्मविष्ण्वादिभिर्वंदितमंघ्रियुगं यस्यास्तेषामेतदपेक्षया न्यूनोपाधिकत्वात् । भक्त्यतिशयेन देवीत्यस्य पुनरावृत्तिः ॥ ४ ॥ रक्तेति ॥ रक्तबीजस्य वधः कर्तव्यतया अस्ति यस्याः सा । अर्शआद्यजंतम् । रक्तबीजवधकर्त्रीत्यर्थः । रक्तबीजस्य वधो यस्याः सकाशादिति वा । अत्र निशुंभशुंभेति श्लोकपाठोऽपपाठः । प्राचीनैरव्याख्यानात् ।

महिषासुरनिर्नाशं विधात्रि वरदे नमः ॥ रूपं देहि० ॥ ३ ॥ वंदितांघ्रियुगे देवि देवि सौभाग्यदायिनि ॥ रूपं० ॥४॥ रक्तबीजवधे देवि चंडमुंडविनाशिनि ॥ रूपं० ॥ ५ ॥ अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि ॥ रूपं० ॥ ६ ॥ नतेभ्यः सर्वदा भक्त्या चंडिके प्रणताय मे ॥ रूपं० ॥ ७ ॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि ॥ रूपं० ॥ ८ ॥ चंडिके सततं ये त्वामर्चयंतीह भक्तितः ॥ रूपं० ॥ ९ ॥ देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ॥ रूपं० ॥ १० ॥ विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ॥ रूपं० ॥ ११ ॥ विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ॥ रूपं० ॥ १२ ॥ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु ॥ रूपं० ॥ १३ ॥ प्रचंडदैत्यदर्पघ्ने चंडिके प्रणताय मे ॥ रूपं० ॥ १४ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं० ॥ १५ ॥

प्राचीनपुस्तकेष्वपाठाच्च ॥ ५ ॥ अचिंत्येति ॥ " यतो वाचो निवर्तंते " इति श्रुतेः । " यो अस्याध्यक्षः परमे व्योमन्त्सोऽग वेद यदि वा न वेद " इति श्रुतेः ॥ ६ ॥ नतेभ्य इति ॥ सदा सर्वदा भक्त्या नतेभ्यः प्रणतेभ्यो मे प्रणताय च रूपं देहीत्यन्वयः ॥७॥८॥ ये त्वामर्चयंति तेभ्य इति शेषः ॥ ९ ॥ सौभाग्यं देहि । अर्थान्मह्यम् ॥ १० ॥ विधेहीति ॥ उच्चकैः अतिशयेनोच्चं बलं मम विधेहि ॥ ११ ॥ १२ ॥ विद्यावंतमिति ॥ ब्रह्मविद्यावंतं जनं स्वभक्तं कुरु अथ च रूपं देहीत्यर्थः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ १३ ॥ १४ ॥ १५ ॥ कृष्णेनेति ॥ इयं कथा देवीभागवते प्रसिद्धा ॥ १६ ॥ हिमाचलसुतानाथः शिवस्तेन पूजिते ॥ १७ ॥ सुरेति ॥ अनेन च देवीस्वरूपदर्शनेन निर्वैरता अद्वैतभावश्च भवतीति ध्वनितम् । सुरासुरयोः सामानाधिकरण्यकथनात् ॥ १८ ॥ इंद्राणीति ॥ इंद्राणीपतिना सद्भावेन पूजिते ॥ १९ ॥ २० ॥ भक्तजनेषु ये उद्दामास्तेभ्यो दत्त आनंदोदयो मोक्षो यया ॥ २१ ॥ तारिणी मार्कंडेयपुराणप्रसिद्धया मदालसया वासिष्ठरामायणप्रसिद्धया चूडालया च तुल्याम् । "आद्यया पुत्रस्तारितो द्वितीयया पतिरेव तारितः" इति तत्राख्यानात् ॥ २२ ॥ महास्तोत्रं सप्तशत्याख्यम् । अनेन चार्गलास्तुतेरपि सप्तशत्यंगत्वं बोधितम् । य एवमर्गलास्तुतिं पठित्वा सप्तशतीस्तोत्रं जपति स तु स एव सप्तशत्याः संख्या सम्यक्कथनं तया यज्जायमानं वरं फलं तत्प्राप्नोति नान्यः संपदश्च प्राप्नोति तस्मादवश्यमर्गलास्तोत्रं पठ-

कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमंबिके ॥ रूपं० ॥ १६ ॥ हिमाचलसुतानाथपूजिते परमेश्वरि ॥ रूपं० ॥ १७ ॥ सुरासुरशिरोरत्ननिघृष्टचरणेऽबिके ॥ रूपं० ॥ १८ ॥ इंद्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपं० ॥१९॥ देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिनि ॥ रूपं ॥ २० ॥ देविभक्तजनोद्दामदत्तानंदोदयेऽबिके ॥ रूपं० ॥ २१ ॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥ तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥ २२ ॥ इदं स्तोत्रं जपित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तशतीसंख्यावरमाप्नोति संपदः ॥ २३ ॥ इति अर्गलास्तुतिः ॥ २ ॥ ऋषिरुवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥ १ ॥

नीयमिति भावः । सिद्धिप्रतिबंधकं पापमर्गलासदृशत्वादर्गला तन्नाशकस्तोत्रस्यापि लक्षणयार्गलेति संज्ञा ॥ २३ ॥ त्रयोविंशतिसंख्यानां श्लोकानामत्र संग्रहः । अत्रापि मूलं वाराहीतंत्रमेव । इति श्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंटभट्टकृतमर्गलाविवरणं समाप्तम् ॥ २ ॥ अथ कीलकविवरणम् ॥ तत्र मार्कंडेयऋषिः शिष्यानुपदिदेश स संवादस्तंत्रेषु कथित इति तंत्रस्थमेवैतत् । ऋषिरुवाच ॥ मार्कंडेयऋषिः स्वशिष्यान्प्रतीत्यर्थात् । कीलकं वक्तुं मंगलमाचरति मार्कंडेयः—विशुद्धेति ॥ निर्मलज्ञानरूपायेत्यर्थः। त्रिवेदी वेदत्रयरूपं दिव्यं चक्षुर्यस्य तस्मै श्रेयःप्राप्तेः कल्याणप्राप्तेर्निमिताय सोमार्धधारिणे नमोऽस्त्वित्यर्थः। अत्र केचिदयं श्लोकस्त- ॥१०३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

केचरणमीमांसावार्तिकप्रथमोऽत्रापि बहुभिः पठ्यते परं तु अनार्ष इत्याहुः। वयं तु ब्रूमोऽत्रत्य एव स श्लोको मंगलार्थं वार्तिककारैर्गृहीत इति कुतो न स्यात् नहि कुत्र-चित्स्थितः श्लोको मंगलार्थमन्यत्र न गृहीतव्य इति राजाज्ञास्ति तस्मात्सर्वपुस्तकेषु उपलंभादार्ष एव श्लोक इति ॥ १ ॥ किमुवाच तदाह–सर्वमिति ॥ मन्त्राणां सर्वेषामभिकीलकं वक्ष्यमाणरीत्या सर्वमंत्रसिद्धिप्रातिबंधकशापरूपकीलकनाशकत्वाल्लक्षणया सप्तशतीस्तोत्रमभिकीलकं तत्सर्वं विजानीयादुपासीतेत्यर्थः। नन्वन्यमंत्रो-पासनाभिः किं क्षेमं न भवति यतोऽत्रैवाग्रहः क्रियते इति चेद्भवत्येवेत्याह । सोऽपीति । तत्सप्तशतीस्तोत्रं विना सततं जाप्यतत्परः नानामंत्राणां जपरूपे कर्मणि नि-रंतरं निष्ठा यस्य सः तत्परो यस्तु पुरुषः सोऽपि क्षेमं सर्वं कल्याणं प्राप्नोतीत्यर्थः ॥ २ ॥ एवं जपतत्परस्य पुरुषस्योच्चाटनादीन्यपि कर्माणि सिध्यंति तथा सकलानि वस्तून्यलभ्यानि सिध्यंति। एवं सप्तशतीपाठरहितानामपि पुरुषाणां केवलमंत्रजपेन सिद्धिमुक्त्वा मंत्रजपरहितानामपि पुरुषाणां केवलसप्तशतीपाठेनापि सर्वसि-

सर्वमेतद्विना यस्तु मंत्राणामभिकीलकम् ॥ सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः॥२॥ सिद्ध्यंत्युच्चाटनादीनि वस्तूनि सकलान्य-पि ॥ एतेन स्तुवतां देवीस्तोत्रमंत्रेण सिद्ध्यति ॥ ३ ॥ न मंत्रो नौषधं तत्र न किंचिदपि विद्यते ॥ विना जाप्येन सिध्येत सर्वमुच्चाट-नादिकम् ॥ ४ ॥ समग्राण्यपि सिद्ध्यंति लोकशंकामिमां हरः ॥ कृत्वा निमंत्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥

द्धिमुपदिशति । एतेनेति । एतेन प्रकृतेन स्तोत्रमात्रेण सप्तशत्याख्यस्तोत्रपाठमात्रेण स्तुवतां स्तोतॄणां देवी भगवती सच्चिदानंदरूपिणी सिद्ध्यति प्रसीदति ॥ ३ ॥ अस्य पुरुषस्य नान्यमंत्राद्युपयोग इत्याह–न मन्त्र इति ॥ तत्र तस्य पुरुषस्य कार्यसिद्धौ न मन्त्र उपयुक्तो भवति तथा नौषधं तथा न किंचिदन्यदपि योगसिद्ध्या-दिरूपं साधनं विद्यते उपयोगाय किंतु जाप्येन विना तत्तन्मन्त्रजपरूपकर्माभावेऽपि सर्वमुच्चाटनादिकमाभिचारिकं कर्म तथा समग्राण्यप्यभिलषणीयानि कार्याणि सिद्ध्यंति । केवलस्तोत्रमात्रेणेति । एतावत्पर्यंतं सप्तशत्युपासनया केवलया सर्वं कल्याणं भवति तथा सप्तशत्यन्यन्मन्त्रोपासनयापि सर्वं कल्याणं भवतीति पक्षद्वयमु-पपादितम् ॥ ४ ॥ इत्थं पक्षद्वयमपीदमस्तीति या पक्षद्वयविषयिणी लोकानां शंका तां हरः प्रथमतः कृत्वा तच्छंकानिरासार्थं निमन्त्रयामास निमंत्रितवानर्थाल्लो-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कांस्तानागतानाह । किमिति । वक्ष्यमाणप्रकारेणेदं सप्तशत्याख्यमेव शुभमिति । अत्र तानाहेति शेषः ॥ ५ ॥ अनंतरं चंडिकायास्तु चंडिकाया एव स्तोत्रं सप्तश-त्याख्यं तच्च गुह्यमतिरहस्यं चकार । पूर्वोक्तमंत्रजपरूपपक्षापेक्षया द्वितीयं पक्षमेव सारभूतं चकारेत्यर्थः । इति मार्कंडेयेन तंत्रोक्तं पूर्ववृत्तं कथितं पुनः शिष्यान्सप्तश-तीमाहात्म्यं कथयन् शिवाभिप्रायं कथयति । यस्मादेतत् स्तोत्रपाठजन्यफलस्य न समाप्तिः कदापि भवति तत्तन्मंत्रजपजन्यपुण्यस्य तु समाप्तिरस्ति पूर्वोक्तां शिवेन कृतां नियन्त्रणां प्रथमपक्षस्य संकोचरूपां यथावद्यथार्थमेव जानीध्वमिति शेषः ॥ ६ ॥ सोऽपीति ॥ सोऽपि तत्तन्मंत्रजपकर्तापि एतत्स्तोत्रजपसहितश्चेदेव सर्वं क्षे-ममवाप्नोति तस्मात्तं प्रथमपक्षं विहाय सप्तशतीपाठे एव सर्वैरादरः कर्त्तव्य इत्यर्थः । एतेनान्ये मन्त्रा अपि सप्तशतीपाठं कृत्वैव जपनीयाः अन्यथा तत्तन्मन्त्रफलप्रा-प्तिर्न स्यादिति बोधितम् । यत एतत्सर्वमन्त्रसिद्धिप्रतिबंधकनाशकं भवति । तस्मादेव मंत्राणामभिकीलकमेतादिति पूर्वमुक्तमिति बोध्यम् । अभिकीलकं सिद्धिप्रति-

स्तोत्रं वै चंडिकायास्तु तच्च गुह्यं चकार सः॥ समाप्तिर्न च पुण्यस्य तां यथावन्नियंत्रणाम् ॥६॥ सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ॥
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥७॥ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति॥ इत्थं रूपेण कीलेन महादेवेन कीलितम्॥८॥

ष्टंभकरं दोषरूपं तन्नाशकत्वादस्यापि लक्षणया अभिकीलकत्वम् । नन्वत्रापि नवार्णमन्त्रजपापेक्षास्त्येवेति चेत्सा शीघ्रफलार्थमिति ब्रूमो नतु तद्विना फलमेतस्य ना-स्तीति । एतद्विना तु तत्तन्मंत्राणां फलमेव न भवतीति विशेषः । परंतु हे शिष्याः, तत्स्तोत्रं सर्वेषामप्यचिंत्यफलप्रदं जातामिति सर्वेऽपि सर्वेश्वरा भविष्यंतीति ज्ञा-त्वा महादेवेन कीलितमस्तीत्याह । कृष्णायामिति । कृष्णचतुर्दश्यामष्टम्यां वा कृष्णायां समाहितः एकाग्रः सन् ॥ ७ ॥ य उपासको निजं सर्वं धनं न्यायेनार्जितं देव्यै ददाति समर्पयति । हे देवि, इत आरभ्येदं सर्वं मदीयं धनं तुभ्यं मया दत्तमस्ति इति समर्पयति पश्चात्संसारयात्रानिर्वाहार्थं गृहाणेदं द्रव्यं मत्प्रसादभूतमिति देव्याः अनुज्ञां मनसा गृहीत्वा तद्द्रव्यं प्रसादबुद्ध्या प्रतिगृह्णाति गृहीत्वा धर्मशास्त्रोक्तमार्गेण तस्य व्ययं कुर्वन्निरंतरं देव्यधीनो भवति तस्यैषा सप्तशती प्रसन्ना भ-वति नान्यथा । इत्थंरूपेण कीलेन सिद्धिप्रतिष्टंभकरेण रूपेण महादेवेन कीलितमास्ते । अयं च कीलकस्यार्थो रहस्याम्नाये गुरुकीलकपटले प्रदर्शितः । अग्रे स्पष्टीक-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रिष्यामः ॥ ८ ॥ तर्हि किं कर्तव्यं तत्राह—य इति ॥ यस्मादेवं तस्माद्यो हि पुरुष एतां सप्तशतीं पूर्वोक्तदानप्रतिग्रहकरणेन निःकीलां विधाय स्फुटं यथा स्यात्तथा संजपति स एव सिद्धो भवति स एव देव्या गणो भवति सोऽपि स एवावने सर्वजगद्रक्षणे गंधर्वः । बृहदारण्यके । " तस्यासीद्दुहिता गंधर्वगृहीता " इति श्रुत्युक्तो देवताविशेषो गंधर्वो जायते स हि समर्थः सर्वजगद्रक्षणे इति ॥ ९ ॥ दृष्टफलान्याह—नेति ॥ १० ॥ एतादृशं कीलकमज्ञात्वा पाठकर्तुर्दोषमाह—ज्ञात्वेति ॥ पूर्वोक्तं कीलकं ज्ञात्वा तत्परिहारं प्रारभ्य पाठं कुर्वीत तत्परिहारमकुर्वाणो विनश्यति । यस्मादेवं तस्मात्कीलकं ज्ञात्वैव संपन्नं निर्दुष्टमिदं स्तोत्रं बुधैः प्रारभ्यते । अत्र विनाशकथनं कीलकज्ञानस्यावश्यकत्वार्थमेव । यथाकथंचित्पाठस्यापि वचनांतरैरनुज्ञानात् ॥ ११ ॥ तेन तेन हेतुना जाप्यमित्यर्थः ॥ १२ ॥ शनैस्त्विति ॥ शनैः स्वकर्णा-

यो निःकीलां विधायैनां नित्यं जपति संस्फुटम् ॥ स सिद्धः स गणः सोऽपि गंधर्वो जायतेऽवने ॥ ९ ॥ न चैवाप्यटतस्तस्य भयं क्वापीह जायते ॥ नाल्पमृत्युवशं याति मृतो वा मोक्षमाप्नुयात् ॥१०॥ ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ॥ ११ ॥ सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने ॥ तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम् ॥१२॥ शनैस्तु जाप्यमानेऽस्मिन्स्तोत्रे संपत्तिरुच्चकैः ॥ भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥ १३ ॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः ॥ शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥ १४ ॥ इति कीलकम् ॥ ३ ॥

गोचरं यथा स्यात्तथा पाठे यत्किंचित्संपत्तिरेव भवति । उच्चकैः उच्चैः पाठे तु समग्रापि भवत्येव । तत उच्चकैरेवैतत्प्रारभ्यमित्यर्थः ॥ १३ ॥ इत्थं मुनिः कीलकविधिं समाप्य जनानाक्रोशति—ऐश्वर्यमिति ॥ परो मोक्षः कैवल्यमोक्षः अहो मंदभाग्या एते दृष्टिगोचरं चिंतामणिं कामदुघां भगवतीं विहाय स्वकल्याणार्थं वराटिकामन्यदेवतोपासनारूपां किमर्थं गृह्णंतीति ॥ १४ ॥ श्लोकाश्चतुर्दशैवात्र कीलके संप्रतिष्ठिताः । अत्रापि मूलं वाराहीतंत्रं स्पष्टं चेदं गुप्तवत्याम् । अत्र रहस्यतन्त्रस्थो गुरुकीलकपटलो लिख्यते । " शिव उवाच । पुरा सनत्कुमाराय दत्तमेतन्मयानघ ॥ संवर्ताय ददौ तच्च स चान्यस्मै ददौ च तत् ॥ १ ॥ सर्वत्र चंडीपाठस्य प्राचुर्येण मही-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तले ॥ ब्रह्मकांडः कर्मकांडस्तंत्रकांडश्च सर्वथा ॥ २ ॥ अभूत्प्रातिहतोऽनेन शीघ्रसिद्धिप्रदायिनी ॥ तदा तेषां च सार्थक्यं कर्तुकामेन भूतले ॥ ३ ॥ दानप्रतिग्रहत्वेन मंत्रोऽयं कीलितो मया ॥ दानप्रतिग्रहाख्यं यत्कीलकं समुदाहृतम् ॥ ४ ॥ तदारभ्य च मंत्रोऽयं कीलकेनाभिकीलितः ॥ न सर्वेषां भवेत्सिद्ध्यै ये कीलकपराङ्मुखाः ॥५॥ ये नराः कीलनेनेमं जपंति परया मुदा ॥ तेषां देवी प्रसन्ना स्यात्ततः सर्वाः समृद्धयः ॥६॥ त्वत्प्रसूतस्त्वदाज्ञप्तस्त्वद्दासस्त्वत्परायणः॥ त्वन्नामार्चिंतनपरस्त्वदर्थेऽहं नियोजितः ॥ ७ ॥ मयार्जितमिदं सर्वं तव स्वं परमेश्वरि ॥ राष्ट्रं बलं कोशगृहं सैन्यमन्यच्च साधनम् ॥ ८ ॥ त्वदधीनं करिष्यामि यत्रार्थे त्वं नियोक्ष्यसि ॥ तत्र देवि सदा वर्ते त्वदाज्ञामेव पालयन् ॥ ९ ॥ इति संचिंत्य मनसा स्वार्जितानि धनानि च ॥ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥ १० ॥ समर्पयेन्महादेव्यै स्वार्जितं सकलं धनम् ॥ राष्ट्रं गृहं कोशबलं नवं च यदुपार्जितम् ॥ ११ ॥ अस्मिन्मासि मया देवि तुभ्यमेतत्समर्पितम् ॥ इति ध्यात्वा ततो देव्याः प्रसादात्प्रतिगृह्य च ॥ १२ ॥ विभज्य पंचधा सर्वं त्र्यंशान्स्वार्थं प्रकल्पयेत् ॥ देवपित्रतिथीनां च क्रियार्थं त्वेकमादिशेत् ॥१३॥ एकांशं गुरवे दद्यात्तेन देवी प्रसीदति ॥ तस्य राज्यं स्वकं सैन्यं कोशः साधु विवर्धते ॥ १४ ॥ नानारत्नाकरः श्रीमान्यथा पर्वणि वारिधिः ॥ ज्ञात्वा नवाक्षरं मंत्रं जीवब्रह्मसमाश्रयम् ॥ १५ ॥ तत्त्वमस्यादिवाक्यानां सारं संसारभेषजम् ॥ सप्तशत्याख्यमंत्रस्य यावज्जीवमहं जपम् ॥ १६ ॥ कुर्वंस्ततो न प्रमादं प्राप्नुयामिति निश्चितम् ॥ कृत्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ॥ १७ ॥ नाहं ब्रह्म निराकुर्यां मा मां ब्रह्मनिराकरोत् ॥ अनिराकरणं मेऽस्तु अनिराकरणं मम ॥ १८ ॥ इति वेदांतमूर्धन्ये छांदोग्येऽस्य प्रपंचनात् ॥ प्रारभ्य तत्परित्यागो न तस्य श्रेयसे ततः ॥ १९ ॥ नाब्रह्मवित्कुले तस्य जायते हि कदाचन ॥ न दारिद्र्यं कुले तस्य यावत्स्थास्यति मेदिनी ॥२०॥ प्रतिसंवत्सरं कुर्याच्छारदं वार्षिकं तथा ॥ तेन सर्वमवाप्नोति सुरासुरसुदुर्लभम् ॥ २१ ॥ अन्यच्च यद्यत्कल्याणं जायते तत्क्षणे क्षणे ॥ सत्यं सत्यमिदं सत्यं गोपनीयं प्रयत्नतः ॥ २२ ॥ पुत्राय ब्रह्मनिष्ठाय पित्रा देयं महात्मना ॥ अन्यथा देवता तस्मै शापं दद्यान्न संशयः ॥ २३ ॥ इति ।" अयं भावः । पित्रार्जितं विना स्वेनैव मंत्रप्राप्त्युत्तरं यद्यन्नूतनमार्जितं तदर्जनं माससंबंधि कृष्णचतुर्दश्यष्टम्यन्यतरदिवसे देवीनिकटे स्थित्वा देशकालौ संकीर्त्य दानप्रतिग्रहाख्येन कर्मणा देवीं प्रीणयिष्ये इति संकल्प्य त्वत्प्रसूत इत्यादि-श्लोकत्रयमर्थानुसंधानपूर्वकं पठित्वा राष्ट्रं बलं कोशगृहं इति श्लोकमंत्रेण देवीचरणयोर्दत्तमिवानुसंधाय प्रसन्नया देव्याज्ञप्त एव पुनः प्रतिग्रहं विभाव्य तन्मध्ये पंचमं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भागं गुरवे निवेद्य तत्पुत्रादिभ्यो वा दत्त्वावशिष्टं चतुर्थांशं स्वेन क्रियमाणपंचयज्ञादिधर्मव्ययार्थं निष्कास्येतरत्स्वार्थं यथेष्टं नियोजयेत् । अत्र मासश्चांद्रमासो ग्राह्यः । अमायामार्जितस्य तूत्तरमासे दानं मन्त्रपूर्वमासीदित्यूह्यो यथान्यायं तंत्रेण दानादावूह्यः । प्रकृते तदपवादमाह । ज्ञात्वेति पञ्चदशश्लोके । नवार्णमंत्रं स्वीकृत्य महावाक्यार्थसंवादिनं तदर्थं च गुरोर्लब्ध्वाधिकृतः सन्नद्यावधि यावज्जीवं सप्तशतीस्तवपाठं प्रमादेन सकृदपि न त्यक्ष्ये इति दृढं संकल्प्य तथैवानुतिष्ठेत् । अनेन च कीलकपटलेन ददाति प्रतिगृह्णातीत्यस्य ज्ञात्वा प्रारभ्य कुर्वीतेत्यस्य च प्रागुक्तोऽर्थः स्पष्टमेवोक्त इति । इति श्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतं सप्तशतीकीलकविवरणं समाप्तम् ॥ ३ ॥ अथ रहस्यव्याख्या ॥ तत्र सुमेधसं प्रति सुरथो राजा प्रश्नं करोति—भगवन्निति ॥ हे भगवन्, " यद्भयाद्वाति वातोऽयं सूर्यो भीत्या च गच्छति । इंद्राग्निमृत्यवस्तद्वत्सा देवी चंडिका स्मृता ॥ " इति भुवनेश्वरसंहितोक्तेः । चंडभानुः चंडवात इत्यादौ भयजनके चंडपदस्य प्रयोगाच्च भयज-

राजोवाच ॥ भगवन्नवतारा मे चंडिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि ॥ १ ॥

आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज ॥ विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥ २ ॥

नककोपार्थकचडिकोपे इति धातोः पचाद्यचि गौरादिपाठात् ङीषि कृते चंडीति रूपं भवति । तद्वशादेव " नमस्ते रुद्र मन्यव " इत्यादिना प्रथमं मन्यवे एव नमस्कारदर्शनम् । " भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचमः " इत्यादिश्रुत्या वाय्वादिभयजनककोपस्यापि परब्रह्मलिंगत्वमक्षतमेव । अत एव " महद्भयं वज्रमुद्यतम् " इति श्रुतौ वज्रपदेनात्र ब्रह्मैवोच्यते नायुधविशेषो भयजनकत्वलिंगादित्युत्तरमीमांसायां कंपनादित्याधिकरणे । तस्मात्सर्वभयजनकं वेंप्रशास्तृपरं ब्रह्मैव चंडीपदवाच्यम् । तस्याश्चिद्रूपायाश्चंडिकाया अवतारास्त्वया मे मह्यं कथिताः । परंतु एतेषामवताराणां प्रकृतिं मूलभूतां प्रधानां मुख्यां हे ब्रह्मन्, वक्तुमर्हसि यन्मुख्यरूपपूजया मूलसेकेन शाखानां सेचनवदवताराणामपि पूजा भविष्यति तन्मुख्यं रूपं कथयेति भावः ॥ १ ॥ तदेवाह—आराध्यमिति ॥ येन च विधिना तद्रूपमाराध्यं तं विधिं तदाराध्यं च रूपं वदेत्यर्थः । किमिति चेत्प्रणतस्य मे संबंधसामान्ये षष्ठी । प्रणतं शिष्यं मां

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रूहीत्यर्थः । भक्तियुक्ताय शिष्याय यथावद्गुरुणा सर्वं वक्तव्यमिति भावः ॥२॥ राजवाक्यं श्रुत्वा ऋषिरुवाच । हे राजन्, यत्त्वया दृष्टं तदिदं परममुत्कृष्टं रहस्यमस्ति अत एवैतदनाख्येयं कस्याप्यकथनीयमिति प्रचक्षते । महांतः शिवादयः । तथा च तंत्रेषु । "एतत्प्रकाशनं मातुरुद्घाटनमुरोजयोः । तस्मान्नैव प्रकाशोऽस्य कर्तव्यः परमेश्वरी ॥" इति । सर्वथा प्रकाशनिषेध उक्तः । तथापि तत्रैव । "नाभक्ताय प्रदातव्यं नाशिष्याय कथंचन ।" इत्युक्तेः । शिष्यस्यानुमतिदर्शनात् । हे नराधिप, त्वं भक्तोऽसि इति तवावाच्यं नैव किंचिदस्ति यत्पृच्छ्यते तत्सावधानतः शृणु ॥ ३ ॥ तत्र सर्वदेवतानां रूपद्वयं सूक्ष्मं स्थूलं चेति । सूक्ष्मं तत्तदुपाधिविशिष्टचैतन्यरूपं मंत्रवाच्यम् । स्थूलं तु तत्तत्सूक्ष्मरूपोपासकभक्तानुग्रहार्थं तेनैव सूक्ष्मरूपेण स्वीकृतं करचरणादिविशिष्टं तंत्रविदां स्पष्टमेतत् । तदुभयं दर्शयति । सर्वस्येति । सर्वस्य कार्यप्रपंचस्य सर्वस्यावतारसमूहस्य चाद्या प्रथमा महालक्ष्मीर्भवति । रूपमाह । त्रिगुणेति । त्रयो गुणाः सत्वरजस्तमोरूपाः साम्यावस्थापन्ना यस्याः सा

ऋषिरुवाच ॥ इदं रहस्यं परममनाख्येयं प्रचक्षते ॥ भक्तोऽसीति न मे किंचित्तवावाच्यं नराधिप ॥ ३ ॥

सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४ ॥

मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिंगं च योनिं च बिभ्रती नृप मूर्धनि ॥ ५ ॥

अत एव प्रपंचस्योद्भूतगुणस्य कारणत्वात्परमेश्वरी परमेशित्री । किं जडा नेत्याह । लक्ष्येति । लक्ष्यं लक्षणीयं मायारूपमलक्ष्यं ब्रह्मरूपं तदुभयस्वरूपा त्रिगुणमायाशबलब्रह्मरूपेत्यर्थः । सा क्व वर्तते तत्राह । व्याप्येति । कृत्स्नं जगद्व्याप्य स्थितास्ति नहि घटादिकार्यं मृत्कारणाननुविद्धं क्वचिद्दृश्यते तथेदमपि जगत्कार्यं सच्चिदानंदमायाशबलब्रह्माननुविद्धं न क्वचिद्भासते । तदुक्तम् । "अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम् । आद्यं त्रयं ब्रह्मरूपं मायारूपं ततो द्वयम् ॥" इति ॥ ४ ॥ एवं सूक्ष्मं रूपसर्वकारणमुक्त्वावताराणामपि मूलभूतं प्रधानमवतारं स्थूलरूपात्मकं दर्शयति—मातुलिंगमिति ॥ मातुलिंगं बीजपूराख्यं फलं गदा प्रसिद्धा खेटं चर्म पानपात्रं च प्रसिद्धम् । आयुधक्रमस्तु सह्याद्रिखंडे रेणुकामाहात्म्ये । "दक्षिणेऽधःकरे पात्रमूर्ध्वे कौमोदकीं तथा । वामेऽथ खेटकं धत्ते श्रीफलं तदधःकरे ॥ बिभ्रती

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मस्तके लिंगं पूजनीया विभूतये ।" इति । आयुधार्थस्तु भुवनेश्वरीसंहितायामुक्तः। "मातुलिंगं कर्मवृंदं क्रियाशक्त्यात्मिका गदा । ज्ञानशक्त्यात्मकं खेटं तुर्यवृत्तिस्तु पानकम् ॥ लिंगं पुरुष इत्युक्तो योनिस्तु प्रकृतिः स्मृता । नागः कालः समाख्यातः संबंधस्तु तयोर्द्वयोः ॥ त्रयाणामप्यधिष्ठानं यतः स्यात्परमेश्वरी । नवार्णमंत्रमध्यस्थमायाबीजस्वरूपिणी ॥ " इति । तथा च मातुलिंगग्रहणेन सर्वकर्मणां फलदात्र्यहमस्मीति बोध्यते । गदाधारणेन क्रियास्वरूपा विक्षेपशक्तिर्मय्यस्तीति बोधितम् । खेटधारणेन ज्ञानशक्तिसद्भावदर्शनेनावरणाभावो बोधितः । पानपात्रेण निरंतरमहं स्वानंदानुभवरसं पिबामीति बोधितम् । द्वयोः प्रकृतिपुरुषयोः संबंधात्मको हि कालः तथा च तेषां धारणेन तेषां प्रकृतिपुरुषकालानामधिष्ठानब्रह्मरूपिण्यहमस्मीति देव्या बोधितम् । नवार्णमंत्रस्य मध्यस्थं यन्मायाबीजं तदस्या मंत्रोऽस्तीति पूर्ववचनेनायमर्थो बोधितः । इयमेव भुवनेश्वरीति तंत्रेषु घंटाघोषः । भुवनेश्वरीमहालक्ष्म्योः सूक्ष्मरूपैकत्वेऽपि मायाबीजरूपमंत्रैकत्वेऽपि स्थूलरूपेण पाशांकुशाभयवरायुधात्मकेन मातुलिंगगदाखेटपानपात्रायुधात्मकत्वेन भेदात् । ध्यानभेदेनैव भेदव्यवहारो न तत्त्वतो मंतव्यः । सर्वं चेदं तंत्रविदां स्पष्टम् ॥ ५ ॥

तप्तकांचनवर्णाभा तप्तकांचनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥

अथ महालक्ष्म्या वर्णालंकारानाह—तप्तकांचनेति ॥ रक्तवर्णेत्यर्थः । शून्यमिति । शून्यं स्वतः सत्ताशून्यं जगत्स्वतेजसा स्वसत्तया पूरयामास पूरितवती । यद्वा स्वतेजसा स्वप्रतिबिंबचिदाभासेन शून्यं जगत्तेन पूरितवतीत्यर्थः । अत्रेदं बोध्यम् । नियतकालपरिपाकानां हि प्राणिकर्मणां मध्ये परिपक्वानामुपभोगेन क्षयादितरेषां चापरिपक्वानां भोगसंभवेन तदर्थायाः सृष्टेरनुपयोगाद्धिरण्यगसर्वमेकीकृत्य सुषुप्तावस्थां प्रलयात्मिकां गतो भवति । मायोदरे तदा गर्भिणीगर्भवत्सर्वप्रपंचरूपमंडं तिष्ठति तदा ग्रस्तसमस्तप्रपंचा माया स्वनिष्ठे निर्गुणे ब्रह्मणि विलीना सती यावदवशिष्टकर्मपरिपाकं तथैव तिष्ठति । तदुक्तं विष्णुपुराणे । " जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते । तेजःस्वापः प्रलीयंते तेजो वायौ प्रलीयते ॥ वायुः प्रलीयते व्योम्नि तदव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते ॥" इति । अव्यक्तं माया । " अव्यक्तं प्रकृतिर्माया " इति वायुपुराणात् । अवशिष्टैः प्राणिकर्मभिश्च तस्यां मायायां विलीयैव क्रमेण प्राप्तपरिपाकैः परमेश्वर्या भगवत्याश्चिदात्मिकायाः सिसृक्षात्मिका मायावृत्तिरुत्पद्यते सैषा मायावस्था ईक्षणकामतपोविचिकीर्षादिशब्दैरभिधीयते । " तदैक्षत बहुस्यां प्रजायेय " इति च्छांदोग्ये । " स

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ऐक्षत लोकानुत्सृजा " इत्यैतरेयके । " सोऽकामयत बहुस्यां प्रजायेय " इति तैत्तिरीये । " तपसा चीयते ब्रह्म " इति मुंडके । " विचिकीर्षुर्घनीभूती क्वचिद-
भ्येति विंदुताम् । " इति प्रपंचसारे । प्रलये सृज्यमानप्राणिकर्मणामपरिपाकदशायां तादृशकर्माभिन्नमायावच्छिन्नं ब्रह्म घनीभूतमित्युच्यते । कालवशात्कर्मणां परि-
पाके सति विश्वदेवस्थः परिपाकप्रागभावो विचिकीर्षेत्युच्यते । ततः परिपाकक्षणे मायावृत्तिरुत्पद्यते तादृशं परिपक्वकर्माकारपरिणतमायाविशिष्टब्रह्मबिंदुस्तदिदमवि-
भागावस्थमव्यक्तमव्याकृतमित्युच्यते । अत एव तस्योत्पत्तिः श्रूयते । " तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम । " इति । मायाया अनुत्पन्नत्वेऽपि तादृशाकार-
णोत्पन्नत्वादुत्पन्नेति व्यवहारः । तस्य च व्यक्तस्य ब्रह्मणः अव्याकृताव्यक्तमायाशक्तिकारणबीजत्रिगुणा परा महाप्रकृतिभुवनेश्वरीत्यादयः संज्ञा तन्मंत्रस्य माया-
बीजस्याप्येता एव संज्ञास्तंत्रेषु प्रसिद्धाः । इतरमंत्रापेक्षया मायाबीजे प्रत्यासत्त्यतिशयान्मायाबीजमेव मुख्यत्वेनैतत्तस्य वाचकम् । अत एव मायाबीजस्य देवीप्रण-
वशक्तिप्रणवशक्तिप्रणवशक्तिबीजपराबीजत्रिगुणामायापराशक्तीत्यादिसामान्यशब्दैर्व्यवहारस्तंत्रेषु । प्रणवोऽप्यस्यैव तत्त्वस्य वाचकः । तदुक्तमाचार्यैः शंकरभगवत्पा-

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥ बभार रूपं परमं तमसा केवलेन हि ॥ ७ ॥

दैः प्रपंचसारे प्रथमपटले मायास्वरूपनिरूपणानंतरम् । "तदा तां तारमित्याहुरोमात्मेति बहुश्रुताः । तामेव शक्तिं ब्रुवते हरेरात्मेति चापरे ॥" इति । तदेतदव्याकृतं
द्विविधमंतर्मुखं बहिर्मुखं चेति । तत्र अंतर्मुखस्य तुरीयमिति संज्ञा । बहिर्मुखस्य कारणदेह इति संज्ञा । इमौ च द्वौ भेदौ तापनीये प्रसिद्धौ । तत्र बहिर्मुखात्तस्मादात्मन
आकाशः संभूत इत्यादिक्रमेण सूक्ष्मदेहस्थूलदेहयोरुत्पत्तिः सर्ववेदांतप्रसिद्धा । तथा च तुरीयाकारेण सूक्ष्मस्थूलमध्ये एव सर्वप्रपञ्चस्यांतर्भावः। तत्र थूलदेहस्य सम-
ष्टिव्यष्ट्यात्मकस्य लिंगदेहस्य ज्ञानेंद्रियांतःकरणरूपस्य चाधिपतिः सरस्वतीसहितो ब्रह्मा । क्रियाशक्त्यात्मकप्राणात्मलिंगदेहस्याधिपतिर्लक्ष्मीसहितो विष्णुः । का-
रणदेहस्याभिमानी गौरीसहितो रुद्रस्तुरीयदेहस्य भुवनेश्वरीमहालक्ष्मी अभिमानिन्यौ देवते इति वस्तुस्थितिः सकलवेदतंत्रपुराणसिद्धा । इदं सर्वं मत्कृतदेवीभागव- ॥१०७॥
तटीकायां स्पष्टम् ॥ ६ ॥ तत्र तुरीयरूपाधिष्ठात्र्या महालक्ष्म्याः सर्वावतारमूलभूतायाः स्वरूपमभिहितं संप्रत्यवतारांतरस्य स्वरूपमाह——शून्यमिति ॥ अधिष्ठातृभिः
शून्यं सकलं लोकं विलोक्य केवलेन तमसा गुणेनोपाधिना परं रूपं रूपांतरं बभार धारितवतीत्यर्थः । अयं भावः । मायाशबलब्रह्मणः सद्रूपत्वं चिद्रूपत्वमानंदरू-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं चास्ति गुणत्रयसाम्यावस्थात्मकत्वं च तत्र प्राणिकर्मवशाद्वा गुणद्वयापेक्षया तमोगुणः किंचित्स्वस्थानाच्चलित इव जातस्तदा तेन केवलेन चलिततमोगुणेन विशिष्टं यत्तदेवाव्यक्तं तत्तमोगुणाभिमानत्वेन महाकाल्याख्यं रूपं धारितवदित्यर्थः । महालक्ष्मी तु साम्यावस्थाभिमानिनीति पूर्वमेव स्थितम् ॥ ७ ॥ तस्या ध्यानमाह--सेति ॥ सा काली भिन्ना मूलदेवीतः पृथग्भूता । अभिन्नेति वा छेदः तयोरभेदात् । यद्वा । भिन्नं स्फुटितं यदंजनमतिनीलं तत्संकाशा उपरिगतमलापगममध्यभागस्य नीलत्वात् ॥ ८ ॥ पात्रं पानपात्रं पूर्वोक्तार्थकं शिरो मुंडं दक्षिणाकालिकाध्याने तस्यैव सत्त्वात् । केचित्तु । शिरःशब्देन दंडारोपितग्रीवाभागं खट्वांगनामकमाहुः । कबंधाः शिरोहीनदेहास्तेषां हारं मालामुरसेति शेषः । हीति निश्चयेन शिरसा शिरःस्रजं शिरोमालां दधती । उरसि कबंधमालां शिरसि शिरोमालां दधतीत्यर्थः। केचित्तु कबंधहारशब्देन मुंडमालामहिशिरस्रजमित्यनेन सर्पमस्तकमालामित्यर्थः। "मूर्ध्नि सर्पसहस्राणां स्रजं वै सुन्दरी तदा ।" इति यामलोक्तेरित्याहुः।

सा भिन्नांजनसंकाशा दंष्ट्रांकितवरानना ॥ विशाललोचना नारी बभूव तनुमध्यमा ॥ ८ ॥ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबंधहारं शिरसा बिभ्राणा हि शिरःस्रजम् ॥ ९ ॥ सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ॥ नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥ १० ॥ तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥ ददामि तव नामानि यानि कर्माणि तानि ते ॥ ११ ॥

कबंधहारमुरसेत्यपि पाठः क्वचित् । तदा शिरसेत्यध्याहारः॥९॥ सेति ॥ सैवमुत्पन्ना महाकाली तामसी तमोगुणेन निर्वृतापि प्रमदोत्तमा सर्वस्त्रीसमुदाये उत्तमा लज्जावती तमःकार्येणांतरस्पृष्टैवास्तीति ध्वनितम् । महालक्ष्मीं प्रोवाचेत्यनेनापि स्वामिमर्यादापरिपालनप्रकटीकरणेनास्पृष्टतमोगुणदोषेति ध्वनितम् । इच्छया स्वीकृततमोगुणवत्त्वेन तदधीनत्वात् ॥१०॥ यानीति । यानि यादृशानि त्वया कर्तव्यानि कर्माणि ममाभिलषितानि तादृशार्थकानि नामानि ते तुभ्यं ददामि । नामार्थानुरूपमेव कर्म कुर्वित्यर्थः । अनेनैव कर्मोपदेशकरणेन कर्म देहीति प्रश्नस्योत्तरमपि दत्तमेव भवतीति बोध्यम् । यथाश्रुते तु कर्म देहीति प्रार्थनोत्तरं कर्मस्वरूपाकथनेन तस्या अद्यापि कर्माभावाद्यानि कर्माणि इति अनुपपन्नमेव स्यादिति बोध्यम् ॥ ११ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महामायेति ॥ ब्रह्मादीनामपि मोहकत्वात्तेषामेव कलनान्मारणाच्च महामायादिनामत्रयम् । क्षुधा तृषेत्यत्रार्शआद्यजंताट्टाप् । सर्वाविद्यादिभक्षणेच्छावतीत्यर्थः । तथा सर्वाविद्यादिपानेच्छावतीत्यर्थः । निद्रा योगनिद्रा समाधिस्तद्रूपा तदधिष्ठात्रीत्यर्थः । योगनिद्रा हरेरुक्तेति वक्ष्यमाणत्वाच्च तदधिष्ठातृत्वादेव तद्रूपत्वमिति तु देवीभागवते प्रसिद्धम् । तृष्णाभक्तकृतभक्तीच्छावतीत्यर्थः । अर्शआद्यजंतम् । एकवीरा वाहुलकादेतद्रूपं सिध्यति । एकैव वीरा पराक्रमविशिष्टा प्रपंचमध्ये इत्येकवीरा । कालनाशकत्वात् कालरात्रीः । यस्या ध्वंसाभावः सा दुरत्यया । इदं सर्वतमोगुणकार्यकारित्वस्योपलक्षणं तमोगुणवत्त्वादेव कृष्णवर्णत्वमे-वमुत्तरत्रापि ॥ १२ ॥ ईदृशार्थज्ञानपुरःसरं नामसंकीर्तनं फलाय विधत्ते ॥ १३ ॥ १४ ॥ १५ ॥ महाविद्येति ॥ महाविद्यादिवागंतानामधिष्ठातृत्वादेव तत्तन्ना-

महामाया महाकाली महामारी क्षुधा तृषा ॥ निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥ १२ ॥ इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ॥ एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥ १३ ॥ तामित्युक्त्वा महालक्ष्मी स्वरूपमपरं नृप ॥ सत्त्वाख्ये-नातिशुद्धेन गुणेनेंदुप्रभं ददौ ॥१४॥ अक्षमालांकुशधरा वीणापुस्तकधारिणी ॥ सा बभूव वरा नारी नामान्यस्यैव सा ददौ ॥१५॥ महाविद्या महावाणी भारती वाक् सरस्वती ॥ आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥ १६ ॥

मत्वम् । अन्यानि नामानि प्रसिद्धार्थकत्वान्येव । अत्रापि नामानुरूपमेव कर्मापि सरस्वत्या ज्ञेयमनुक्तमपि पूर्ववत् । ननु यथा गुणत्रयोपाधिकस्य ब्रह्मणोऽभिमानि-रूपद्वयमुक्तं तथा रजोगुणोपाधिकस्याभिमानी रूपांतरं वक्तव्यामिति चेन्न । गुणत्रयसाम्यावस्थाभिमानिमहालक्ष्मीरूपस्यैव रजोगुणाभिमानित्वस्यापि संभवेन तद्वक्तव्यत्वानुपयोगात् । न ह्येकं रूपमेकस्यैवाभिमानीति नियमेन प्रमाणमस्ति नियतमेव । भगवतीच्छायाः सर्वतो बलवत्त्वान्न रूपांतरेच्छा भगवत्या इति न रूपांतरं स्वीकृतं किंतु गुणत्रयसाम्यावस्थाभिमानिस्वस्वरूपस्यैव रजोगुणाभिमानित्वमपि स्वीकृतमिति । अत एव महालक्ष्म्या मूलभूताया रजोगुणाभिमानित्वेन रक्तवर्णत्वम् । अत एव देवीभागवते प्रथमस्कंधे । "तस्यास्तु सात्विकी शक्ती राजसी तामसी तथा । महाकाली महालक्ष्मीर्महासरस्वतीति ताः स्त्रियः॥" इति मूर्तित्रयमध्ये महाल-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्ष्म्या गणनं कृत्वा यस्य एतास्त्रिविधाः शक्तयस्तस्या महालक्ष्म्या एव महता प्रबंधेन वर्णनं कृतम् । तृतीयस्कंधे तच्चोभयोरैक्य एव संगच्छते । एताश्चतस्रः शक्तयः पतिरहिताः स्वतंत्रा विषयवासनारहिताः केवलं स्वानंदानुभवेनैवानंदिताः संतीति भुवनेश्वरीसंहितायाम् ॥ १६ ॥ अनंतरकृत्यमाह—अथेति ॥ हे देव्यौ, स्वानुरूपतः स्वस्वगुणानुरूपेण मिथुने युवां जनयतमुत्पादयतमित्यर्थः । जनयतामित्यपि पाठः ॥ १७ ॥ महालक्ष्मीस्ते देव्यावुक्त्वा प्रथमतः स्वयमेव मिथुनं ससर्ज उत्पादितवती पूर्ववत्स्वस्यापि गुणत्रयमूर्तिमध्यस्थत्वाद्धिरण्यगर्भौ हिरण्यवन्निर्मलं ज्ञानं हिरण्यं तद्गर्भे ययोः एकः पुरुषः अन्या स्त्री उभावपि

अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥ युवां जनयतं देव्यौ मिथुने स्वानुरूपतः ॥ १७ ॥ इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ॥ हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८ ॥ ब्रह्मन्विधे विरिंचेति धातरित्याह तं नरम् ॥ श्रीः पद्मे कमले लक्ष्मीत्याह माता स्त्रियं च ताम् ॥ १९ ॥ महाकाली भारती च मिथुने सृजतः सह ॥ एतयोरपि रूपाणि नामानि च वदामि ते ॥२०॥ नीलकंठं रक्तबाहुं श्वेतांगं चंद्रशेखरम् ॥ जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥२१॥ स रुद्रः शंकरः स्थाणुः कपर्दी च त्रिलोचनः ॥ त्रयी विद्या कामधेनुः सा स्त्री भाषा स्वराक्षरा ॥२२॥ सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥ जनयामास नामानि तयोरपि वदामि ते ॥२३॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी सती चंडी सुंदरी सुभगा शिवा ॥२४॥

कमलासनौ ॥ १८ ॥ अनंतरं देवी तयोः नामकरणमकरोदित्याह—ब्रह्मन्निति ॥ १९ ॥ मातुराज्ञया तदनंतरं महाकालीमहासरस्वतीदेव्यावपि मिथुनद्वयमुत्पादितवत्यावित्याह—महाकालीति ॥ २० ॥ सितां श्वेताम् । अत एव महाकाल्यामंतर्हितसत्त्वगुणोऽप्यस्तीति बोध्यम्॥ २१ ॥ तत्सृष्टपुरुषनामान्याह—स इति ॥ त्रयी विद्या स्त्रीभाषा इत्येकैकमभिन्नमेव वा नामद्वयम् । द्वितीयपक्षे स्त्रीभाषा बालभाषेत्यर्थः । अक्षरा नित्या स्फोटरूपा व्यंजनरूपा वा स्वरा षोडशस्वररूपा उदात्तादिस्वररूपा वा ॥ २२ ॥ सरस्वतीजन्यामिथुनमाह—सरस्वतीति ॥ अत्राप्यंतर्हितस्तमोगुणोऽस्त्येव ॥ २३ ॥ २४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवामीति ॥ पूर्वं पुरुषाभावेऽपि स्वयमेव पुरुषरूपा अपि तिस्रः शक्तयो जाता इत्यर्थः। तदिदं चर्मचक्षुषामदृश्यमित्याह । चक्षुष्मंत इति । ज्ञानस्यैव मुख्यचक्षुष्ट्वं न चर्मण इति चक्षुष्मतो ज्ञानिनोऽनुपश्यंतीति न तद्विन्ना इतरे अतद्विद इति च्छेदः। अयं भावः । कथं स्त्रियः पुरुषत्वं प्रपेदिरे नैतद्बुद्धिगम्यं भवतीति ये वदंति तान् प्रति कटाक्षेण मुनिराह । सत्यं भवद्बुद्धिगम्यं न भवतीति । ज्ञानिनां तु मायाशक्तिसामर्थ्यविदां नैतदाश्चर्यभूतमिति ॥ २५ ॥ अनंतरं कृत्यमाह--ब्रह्मण इति ॥ त्रयीं सरस्वतीम् ॥२६॥ इत्थं परस्परविवाहे जातेऽनंतरं सृष्टिमाह–स्वरयेति ॥ इदं च मिथुनत्रयं कारणदेहसूक्ष्मदेहस्थूलदेहानामभिमानीति तापनीयादौ स्पष्टम् । तत्र पूर्वकल्पे यो विरिंचिः स स्वरया शक्त्या युक्तः सन् प्रलयकाले सर्वप्राणिकर्मवृंदं स्वाधिष्ठितमेकत्रांडरूपं कृत्वा सुषुप्तौ संस्थाप्य स्वयं लीयत इति पूर्वमवादिष्म तदभि-

एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥ चक्षुष्मंतोऽनुपश्यंति नेतरे तद्विदो जनाः ॥२५॥ ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ॥ रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २६ ॥ स्वरया सह संभूय विरिंचोऽंडमजीजनत् ॥ बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान् ॥ २७ ॥ अंडमध्ये प्रधानादिकार्यजातमभून्नृप ॥ महाभूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥२८॥ पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥ संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥ २९ ॥ महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी ॥ निराकारा च साकारा सैव नानाभिधानभृत् ॥ ३० ॥

प्रायेणाह । स्वरयेत्यनेन अजीजनत्पूर्वकल्पे इत्यर्थः । तत्र सुषुप्तेरभिमानी गौरीसहितो रुद्रः सोऽस्मिन्कल्पे प्रलयचरमकाले "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियते" इति श्रुत्युक्तरीत्या नामरूपविवेचनरूपभेदनेन सुषुप्तौ लीनं तदंडं विभेदेत्यमुमर्थमाह । बिभेदेति॥२७॥ अंडमध्ये किमासीत्तदाह–अंडेति ॥ सुषुप्तौ कस्यापि भानाभावेन लीनांडमध्ये प्रधानादिस्थितिरुक्ता युक्त्यैवेति ॥ २८ ॥ तदेव नामरूपाभ्यां व्याकृतं जगल्लक्ष्म्या सहितः केशवः सूक्ष्मे देहाभिमानी पुपोष तदेव पालयामासेत्यर्थः। यथा वा पुपोष तथैव पालयामासेत्यर्थः। तदेव पुनः संहारकाले गौर्या सह महेश्वरः स्वसृष्टमेव जगत्संजहार नाशितवान्॥२९॥ तथा च पूर्वोक्तरीत्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रुत्युक्तसृष्ट्यादिविषये एवास्य ग्रंथस्य तात्पर्यम् । न सगुणपरिच्छिन्नरूपेभ्यो ब्रह्मादिदेहेभ्यः सृष्टिरित्यत्र उक्तसृष्ट्यादिश्रुतिविरोधात् । अत्र ब्रह्मादिशब्देन च तदधिष्ठितं श्रुत्युक्तं सूक्ष्मं तत्त्वमुच्यते इति न कोऽपि दोषः। इत्थं यस्याः प्रभावः सर्वप्रपंचसर्जनरूपस्तदधिष्ठातृब्रह्मादिसर्जनरूपश्च सा महालक्ष्मीः कियत्पर्यंतं वर्णनीयेत्यभिप्राये-णाह । महालक्ष्मीरिति । निराकारा निर्गुणापि सैव महालक्ष्मीः साकारा सगुणापि सैव नानाभिधानभृत् इति । तथा च श्रुतिः देव्यथर्वशिरसि । "एकैव सर्वत्र वर्तते तस्मादुच्यते एका एकैव विश्वरूपिणी तस्मादुच्यते अनेका" इति ॥ ३० ॥ इत्थमध्यारोपमुक्त्वापवादमाह—नामांतरैरिति ॥ सगुणवाचकैः सत्यज्ञानचिन्महामायादि-शब्दरूपैर्नामांतरैरेषा निरूप्या लक्षणीया न तु स्वनाम्ना अन्येन वा केनचित्प्रत्यक्षादिना प्रमाणेन बोध्येति शेषः । तथा च श्रुतिः। "ज्ञानानां चिन्मयातीता शून्यानां

नामांतरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ इति प्राधानिकं रहस्यम् ॥ ४ ॥ ऋषिरुवाच ॥ त्रिगुणा तामसी देवी सात्विकी या त्रिधोदिता ॥ सा शर्वा चंडिका दुर्गा भद्रा भगवतीर्यते ॥१॥ योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥ मधुकैटभनाशार्थं यां तुष्टा-वांबुजासनः ॥ २ ॥ दशवक्त्रा दशभुजा दशपादांजनप्रभा ॥ विशालया राजमाना त्रिंशल्लोचनमालया ॥ ३ ॥ स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप ॥ रूपसौभाग्यकांतीनां सा प्रतिष्ठा महाश्रियः ॥ ४ ॥

शून्यसाक्षिणी । यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥ यतो वाचो निवर्तंते अप्राप्य मनसा सह" इति । सार्धत्रिंशत्समाख्याताः श्लोकास्त्वत्र सुसंस्कृताः । इति श्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंठभट्टकृतं प्राधानिकरहस्यविवरणं समाप्तम्॥४॥ इदानीमेतासामेव मूर्तीनां ध्यानांतराण्याह—ऋषिरुवाच ॥ त्रिगुणेति॥ पूर्वोक्तरीत्या रजोगुणविशिष्टाया मूललक्ष्म्यास्त्रिगुणात्मिकाया भेदाभावेनोभयोरपि ग्रहणं त्रिगुणापदेनोच्यते । शर्वाणीति वक्तव्ये शर्वेत्युक्त्या पुंसंबंधाभावबोधनेन स्वातन्त्र्यमासां बोधितम् । त्रिविधापि सा वस्तुत एकैवेति सैवैतैर्नामभिरीर्यते ॥ १ ॥ या हरेर्योगनिद्राधिष्ठातृत्वेनोक्ता सेत्यर्थः । तस्या ध्यानांतरं शृण्वित्यर्थः ॥ २ ॥ दशभुजा पंचदक्षिणहस्ता पंचवामहस्ता एवं पादा अपि । प्रतिवक्त्रं नेत्रत्रयम् ॥ ३ ॥ शत्रूणां भीमरूपापि भक्तानां रूपसौभाग्यदात्र्यस्त्येवेत्यर्थः ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दाक्षिणाधःकरमारभ्य वामाधःकरपर्यंतमायुधान्याह–खङ्गेति ॥ निश्च्योतद्रुधिरं शीर्षं मुंडमित्यर्थः । केचित्तु खट्वांगमाहुः ॥५॥६॥ सर्वेति ॥ स महालक्ष्म्या अवतार इत्यर्थः॥ ७ ॥ आननस्य शिवांशजन्यत्वाच्छ्वेतत्वमित्यादिकं मध्यमचरित्रानुरोधेनोह्यम् ॥ ८ ॥ ९॥ अत्र सहस्रशब्दोऽनंतवाची ॥ १०॥ ११॥ १२ ॥ १३ ॥ सरस्व-

खड्गबाणगदाशूलचक्रशंखभुशुंडिभृत् ॥ परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥५॥ एषा सा वैष्णवी माया महाकाली दुरत्यया ॥ आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ॥६॥ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा ॥ त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ॥७॥ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला ॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा॥८॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥९॥ अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात् ॥१०॥ अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥ चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥११॥ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः॥ अलंकृतभुजामेभिरायुधैः कमलासनाम् ॥१२॥ सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥ पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत्॥१३॥ गौरीदेहात्समुद्भूता या सत्वैकगुणाश्रया ॥ साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी॥१४॥ दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ॥ शंखं घंटां लांगलं च कार्मुकं वसुधाधिप ॥१५॥ एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥ निशुंभमथिनी देवी शुंभासुरनिबर्हिणी ॥१६॥ इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥ उपासनं जगन्मातुः पृथगासां निशामय ॥१७॥

तीध्यानमाह–गौरीति ॥ १४ ॥ १५ ॥ १६ ॥ प्रथमप्रश्नसमाधानमुपसंहरन्नेव द्वितीयप्रश्नस्योत्तरं प्रतिजानीते–इत्युक्तानीति ॥ जगन्मातुस्तप्तकांचनवर्णाभेत्यनेनोक्ताया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महालक्ष्म्या उपासनम्। आसां च महाकाल्यादीनां तिसृणां च पृथग्र भिन्नं भिन्नमुपासनं निशामयेत्यर्थः ॥ १७ ॥ यदा महालक्ष्मीश्चतुर्भुजा तप्तकांचनेति ध्यानोक्ता पूज्या तदा तां मध्ये स्थाने संपूज्य तस्या एव प्रत्यासत्त्या दक्षिणोत्तरभागयोर्दक्षिणभागे चतुर्भुजां महाकालीमुत्तरे वामभागे महासरस्वतीं चतुर्भुजां पूजयेत्। देवतात्रयमपि चतुर्भुजं पूर्वोक्तायुधचतुष्टयविशिष्टमेव पूज्यम्। पृष्ठतः एतासां पृष्ठभागे मिथुनत्रयं पूजयेदित्यर्थः ॥१८॥ तत्रापि स्थानान्याह—विरिंचिरिति ॥ महालक्ष्म्याः पृष्ठभागे दक्षिणे। विरिंचेर्दक्षिणे महाकाल्याः पृष्ठभागे वामे। विरिंचेर्वामे सरस्वत्याः पृष्ठभागे इत्यर्थः। मध्यस्थदेवीत्रयस्य पुरतो वक्ष्यमाणं देवतात्रयं पूजयेत् ॥ १९ ॥ तदेव देवतात्रयमाह—अष्टेति ॥ महालक्ष्म्याः संमुखं मध्ये अष्टादशभुजा महालक्ष्मीः पूज्या। अस्या अष्टादशभुजाया वामभागे चतुर्भुजमहाकालीसंमुखं दशानना काली पूज्या। अस्या एवाष्टादशभुजाया दक्षिणे भागे अष्टभुजां सरस्वतीं चतुर्भुजसरस्वत्या अग्रे पूजयेत्। लक्ष्मीर्महतीत्यत्र द्वितीयाभावः। इतिशब्देन

महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥ १८॥ विरिंचिः स्वरया मध्ये रुद्रो गौर्यांश्च दक्षिणे ॥ वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ॥ १९ ॥ अष्टादशभुजा मध्ये वामे चास्या दशानना ॥ दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥ २० ॥ अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ २१ ॥

कर्मत्वस्याभिधानात्। इत्थं चतुर्भुजमहालक्ष्म्याः पूजेत्यर्थः। अत्र चतुर्भुजमहाकाल्याश्चतुर्भुजमहासरस्वत्याश्च स्वातंत्र्येण पूजा नास्ति। चतुर्भुजमहालक्ष्म्यपेक्षया तयोः स्वातंत्र्याभावात्तयोरस्यां पूजायां स्थितत्वादेवंप्रकारपूजयैव तयोरपि पूजा सिद्ध्यतीति तयोरुपासकेनापि तथैव पूजा कर्तव्या। तदुक्तं लक्ष्मीतंत्रे। "इत्थमेवार्चना प्रोक्ता तयोः शक्त्योर्नराधिप।" इति। तदयं निर्गलितोऽर्थः। भूर्जपत्रे स्वर्णादिपट्टे वा स्थंडिले वा नवकोष्ठं यंत्रं कृत्वा तत्र प्रथमपंक्तावीशानकोणादग्निकोणपर्यंतं रुद्रगौर्यौ विरिंचिसरस्वत्यौ विष्णुलक्ष्म्यौ पूजयेत्। मध्यमपंक्तौ क्रमेणोत्तरकोष्ठाददक्षिणांतं महाकालीमहालक्ष्मीमहासरस्वतीत्रयं तृतीयपंक्तौ वायुकोणान्निर्ऋतिकोणपर्यंतं दशाननाष्टादशभुजाष्टभुजाः पूजयेदिति ॥ २० ॥ अधुना केवलाष्टादशभुजादशाननाष्टभुजानामवताराणां पृथक्पूजामाह—अष्टेति ॥ अष्टादशभुजा चैषा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वा दशानना च वाष्टभुजा यदा पूज्या तदा एतासां देवतानां दक्षिणे भागे कालमुत्तरे मृत्युं च पूजयेदित्युत्तरेणान्वयः ॥२१॥ तत्राष्टभुजायां विशेषमाह—यदेत्युत्तरेणान्वयः ॥ २२॥नव शक्तयः शैलपुत्र्याद्याः । तथा दक्षिणोत्तरयो रुद्रविनायकौ च संपूज्यौ । अयमपि द्वितीयपक्षः सरस्वतीपूजायामस्ति न त्वनेन पूर्वपक्षस्य वा बाधस्तस्य वैयर्थ्यापत्तेः । तथा च सरस्वतीपूजायां विकल्पः फलितः । प्रसंगात्पूजाचतुष्टयेऽपि स्तोत्रमंत्रानाह । नम इति । स्तोत्रैरिति बहुवचनेन चरित्रत्रयांतर्गतस्तोत्रैरपि प्रथमपूजायां स्तुतिः कर्तव्येत्यर्थः ॥ २३ ॥ अवतारेति ॥ पृथगवतारत्रये तु तत्तद्देवताचरित्रांतर्गततत्तत्स्तोत्रेणैव स्तुतिः कर्तव्येत्यर्थः । अवतारत्रयेऽपि महालक्ष्मीपूजयैवेत-

कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशांतये ॥ यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी ॥ २२ ॥ नवास्याः शक्तयः पूज्यास्तथा रुद्रविनायकौ ॥ नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ॥ २३ ॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः ॥ अष्टादशभुजा चैषा पूज्या महिषमर्दिनी ॥२४॥ महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥ २५ ॥ महिषांतकरी येन पूजिता स जगत्प्रभुः ॥ पूजयेज्जगतां धात्रीं चंडिकां भक्तवत्सलाम् ॥२६॥ अर्घ्यादिभिरलंकारैर्गंधपुष्पैस्तथाक्षतैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २७ ॥ रुधिराक्तेन बलिना मांसेन सुरया नृप ॥ प्रणामाचमनीयेन चंदनेन सुगंधिना ॥ २८ ॥ सकर्पूरैश्च तांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ २९ ॥

रयोः पूजयोर्गतार्थत्वमाह । अष्टेति ॥ २४ ॥ तत्र हेतुमाह—महालक्ष्मीरिति ॥ यतो महालक्ष्म्येवेतरस्वरूपा तस्मात्सैव पूज्येत्यर्थः । तयोरपेक्षया महालक्ष्म्याः पूर्वोक्तरीत्या मूलप्रकृत्या सह प्रत्यासत्त्याधिक्यात् । अन्यत्स्पष्टार्थमेव ॥ २५ ॥ २६ ॥ २७ ॥ रुधिराक्तेनेति ॥ इदं च ब्राह्मणातिरिक्तविषयम् । तथा च श्रुतिरुत्तरतंत्रे वार्तिककारैर्मीमांसकाचार्यैरुक्ता । " यन्माल्यमासीत्तत्पश्चात्पर्यौहत्सुरा वै माल्यं ततो राजन्यमसृजत तस्माज्ज्यायांश्च कनीयांश्च श्वशुरश्च स्नुषा च श्वश्रूश्च सुरां पीत्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विलपंत आसते पाप्मा वै माल्यं तस्माद्ब्राह्मणः सुरां न पिबेत् पाप्मना संसृज्यते " इति । तत्रैव । " गौडी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः ॥ " इति । " न सुरां पिबेत् " इति तैत्तिरीयश्रुतिरपि । तथा कूर्मपुराणादिसर्वपुराणेषु । कूर्मपुराणे द्वादशाध्याये । " नच वेदादृते किंचिच्छास्त्रं धर्माभिधायकम् । यो यथा रमते विप्रो न संभाष्यो द्विजातिभिः ॥ यानि शास्त्राणि दृश्यंते लोकेऽस्मिन्विविधानि तु । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥ कापालं भैरवं चैव यामलं वा ममार्हतम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु ॥ ये कुशास्त्राभियोगेन मोहयंतीह मानवान् । मया सृष्टानि शास्त्राणि मोहायैषां भवांतरे ॥ " एवं सर्वपुराणेषु । तथा कालिकापुराणे । "अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः । नारिकेलजलं कांस्ये पात्रे वा विसृजेन्मधु ॥ सिंहव्याघ्रादिकं दत्त्वा चात्मवध्यामवाप्नुयात् । मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥ " इति । " पशुहिंसा न कर्तव्या ब्राह्मणेन कदाचन । बलिदाने यदोक्ता स्यात्तत्र पैष्टं नियोजयेत् ॥ " इति । पैष्टं पिष्टनिर्मितं पशुं कृत्वा तस्य बलिं नियोजयेदित्यर्थः । तथा चिद्वल्लीतंत्रमेरुतंत्रमहाकालसंहितादक्षिणाचारतंत्रराजादिसर्वतंत्रेषु । " मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते । न कर्तव्यं न कर्तव्यं न कर्तव्यं कदाचन ॥ इदं तु साहसं देवि न कर्तव्यं कदाचन । " इत्यादि ! ननु तंत्रेषु ब्राह्मणस्यापि वामाचारप्रतिपादकानि वचनानि दृश्यंते तेषां का गतिरिति चेत् । भ्रष्टब्राह्मणविषयाणि तानीति ब्रूमः । तदप्युक्तं चिद्वल्लीतंत्रे । " तंत्राणि द्विविधानीह मया प्रोक्तानि पार्वति । श्रुतिस्मृत्यविरुद्धानि तद्विरुद्धानि चैव हि ॥ वेदेनाधिकृतानां तु ब्राह्मणानां गतेर्वशात् । तद्विरुद्धानि चोक्तानि नैव ग्राह्याणि वैदिकैः ॥ " इत्यादि । स्कांदे वायुसंहितायाम् । " शैवागमोऽपि द्विविधः श्रौताश्रौतश्च तद्विधः । श्रुतिसारमयः श्रौतः स्वतंत्र इतरो मतः ॥ " इत्यादिश्रौतो ग्राह्यस्तु वैदिकैरिति । ननु तंत्रस्मृतिविरोधात्सुरामांसनिषेधश्रुतिरसंस्कृतसुरामांसभक्षणपरास्त्विति चेन्न । दुर्बलस्मृतिविरोधेन प्रबलश्रुतेः संकोचस्य शास्त्रकारैरनंगीकारात् । मीमांसाप्रथमपादे स्पष्टमेतत् । ननु कालिकात्रिपुरोपनिषदादिश्रुतिप्रामाण्यात्तन्निषेधकश्रुतेः संकोचोऽस्त्विति चेन्न । कालिकाद्युपनिषद्घटितशाखानामुच्छिन्नत्वात्कालिकाद्युपनिषत्सु कल्पितत्वसंदेहादिदमपि मीमांसाप्रथमपादे स्पष्टम् । एवं सति सर्वतंत्राणां प्रामाण्यमधिकारिभेदेनैवाव्याहतम् । अत एव स्कांदे सूतसंहितायां पुराणांतरे च तंत्रप्रामाण्यप्रस्तावे । " मृषावादी कथं शिवः " इत्यादिवचनैरधिकारिभेदेनैव तंत्रप्रामाण्यं समर्थितं विस्तरेण चैतन्मत्कृततंत्रप्रामाण्यविमर्शिन्यां द्रष्टव्यम् । एतेन कैश्चित्

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सप्तशतीटीकायां तंत्राणामप्रामाण्यं समर्थितं तत्किंचिज्ज्ञत्वमूलकं नास्तिकत्वमूलकं चेति सुधीभिराकलनीयम् । तंत्रनिषेधकवचनानां तद्गुदाहृतानां वेदविरुद्धतंत्रविषयत्वादित्यादिकं सर्वं मत्कृततंत्रप्रामाण्यविमर्शिन्यां द्रष्टव्यम् । अत्रापि राजानं प्रत्येव मुनिना कथितत्वाद्बुधिराक्तेनेत्यादिकं ब्राह्मणातिरिक्तविषयकमेवेति बोध्यम् ॥ २८ ॥ २९ ॥ प्राप्तं सायुज्यमीशया । एतेन वैरिष्वपि भगवत्या जगन्मातुर्वात्सल्यं दर्शितम् । अत एव वैरिष्वपि प्रकटितैव दया त्वयेत्थमित्युक्तम् । यो धीमानेकाग्रमानसः प्रयतस्तस्याः परमेश्वर्याः पूजां कुर्यात्स सिंहं धर्मात्मकं पूजयेदित्यग्रिमेणान्वयः । अनेन च सिंहस्य वासनात्मकरूपमुक्तं वेदितव्यम् । धर्मवाहनत्वकथनेनानेकजन्मपुण्यवंतः सर्वधर्मात्मान एव पुरुषा एतां देवतां प्राप्नुवंति नान्ये इत्युक्तं भवति । तदुक्तं ब्रह्मांडपुराणे । " यस्य नो पश्चिमं जन्म यदि वा शंकरः स्वयम् ।

पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३० ॥ वाहनं पूजयेद्देव्या धृतं येन चराचरम् ॥
यः कुर्यात्प्रयतो धीमांस्तस्या एकाग्रमानसः ॥ ३१ ॥ ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः ॥ एकेन वा मध्यमेन नैकेनेतरयोरिह ॥ ३२ ॥ चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥ प्रदक्षिणां नमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३३ ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः ॥ प्रतिश्लोकं तु जुहुयात्पायसं तिलसर्पिषा ॥ ३४ ॥

तेनैव लभ्यते विद्या श्रीमत्पंचदशाक्षरी ॥ " इति ॥१०॥११॥ प्रथमतः कवचं ततोऽर्गलां ततः कीलकं ततो रात्रिसूक्तं ततो नवार्णमंत्रजपः मध्ये चरित्रत्रयं पुनर्नवार्णं ततो देवीसूक्तं ततो रहस्यत्रयमित्येवं क्रमेण स्तुवीतेत्यर्थः । विस्तरेण च एतदग्रे वक्ष्यामः । यदि समग्रं पाठं कर्तुं न शक्नोति तं प्रत्याह । एकेनेति । एकेन चेत्स्तुवीत तदा मध्यमेनैव स्तुवीतेत्यर्थः । महालक्ष्म्या मूलप्रकृत्यभेदेन सर्वदेवतात्मकत्वात्तच्चरित्रपाठेन सर्वदेवतास्तृप्यंतीति भावः । पूर्वोक्तपूजाचतुष्टयेऽप्येष विधिर्बोध्यः। इतरयोश्चरितयोर्मध्ये एकेन न स्तुवीतेत्यर्थः ॥ ३२ ॥ ३३ ॥ प्रतिश्लोकं प्रतिमंत्रमित्यर्थः । ते च मंत्राः सप्तशतीस्तोत्रसंबंधिनः कात्यायनीतंत्रप्रदर्शिताः सप्तशतसंख्याकाः मार्कंडेय उवाच स्वाहा इत्यादिकाः । अत्र केचित्कवचादित्रयस्य रहस्यत्रयस्य च प्रतिश्लोकं होममनुतिष्ठंति । तत्र कवचांशे होमो न युक्तस्तंत्रांतरे निषे-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धात् । " चंडीस्तवे प्रतिश्लोकमेकाहुतिरिहेष्यते । रक्षाकवचगैर्मंत्रैर्होमं तत्र न कारयेत् ॥ मौर्ख्यात्कवचगैर्मंत्रैः प्रतिश्लोकं जुहोति यः । स्याद्देहपतनं तस्य नरकं च प्रपद्यते ॥ अंधकाख्यो महादैत्यो दुर्गाभक्तिपरायणः। कवचाहुतिजातपापान्महेशेन निपातितः॥" इति ॥३४॥ एतावदशक्तस्य पक्षांतरमाह—जुहुयादिति॥ स्तोत्रमंत्रैः रात्रिसूक्तादिस्तोत्रस्थमंत्रैरित्यर्थः। केचित्तु स्तोत्रमंत्रशब्देन नवार्णमंत्रमित्याहुः । तन्मंदं प्रमाणाभावात् । बहुत्वानुपपन्नं स्याच्च । अयं च होमः प्रकरणान्नित्यपूजांग-

जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं हविः ॥ भूयो नामपदैर्देवीं पूजयेत्सुसमाहितः ॥ ३५ ॥ प्रयतः प्रांजलिः प्रह्वः प्रणम्यारोप्य चात्मनि ॥ सुचिरं भावयेदीशां चंडिकां तन्मयो भवेत् ॥ ३६ ॥ एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् ॥ भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ३७ ॥ यो न पूजयते नित्यं चंडिकां भक्तवत्सलाम् ॥ भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥ ३८ ॥ तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि ॥ ३९ ॥ इति वैकृतिकरहस्यम् ॥ ९ ॥

ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्यति नंदजा ॥ सा स्तुता पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥ १ ॥ कनकोत्तमकांतिः सा सुकांतिकनकांबरा ॥ देवी कनकवर्णाभा कनकोत्तमभूषणा ॥२॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः सा श्री रुक्मांबुजासना ॥ ३ ॥

भूतः॥३५॥३६॥ अस्याः पूजायाः काम्यत्वं नित्यत्वं क्रमेणाह—एवं य इति द्वाभ्याम् ॥३७॥३८॥ उपसंहरति—तस्मादिति ॥३९॥ श्लोकाश्चैकोनचत्वारिंशत्संख्यास्त्वत्र कीर्तिताः । इति श्रीशैवोपनामकरंगनाथभट्टसुतलक्ष्मीगर्भजनीलकंठकृतं वैकृतिकरहस्यविवरणं समाप्तम् ॥ ९ ॥ एकादशाध्यायांते सप्तशत्यां लोकरक्षार्थं भविष्यमाणा ये नंदजादयोऽवताराः कथितास्तेषां ध्यानमुपास्तिं चाह—नंदेति ॥ विंध्यवासिनीयम् ॥१॥ कनके हिरण्ये उत्तमा कांतिरिच्छा यस्याः सा॥२॥ पाशाब्जैरित्यत्र अब्जः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंखः । चक्रं शंखवराभयानि दधतीति शारदायां विंध्यवासिनीध्याने उक्तत्वात् । कमलस्यैकवारं ग्रहणाच्च ॥३॥ अथ रक्तदन्तिकामाह–येति ॥४॥५॥ रक्तदंतिकानामिका देवीत्यर्थः । पतिं नारीवेति दृष्टांतोऽनुरागमात्रांशे ज्ञेयः ॥ ६ ॥ दीर्घलंबावित्यत्र तिर्यग्लंबायमानतैव गृह्यते न त्वधःपतनमतिस्थूलौ । कर्कशाविति विशेषणात् ।

या रक्तदंतिका नाम देवी प्रोक्ता मयानघ ॥ तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहम् ॥४॥ रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा ॥ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ ५ ॥ रक्ततीक्ष्णनखा रक्तदशना रक्तदंतिका ॥ पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ ६ ॥ वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनोहरौ ॥ ७ ॥ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ॥ भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ ८ ॥ खड्गपात्रं च मुसलं लांगलं च बिभर्ति सा ॥ आख्याता रक्तचामुंडा देवी योगेश्वरीति च ॥ ९ ॥ अनया व्याप्तमखिलं जगत्स्थावरजंगमम् ॥ इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ १० ॥ अधीते य इमं नित्यं रक्तदंत्या वपुस्तवम् ॥ तं सा परिचरेद्देवी पतिं प्रियमिवांगना ॥ ११ ॥ शाकंभरी नीलवर्णा नीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १२ ॥ सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥ मुष्टिं शिलीमुखापूर्णं कमलं कमलालया ॥ १३ ॥ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयम् ॥ काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्युभयापहम् ॥ १४ ॥

दीर्घा लंबेति पुनरुक्त्या तु अतिदीर्घावित्यर्थः ॥ ७ ॥ किमित्यतिस्थूलौ जातावित्यत आह । सर्वेति । सर्वानंदरसभरितत्वादतिस्थूलावित्यर्थः । तदपि किमर्थमिति चेद्भक्तपानार्थमित्याह । भक्तानिति । तेनातिशयदयावतीयमिति फलितम् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ शिलीमुखापूर्णं बाणपूर्णमित्यर्थः ॥ १३ ॥ १४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धनुर्बाणपद्मशाकान्बिभ्रती चतुर्भिर्भुजैरित्यर्थः । देवीभागवतोक्तशताक्षीमूर्त्युपाख्यानरीत्या शताक्षीमूर्तिदुर्गामूर्त्योरवतारांतरत्वाभावेन शाकंभरीपूजयैव दुर्गापूजामुपदिशति । सैवेति ॥१५॥१६॥१७॥१८॥ चंद्रहासं खड्गम् ॥१९॥ सप्तमूर्तिमाह—तेज इति ॥ चित्रकांतिरनेकवर्णकांतिः ॥२०॥ चित्रभ्रमरपाणिः हस्ते अनेकवर्णविशिष्टो भ्रमरो यया धृतः । स च भ्रमरो जीवरूपस्तेन च सर्वे जीवा मदधीनाः संतीति बोधितम् । तदुक्तं भुवनेश्वरीसंहितायाम् । " द्विरेफा जीवरूपा स्युर्यया हस्ते धृताः

कार्मुकं च स्फुरत्कांति बिभ्रती परमेश्वरी ॥ शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता॥१५॥विशोका दुष्टदमनी शमनी दुरितापदाम् ॥ उमा गौरी सती चंडी कालिका सा च पार्वती ॥ १६ ॥ शाकंभरीं स्तुवन् ध्यायञ्जपन्संपूजयन्नमन् ॥ अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् ॥ १७ ॥ भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ विशाललोचना नारी वृत्तपीनपयोधरा ॥१८॥ चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥ एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता॥१९॥ तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् ॥ चित्रानुलेपना देवी चित्राभरणभूषिता॥२०॥चित्रभ्रमरपाणिः सा महामारीति गीयते॥ इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप॥२१॥ जगन्मातुश्चंडिकायाः कीर्तिताः कामधेनवः ॥ इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ २२ ॥ आख्यानं दिव्यमूर्तीनामभीष्टफलदायकम् ॥ तस्मात्सर्वप्रयत्नेन देवीं जप निरंतरम् ॥२३॥ सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि ॥ पाठमात्रेण मंत्राणां मुच्यते सर्वकिल्बिषैः ॥२४॥ देव्या ध्यानं तवाख्यातं गुह्याद्गुह्यतरं महत् ॥ तस्मात्सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥२५॥ इति मूर्तिरहस्यम् ॥६॥

सदा । जीवाधीशा ततः प्रोक्ता भ्रामरी लोकसुंदरी॥ " इति । एतासां देवतानामुपाख्यानं देवीभागवते स्पष्टम् ॥२१॥२२॥ रहस्यत्रयस्याध्ययनं विधत्ते । तस्मादिति ॥२३॥ फलं कथयति—सप्तेति॥२४॥ उपसंहरति—देव्या इति ॥ सर्वकामफलप्रदं धर्मार्थकाममोक्षप्रदमित्यर्थः॥२५॥ पंचविंशतिसंख्यास्तु श्लोका अत्र प्रकीर्तिताः।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रक्तांबरादरुणबिंबफलाधरौष्ठाच्चंद्रार्धवद्धमुकुटात्करुणासमुद्रात् ॥ पाशांकुशाभयवराढ्यकरात्रिनेत्रादंतःपुरात्पुरारिपोरपरं स विघ्नः ॥ १ ॥ श्रीमच्छैवकुलोत्पन्नो रंगनाथात्मजः सुधीः॥ श्रीलक्ष्मीगर्भसंभूतो नीलकंठाभिधानतः ॥२॥ सप्तशत्यंगषट्कस्य व्याख्यां यः कृतवाञ्छुभाम् ॥ तया तुष्यतु सा लक्ष्मीस्तथा श्रीभुवनेश्वरी ॥ ३ ॥ इति श्रीशैवोपनामकरंगनाथसुतलक्ष्मीगर्भसंभवनीलकंठभट्टकृतं सप्तशत्यंगषट्कविवरणं समाप्तम् ॥६॥ मूलम् ॥ १८१ ॥ टीका ॥ ८२० ॥ अहमित्यष्टर्चं त्रयोदशं सूक्तं वागांभृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत् । अतः सा ऋषिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन हि तादात्म्यमनुभवंती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन च अहमेव भवामीति स्वात्मानं स्तौति । द्वितीया जगती । शिष्टाः सप्त त्रैष्टुभः । तथा चानुक्रांतम् । अहमष्टौ वागांभृणी तुष्टावात्मानं द्वितीया जगतीति गतो विनियोगः ॥ अहमिति ॥ अहं सूत्रस्य द्रष्ट्री वागांभृणी वागांभृणं यद्ब्रह्म जगत्कारणं तद्रूपा भवंती रुद्रेभिः रुद्रैः एकादशभिः । इत्थं-

ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ॥ अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥ १ ॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ॥ अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥ २ ॥

भावे तृतीया । तदात्मना चरामि । एवं वसुभिरित्येतत्तदात्मना चरामीति योज्यम् । उतापि च आदित्यैः समं चरामि । उतापि च विश्वदेवैश्च । तथा मित्रावरुणौ मित्रं च वरुणं च । "सुपां सुलुक्" इति द्वितीयाया आकारः। उभा उभौ अहमेव ब्रह्मीभूता बिभर्मि धारयामि । इंद्राग्नी अप्यहमेव धारयामि । उभा उभौ अश्विना अश्विनावपि अहमेव धारयामि । मयि हि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सत् दृश्यते । माया च जगदाकारेण विवर्त्तते । तादृश्या मायाया आधारत्वेनासंगस्यापि ब्रह्मणः उक्तस्य सर्वस्योपपत्तिः ॥ १ ॥ अहमिति ॥ अहमाहनसं हंतव्यमभिषोतव्यं सोमम् । यद्वा शत्रूणामाहंतारं दिवि वर्तमानं देवतात्मानं सोममहमेव बिभर्मि तथा त्वष्टारम् । उत अपि च पूषणं भगमहमेव बिभर्मि । तथा हविष्मते हविर्युक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे । अवतेस्तर्पणार्थात् " अवितॄस्तॄतंत्रिभ्य ईः " इति ईकारप्रत्ययः । चतुर्थ्येकवचने याणि उदात्तस्वरितयोर्यणः " स्वरितोऽनुदात्तस्य " इत्यनुदात्तस्य सुपः स्वरितत्वम् । सुन्वते सोमाभिषवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुर्वते । "शतुरनुमः" इति चतुर्थ्या उदात्तत्वम् । ईदृशाय यजमानाय द्रविणं धनं यागफलरूपम् अहमेव ददामि प्रयच्छामि । एतच्च ब्रह्मणः फलदातृत्वं फलमत उपपत्तेरित्यधिकरणे भगवता भाष्यकारेण समर्थितम् ॥ २ ॥ अहमिति ॥ अहं राष्ट्री ईश्वरनामैतत् । सर्वस्य जगतः ईश्वरी । तथा वसूनां धनानां संगमनी संगमयित्री उपासकानां प्रापयित्री । चिकितुषी यत्साक्षात्कर्तव्यं परं ब्रह्म तज्ज्ञातवती स्वात्मतया साक्षात्कृतवती । अत एव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या । या एवंगुणविशिष्टा अहं तां मा भूरिस्थात्रां बहुभावेन प्रपंचात्मना तिष्ठमानाम् । भूरि भूरीणि बहूनि भूतजातानि आवेशयंतीं जीवभावेनात्मानं प्रवेशयंतीमीदृशीं पुरुत्रा बहुषु देशेषु व्यदधुः विदधंति कुर्वंति । उक्तप्रकारेण वैश्वरूप्येणावस्थानात् । यद्यत्कुर्वंति तत्सर्वं मामेव कुर्वंतीत्यर्थः ॥३॥ मया स इति ॥ य अन्नमत्ति सः उक्तशक्तिरूपया मयैवान्नमत्ति । यश्च विपश्यति सोऽपि मयैव पश्यति । यश्च प्राणिति श्वासोच्छ्वासादिव्यापारं करोति सोऽपि मयैव प्राणरूपया करोति । "अन प्राणने"

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ॥ तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीम् ॥ ३ ॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ॥ अमंतवो मां त उपक्षियंति श्रुधि श्रुतं श्रद्धिवं ते वदामि ॥ ४ ॥

अदादिकः । "रुदादिभ्यः सार्वधातुके" इतीडागमः । अनितेरिति णत्वम् । यश्च परेणोक्तवचनं शृणोति विविधं रूपं पश्यति सोऽपि ज्ञानशक्त्यात्मिकया मयैव पश्यति सोऽपि मयैव शृणोति । "श्रु श्रवणे । श्रुवः शृ च" इति श्नुप्रत्ययः धातोः शृभावश्च । ये ईदृशीमंतर्यामिरूपेण स्थितां मां जानंति ते माममंतवोऽमन्यमानाः अजानंतः उपक्षियंति उपक्षीणाः संसारेण न हीना भवंति । मनेरौणादिकस्तुप्रत्ययः । नञ्समासे व्यत्ययेनोदात्तत्वम् । यद्वा भावे तुप्रत्ययः । ततो बहुव्रीहौ "नञ्सुभ्याम्" इत्युत्तरपदांतोदात्तत्वम् । माममंतवः मद्विषयज्ञानरहिता इत्यर्थः । हे श्रुत विश्रुत सखे, श्रुधि मया वक्ष्यमाणं शृणु । छांदसो विकरणस्य लुक् । "श्रुशृणुपृकृवृभ्यः" इति हेर्धिभावः । किं तच्छ्रोतव्यं श्रद्धिवं श्रद्धिः श्रद्धा तया युक्तं श्रद्धधानेन लभ्यमित्यर्थः । "श्रदंतरोरुपसर्गवद्वृत्तिरिष्यते" इति श्रच्छब्दस्य उपसर्गवद्वर्तनात् । "उपसर्गे घोः किः" इति किप्रत्ययः मत्वर्थीयो वः । ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ॥ ४ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अहमेवेति ॥ अहं स्वयमेव इदं वस्तु ब्रह्मात्मकं वदाम्युपदिशामि । देवेभिः देवैः इंद्रादिभिरपि जुष्टं सेवितम् । उतापि च मानुषेभिर्मनुष्यैरपि जुष्टम् । ईदृग्विधात्मिकाहं यं कामयेयं यं पुरुषं रक्षितुमहं वांछामि तं तं पुरुषमुग्रं कृणोमि सर्वेभ्योऽधिकं करोमि । तमेव ब्रह्माणं स्रष्टारं करोमि । तमेव ऋषिमतींद्रियार्थदर्शनं करोमि । तमेव सुमेधां शोभनप्रज्ञं च करोमि । अष्टमस्य सप्तमे एकादशो वर्गः॥५॥अहमिति॥ पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य षष्ठयर्थे चतुर्थी । महादेवस्य धनुश्चापमहमातनोमि ज्यया आततं करोमि । किमर्थं ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारम् । शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरम् । हंतवे हंतुं हिंसितुम् । हंतेः " तुमर्थेसेसेन् " इति तवेप्रत्ययः । अंतश्च तवै युगपदिति आद्यंतयोर्युगपदुदात्तत्वम् । " शॄ हिंसायाम् " इत्यस्मात् " शॄस्वृस्नुहि " इत्यादिना उप्रत्ययः । " क्रियाग्रहणं कर्तव्यम् " इति कर्मणः संप्रदानत्वाच्चतुर्थी । उशब्दः पूरकः । अहमेव समदं संमाद्यंत्यस्मिन्निति समदं संग्रामः योद्धृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि करोमि । तथा द्यावापृथिवी

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ॥ यं कामये यं तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५ ॥

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हंतवा उ ॥ अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश ॥ ६ ॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वंतः समुद्रे ॥ ततो वितिष्ठे भुवनानि विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि ॥ ७ ॥

दिवं च पृथिवीं च अंतर्यामितया अहमेव आविवेश प्रविष्टवती ॥६॥ अहं सुव इति ॥ " द्यौः पिता " इति श्रुतेः । पिता द्यौः पितरं दिवमहं सुवे प्रसुवे जनयामि । " आत्मन आकाशः संभूतः " इति श्रुतेः। कुत्रेति तदाह । अस्य परमात्मनः मूर्धन्मूर्धनि उपरि कारणभूते तस्मिन्दिवि यद्यत्कार्यजातं सर्वं वर्तते । तंतुषु पट इव । मम च योनिः कारणम् । समुद्रे समुद्रवंत्यस्माद्भूतजातानि इति समुद्रः परमात्मा तस्मिन्नप्सु व्यापनशीलासु धीवृत्तिषु अंतर्मध्ये यद्ब्रह्म चैतन्यं तन्मम कारणमित्यर्थः। यतः ईदृग्भूताहमस्मि ततो हेतोः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अनुप्रविश्य वितिष्ठे विविधं प्राप्य तिष्ठामि । " समवप्रविभ्यः स्थः " इत्यात्मने- पदम् । उतापि च अमूं द्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम् । उपलक्षणमेतत् । एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेन ॥११५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपस्पृशामि । यद्वा अस्य भूलोकस्य मूर्धन् मूर्धनि उपरि पितरमाकाशं सुवे । समुद्रे जलधौ । अप्सु उदकेषु । अंतः मध्ये मम योनिः कारणभूतः अंभृणाख्य ऋषिर्वर्तते । यद्वा समुद्रे अंतरिक्षे अप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते । ततोऽहंकारात्मिका सती सर्वाणि भुवनानि व्याप्नोमि । अन्यत्समानं पूर्वेण ॥ ७ ॥ अहमेवेति ॥ विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयंती अहमेव परेण अनधिष्ठिता स्वयमेव प्रवामि प्रवर्ते वात इव । यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । परो दिवेति । पर इति सकारांतं परस्तादित्यर्थे वर्तते । यथा अध इत्यधस्तादर्थे तद्योगे च तृतीया सर्वत्र दृश्यते । दिवः आकाशस्य परस्तात् । एना पृथिव्या " द्वितीया टौस्स्वेनः " इति इदम एनादेशः । " सुपां सुलुक् " इति तृतीया आजादेशः । अस्याः पृथिव्याः परः परस्तात । द्यावापृथिव्योरुपादानमुपलक्षणम् । एतत् उपलक्षितात्सर्वस्माद्भूतजातात् परस्ताद्वर्तमाना असंगोदासीनकूट-

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ॥ परो दिवा पर एना पृथिव्यैतावती महिना संबभूव ॥ ८ ॥ इति देवीसूक्तम् ॥

ॐ रात्री व्यख्यदायती पुरुत्रा देव्य १ क्षभिः ॥ विश्वा अधि श्रियोऽधित ॥ १ ॥

स्थब्रह्मचैतन्यरूपाहं महिना महिम्ना एतावती संबभूव । एतच्छब्देन उक्तं सर्वं परामृश्यते । एतावत्परिमाणमस्याः "यत्तदेतेभ्यः परिमाणे" इति वतुप् । "आसर्वनाम्नः " इत्यात्वम् । सर्वजगदात्मना अहं संभूतास्मि । महच्छब्दादिमनिचि टेरिति टिलोपः । ततस्तृतीयायामुदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम् । छांदसो मलोपः ॥ अष्टमस्य सप्तमे द्वादशो वर्गः ॥ ८ ॥ इति देवीसूक्तभाष्यम् ॥ श्रीगणेशाय नमः ॥ अथैतद्रात्रिसूक्तं रात्रिदेवताप्रतिपादकं सा रात्रिदेवता द्वेधा जीवरात्रिरीश्वररात्रिश्च । तत्राद्या प्रसिद्धा । यस्यामस्मदादीनां जीवानां प्रतिदिनं व्यवहारो लुप्यते । द्वितीया तु यस्यामीश्वरव्यवहारलोपो भवति । महाप्रलयकाले तदानीमन्यवस्त्वभावात्केवलं ब्रह्ममायात्मकमेव वस्तु सर्वकारणमव्यक्तपदवाच्यं तिष्ठति सा द्वितीया रात्रिः । तदुक्तं देवीपुराणे । " ब्रह्ममायात्मिका रात्रिः परमेशलयात्मिका । तदधिष्ठातृदेवी तु भुवनेशी प्रकीर्तिता ॥" इति । तदेवं सर्वोत्तमदेवताप्रतिपादकस्य रात्रिसूक्तस्य भाष्यकारादिभिः कृतव्याख्यानस्यापि विस्पष्टं व्याख्यानं यथामति क्रियते । रात्रीति ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

या देवी सर्ववस्तुद्योतनशीला पुरुत्रा बहुषु देशेषु सर्वदेशेषु अक्षभिः प्रकाशमानैरिंद्रियैरुपलक्षणविधया महदादिभिस्तत्वैर्देवी सर्ववस्तुद्योतनशीला आयती आगच्छंती विद्यमाना रात्री ब्रह्ममायात्मिका व्यख्यत् स्वोत्पादितजगज्जालसदसत्कर्मादिकं प्रथमतो विशेषेण पश्यति । अनंतरं तत्तत्कर्मानुरूपफलरूपाः विश्वाः सर्वाः श्रियः सा अध्यधित अदिधारयाति ददातीत्यर्थः । अयं भावः । सर्वकारणभूता चिच्छक्तिः पूर्वकल्पीयानंतजीवानां सदसत्कर्माण्यपरिपक्वान्यवलोक्य तत्फलप्रदानसमयाभावात्सेश्वरं प्रपंचं स्वस्मिन्विलापयति यावत्फलप्रदानसमयम् । सा रात्रिरूपा चिच्छक्तिः फलप्रदानसमये प्राप्ते महदादिद्वारा प्रपंचं निर्माय तत्तत्प्राणिनां तत्तत्कर्माण्यसंकरमवलोकयति पश्चात्तत्तत्कर्मफलं ददातीत्यहो सर्वज्ञता भगवत्या रात्रेर्भुवनेश्वर्याः कियद्वर्णनीयेति । अस्मिन्नर्थे सर्वोऽप्युपनिषद्भागः प्रमाणमिति स्पष्टमेव तद्विदाम् ॥१॥ इत्थं प्रथमकृत्यं वर्णयित्वा द्वितीयं कृत्यं वर्णयति–ओर्वप्रा इति ॥ अमर्त्या मरणरहिता सा देवी देवनशीला चिच्छक्तिर्भुवनेश्वरी रात्रिः उरु विस्तीर्णमंतरिक्षमुप-

ओर्वप्रा अमर्त्या निवतो देव्युद्वतः ॥ ज्योतिषा बाधते तमः ॥२॥ निरु स्वसारमस्कृतोषसं देव्यायती ॥ अपेदु हासते तमः ॥३॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि ॥ वृक्षे न वसतिं वयः ॥ ४ ॥

लक्षणविधया सर्वप्रपंचमाप्राः स्वस्वरूपेणापूरयति स्वाधिष्ठानरूपे स्वाभेदेन विद्यमानं कल्पयति । तथा प्रपंचगतान्निवतो नीचान् लतागुल्मादीन् उद्वत उच्छ्रितान्वृक्षादींश्च स्वकीयेन तेजसाधिष्ठानचैतन्येनाप्राः पूरयति । या रात्रिर्भुवनेश्वरी सा प्रपंचगतानां प्राणिनां वेदोक्तानुष्ठानपराणां चित्तशुद्धिमवलोक्य तेषां तमो मूलाज्ञानं ज्योतिषा स्वाकारवृत्तिप्रतिबिंबितस्वस्वरूपचैतन्यज्योतिषा बाधते नाशयति । अनेन पूर्वोक्ताध्यारोपस्यापवाद उक्तः ॥ २ ॥ केन प्रकारेण नाशयति तत्राह–निरुस्वसारमिति ॥ आयती आगच्छंती देवनशीला रात्रिश्चिच्छक्तिर्भुवनेश्वरी स्वस्य स्वसारं भगिनीमुषसं प्रकाशरूपामविद्याया आवरणशक्तिरूपां निरस्कृत निष्करोति दग्धबीजभावमापादयतीत्यर्थः । तस्यामुषसि तथाजातायां प्रारब्धकर्मक्षये विक्षेपशक्तेर्नाशान्मूलाज्ञानरूपं तमः अपेदु हासते अपैव गच्छति शक्तिद्वयातिरिक्तस्वरूपावस्थानोपयोगाभावादर्थान्नष्टं भवतीत्यर्थः ॥ ३ ॥ अथास्या रात्रेः प्रार्थनामंत्रमाह–सा नो इति ॥ अद्यास्मिन्काले नोऽस्माकं सो रात्रिदेवता चिच्छक्तिर्भुवनेश्वरी ॥११६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसीदतु यस्या यामन् यामनि प्राप्तौ सत्यां यत्प्रसादप्राप्तौ सत्यां वयं न्यविक्ष्महि निविशामहे सुखने स्वस्वरूपे आस्महे । तत्र दृष्टांतः । वयः पक्षिणः वृक्षेन यथा वृक्षे नीडाश्रये वसंति रात्रिनिवासं कुर्वंति तथा निवसाम इत्यर्थः ॥ ४ ॥ नि ग्रामासो इति ॥ ग्रामासः ग्रामाः तत्स्थाः सर्वे जनाः पामरा अपामरा आंगोपांगनं न्यविक्षत तस्यां चिच्छक्तिरूपायां रात्र्यां विद्यमानायां निविशंते सुखेन शेरते तथा पद्वंतः पादयुता गवाश्वादयश्च निविशंते तथा पक्षिणः पक्षोपेताश्च निविशंते तथा अर्थिनः कामार्थिनः पांथस्थाः तथा श्येनासः श्येनः अपि निविशंते । अयं भावः । ये प्राणिनः परमेश्वरीनामानभिज्ञा अपि केवलं करुणासागराया रात्रेश्चिच्छक्तेर्भुवनेश्वर्याः करुणया सर्वे जनाः सुखेन शेरते स्वस्था भवंति । यथातिमूढा बालाः मातुः करुणावशाच्छेरते एतादृशीयमतिकरुणावती रात्रिरस्तीति ॥ ५ ॥ यावयेति ॥ हे ऊर्म्ये, रात्रिनामैतत् । चिच्छक्तिरात्रिरूपिणी भुवनेश्वरी यस्मात्त्वमतिदयावती तस्मादस्माकमपि पामराणां किंचिदपि कृतमनवेक्ष्य वृक्यं वृकस्य स्त्रियं नाना-

नि ग्रामासो अविक्षत नि पद्वंतो नि पक्षिणः ॥ नि श्येनासश्चिदर्थिनः ॥ ५ ॥ यावया वृक्यं १ वृकं यावय स्तेनमूर्म्ये ॥ अथा नः सुतरा भव ॥ ६ ॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ॥ उष ऋणेव यातय ॥ ७ ॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ॥ रात्रि स्तोमं न जिग्युषे ॥ ८ ॥ इति रात्रिसूक्तम् ॥

वासनारूपां वृकं च वृकवन्मारकं पापं चास्मान्हिंसंतं यावय अस्मत्तः पृथक्कुरु । तथा स्तेनं तस्करं चित्तापहारकं कामादिकं च यावयास्मत्तो वियोजय । अथानंतरं नोऽस्माकं सुतरा सुखेन तरणीया क्षेमकरी मोक्षदात्री भव ॥ ६ ॥ हे रात्रि चिच्छक्ते भुवनेश्वरि, पेपिशत् भृशं पिंशत् सर्ववस्तुषु आश्लिष्टं तमोऽज्ञानं कृष्णं कृष्णवर्णं तमःप्राधान्येन व्यक्तं विशेषेण स्वभासा सर्वस्यांजकमीदृशं ज्ञानं मा उपास्थित उपागच्छत् । हे उषः रात्रिदेवते, त्वमृणेव ऋणानीव तत् त्वं यातयापगमय । यथा स्तोतॄणामृणानि धनप्रदानेनापाकरोषि यथा ममाज्ञानमपि अपसारयेत्यर्थः ॥ ७ ॥ उप ते गा इति ॥ हे रात्रि चिच्छक्ते भुवनेश्वरि, ते त्वां गा इव पयसो दोग्ध्रीर्धेनूरिव उपेत्याकरं स्तुतिजपादिभिरभिमुखीकरोमि । हे दिवः परमाकाशरूपपरमात्मनो दुहितः पुत्रि, परमात्मप्रकाशेन विच्छक्तेरभिव्यज्यमानत्वाद्युक्तं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परमात्मपुत्रीत्वं त्वत्प्रासादात्कामादीन् शत्रून् जिग्युषे मम स्तोमं न स्तोत्रमिव हविरपि यथाशक्ति दत्तं वृणीष्व भजेति ॥ ८ ॥ इति रात्रिसूक्तभाष्यं समाप्तिमगमत् ॥ ग्रीवायां मधुसूदनोऽस्य शिरसि श्रीनीलकंठः स्थितः श्रीदेवी गिरिजा ललाटफलके वक्षःस्थले शारदा ॥ षड्वक्त्रो मणिवंधसंधिषु तथा नागास्तु पार्श्वस्थिताः कर्णौ यस्य तु चाश्विनौ स भगवान्सिंहो ममास्त्विष्टदः ॥ १ ॥ यन्नेत्रे शशिभास्करौ वसुकुलं दंतेषु यस्य स्थितं जिह्वायां वरुणस्तु हुंकृतिरियं श्रीचर्चिका चंडिका ॥ गंडौ यक्षयमौ तथोष्ठयुगुलं संध्याद्वयं पृष्ठके वज्री यस्य विराजते स भगवान्सिंहो ममास्त्विष्टदः ॥ २ ॥ ग्रीवासंधिषु सप्तविंशति मतान्यृक्षाणि साध्या हृदि प्रौढा निर्घृणतातमो स्यतु महाक्रोर्यैः समाः पूतनाः ॥ प्राणे यस्य तु मातरः पितृकुलं यस्यास्त्यपानात्मकं रूपे श्रीकमलाकचेषु विमलास्ते स्यू रवे रश्मयः ॥ ३ ॥ इति देवीपुराणे देवीवाहनसिंहध्यानम् ॥

इदं सप्तशती पुस्तकं शांतनवीटीकासमेतं कल्याणनगर्यां श्रीकृष्णदासात्मजेन गंगाविष्णुना स्वकीये "लक्ष्मीवेंकटेश्वर" मुद्रणागारे मुद्रयित्वा प्रकाशितम्। संवत् १९६० शकाब्दाः १८२५।

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" छापाखाना, कल्याण-मुंबई.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अन्वितार्थप्रकाशिकाख्यव्याख्यासहित—

श्रीमद्भागवत.

(व्याख्याग्रन्थसंख्या ७००००)

यह टीका बूंदी महाराजाश्रित पं० गंगासहायजीने बनाई है. इसमें मल्लिनाथके ढंगपर अन्वयक्रमसे सरल और कठिन सब श्लोकोंका अर्थ सुगम रूपसे लिखा है और टीकामें जिन जिन बातोंका लिखना आवश्यक है वे सब संक्षेप और सुगमतासे लिख दी हैं इसमें श्रीधरजीकी टीकाकी तो प्रायः सब बात आगई और बहुतसी बातें तोषिणीसारार्थसंदर्शिनी आदिसेभी लीगई हैं और सुगमता अन्वयक्रम और संक्षेपपर पूरी दृष्टि रक्खी गई है. इस टीकाके शेषमें भागवतोपयोगी वेदांत सांख्यादिक कितनेक मत सुगम रीतिसे लिख दिये हैं. इसमें किसी मतका पक्षपात अथवा खंडन नहीं किया गया है। सब मतोंके आचार्योंका आदरपूर्वक स्मरण किया गया है. और भागवतके स्कंध और प्रकरणोंका अभिप्राय और श्लोकोंके छन्द तथा अध्यायोंके श्लोकोंकी गणना लिख दी है औरभी बहुत बातें हैं. इसका मूल्य अत्यल्प केवल १२ रुपये. देखनेसे मालूम होगा. पुस्तक समग्र छप चुका. नमूना मँगालो. काशिआदि ठिकानेके विद्वानोंकी सैकडों सम्मति आई हैं.

अन्वितार्थप्रकाशिकाख्यव्याख्यासहित

दशमस्कन्ध अलगभी मिलता है. की० ४ रु० ।

सुगमकौमुद्याः ।

प्रथमद्वितियखण्डात्मकः प्रथमो भागः ।

भोः भो व्याकरणाधिजिगांसवो विदाङ्कुर्वन्तु यद्बुंदीस्थपण्डितश्रीगंगासहायैर्विद्यार्थिजनसौलभ्याय सिद्धान्तकौमुदीछायारूपा सुगमकौमुदी विरचिता तस्या अयं प्रथमद्वितीयखण्डात्मकः प्रथमभागः संमुद्रितः एतस्य मूल्यं रु. २ द्वितीयभागोऽप्यचिरादेव संमुद्रितो भविष्यति. संपूर्णग्रंथस्य मूल्यं रु० ४.

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जीह-

॥ १ ॥

पञ्चतन्त्र भाषाटीका.

पण्डितवर विष्णुशर्मा विरचित पञ्चतंत्र संस्कृतमें नीतिका एक ऐसा ग्रन्थ है जिसकी सारे संसारने पूजा की। अरबीमें कलेला दमना, फारसीमें अनुवारसुहेली, उर्दूमें बुस्ताने हिकमत आदि पुस्तकें उसी पञ्चतन्त्रका अनुवाद हैं। कहा जाता है कि नोशेरवां बादशाहने बडे परिश्रम तथा यत्नसे अपने मन्त्रीको भारतवर्षमें भेजकर पञ्चतन्त्रके अनुवाद कराके उसने अपनेको धन्य समझा। इसीका सार निकालकर संस्कृतमें हितोपदेश बनाया गया जिसका बङ्गभाषा आदि कितनीही भाषाओंमें अनुवाद मिलता है। हिंदीमेंभी कविवर लल्लूलालजीका किया हुआ अनुवाद है। मुरादाबादनिवासी पण्डित ब्रजरत्नजी भट्टाचार्य्यनेभी हितोपदेशका भाषा अनुवाद किया परन्त पञ्चतंत्रका हिंदी अनुवाद अवतक नहीं हुआ था। पं० ब्रजरत्न भट्टाचार्य्यने मूल संस्कृतके साथ साथ सरल हिंदी अनुवाद रखकर पञ्चतंत्र तय्यार कर डाला। अब हिन्दी जाननेवालोंकोभी इसके पढनेका अवसर मिला। यह पुस्तक घर घर रहने योग्य है। दाम २ रु०।

हरिवंश-१ संस्कृत टीकासह की० ५ रु०। २-पं०ज्वालाप्रसादजी कृत भाषाटीकास० की० १०रु०। ३-के वलभाषा-अध्यायके आदि अन्तको श्लोक लिखकर शेष श्लोकोंकी मूलांकसहित सुन्दर भाषा मूल्य ५ रु०

विरहीनदोदयकाव्य.

अयि काव्यरसिकपाठकव्यक्तयः ! सविनयमावेद्यते यत् भवतां मानसतुष्टये विरहीनदीसमुदयवर्णनात्मकं काव्यरत्नमिदं समुद्रच्य प्रकाशितम्। कविश्चास्य काव्यस्य प्रणेता विजयानन्देति शुभाभिधानः कूर्माञ्चलाभिजनो श्रीगौरीशङ्करशर्मणो विद्वद्वरस्य तनुजन्मा प्राप्तिश्चास्य ग्रन्थरत्नस्य मे सज्जनशिरोमणिभ्यः सुयोग्यवर न्यायमूर्तिभ्यः करुणार्द्रहृदयेभ्यो निपुणशासनकर्तृभ्यो विद्वद्वरश्रीमत्पण्डितबदरीदत्तज्योतिर्विद्भ्यो डिपुटीकलेक्टर महोदयेभ्योऽभवदित्यतोऽहमुक्तपण्डितमहाशयानां कृतज्ञोऽस्मि सविशेषं तदेतत् सुमनोहरं काव्यं पुष्टसचिक्कण पत्रेषु सुमनोहरं रायमाक्षरैर्मुद्रापितम्। अस ग्रंथस्य मूल्यं रूप्यकपादः।

सबलसिंह चौहानकृत-श्रीमहाभारतभाषा.

सम्पूर्ण अठारहों पर्व अत्युत्तम दोहा चौपाईयोंमेंहैं की०४ रु०

पुस्तकें मिलनेका ठिकाना-
गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेंकटेश्वर" छापखाना,
कल्याण-मुंबई.

रात.

॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

❁ इति शान्तनवीटीकासमेता दुर्गासप्तशती समाप्ता ❁

अत्र च सटीकांगषट्कं सभाष्यं देवीसूक्तं रात्रिसूक्तं च निवेशितमस्माभिः ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri